SRI VANI VILAS SASTRA SERIES No. 1.

. . . ADHVARA MIMAMSA . . .

KUTUHALA VRITTI

OF

SRI VASUDEVA DIKSHITA

EDITED BY

S. KUPPUSWAMY SASTRIGAL M. A.,

Principal, Madras Sanskrit College.

WITH THE CO-OPERATION OF

Professors Brahmasri R. CHANDRASEKHARA SASTRIGAL

and Brahmasri P. V. PANCHAPAGESA SASTRIGAL.

CHAPTER I.

SRI VANI VILAS PRESS


SRIRANGAM

1908

श्रीवाणीविलासशास्त्रग्रन्थमाला—१.

अध्वरमीमांसा

कुतूहलवृत्तिः



श्रीवासुदेवदीक्षितविरचिता

मैलापुरस्थगीर्वाणमहापाठशालाध्यक्षेण

एस्. कुप्पुस्वामिशास्त्रिणा

सह

तत्पाठशालाध्यापकाभ्यां

आर्. चन्द्रशेखरशास्त्रिणा

पि. वि. पञ्चापगेशशास्त्रिणा च

संशोधितां।

(प्रथमोऽध्यायः।)

श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

समुद्रिता

— १९०८ -



श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायामप्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्नगुरुपरंपराप्राप्तषड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदयसांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्र आदिराजधानीविद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋश्यशृङ्गपुरवराधीश्वरतुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीमन्नृसिंहभारतीस्वामिगुरुकरकमलसंजात श्रीजगद्गुरु शृंगेरि श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः

अस्मत्सच्छिष्य आज्ञाधारक श्रीरंगनाथपुरवराभिजनास्मदत्यन्तप्रियतमान्तेवासि बालसुब्रह्मण्याभिरूय श्रेयोभिवृद्धये,

नारायणस्मरणपूर्वकविरचिताशिषः समुल्लसन्तुतराम् ॥

सविनयं, सभक्तिश्रद्धं, सानुरागं च, भवदनुप्रेषितविज्ञप्तिपत्रिकातो विज्ञाय प्रवृत्तिं भवतः कुतूहलवृत्त्यादिप्राचीनमहाप्रबन्धमुद्रणाभिज्ञां महानानन्दः समजनि ॥

इह खलु वैभवान्महापापीयसः कलेः अतिमन्दप्रचारेषु पुरातनापूर्वग्रन्थजातेषु, वेदार्थप्रबोधनपटिष्ठेषु वैय्यर्थ्यमापन्नेष्वलघुषु प्रयासेष्वास्माकीनानां महतां प्रबन्धकृतां भारतीयानाम्, शशशृङ्गायितेषु तत्तादृशप्रथितयशःसु विद्वत्सु, तत्र तत्र खद्योतसहचरवृत्त्या उपजीवितप्राचीनग्रन्थसंरक्षणमन्तरा नान्यः प्रयत्नः सुतरां प्रवेष्टुमर्हत्यभिज्ञानन्दपदमिति दृढं मन्यामहे ॥

तादृशे कर्मण्यभियुक्तस्य जनस्य सर्वोऽपि लोकः कुयादव साह्य यावच्छक्त्यामत्याशासानाः श्रीशारदाचन्द्रचूडादयो देवाः वितीर्यायुरारोग्यसंपदो भवतो भक्ताग्रगम्य पालयन्त्वजस्रं श्रीवाणीविलासाख्यमुद्रणशालां चेति सायंदिवमभ्यर्थयन्तो वर्तामहे ॥

कीलकसंवत्सर वैशाखशुक्ल-
प्रतिपदि भृगुवासरे
कोविलग्रामतः ।



॥ श्रीः ॥

अध्वरमीमांसा

॥ कुतूहलवृत्तिः ॥

प्रथमोऽध्यायः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥ १ ॥

जैमिनिमतिप्रसृष्टां[1] शबरकुमारप्रकामनिष्कृष्टाम् ।
मीमांसां [2]दीदांसारीत्या वृत्त्या परिष्कुर्वे ॥ २ ॥

स्फायच्छाबरभाष्यवार्तिकमहाग्रन्थैकलोलीभव-
त्क्षुभ्यज्जैमिनिसूत्रजालमपृथग्भूरिप्रचारं श्रथम्[3] ।
उद्धृत्य स्फुटबालबोधनकृते श्रीवासुदेवाध्वरी
तत्कौतूहलवृत्तिमाकलयते सन्तो दयन्तामिह ॥ ३ ॥

अथेयमध्वरमीमांसा नारब्धव्या प्रयोजनाभावात् । न चाध्ययनविधिसाध्यार्थज्ञानस्य विचारमन्तरेणानुपपत्तेस्तदेव प्रयोजनमिति वाच्यम् । अर्थज्ञानस्याध्ययनविधिभाव्यत्वाश्रवणात्, अध्ययनमर्थज्ञानहेतुरध्ययनत्वाद्भारताद्यध्ययनवदित्यनुमानेन तदर्थमध्ययनस्य प्राप्तत्वाच्च । न च लिखितपाठादिना पक्षप्राप्तमध्ययनमत्र नियम्यत इति वाच्यम् । वैयर्थ्यात् । नियमा-

1. जैमिनिमतप्रसृष्टां—ख. 2. मीमांसा—क, ख, ग. 3. अवृधत...स्वयम्—क.

दृष्टस्य हि न तावदर्थज्ञान उपयोगः, तस्य तदन्तरेणापि जायमानत्वात्। नापि क्रत्वपूर्वे, अध्ययनविधेरनारभ्य विहितत्वेन तदयोगात्। किंच 'अधीत्य स्नायात्' इति स्मृतेरध्ययनानन्तरं समावर्तनं विदधानाया[1] गुरुकुलवास्तव्येन विचारकरणे बाधः स्यात्। अथाध्ययनविधेः किं भाव्यमिति चेत्, विश्वजिदादिवत्स्वर्ग इति गृहाण। अतः प्रयोजनाभावादत एव च विषयाद्यभावान्नारब्धव्या धर्ममीमांसा। 'प्रायेणानृतवादित्वात्पुंसां भ्रान्त्यादिसंभवात्' इति न्यायेन पुरुषविशेषप्रणीतवेदस्य प्रामाण्यानवधारणाशेत्यादिशङ्कापरिहारायाध्वरमीमांसाशास्त्रस्येदमादिमं सूत्रम्—

अथातो धर्मजिज्ञासा ॥ १ ॥

अत्राथशब्द आनन्तर्ये वर्तते। तच्चानन्तर्यमर्थाद्वेदाध्ययननिरूपितमवगम्यते। न हि वेदैकबोध्यो धर्मो वेदाध्ययनमन्तरा शक्यो विचारयितुम्। अतःशब्दो वृत्तं वेदाध्ययनं हेतुत्वेन

१. धर्माधर्मजिज्ञासाधिकरणम्।

स्थिरीकुर्वन्नथशब्दस्यानन्तर्यातिरिक्तार्थपरतां निराचष्टे। ज्ञातुमिच्छा जिज्ञासा। सा च धर्मे विशिष्य ज्ञाते न संभवति, अज्ञाते च [2]नतरामिति सामान्यतो ज्ञाते विशेषजिज्ञासा। विशेषज्ञानं च विचारमन्तरा न संभवतीत्यन्तभूतो विचारो जिज्ञासेत्यनेनोच्यते। कर्तव्येत्यध्याहार्यम्। तथा च वेदाध्ययनानन्तरं तद्धेतुको धर्मविचारः कर्तव्य इति सूत्रार्थः। तत्र धर्मस्वरूपविचारस्तावच्छक्तपदश्रुतिरूपया श्रुत्या गम्यमानत्वाच्छ्रौतः। तदतिरिक्तप्रमाणादिविचारस्त्वार्थकः। न हि वेदैकगम्यधर्मविचारो वेदप्रामाण्यविचारमन्तरा संभवति। नापि साधनफलनिर्णयमन्तरा तत्संभवः। साधनफलनिर्णयाभावे ह्यनुष्ठानद्वारा तदभ्युदयपर्यवसानाभावादलौकिकश्रेयःसाधनता कर्मरूपं कथं सिध्येत्। नापि वृद्धाद्यागमाभासतदवगतधर्मस्वरूपसाधनफलाभावनिरूपणं विना तद्विलक्षणप्रमाणस्वरूपसाधनफलनिर्णयसंभवः। तदेवं श्रुत्यर्थाभ्यां प्रमाणस्वरूपसाधनफलैस्तदभावैश्च धर्मस्य जिज्ञास्यत्वं प्रतिज्ञातं प्रतीमः। तथा चायमर्थः॥ अथ वेदाध्ययनानन्तरम्, अतः विचारहेतुभूताध्ययनस्य [3]वृत्तत्वाद्धेतोः, धर्मस्य प्रमाणस्वरूपसाधनफलैरग्रे निरूपयिष्यमाणैः जिज्ञासा विचारात्मिका चिन्ता, कर्तव्येति शेषः॥ अयमाशयः। अध्येतव्य[4] इति नियमविधिः। तत्र यथा दर्शपूर्णमासापूर्वेऽवघातनियमादृष्टस्योपयोगो विधिबलात्कल्प्यते, तथा सर्वक्रत्वपूर्वेष्वध्ययननियमादृष्टस्याप्युपयोगः कल्प्यः— अध्ययनगृहीतेनैव स्वाध्यायेन प्रणाड्या क्रत्वपूर्वं जन्यत इति। अनारभ्याधीतस्याप्यध्ययनस्य सामर्थ्यादेव क्रतुविध्याक्षिप्तार्थज्ञान उपयोगः संभवति।

1. समावर्तनविधानाय—ख. 2. नितरां—ख. 3. अत्रेत्यारभ्य तथाचायमर्थः इत्येतत्पर्यन्तं क पुस्तके नास्ति. 4. प्राप्तत्वात्—क. 5. अध्येतव्यमिति—क, ग.

किंच, असत्यध्ययननियमविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानान्यविद्वांसमेवाधिकृत्य, विद्यामन्तरेणानुष्ठानासंभवाद्विद्यामाक्षिपन्तीति तान्यविशेषेण चतुरो वर्णानधिकुर्युः । सति त्वध्ययननियमविधौ 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्यावगतोपनयनसंस्कृतत्रैवर्णिकानां क्वचिद्विनियोगापेक्षायां तत्संनिधौ पठितस्य चाध्ययनस्यानिर्दिष्टकर्तृकस्य कर्त्रपेक्षायां परस्परमन्वये सत्यध्ययनमुपनयनसंस्कृतत्रैवर्णिककर्तृकम्, तच्चार्थज्ञानपरंपरया क्रतुसाध्वस्वर्गादिपुरुषार्थपर्यवसायीति लभ्यते । एवं चाग्निहोत्रादिशास्त्राण्यपि विद्वत्त्रैवर्णिकाधिकारिलाभान्न शूद्रमधिकुर्वन्तीत्यपशूद्राधिकरणे वक्ष्यमाणोऽधिकारिनियमोऽप्यध्ययनविधिमूलकः संगच्छते । न [1]चाधीतसाङ्गस्यार्थज्ञानं विचारमन्तरेणापि संभवतीति वाच्यम् । [2]ज्ञानोत्पत्तावपि निर्णयस्य विचाराधीनत्वात् 'अक्ताः शर्करा उपदधाति' इत्यञ्जनं येन केनचित्, उत घृतेनैवेति संशयस्य 'संदिग्धे तु वाक्यशेषात्' इत्यनेनैव निरासात् । 'अधीत्य स्नायात्' इत्यत्र तु क्त्वाप्रत्ययात् पूर्वकालत्वमवगतम् । न त्वानन्तर्यम् । [3]तच्च क्वचिद्दृश्यते । न तु सर्वत्र । न हि भुक्त्वा दण्डद्वयं स्थित्वा व्रजति पुरुषे भुक्त्वा व्रजति इति न प्रयुञ्जते । प्रयुक्तमपि नाप्रयोगं मन्यन्ते । तस्माद्धर्मावबोधफलकत्वात्, अत एव च विषयादिलाभात्, आरब्धव्या धर्ममीमांसा । अत्र सूत्रे धर्मपदमधर्मस्याप्युपलक्षणम् । अकारप्रश्लेषेण वा योज्यम् । हानाय तस्यापि जिज्ञास्यत्वात् ।

ननु तथापि धर्मविचारो न कर्तुं शक्यः, धर्मस्य लौकिकाकारहीनत्वेन लक्षणप्रमाणयोरसंभवात् । न ह्यस्य लौकिकाकारः कश्चिद्दृश्यते । नापि प्रमाणमस्ति । न तावत्प्रत्यक्षम्, रूपादिरहितत्वात् । नाप्यनुमानोपमाने, तयोः प्रत्यक्षपूर्वकत्वात् । नाप्यर्थापत्तिः, धर्मं विना कस्याप्यनुपपन्नत्वाभावात् । नापि शब्दः, संगतिग्रहणस्य प्रत्यक्षानुमानमूलकत्वात् । नाप्यनुपलब्धिः, तस्याभावमात्रविषयकत्वात् । अत आह—

२. धर्माधर्मस्वरूपलक्षणाधिकरणम् ।

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

सत्यम्, न तस्य लौकिकाकारोऽस्ति । तथापि चोदनागम्यः स्वर्गादिसाधनताख्य आकारोऽस्त्येव । लक्षणमपि सुवचम् । प्रवर्तनाबोधकलिङादिसमभिव्याहृतं वाक्यं चोदना, सा लक्षणं प्रमाणं यस्य सः अर्थः धर्म इति धर्मस्वरूपनिर्वचनात् । श्येनाद्यभिचारवारणाय अर्थ इति । अनर्थफलकत्वानाक्रान्तं श्रेयःसाधनत्वं विवक्षितम् । अन्ये तु, चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्यते । ततश्च 'न हिंस्यात्' इत्यादिनिषेधवाक्यगम्यहिंसादीनां धर्मत्ववारणायार्थपदम् ।

1. अधीताङ्गस्यार्थ— ग. 2. ज्ञानोपपत्तावपि— क. 3. तत्तु—ग.

अनिषिद्धत्वमत्र विवक्षितम् । तथा च प्रवर्तकवाक्यगम्यत्वे सत्यनिषिद्धत्वं धर्मत्वमिति फलति । श्येनाद्यभिचारस्य तु धर्मत्वमेव । न च न हिंस्यादिति निषेधः श्येनाद्यभिचारे प्रवर्तते । निषेधस्य हिंसाविषयत्वाच्छ्येनादेश्चाहिंसात्वात् । अत एव 'यो हिंसितुमिच्छेत्तस्यायमभ्युपायः[1]' इति श्येनफलस्यैव हिंसात्वपरं भाष्यं संगच्छते । न चाभिचारस्य धर्मत्वे शिष्टानां तत्र प्रवृत्त्यापत्तिः । तेषां तत्फलेच्छाभावात् । श्येनानुष्ठायिष्वधार्मिकत्वव्यवहारस्य फलमादायैवोपपत्तेश्चेत्याहुः । वस्तुतस्तु अधर्म इत्यपि च्छेदः । पूर्वसूत्रे अधर्मविचारस्यापि प्रतिज्ञातत्वेन तल्लक्षणावश्यकत्वात् । चोदनेति प्रवर्तकं निवर्तकं च वाक्यमुच्यते । अर्थपदेन इष्टसाधनमनिष्टसाधनं चोच्यते । ततश्च प्रवर्तकवेदवाक्यबोधितश्रेयःसाधनताकत्वं धर्मत्वम् । निवर्तकवेदवाक्यबोधितानिष्टसाधनताकत्वमधर्मत्वमिति फलति । अस्ति चेदं यागादौ हिंसादौ च, प्रवर्तनानिवर्तनाभ्यामिष्टानिष्टसाधनत्वकल्पनात् । अभिचारस्त्वधर्म एव, "नाभिचरित वै" इति निषेधात्, मन्वादिभिरुपपातकेषु तस्य परिगणनाच्च । अत्र लक्षणोक्त्या प्रवर्तकं निवर्तकं च वेदवाक्यं धर्माधर्मयोः प्रमाणमित्यप्यर्थादुक्तं भवति ।

अथ धर्मप्रमाणपरीक्षां प्रतिजानीते—

३. प्रमाणपरीक्षाधिकरणम् ।

तस्य निमित्तपरीष्टिः ॥ ३ ॥

तस्य धर्मस्य यत् निमित्तं प्रमाणम्, तस्य परीष्टिः परीक्षा, क्रियत इति शेषः ।

ननु चोदनैव धर्मे प्रमाणमित्यनुपपन्नम्, धर्मस्य यागादिक्रियारूपस्य प्रत्यक्षत्वात् । अनुमानमपि तत्र प्रमाणम् । अर्थापत्तिर्वा । जगद्वैचित्र्यानुपपत्त्या तत्कल्पनात् । तत्राह—

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

इन्द्रियाणां सत्संप्रयोगे विषयसंनिकर्षे सति पुरुषस्य बुद्धिजन्म प्रत्यक्षस्योत्पत्तिर्भवति । तत् प्रत्यक्षं धर्मस्यानिमित्तं स्वरूपनिश्चायकं न भवति । कुतः, विद्यमानमात्रग्राहित्वात् । अनुमाना-

४. प्रत्यक्षादीनां धर्मे अप्रमाणताधिकरणम् ।

देरप्युपलक्षणमेतत् ॥ यद्यपि यागादिक्रिया प्रत्यक्षेण गृह्यते । तथापि श्रेयःसाधनत्वरूपेणाग्रहणान्न दोषः । अलौकिकश्रेयःसाधनताकत्वमेव हि धर्मस्वरूपम् । अत एव शूद्रकृतयागादिर्न धर्मः । न च योगिप्रत्यक्षमेव तत्र प्रमाणमिति वाच्यम् ।

1. तस्यायं द्युपायः—क.

योगिनां हि तत्सामर्थ्यं नाकस्मिकम् । किंतु धर्मानुष्ठानादेव भवति । तच्च न धर्मज्ञानं विना भवितुमर्हति । अथ तेषां धर्मज्ञानं योग्यन्तरादिति चेन्न । अनवस्थापत्तेः । तस्माच्चोदनैव शरणम् । अनुमानमर्थापत्तिश्च, यागादिर्धर्मो हिंसादिरधर्म इति विशिष्य विवेचनासमर्थत्वात्तत्समर्थां चोदनामेवापेक्षेते । सा चेदङ्गीकृता, अलमनुमानार्थापत्तिभ्याम् । तस्माच्चोदनैव धर्मे प्रमाणम् ॥

५. चोदनाया धर्मे प्रामाण्याधिकरणम् ।

ननु कथं चोदनाया धर्मप्रामाण्यम्, तस्याः शक्तिग्रहापेक्षत्वात्, शक्तिग्रहस्य चालौकिके धर्मेऽसंभवात्, संकेतरूपशक्तेः पुरुषकल्पिततया तस्याः पुरुषदोषादिमूलकत्वसंभवाच्च । किंच 'चित्रया यजेत पशुकामः' इत्यादिचोदना अप्रमाणमेव, यागानुष्ठानानन्तरमेव फलादर्शनात् । न च कालान्तरे तत्संभवतीति वाच्यम् । अनन्तरमेवासंजातस्य पश्चाद्भवनोत्प्रेक्षाया मनोरथमात्रत्वात् । किंच शब्दानामनित्यत्वेन तद्विशेषात्मकतया काठकादिसमाख्यया च वेदस्य पौरुषेयत्वात्कथं प्रामाण्यम्, प्रायेण पुरुषस्यानृतवदनभ्रमप्रमादादिदोषबहुलत्वात् । तस्मान्न चोदनाप्रमाणकत्वं धर्मस्येत्यत आह—

औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

शब्दस्यार्थेन संबन्धः प्रत्याय्यप्रत्यायकभावलक्षणः औत्पत्तिकः नित्यः; जातेः शब्दार्थत्वस्याकृत्यधिकरणे व्युत्पादयिष्यमाणत्वात्, जातेश्च नित्यत्वात्, शब्दनित्यत्वस्य चानुपदमेव वक्ष्यमाणत्वात् । एतेन शक्तेरनित्यत्वदोषो निवारितः । तस्य शब्दार्थसंबन्धस्य शक्तेः ज्ञानं शक्तिग्रहमिति यावत् । उपदेशः वेदवाक्यम्, जनयति प्रसिद्धपदसमभिव्याहारादिति शेषः । उपदेश इत्यस्य प्रसिद्धपदसमभिव्याहार इत्यर्थ इत्यन्ये । 'कमलोदरे मधूनि मधुकरः पिबति' इत्यत्र मधुकरशब्दस्यार्थमजानतोऽन्येषां पदानामर्थमवगत्य तत्समभिव्याहारात्कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य संगतिं गृह्णतो वाक्यार्थबोधवत्[1] 'चित्रया यजेत पशुकामः' इत्यादावपि लोकप्रसिद्धपश्वादिपदसमभिव्याहारात्पशुभाव्यकयागकरणकभावनायामलौकिक्यां लिङः[2] संगतिं गृह्णतो यागः पशुसाधनमिति बोधः संभवति । तेन धर्मे संकेतग्रहासंभवो निरस्तः । अलौकिकश्रेयःसाधनत्वमेव हि धर्मस्वरूपम् । अनुपलब्धे प्रत्यक्षाद्यगृहीतेऽर्थे विधिवाक्यजन्यज्ञानस्य अव्यतिरेकश्च व्यभिचारोऽपि नास्ति, विपर्ययसंशयजनकत्वं नास्तीति यावत् । अनुपलब्ध इत्यनेनानुवादत्वनिरासः । तत तस्मात् अगृहीतार्थविषयकत्वे सति भ्रमसंशयान्यज्ञानजनकत्वात्

1. बोध इव—क. 2. अलौकिकलिङः—क.

चोदनावाक्यं प्रमाणम् । तुरवधारणे, प्रमाणमेव । अनपेक्षत्वात् पुरुषान्तरे प्रत्ययान्तरे चापेक्षारा-हित्यात् । वाक्येषु हि त्रेधा पुरुषानुप्रवेशः पदपदार्थसंबन्धद्वारेण, वाक्यतदर्थसंबन्धद्वारा वा, संदर्भ-स्यैव वा भारतादिवत्पौरुषेयत्वेन । तत्र पदपदार्थसंबन्धस्य नित्यत्वमौत्पत्तिकशब्देनोक्तम् । वाक्या-र्थबोधस्य पदार्थमूलकत्वं वेदस्यापौरुषेयत्वं चोपरिष्टाद्वक्ष्यते । न च संवादाभावादप्रामाण्यं शङ्क्यम्, 'कारीर्या वृष्टिकामो यजेत' इत्यादौ समनन्तरभाविदृष्टफलके संवादसत्त्वात्, स्वतःप्रामाण्येन संवादानपेक्षत्वाच्च । बादरायणग्रहणमादरार्थम्, अनधिगतार्थगन्तृत्वमेव प्रमाणलक्षणमादर्तव्यं न त्वन्यदिति । तार्किकास्तु प्रमाकरणं प्रमाणम् । प्रमात्वं च यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्वि-शेष्यकत्वावच्छिन्ननत्प्रकारकत्वम् । अनुभवत्वं तु अनुभवामीति प्रतीतिसिद्धः साक्षात्कारानुमित्यु-पमितिशाब्दबोधसाधारणः स्मृतिव्यावृत्तो जातिविशेषः, न त्वगृहीतग्राहित्वम्; [1]धारावाहिके अव्या-प्तेरित्याहुः । तदेतदयुक्तम् । अनुभवामीति प्रतीतिसिद्धानुभवत्वस्य साक्षात्कार एव सत्त्वेनानुमि-त्यादावव्याप्तेः, स्वर्गमनुभवामि पर्वते वह्निमनुभवामीति प्रतीत्यभावेनानुमित्यादौ तत्सत्त्वे माना-भावात् । तस्मादनधिगतार्थगन्तृत्वमेवानुभवत्वम् । न च धारावाहिकेऽव्याप्तिः, तत्तत्क्षण-विशिष्टघटादेः पूर्वपूर्वज्ञानागृहीतस्यैवोत्तरोत्तरज्ञानविषयत्वात् । इदानीं स्पृशामि, इदानीं पश्या-मीत्यादिप्रतीत्या कालस्यापि पञ्चेन्द्रियवेद्यत्वात्, कालान्यद्रव्यचाक्षुषत्वस्यैव रूपकार्यतावच्छे-दकत्वात्, अनुभवानुसारेण कार्यकारणभावकल्पनात्, अन्यथा लाघवाच्चाक्षुषत्वस्यैव कार्यताव-च्छेदकत्वापत्तेः । न च कालोऽतिसूक्ष्मत्वात्कथं प्रत्यक्षग्राह्य इति वाच्यम् । ज्ञानधारायां ह्युपरतायां किमत्र घटोऽवस्थित इति पृष्टः सन्कथयति—अस्मिन्क्षणे मयोपलब्ध इति, प्रातरारभ्यैतावन्तं कालं मयोपलब्ध इति च । कालभेदे त्वगृहीते कथमेवं भवेत् । शतपत्रपत्रशतं मया सूच्या युगपद्भिन्नमिति तु स्थूलकालविषयकम् । वस्तुतस्तु धारावाहिकस्थले तावत्कालव्यापिन्येकैव ज्ञानव्यक्तिः, कारणभेदा-भावात्, तद्भेदकल्पने मानाभावात्, [2]योग्यविभुविशेषगुणानां त्रिक्षणावस्थायित्वस्य परिभाषामात्रत्वात् । वस्तुतस्तु स्वसमानविषयकज्ञानानपेक्षोत्पत्तिकज्ञानत्वमेवानधिगतार्थगन्तृत्वम् । अतः कालभेदस्येन्द्रिय-वेद्यत्वाभावेऽपि न क्षतिः । दिनान्तरे गृहीतस्य घटादेर्दिनान्तरे पुनर्ज्ञानमपि प्रमैव । याथा-र्थ्यमपि प्रमालक्षणे देयम् । तच्च तद्वति तत्प्रकारकत्वं विशेष्यावृत्त्यप्रकारकत्वं वा । अनुमिते-रपि वह्निविशिष्टः पर्वतो विषय इत्यनधिगतार्थगन्तृत्वम् । न च पर्वतस्यानुमितिविषयत्वे पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः । विधेयताख्यविषयताशालिन एवानुमिनोमीत्यनुव्यवसायभान-नियमात् । एवमुपमितावप्यनधिगतार्थगन्तृत्वं बोध्यम् । लौकिकशब्दजन्यज्ञानं तु न प्रमा, अनधिगतार्थगन्तृत्वाभावात् । न च लौकिकशब्दः प्रमाणम्, उक्तप्रमाकरणत्वाभावात् । लौकिके शब्दे

1. धारावाहिकैरव्याप्तेः —क, ग. 2. योग्यविशेषगुणानां—ख, ग.

तज्जन्यज्ञाने च प्रामाण्यव्यवहारस्तु तद्वति तत्प्रकारकत्वांशमादाय गौणः। आप्तत्वं चात्रैवोपयुज्यते । वेदस्तु प्रमाणम्, तस्योक्तलक्षणाक्रान्तत्वात्। 'व्रीहिभिर्यजेत' इत्यादिवाक्येषु यागादिपदार्थविषयेऽप्रामाण्यमिष्टमेव । तदुक्तम्—'ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः' इति । प्रामाण्यं च स्वतः, अप्रामाण्यं तु परतः । स्वतस्त्वं च कारणगुणसंवाद्यर्थक्रियाज्ञानानधीनत्वम् । परतस्त्वं तु बाधकज्ञानकारणदोषविसंवादिज्ञानाधीनत्वम् । याथार्थ्यघटितप्रामाण्यस्य स्वतस्त्वम्, अयाथार्थ्यरूपाप्रामाण्यस्य च परतस्त्वम् । ज्ञानग्राह्यत्वं कारणदोषादिज्ञानग्राह्यत्वं च क्रमेण बोध्यमित्यन्यत्र विस्तरः ।

अथ यदुक्तं शब्दार्थयोर्नित्यः संबन्ध इति, तत्राक्षिपति –

कर्मैके तत्र दर्शनात् ॥ ६ ॥

क्रियते इति कर्म कार्यं शब्दः, अतस्तत्संबन्धोऽप्यनित्य इति केचिन्मन्यन्ते। कुतः, तत्र दर्शनात्। तत्र तस्मिन्प्रयत्नोत्तरकाले दर्शनात् प्रयत्नजन्यत्वनिश्चयात् । न च प्रयत्नव्यङ्ग्यत्वेन तदुत्तरदर्शनमुपपद्यत इति वाच्यम्। प्राक्ततत्सत्त्वे मानाभावात । अभिव्यक्तिरपि किं प्रतिबन्धकनिरासेन, उत संस्कारविशेषाधानेन। नाद्यः, प्रतिबन्धकानुपलब्धेः। अथ कर्णे स्तिमितैरवयवैराच्छादननिरासे च तदभिव्यक्तिरिति चेन्न । एवं सति सर्वेषां शब्दानां सर्वगतत्वेन श्रोत्रसंनिकृष्टतया प्रतिबन्धकाभावदशायां युगपच्छ्रवणापत्तेः । न द्वितीयः । संस्कारोऽपि हि तैः शब्दस्य, उत श्रोत्रस्य, अथोभयोः । नाद्यः, तस्यैकत्वात्सर्वगतत्वादनवयवत्वेन चावयवसंस्कारायोगात्मुन्नस्थैर्वायुभिः संस्कृतस्य पाटलीपुत्रेऽप्युपलम्भापत्तेः । न च द्वितीयः, श्रोत्रं ह्याकाशम्, तस्य सर्वेषामेकतया एकदेशस्थध्वनिभिरपि संस्कारात्सर्वेषां शब्दोपलब्धिप्रसङ्गः । न तृतीयः, पक्षद्वयोक्तदोषप्रसङ्गात् । अतः शब्दोऽनित्यः । न च तस्यानित्यत्वेऽपि समवायवत्तत्संबन्धो नित्योऽस्त्विति वाच्यम् । समवायनित्यत्वस्यापि परिभाषामात्रत्वात ।

६. शब्दनित्यत्वाधिकरणम् ।

इतोऽप्येवमित्याह—

अस्थानात् ॥ ७ ॥

न च शब्दस्योच्चारणानन्तरं ज्ञातस्य चिरकालं स्थितिरुपलभ्यते । अतोऽपि तदनित्यत्वम ॥

इतोऽप्येवमित्याह—

करोतिशब्दात् ॥ ८ ॥

शब्दं कुर्वकार्षीत्करोतीत्यादिव्यवहारादपि न नित्यः शब्दः, कृञ उत्पत्त्यर्थकत्वादिति भावः ॥

इतोऽप्येवमित्याह—

सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥

सत्त्वान्तरे प्राण्यन्तरे यौगपद्यात्, उपलम्भस्येति शेषः । नानादेशस्थैर्वक्तृभिरुच्चारिता युगपन्नानादेशेषूपलभ्यन्ते । न चेदं नित्यस्यैकस्य संभवति । न च नित्यत्वेऽप्यनेकत्वादिदमुपपद्यते । न हि नित्यमेकमेवेति नियम इति वाच्यम् । प्रत्यभिज्ञा हि नित्यत्वे मानम् । यथा ह्यस्तना-ह्यस्तनयोस्तथा नानावक्तृकशब्देऽपि प्रत्यभिज्ञाबलान्नित्यत्वे तदैक्यमपीति नानादेशेषु युगपदुपल-ब्धिर्विरुद्धेत्याशयः ॥

इतोऽप्येवमित्याह—

प्रकृतिविकृत्योश्च ॥ १० ॥

दध्यत्रेत्यत्र प्रकृतेरिकारस्य विकृतेर्यकारस्य च दर्शनादिति शेषः । न हि विक्रियमाणस्य नित्यत्वं संभवतीति भावः ॥

इतोऽप्येवमित्याह—

वृद्धिश्च कर्तृभूम्नास्य ॥ ११ ॥

कर्तृभूम्ना उच्चारयितृबाहुल्येन वृद्धिः महत्त्वं दृश्यते । अवयवप्रचयकृतं महत्त्वमित्यवय-विजननं तत्रेति गम्यते । अभिव्यङ्ग्यत्वे तु नेदमुपपद्यते । न हि बहुभिरल्पैर्वाभिव्यङ्ग्यो घटोऽ-न्यथोपलभ्यते । अवयवाल्पत्वबहुत्वाभ्यां तु घटादिरन्यथैवोपलभ्यते । अतो घटादिवदनित्यः शब्द इति भावः । यद्यपि तार्किकैः शब्दस्य द्रव्यत्वं नाङ्गीकृतं नापि तस्यावयवित्वम्, तन्मते गुणत्वादि-ति; तथापि तदन्य एवात्र पूर्वपक्षीत्याशयः ॥

अनित्यत्वं दूषयति—

समं तु तत्र दर्शनम् ॥ १२ ॥

तुरनित्यत्वं व्यावर्तयति। तत्र प्रयत्नोत्तरकाले दर्शनं समम्, कार्यत्वाभिव्यङ्ग्यत्वयोरिति शेषः॥

यदुक्तमुच्चारितप्रध्वस्तः शब्द इति तत्राह—

सतः परमदर्शनं विषयानागमात् ॥ १३ ॥

परमित्यव्ययं युक्तमित्यर्थे 'खलः प्रमाद्यतु परं सज्जने तदसांप्रतम्' इति यथा। स एवायं गकार इति प्रत्यभिज्ञया सतः स्थिरस्यैव शब्दस्य अदर्शनं युक्तम्। कुतः, विषयानागमात् विषयं शब्दं प्रति अभिव्यञ्जकानामनागमात् असंबन्धात्। प्रयत्नोत्तरकालिकं शब्दस्य दर्शनं न शब्दस्य कार्यत्वं साधयति, प्रयत्नव्यङ्ग्यत्वेनापि तदुपपत्तेः॥ यत्तु कथमभिव्यङ्ग्यत्वमिति, श्रोत्रेन्द्रियसंस्कारेणेति ब्रूमः। श्रोत्रेन्द्रियं च कर्णशष्कुल्यवच्छिन्नमाकाशम्। तच्च प्रतिपूरुषं भिन्नमिति नातिप्रसङ्गः। अधिष्ठानभेदाच्च संस्कारव्यवस्था। न चैकेनाधिष्ठानेनाकाशस्य संस्कृतत्वात्सर्वेषामुपलब्धिः स्यादिति वाच्यम्। भोगायतने हि स्वशरीरे पुंसां ज्ञानमुत्पद्यते, न त्वन्यत्र। शब्दज्ञानाङ्गं चायमधिष्ठानसंस्कारः। प्रधानसमदेशत्वं चाङ्गानां गुणः। तेन देहान्तरवतः पुरुषस्य यत्स्वदेहे निष्पादयितव्यं ज्ञानं तस्य तद्देहगत एव संस्कारो निष्पादकः, न तु देहान्तरगतः। विगुणो हि सः, प्रधानदेशत्वाभावात्। नन्वेवमपि संस्कार्यस्यैकत्वात्तद्द्वारत्वाच्च संस्काराङ्गभावस्य देशभेदोऽकिंचित्करः, [1]बर्हिरेकत्वेन तत्संस्काराणामातिथ्याकालानामप्युपसदग्नीषोमीयाङ्गत्वादिति चेत्। न ह्येकस्मिन्नधिष्ठाने सर्वेषां ज्ञानमुपलभ्यते। साधारणमपीन्द्रियं विज्ञानसमानदेशसंस्कारसचिवं विज्ञानमुत्पादयति, नान्यथेति कल्पनेनानतिप्रसङ्गात्। किंच, यद्यप्याकाशमेकमनवयवं च तथापि तस्य परिच्छिन्नैर्घटादिभिर्ये संयोगास्तेऽपि परिच्छिन्ना एव। एवं च कर्णशष्कुलीसंयोगानां प्रतिपूरुषं भिन्नत्वात्तदवच्छिन्नाकाशस्य च श्रोत्रत्वात्सत्यपि स्वरूपैक्येऽवच्छिन्नरूपाणां तेषां भिन्नत्वाद्व्यवस्थासिद्धिः। न चैवमपि सकृत्संस्कृतं श्रोत्रं सर्वशब्दान्प्रकाशयेदिति वाच्यम्। ध्वनयो हि ताल्वादिसंपर्काद्विजातीया [2]विलक्षणसामर्थ्या निष्पद्यन्ते। ततश्च कश्चिदेव ध्वनिः कंचिदेव शब्दमभिव्यनक्तीति व्यवस्थोपपत्तिः। दृष्टा च समानेन्द्रियग्राह्याणामप्यभिव्यञ्जकव्यवस्था। सावित्रं हि तेजो घटादीनामेवाभिव्यञ्जकं न तु नक्षत्राणाम्। निम्बत्वक् चन्दनगन्धस्यैवाभिव्यञ्जिका न तु गन्धान्तराणाम्। किंच शब्दसंस्कारपक्षेऽपि न सर्वपुंसामुपलब्धिप्रसङ्गः, ध्वनीनां परिच्छिन्नत्वेन तद्देश एव शब्दस्य संस्कारात्। संस्कृतेन शब्देन यस्येन्द्रियं संनिकृष्टम्, स एव शृणोतीति कल्पनान्नाभिव्यङ्ग्यत्वे कश्चिद्दोषः।

1. बर्हेरेकत्वेन—क. 2. संपर्काद्विलक्षणसामर्थ्यात्—ख; विजातीयां विलक्षणसामर्थ्यात्—क.

यदुक्तं करोतिशब्दादिति तत्राह—

प्रयोगस्य परम् ॥ १४ ॥

परम् अन्यत् यत्कारणमुक्तं करोतिशब्दादिति, तत् प्रयोगस्य उच्चारणस्य, [1]शब्दं करोतीत्यत्र शब्दोच्चारणस्य उत्पत्तिर्विवक्षितेत्यर्थः ॥

एकस्य नित्यस्य युगपन्नानादेशोपलम्भः कथम् । तत्राह—

आदित्यवद्यौगपद्यम् ॥ १५ ॥

आदित्यस्य एकस्य यथा युगपद्दर्शनं तथा शब्दस्यापीत्यर्थः ॥ 'सर्वगतो हि शब्दो भिन्नदेशैर्ध्वनिभिः स्वे स्वे देशेऽभिव्यज्यमानो भिन्नदेशेऽवभासते । ध्वनयो हि श्रोत्रदेशमागत्यापि शब्दं व्यञ्जयन्तः स्वोत्पत्तिदेशमिव शब्दं भासयन्तीति दर्शनबलादभ्युपगम्यते । ननु, अप्राप्यकारि श्रोत्रम्, न च ध्वन्युत्पत्तिदेशाः श्रोत्रेण प्राप्यन्त इति कथं [2]तद्विशिष्टशब्दग्रहणं श्रोत्रेणेति चेत् । श्रोत्रं हि स्वदेशावस्थितमेव शब्दं बोधयदपि न तद्विशिष्टं बोधयति, किंतु स्वरूपेणैव । शब्दोच्चारणदिश [3]आगता ध्वनयस्तु तया विशिष्टं शब्दं बोधयन्ति । सा च दिक् श्रोत्रप्राप्ता कालवच्छब्दविशेषणतया शक्यते श्रोत्रेण ग्रहीतुम् । ध्वनयश्च क्रमेण मन्दीभवन्तः प्रत्यासन्नादूरतराच्च देशादागतास्तीव्रं मन्दं मन्दतरं च शब्दं बोधयन्ति । बोधविशेषाच्च प्रत्यासन्नदूरादिरूपेणानुमानाद्ध्वन्युत्पत्तिदेशो हृदयं[4] तद्रूपेणागच्छति । तत्र यः शब्दस्य परमार्थदेशस्तस्याग्रहणाद्विशिष्टस्य शब्दस्वरूपस्य च ग्रहणात् ध्वन्युत्पत्तिदेशस्य च ग्रहणात्त्रयाणां संसर्गभ्रमादेवंविधः प्रत्ययो भवति— प्राच्यां दिश्येतावदन्तराले शब्दः' इति शास्त्रदीपिकायां व्यक्तम् । अत्र '[5]आगता ध्वनयः' इत्युक्त्या ध्वनीनां द्रव्यत्वं सूचितम् । 'वायुगुणत्वं तु युक्तम्' इत्यादिसंदर्भेण गुणत्वमपि प्रपञ्चितम् । तत्र गुणत्वपक्षे ध्वनिमद्वायव एव स्वदेशे यत्नेनोत्पन्नाः श्रोत्रमायान्ति । वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा तार्किकाणां शब्दगुणस्येन्द्रियसंनिकर्षो वा बोध्यः । भाष्ये तु 'वायवीयाः संयोगविभागा एव व्यञ्जकाः' इति स्थितम् । ध्वनय एव च लोके नादशब्देन व्यवह्रियन्ते । न चाकाशगुणत्वं शब्दस्य युक्तम् । तस्य शङ्खाद्यवच्छिन्ने तस्मिन्नुत्पत्तेर्वाच्यतया संनिकर्षाभावेन श्रोत्रेन्द्रियेण ग्रहणानापत्तेः । वस्तुतस्तु वायोरभिघातकारणत्वेनावश्यकत्वात्तद्गुणत्वमेव युक्तम् । वर्णास्तु नित्यानि द्रव्याणि, वर्णा न

1 ज्ञेयम् । शब्दं—क, घ. 2. तद्विशेषशब्दग्रहणं—ख, ग; तद्विशेषे शब्दग्रहणं—क. 3. दिश आतताः—ख, ग. 4. हृदयदेशं तद्रूपेण—क, ग. 5. दिश आगता—क, ग.

गुणाः, ध्वन्यन्यत्वे सति श्रावणत्वात् शब्दत्ववद्दिग्वत्कालवच्चेत्यनुमानेन अगुणत्वे सिद्धे परिशेषेण द्रव्यत्वसिद्धेः। दिक्कालयोश्च श्रावणत्वस्य [1]अनुभवसिद्धत्वान्नासिद्धिः। एतेन अस्पर्शत्वे सत्येकेन्द्रियग्राह्यत्वाद्रूपादिवद्गुणत्वमिति प्रत्युक्तम्, शब्दत्वे व्यभिचारात्। ननु वर्णा अनित्याः [2]सामान्यान्यत्वे सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वात्, इत्यनुमानादिति चेन्न। अस्यानुमानस्य श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वात् मनोवत् इति सत्प्रतिपक्षतया असाधकत्वात्। न च श्रोत्रं नित्यद्रव्याग्राहकम् अनित्यभूतविशेषगुणग्राहकं वा बहिरिन्द्रियत्वादिन्द्रियत्वाद्वा चक्षुर्वदिति प्रत्यनुमानबाधः। प्रथमेऽनुमाने दृष्टान्ते साध्यवैकल्यात्, चक्षुष आकाशादिनित्यग्राहकत्वात्। द्वितीये च ध्वनिग्राहकतया सिद्धसाधकत्वात्। किंच, व्यक्तिभेदाभावात्स एवायं गकार इति प्रत्यभिज्ञाया जातिविषयकत्वकल्पनानुपपत्त्या प्रत्यभिज्ञाविरोधोऽपि दुर्वारः। न च द्रुतो गकारो विलम्बितो गकार इति विरुद्धधर्मसंसर्गित्वाद्गकारव्यक्तिभेद इति वाच्यम्। तस्याः प्रतीतेर्ध्वनिविषयत्वात्। एतेनोदात्तत्वादिप्रतीतिरपि व्याख्याता। ध्वन्युत्पत्तिश्च तालवादिव्यापारात्। स्थानभेदात्तु मन्द्रोदात्तत्वादिव्यवहारः। किं बहुना, शब्दानित्यत्वपक्षेऽपि नानादेशोपलब्धेर्भ्रान्तित्वमपरिहार्यम्[3], श्रोत्रस्य प्राप्यकारित्वाभावेन वक्तृमुखादिरूपदेशग्रहणस्य भ्रान्तित्वावश्यकत्वात्। तस्मान्नित्यः शब्दः।

यदुक्तं विक्रियमाणत्वादनित्यत्वं तत्राह—

शब्दान्तरमविकारः ॥ १६ ॥

दधि अत्र इत्यस्मात् दध्यत्र इति शब्दान्तरम्। न यकार इकारस्य विकारः। यथा कटं चिकीर्षुस्तृणान्यादत्ते न तथा यकारं प्रयुयुक्षोरिकारोपादानं संभवति, त्वया तस्य गुणत्वस्वीकारात्, अस्मन्मते विभुत्वेन द्रव्यान्तराप्रकृतित्वात्। व्याकरणं तु साधुत्वमात्रज्ञापकम्, न तु प्रकृतिविकारबोधकम्। अत एव 'सिद्धं तु नित्यशब्दत्वात्' 'किमर्थं शास्त्रमिति चेत्, निवर्तकत्वात्सिद्धम्' इति वृद्धिसूत्रस्थं तद्वार्तिकं तद्भाष्यं च संगच्छते। अभियुक्ताश्चाहुः 'उपायाः शिक्ष्यमाणानां बालानामुपकारकाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति॥

यदुक्तं वक्तृबहुत्वाच्छब्दमहत्त्वमिति तत्राह—

नादवृद्धिः परा ॥ १७ ॥

परा अन्या वृद्धिर्या उक्ता वक्तृबहुत्वाच्छब्दस्य वृद्धिरिति, सा वृद्धिर्न शब्दस्य; किंतु

1. युक्तयनुभवसिद्धत्वात्—क, ग. 2. सामान्यवत्वे सति—क, ग, घ. 3. अपरिहारम्—घ. 4. वर्णान्तरम्.

नादवृद्धिः, नादो ध्वनिः तस्य वृद्धिः, शब्दस्यानवयवत्वेन महत्त्वानुपपत्तेः । बहुभिर्नैरन्तर्येणोच्चार्यमाणैर्नादैः सर्वतः कर्णशष्कुलीं प्राप्नुवद्भिः शब्दो महानिति भ्रमः । न तु तस्य महत्त्वमिति भावः ॥

एवं परमतं दूषयित्वा स्वमतमाह—

नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥

तुरवधारणं । नित्य एव शब्दः स्यात् । दृश्यते अनेनेति दर्शनमुच्चारणम् , तस्य परं प्रत्यर्थप्रत्यायनार्थत्वात् । न ह्युच्चारितस्य शब्दस्य नाशे अन्यस्माच्छब्दजशब्दादर्थप्रतीतिः संभवति, उच्चारिताच्छब्दादर्थं प्रत्येमीत्यनुभवविरोधात् शक्तिग्रहाभावाच्च ॥

इतोऽप्येवमित्याह—

सर्वत्र यौगपद्यात् ॥ १९ ॥

सर्वव्यक्तिषु बोधस्य यौगपद्यात् नित्यः शब्दः । गोशब्देऽभ्युच्चारिते युगपत्सर्वासां गोव्यक्तीनां प्रतीतेरानुभाविकत्वेन आकृतिवचनत्वं शब्दस्याध्यवसीयते । न चाकृत्या अनित्यशब्दस्य संबन्धः कर्तुं शक्यः । नित्यत्वे तु पूर्वपूर्वप्रयोगात् स शक्यग्रह इत्यर्थः ॥

इतोऽप्येवमित्याह—

संख्याभावात् ॥ २० ॥

दश गोशब्दानुच्चारयतीति संख्याप्रतीतेरभावादपि नित्यः शब्दः । दशकृत्वो गोशब्दमुच्चारयतीत्येव प्रतीतेः ॥

इतोऽप्येवमित्याह—

अनपेक्षत्वात् ॥ २१ ॥

यथा घटादि कार्यं स्वोत्पत्तौ समवाय्यसमवायिनिमित्तकारणमपेक्षते तन्नाशे च नश्यति नैवं शब्दः, तस्य समवाय्यादिकारणाभावात् । तस्मान्नित्यः ॥

ननु वायुकारणकः शब्दः, वायुसंयोगवियोगैर्जायमानत्वात् 'वायुरापद्यते शब्दताम्' इति शिक्षाकृदुक्तेश्च । तत्राह—

[1]प्रेक्षाभावाच्च संयोगस्य ॥ २२ ॥

शब्दे वाय्ववयवसंयोगस्यानुपलब्धेः न वायुकारणकः शब्दः। 'प्रख्याभावाच्च योग्यस्य' इति पाठे योग्यस्येति जातावेकवचनम्। वाय्ववयवानां प्रख्यायाः उपलब्धेः अभावादित्यर्थः। यथा पटादौ तन्तवस्तदवयवा उपलभ्यन्ते नैवं शब्दे॥ ननु वायुर्न प्रत्यक्षः, किंतु तदीय एव स्पर्शः स्पार्शनप्रत्यक्षः, अतः शब्दे वाय्ववयवानुपलब्धिरिति चेन्न। वायुं स्पृशामीति[2] प्रतीत्या तस्यापि प्रत्यक्षत्वात् स्पर्शमात्रोपलम्भापत्तिसंभवाच्च। न च शब्दे अनुद्भूतस्पर्शकल्पनान्न दोष इति वाच्यम्। तथा कल्पने मानाभावात्। चकारः अनुक्तसमुच्चयार्थः इममेव शङ्कापरिहारं समुच्चिनोति।

नित्यत्वं शब्दस्य वेदसंमतमपीत्याह—

लिङ्गदर्शनाच्च ॥ २३ ॥

'वाचा विरूप नित्यया' इति [3]नित्यत्वानुवादाल्लिङ्गादपि नित्यः शब्दः॥

ननु तथापि वाक्यार्थे धर्मे चोदनायाः प्रामाण्यं न संभवतीत्याक्षिपति—

उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात् ॥ २४ ॥

वाशब्दः प्रत्यवस्थाने। उत्पद्यते अवगम्यते इत्युत्पत्तिः वाक्यार्थो धर्मः अलौकिकश्रेयःसाधनताकयागादिभावनात्मकः, तत्र विषये चोदना अवचनाः। करणे ल्युट्। अप्रमाणानि।

७. वेदप्रत्यायकत्वाधिकरणम्।

कुतः, अर्थस्य अतन्निमित्तत्वात् धर्मावबोधलक्षणकार्यस्य[4] चोदनाहेतुकत्वाभावात्, चोदनावाक्यस्य धर्मावबोधे असामर्थ्यादिति यावत्॥ तथा हि—किं पदानि प्रत्येकं वाक्यार्थं धर्मं बोधयन्ति, उत तत्समूहात्मकं वाक्यम्, पदार्था वा। नाद्यः, इतरवैयर्थ्यात्प्रत्येकं बोधादर्शनात्, पदानां वाक्यार्थविशेषे संकेतग्रहाभावाच्च। अत एव न द्वितीयतृतीयौ। संकेतमनपेक्ष्य बोधकत्वे तु व्युत्पत्तिवैयर्थ्यं बालानामपि बोधप्रसङ्गश्च।

समाधत्ते—

तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥

तद्भूतानां [5]सिद्धपदार्थेषु विद्यमानानां पदानां भावनार्थकेन पदेन सह समाम्नायः पाठः

1. प्रख्याभावाच्च योग्यस्य. 2. इति तस्यापि— ख. ग. 3. वाङ्नित्यत्व— घ. 4. धर्मावबोधकार्यस्य— घ. 5. प्रसिद्ध— घ.

दृश्यते, अतो वाक्यार्थबोधः संभवति। कुतः, अर्थस्य वाक्यार्थबोधस्य तन्निमित्तत्वात् पदार्थोपस्थितिद्वारा पदनिमित्तकत्वात्॥ पदैरभिहिताः पदार्था एव हि वाक्यार्थं बोधयन्ति, न तु पदानां वाक्यस्य वा तत्र व्यापारः, पदार्थबोधनेनैव कृतार्थत्वात्। अत एव सत्यपि वाक्यश्रवणे अनवहितस्य वाक्यार्थानवबोधः, दीर्घवाक्यैकदेशविस्मरणेऽपि पदार्थस्मृतिशालिनो वाक्यार्थबोधश्च। न च पदार्थानां वाक्यार्थे संबन्धग्रहाभावान्नैतदुपपद्यत इति वाच्यम्। वाक्यार्थलक्षणायां संबन्धग्रहस्यानुपयोगात्, स्वरूपसतः संबन्धस्यैवोपयोगात्। एतेनात्यन्ताप्रसिद्धे वेदार्थे धर्मे संबन्धग्रहासंभवादप्रामाण्यमिति परास्तम्। न चाव्युत्पन्नस्य वाक्यार्थबोधप्रसङ्गः, पदपदार्थसंबन्धग्रहस्यावश्यकत्वात्। समभिव्याहारस्य च नियामकत्वान्नातिप्रसङ्गोऽपि। एवं च वाक्यार्थबोधस्य पदार्थमूलकत्वेन निर्मूलकत्वाभावात् पुरुषापेक्षाभावाच्च निष्प्रत्यूहं धर्मे वाक्यार्थे प्रामाण्यं चोदनायाः।

लोके त्वन्यथापीत्याह—

लोके [1]सन्नियमात्प्रयोगसंनिकर्षः स्यात्॥ २६॥

लोके सन्नियमान् सति मानान्तरेण गृहीतेऽर्थे नियमात्[2] प्रयोगस्य पुरुषसंबन्धः स्यात्। वेदार्थे तु नैव मानान्तरयोग्यत्वमिति भावः॥

अथ वेदस्य पौरुषेयत्वं पूर्वपक्षयति—

वेदांश्चैके संनिकर्षं पुरुषाख्याः॥ २७॥

एके अन्ये तार्किकाः वेदान संनिकर्षं गमयन्ति संनिकृष्टकालान्वदन्तीति यावत्, यतस्ते वेदाः पुरुषाख्याः पैप्पलादं कालापं काठकमित्याधुनिकपुरुषेण समाख्यायमाना भवन्ति॥ अनया हि समाख्यया पुरुषविशेषसंबन्धो वेदानामवगम्यते। न चेयं प्रवचननिमित्ता भवितुमर्हति, प्रवचनस्य साधारणत्वेन समाख्यानिमित्तत्वायोगात्। कर्तृत्वे तु सा घटते। स्वातन्त्र्येण वाक्यरचयितृत्वं हि कर्तृत्वम्। तत् रचकस्यैव; अन्येषां तु तादृक्छब्दोच्चारयितृत्वेऽपि न स्वातन्त्र्यम्। अत एव भारतरघुवंशादिवाक्योच्चारयितृष्वस्मासु न तत्कर्तृत्वव्यवहारः। एवं च वर्णानां नित्यत्वेऽपि तदानुपूर्वीविशेषविशिष्टवेदस्य पौरुषेयत्वादप्रामाण्यम्।

८. वेदापौरुषेयत्वाधिकरणम्।

इतोऽप्येवमित्याह—

1. लोके सन्नियमनात्. 2. नियमात् शब्दप्रयोगनियमात्—घ.

अनित्यदर्शनाच्च ॥ २८ ॥

'बबरः प्रावाहणिरकामयत' इति वृत्तार्थकथनेन तस्मिन्समये वेदो नासीदित्यवगमापि न तस्य प्रामाण्यम् ॥

सिद्धान्तयति—

उक्तं तु शब्दपूर्वत्वम् ॥ २९ ॥

तुः पूर्वपक्षव्यावृत्तौ । शब्दः शब्दनं पूर्वपूर्वाध्ययनम् । तत्पूर्वकत्वमुत्तरोत्तराध्ययनस्य ध्येतृभिरुक्तम् । ततश्च विवादाध्यासितं वेदाध्ययनमध्ययनपूर्वकम् अध्ययनत्वात् इदानींतनाध्ययनवत् इत्यनुमानान्नैव वेदस्य प्रथमः कश्चिदध्येताऽस्ति, येन सकर्तृकत्वं वेदस्य स्यादिति भावः ॥

काठकादिसमाख्यामन्यथयति—

आख्या प्रवचनात् ॥ ३० ॥

प्रवचनातिशयात्काठकादिसमाख्या उपपद्यते ॥

अनित्यदर्शनादित्यत्राह—

परं तु श्रुतिसामान्यमात्रम् ॥ ३१ ॥

परम् अन्यदप्रामाण्यसाधकं यदुक्तमनित्यदर्शनम् , तत् श्रुतिसामान्यमात्रमेव । श्रुतीति कर्मणि क्तिच् । 'धाता यथापूर्वमकल्पयत्' 'यथर्तवः ऋतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इति प्रतियुगं श्रुताः प्रवाहणबबरादयः । तत्सामान्यं प्रवाहणादिकमेव प्रवाहणादिपदेन विवक्षितम् । आसीदिति भूतत्वं च भविष्यत्कल्पापेक्षम् । तुर्नार्थे । ततो न दोष इत्यर्थः । तथा च प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया चन्द्रसूर्यादिवद्वैदिकपदगोचराः सन्तो नैव वेदस्य नित्यतां व्याकोपयन्तीति भावः ॥

नन्वेवमपि 'गावो वा एतत्सत्रमासत' 'सर्पाः सत्रमासत' 'स आत्मनो वपामुदखिदत' इत्यादिवेदवाक्यानां प्रमत्तगीतसदृशानां कथं प्रामाण्यमित्यत आह—

1. सिध्येत्— क. 2. श्रुतिसामान्यम्.

कृते वा विनियोगः स्यात्कर्मणः [1]समत्वात् ॥ ३२ ॥

वाशब्दोऽवधारणे । कृत इति भावे क्तः । कृते कर्मणि प्रशंसाद्वारा गाव इत्यादीनां विनियोगः अन्वयः स्यात् । अतो धर्मप्रामाण्यमस्त्येव । सत्रादिकर्मणः प्रशंसापेक्षाविषये 'वायव्यं श्वेतमालभेत भूतिकामः. वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति' इत्यादिविहितकर्मभिस्तुल्यत्वात् । एतच्चाग्रे व्यक्तं भविष्यति । 'कर्मणः संबन्धात्' इति पाठेऽपि सत्रादिकर्मणः प्रशंसापेक्षस्य संबन्धात् सांनिध्यादित्यर्थः ॥ वेदः पौरुषेयः वाक्यत्वात् भारतादिवत् इत्यनुमानं त्वेवं निराकर्तव्यम्— किमिदं पौरुषेयत्वं पुरुषाधीनोत्पत्तिकत्वं वा, मानान्तरेणार्थमुपलभ्य रचितत्वं वा । नाद्यः, सिद्धसाधनत्वात् । आकाशवन्नित्यानां सर्वगतानां कालतो देशतश्च क्रमशून्यानां वर्णानामनित्योच्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक्रमानुस्मृतिनिमित्तत्तत्सदृशोत्तरोत्तरक्रमवतां वेदशब्दवाच्यानां पुरुषाधीनोत्पत्तिकत्वात् । न द्वितीयः, कालिदासादिकृतरघुवंशादिसाधारण्यापत्तेः । किंच पुरुषोऽपि कस्त्वाभिमतः कश्चिन्मनुष्यो वा योगी वा ईश्वरो वा । नाद्यः, मनुष्ये धर्मादिज्ञानस्य वेदजन्यत्वेन तत्र तस्य कर्तृत्वासंभवात् । न द्वितीयः, योगिनोऽपि हि धर्माधर्मादिप्रमापकं न तावद्बाह्येन्द्रियम् , धर्मादेस्तदयोग्यत्वात् । नापि मनः, [2]तज्जनितज्ञानस्य आत्मयोग्यतद्गुणातिरिक्ताविषयत्वात् । नन्वस्मदादिज्ञानस्य तथात्वेऽपि विवेकवैराग्यादिबहुगुणशालिनां योगिनां तादृशज्ञानमस्त्विति चेन्न । एवं सति वेदस्यानादित्वेन अस्मदिष्टापौरुषेयत्वसिद्धेः । न हि तेषां [3]तादृशसंपत्तिर्वेदाध्ययनतदर्थाचरणमन्तरेण संभवति, आकस्मिकत्वापातात् । न तृतीयः, वेदादीश्वरसिद्धावन्योन्याश्रयात् 'ब्रह्म स्वयंभु' 'वाचा विरूपनित्यया' 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा' 'स्वयंभूरेष भगवान्वेदो गीतः स्वयंभुवा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ।' इति श्रुतिस्मृतिपुराणवचनैर्वेदानां नित्यत्वावगमेन ईश्वरकर्तृकत्वकल्पनायोगाच्च । नन्वेषामन्यपरत्वान्नैभ्यो नित्यत्वसिद्धिरिति चेन्न । अन्यपराणामपि मानान्तरप्राप्तिविरोधयोरसतोः स्वार्थे प्रामाण्यस्यार्थवादाधिकरणे वक्ष्यमाणत्वात् । अत एव विशिष्टविधेर्विशेष्यविशेषणोभयपरत्वे वाक्यभेदापत्त्या विशिष्टमात्रपरस्य विशेषणांशेऽपि प्रामाण्यमिष्यत एवेति रेवत्यधिकरणे वक्ष्यते । अप्राप्ताबाधितार्थबोधकत्वमेव हि प्रामाण्यम्, न तु तात्पर्यघटितमपि, शब्दान्यप्रमाणे तदभावात् । नन्वेवमन्यपरस्यापि 'वज्रहस्तः पुरंदरः' इत्यादेरर्थवादस्य स्वार्थेऽपि प्रामाण्ये देवताधिकरणविरोध इति चेन्न । देवताधिकरणे 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' 'अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वेन देवताश्रुतिः' इति सूत्रकृता याग एव फलस्य प्रयोजकः, देवता तु यागस्य गुणः, न तु यागाराधिता

1. सम्बन्धात्. 2. तज्जनितस्य आत्म—घ. 3. तादृशगुणसंपत्तिः—घ.

देवता फलं प्रयोजयतीत्येवं देवताया गुणभावो यागं प्रतीत्येतावदेव व्यवस्थापयिष्यते । देवताविग्रहादिकं तु भाष्यकृतैवोत्सूत्रं निराकरिष्यते प्रौढिवादेनेति तत्रैवास्माभिः प्रपञ्चयिष्यते । न च काठकादिसमाख्या कर्तृनिबन्धनैवोपपाद्येति वाच्यम । तस्याः [1]प्रवचनातिशयनिबन्धनताया उक्तत्वात् । पदविभागक्रमपाठतदर्थख्यापनादिकमेव तदतिशयः । न च वेदा अनाप्तप्रणीतत्वादाप्तप्रणीताः इदानींतनवाक्यविशेषवदिति वाच्यम् । आत्माकाशादौ व्यभिचारात् । अशब्दत्वे सतीति विशेषणमिति चेन्न । आप्तप्रणीतत्वमात्रस्य उक्तविधया वेदेऽप्यङ्गीकारात् । वेदा अपौरुषेयाः संप्रदायाविच्छेदे सति अस्मर्यमाणकर्तृकत्वात् आत्मवदिति सत्प्रतिपक्षत्वाच्च । न च सत्यन्तासिद्धिः, संसारचक्रप्रवर्तकत्वेन संप्रदायविच्छेदाभावात् । नन्वाप्तप्रणीतत्वाभावे बालोन्मत्तादिवाक्यवदप्रामाण्यं स्यादिति चेन्न । प्रमाणानां स्वतःप्रामाण्याभ्युपगमात् । अनाप्तवाक्येष्वनाप्तसंबन्धात्प्रतिबन्ध इत्याद्याकरे स्पष्टम् । एवं च बोधकत्वात्प्रयोजनत्वान्निरपेक्षत्वाच्च चोदना धर्मे प्रमाणमिति सिद्धं चोदनालक्षणोऽर्थो धर्म इति ॥

इति प्रथमाध्याये प्रथमः पादः ॥



1. प्रवचनादि—क, ख, ग.

द्वितीयः पादः ॥

निर्मथ्य निगममिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

पूर्वस्मिंस्तर्कपादे विध्यर्थवादमन्त्रनामधेयात्मकवेदस्य सामान्यतः प्रामाण्यं विशिष्य च विधिभागस्य प्रामाण्यं वर्णितम् । अथास्मिन्द्वितीयपादे अर्थवादमन्त्रभागयोर्विशिष्य प्रामाण्यं वर्ण्यते ॥

'वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्याद्यर्थवादा धर्मे प्रमाणं न वेति संशये पूर्वपक्षयति—

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ १ ॥

पूर्वस्मिन्पादे 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यधिकरणे आम्नायस्य वेदस्य क्रियार्थत्वात् किं केन कथमित्येवं फलतत्साधनतदितिकर्तव्यतात्मकांशत्रयविशिष्टपुरुषप्रवृत्तिरूपभावना-

१. अर्थवादाधिकरणम् ।

प्रतिपादनार्थत्वावधारणात् अतदर्थानां भावनातदंशत्रयातिरिक्तार्थकानामर्थवादानाम् आनर्थक्यं धर्मप्रमितिरूपप्रयोजनशून्यत्वम् । न ह्यर्थवादेषु भावना गम्यते, तद्बोधकलिङाद्यभावात् । ननु तर्हि तेषां वेदत्वमेव न स्यात्, प्रमाणान्तरागोचरधर्मावेदकत्वस्यैव वेदशब्दप्रवृत्तिनिमित्तत्वादित्याशङ्क्य इष्टापत्त्या परिहरति—तस्मादिति । तस्मात् भावनात्मकधर्मप्रमापकत्वाभावाद्धेतोः अर्थवादजातम् अनित्यमुच्यते । नित्यं वेदवाक्यम् ततोऽन्यदनित्यं लौकिकवाक्यम् उच्यते प्रमादाद्वेदवाक्यसंवलितं पठ्यते ॥ यद्यपि वायव्ययागविधौ वायुरन्तर्भवति, तथापि नात्र स्वरूपेण स वर्ण्यते, लोकत एव तत्सिद्धेः । नापि देवतात्वेन, वायव्यमित्यनेनैव सिद्धेः । क्षेपिष्ठत्वादिकं तु वर्ण्यमानं न विधावन्तर्भवति, लोकसिद्धं च । न च विधेये इष्टसाधनतावगमकस्तुतिसमर्पकतया अर्थवादानां विध्यन्तर्भावादस्तु प्रामाण्यमिति वाच्यम् । इष्टसाधनतावगतिर्हि विनापि स्तुत्या विधिबलादेव भविष्यति, इष्टसाधनतावगतिं विना विधेः प्रवर्तकत्वासंभवेन विधि-

नैवेष्टसाधनतावगतिलाभात् । न चैवं सति लोके[1] इयं गौर्बहुक्षीरा बहुजीवत्स्त्र्यपत्या इत्यादिस्तुतिवैयर्थ्यं शङ्क्यम् । लोके स्तुतेरिष्टसाधनतावगतिदार्ढ्यार्थत्वात्, वेदे चं समीहितसाधनतावगतेर्वेदजन्यत्वेनैव दृढतया स्तुत्यनपेक्षणात् । अन्यथा 'ब्रह्मणे ब्राह्मणमालभते' इत्यादिनिरर्थवादस्थले का गतिः । तस्मादर्थवादा न धर्मे प्रमाणम् ।

ननु धर्मप्रमाणत्वाभावेऽपि यथाभूतार्थानुवादितया प्रमाणत्वमस्त्वित्याशङ्क्य यथाभूतार्थप्रमितिजनकत्वमपि नास्ति, किमुत धर्मप्रमितिजनकत्वमिति वक्तुं सिद्धार्थेऽप्यप्रामाण्यमुपपादयति—

शास्त्रदृष्टविरोधाच्च ॥ २ ॥

शास्त्रविरोधात् दृष्टविरोधात् शास्त्रदृष्टविरोधाच्च भूतार्थप्रमाणत्वमपि नार्थवादानामित्यर्थः॥ 'स्तेनं मनोऽनृतवादिनीं वाक्' इति श्रूयते । अनृतमेव वदति न तु सत्यमित्यनृतवादिनी । ताच्छीलिको णिनिः । अत्र मनसः परद्रव्यापहरणरूपं स्तेयम्, वाचश्चानृतवदनैकस्वभावत्वं बाधितम्। अतो लक्षणया मनःपूर्वकं चोरयेत्, वाग्वच्च कदाचिदनृतं वदेदिति कल्पनायाम् 'न चोरयेत्' 'नानृतं वदेत्' इति शास्त्रविरोधः । दृष्टेति भावे क्तः । प्रत्यक्षविरोधादित्यर्थः । 'धूम एवाग्नेर्दिवा ददृशे नार्चिः' इति प्रत्यक्षविरोधादप्रमाणम् । तथा 'न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वा' इत्यपि प्रत्यक्षविरोधादप्रमाणम् । दर्शपूर्णमासयोरार्षेयवरणं[2] प्रकृत्य ह्येतच्छ्रुतम् । न ह्येतत्संभवति,—ब्राह्मणाधिकृतवासन्तिकोपनयनादिपूर्वकं दर्शपूर्णमासौ कुर्वाणो ब्राह्मण्यं स्वगतं प्रति संदिग्धे इति । तथा 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' इति स्वर्गसंशयपरं वाक्यं शास्त्रदृष्टविरोधादप्रमाणम् । दृष्टेति भावे क्तः । दर्शनमवगमः । 'स्वर्गकामो यजेत' इति शास्त्रान्तर्गतस्वर्गपदजन्यतदवगतिविरोधादित्यर्थः । पूर्वत्र शास्त्रेण विरोधः, इह तु तदेकदेशस्वर्गपदेन विरोध इति भेदः । अथवा पूर्वत्र विधिवाक्येन विरोधः, इह तु 'अमुष्मिन लोके स्त्रियं संभवति' इत्यादयर्थवादान्तरेण विरोध इति भेदः ।

इतोऽप्येवमित्याह—

तथा फलाभावात् ॥ ३ ॥

गर्गत्रिरात्रब्राह्मणं प्रकृत्य श्रूयते 'शोभतेऽस्य मुखं य एवं वेद' इति । अत्र गर्गत्रिरात्रब्राह्मणार्थं जानानस्य शोभत इति लटा वर्तमानमुखशोभालक्षणस्य फलस्य तदानीमविद्यमानस्य

1. लोके इति घ पुस्तके नास्ति. 2. शास्त्रदृष्टि 3. वरणप्रवरं— क, ग.

प्रतिपादनात्स्वार्थेऽप्यप्रामाण्यम् । न हि तदानीं मुखशोभास्ति, प्रत्युत पदपदार्थसंगमनव्यापृतचित्त-विक्षोभप्रयुक्तमुखविकारस्यैवानुभूयमानत्वात् ॥

इतोऽप्येवमित्याह—

[1]अन्यानर्थक्यात् ॥ ४ ॥

आधाने श्रूयते 'पूर्णाहुत्या सर्वान्कामानवाप्नोति' इति । अत्रापि लटा तदानीं सर्वकामावाप्तेरविद्यमानांयाः प्रतिपादनादप्रामाण्यं पूर्वसूत्रात्सिद्धमेव । अथापि लट्कल्पनया फलाय विधिरिति कश्चिद्ब्रूयात् । तं प्रत्युच्यते । नैष फलाय विधिः, तथा सति अग्निहोत्रादिकर्मणां स्वर्गादि-फलाय विधानानर्थक्यप्रसङ्गात् । [2]क्रतुभिर्हि फलान्याजिहीर्षमाणः क्रतुसाधनीभूताहवनीयाद्यग्निनि-[3]र्वर्तकाग्न्याधेयान्तर्गतपूर्णाहुत्यैव सर्वक्रतुफलावाप्तौ सत्यां किमिति क्रतुषु प्रवर्तेत । तदाहुः— '[4]अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत्' इति । 'गृहकोणोऽत्के इत्यपि' इति जयन्तः ।

इतोऽप्येवमित्याह—

अभागिप्रतिषेधात् ॥ ५ ॥

भागः भजनं प्राप्तिः प्रसङ्गः अस्यास्तीति भागि प्रसक्तम् ; अभागि अप्रसक्तम्, तस्य प्रतिषेधादित्यर्थः । 'न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्यः' इत्यप्रतिषेध्यप्रतिषेधादप्रमाणम् । पृथिव्यां हि चयनं विहितत्वादप्रतिषेध्यम् । अन्तरिक्षे दिवि च चयनमप्रसक्तमेव ॥

इतोऽप्येवमित्याह—

अनित्यसंयोगात् ॥ ६ ॥

'बबरः प्रावाहणिरकामयत' इत्याद्यप्रमाणम्, अनित्यैर्जनिमद्भिः प्रवाहणादितदपत्यबबरादिभिरर्थैर्वाच्यतया संयोगात् । न हीदानींतनान्पुरुषान्प्रतिपादयदिदं स्वार्थे प्रमाणं भवितुमर्हति, आदिमत्तादोषप्रसङ्गात् । अतो नैवंजातीयकमर्थवादजातं स्वार्थेऽपि प्रमाणम्, किमुत धर्मे ॥

अथ सिद्धान्तयति—

विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ॥ ७ ॥

1. आनर्थक्यात्. 2. क्रतु...माणः इति ख पुस्तके नास्ति. 3. वर्तकाग्न्याधाना—ख. 4. अर्के - कं, ख, घ. (1) शा. भा. १. २. ४. 5. प्रतिषेधाच्च.

तुः पूर्वपक्षव्यावृत्तौ। विधीनामित्यवयवषष्ठी। अर्थवादा विध्येकदेशाः स्युः। विधिभागस्य च प्रामाण्यं पूर्वस्मिन्पादे व्यवस्थापितमिति भवत्येषां प्रामाण्यम्। कुत एषां विध्येकदेशता, स्तुत्यर्थेन विधिना एकवाक्यत्वात्। स्तुतिः प्ररोचना प्राशस्त्यवर्णना. तामर्थयते अपेक्षत इति स्तुत्यर्थो विधिः। तेन संभूय विशिष्टैकार्थप्रतिपत्तिजनकत्वादित्यर्थः॥ तथा हि— लिङादिप्रत्ययाः प्रवर्तनायां विहिताः। प्रवर्तयितुर्व्यापारः प्रेरणाख्यः प्रवर्तना। आचार्यो हि गामानयतु देवदत्त इति वदति[1]। ततो गामानयन्देवदत्तो ब्रवीति,—आचार्यप्रेरितोऽहं गामानयामीति। स च प्रेरणाख्यव्यापारो नियोजयितृपुरुषनिष्ठोऽभिप्रायविशेषो लोके। वेदे त्वनीश्वरवादे लिङादिनिष्ठो धर्मविशेषः कल्प्यः। सेश्वरवादे तु ईश्वरेच्छैव प्रवर्तना। सा च लिङादिशब्दनिष्ठत्वाद्वा ततः प्राधान्येन गम्यमानत्वाद्वा शब्दभावनेत्युच्यते। तया च किं केन कथमित्यंशत्रयवती पुरुषप्रवृत्तिर्भाव्यते। सेयं प्रवृत्तिः शब्दभावनाभाव्यत्वात् फलोत्पादनव्यापारात्मकत्वाच्च अर्थभावनेत्युच्यते फलभावनेति च। इमां चार्थभावनां प्रति गृहीतशक्तिकलिङादितो ज्ञाता शब्दभावना प्रयोजिका। ततश्च लिङादिशक्तिग्रहः शब्दभावनाज्ञानद्वारा शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वात् शब्दभावनां प्रति करणम्। इष्टसाधनताज्ञानमपि करणम्. तस्य शब्दभावनाभाव्यप्रवृत्तिं प्रति कारणत्वात्। अर्थवादलब्धप्राशस्त्यं तु तत्राङ्गत्वेनान्वेति। तथा हि, लोके इष्टसाधनादन्यत्र प्रेक्षावतः प्रवृत्तेरभावादिष्टतृप्तिसाधनेऽपि विषसंसृष्टान्नभक्षणे प्रवृत्तेरभावादनिष्टाननुबन्धीष्टसाधनतामप्यर्थाद्विधिप्रत्ययो गमयति, तज्ज्ञानस्य प्रवर्तकत्वात्। सर्वस्यापि लौकिकवैदिककर्मणः किंचिदायासाधायकस्य कष्टात्मकस्यानिष्टसाधनताया अपि सत्त्वात् प्रवृत्तिनिवृत्त्योरौदासीन्यापत्तेर्बलवत्त्वेनानिष्टं विशेषणीयम्[2]— बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानं प्रवर्तकमिति। भोजनाद्यायासस्य चानिष्टस्य इष्टतृप्त्याद्यपेक्षया न बलवत्त्वम्, तृप्त्यादिफलोत्कर्षस्य तत्रानुभवसिद्धत्वात्। अत एवोत्कटेच्छापरनामधेया तत्र रुचिर्भवति, निकृष्टतया ज्ञाते फले तदसंभवात्। सा च रुचिरिष्टसाधनतावगत्या निष्पद्यते। तदुत्पादने च कर्तव्ये सतोऽसतो वा गुणस्य कथनेन बलवदनिष्टाननुबन्धित्वज्ञापने सति नान्तरीयकर्किंचिदनिष्टाधायकेऽपीष्टसाधने द्वेषनिरास इति लोकसिद्धमेतत् 'औषधं पिब, शिखा ते वर्धिष्यते' इत्यादौ। ततश्च विधीनां प्रवर्तकानां फलोत्कर्षकथनापेक्षाणाम्, अर्थवादानां च धर्मप्रमित्युपयोगेन सार्थक्यमपेक्षमाणानां श्रुतशब्दशक्तिविधया साक्षाद्धर्मप्रमितिजनने अक्षमाणां परंपरया च तज्जनने द्वारविशेषमपेक्षमाणानां परम्पराकाङ्क्षावशात् विध्यपेक्षितफलोत्कर्षापरनामधेयप्राशस्त्यलक्षकत्वमर्थवादानां पर्यवस्यति। स्वाध्यायविधिरेव च प्रयोजनवदर्थावबोधपर्यवसानं कृत्स्नस्य वेदस्य बोधयन् प्राशस्त्यतात्पर्यकत्वमर्थवादानां गमयति।

1. ब्रवीति — क. घ. 2. बलवत्त्वमनिष्ट विशेषणीयम् — ख.

तात्पर्यानुपपत्त्या च लक्षणेत्यन्यत्र विस्तरः। प्राशस्त्यप्रतिपादनप्रकारस्तु क्षिप्रदेवतासाध्यकं कर्म क्षिप्रमेव फलं दास्यति, अतः प्रशस्तोऽयं याग इत्येवं यथायथमूह्यः। अर्थवादपदानि च न प्रत्येकं प्राशस्त्यं लक्षयन्ति, पदान्तरवैयर्थ्यापत्तेः। किंतु पदसमुदायः। न च समुदायस्य कचिदप्यशक्तत्वात्स्वशक्यसंबन्धरूपलक्षणा कथं तत्र स्यादिति वाच्यम्। अवयवद्वारा शक्यसंबन्धस्य समुदायेऽपि सत्त्वात्। साक्षात्स्वावयवद्वारकत्वसाधारण्येन स्वनिष्ठशक्त्या स्वप्रतिपाद्यसंबन्ध एव हि लक्षणा; न तु साक्षादेव स्वनिष्ठशक्त्या स्वप्रतिपाद्यसंबन्धः, गौरवात्। अवयवशक्तिलभ्यैश्च वायुक्षेपिप्रत्वादिभिरर्थैर्वायुदेवताकयागीयप्राशस्त्यस्य उत्कृष्टफलाधायकत्वलक्षणस्य अविनाभावलक्षणो ज्ञाप्यज्ञापकभावः संबन्धः। वायुक्षेपिष्ठादिपदशक्यैरर्थैर्हि प्राशस्त्यं ज्ञाप्यते—क्षिप्रतमो महात्मा वायुरतिक्षिप्रमुत्कृष्टफलं दास्यति, अतः प्रशस्तं तद्देवताकं कर्मेति। ततश्च वायुक्षेपिष्ठादिपदेषु स्वशक्यार्थद्वारा प्राशस्त्यज्ञापकता तद्द्वारा तत्समुदायेष्विति सिद्धम्। तदेतत् 'तथा यूपस्य वेदिः' इत्यधिकरणे 'अर्धमन्तर्वेदि, अर्धं बहिर्वेदि' इति समुदायेन देशविशेषो लक्ष्यत इति भाष्यवार्तिकादिषु ध्वनितम्। स्पष्टीकृतं च चूडामणिदीक्षितैः। सैषा अर्थवादविध्युद्देशयोः पदैकवाक्यता विज्ञेया, अन्यतरविनाभूतयोस्तयोः साकाङ्क्षत्वात्। तथा च वक्ष्यति 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति। केचित्तु अङ्गप्रधानविध्युद्देशानामिव विधायकलिङादिभेदात्स्वार्थनिराकाङ्क्षतया प्रयोजनवशेन संबन्धाद्वाक्यैकवाक्यतेत्याहुः। निरर्थवादविधिप्रदेशेषु तु विधीनामेव द्वे शक्ती कल्पयामः। न च सर्वत्र विधेरेव शक्तिद्वयकल्पनोपपत्तौ किमर्थवादैरिति वाच्यम्। आम्नातस्यैव हि वयमर्थं वक्तुं प्रभवामः, नाम्नानं पर्यनुयोक्तुमित्यास्तां तावत्।

ननु पौरुषेयाण्येवार्थवादवाक्यानि वेदेषु प्रमादपठितानि कुतो न स्युः, तत्राह—

तुल्यं च सांप्रदायिकम् ॥ ८ ॥

चो ह्यर्थे। सांप्रदायिकं मन्वादिस्मर्तृपारंपर्यसिद्धं नियमाध्ययनम्, तदेतत् शिष्टवैदिकपरंपरया विधिभागानामर्थवादभागानां च तुल्यम् आद्रियमाणं दृश्यते। अतः अर्थवादानां पौरुषेयत्वं न युक्तमाश्रयितुम्॥

अथ 'शास्त्रदृष्टविरोधाच्च' इत्यादिना केषांचिदर्थवादानां स्वार्थेऽप्रामाण्यमुपक्षिप्तं परिहर्तुमुपक्षिपति—

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थ-स्त्वप्रयोगभूतस्तस्मादुपपद्यते ॥ ९ ॥

उक्ता अनुपपत्तिः 'स्तेनं मनः' इत्यादिवाक्यम् अप्राप्ता वेदितव्या। कुतः। हि यस्मात् विधिकल्पनया स्तेयादिप्रयोगे उच्यमाने विरोधः स्यात्। नैवमस्ति, विधिकल्पनाया अनभ्युपगमात्। तर्हि प्रतीयमानार्थे मनःस्तैन्यादावस्ति विरोध इत्यत आह.—शब्दार्थस्त्वप्रयोगभूत इति। शब्दतो वाच्यविधया प्रतीयमानो मनःस्तेयादिरर्थस्तु, अप्रयोगभूतः प्रयुज्यते अनेनेति प्रयोगः तात्पर्यनामधेयोऽभिप्रायविशेषः, तं प्राप्तो न भवतिः अविवक्षित इति यावत्। अतस्तद्विषये विरोधो नास्ति। विधेयस्तुतिमात्रपरत्वादिति भावः। तस्मात् अनुपपत्त्यभावात् 'स्तेनं मनः' इत्यादिवाक्यम् उपपद्यते संगतार्थकं भवति॥

ननु 'वेतसशाखया चावकाभिश्च विकर्षति' इत्यग्न्याख्यस्थण्डिलविकर्षणे वेतसशाखा अवकाश्च विधीयन्ते, आपश्च स्तूयन्ते 'आपो वै शान्ताः' इति। एवंजातीयकानां विधेयस्तावकत्वस्याप्यभावात्कथं धर्मप्रामाण्यम्। तत्राह—

गुणवादस्तु ॥ १० ॥

तुरवधारणे। गुणवादः गुणाभिधानमेव, स्तुतिरेवेति यावत्। अपां स्तुत्या हि तत्प्रभवा वेतसशाखा अवकाश्च स्तुता भवन्ति, यथा वंशे स्तुते देवदत्तादयः। गुणादागतश्च वादो गुणवादः। गौणः शब्द इति यावत्। आप इत्ययं शब्दः अप्कार्यत्वगुणयोगाद्वेतसशाखासु वर्तते; अतो विधेयस्तावकत्वमुपपद्यते। एवमन्यत्रापि यथायथमूह्यम्। उत्तरसूत्राणि गुणवादत्वस्यैव प्रपञ्चनपराणि॥

[1]'स्तेनं मनोऽनृतवादिनी वाक्' इत्यत्र गुणवादत्वमुपपादयति—

रूपात्प्रायात् ॥ ११ ॥

गुणवाद इत्यनुवर्तते। तच्चावर्तते। गुणाभिधानं स्तुतिरित्येकोऽर्थः, [2]गौणः शब्द इत्यन्योऽर्थः। 'हिरण्यं हस्ते भवत्यथ गृह्णाति' इत्यंशुग्रहग्रहणे विहितं हिरण्यं स्तूयते 'स्तेनं मनोऽनृतवादिनी वाक्' इति। तत्र स्तेनमिति प्रच्छन्नं रूपं लक्ष्यते। अनृतवादिनीति प्रायेण अनृतवदनस्वभावत्वं लक्ष्यते। मनः स्तेनवत्प्रच्छन्नम्, वाक् प्रायेण अनृतवदनशीला। हिरण्यं तु तद्दोषद्वयरहितमित्यभ्यर्हितमिति विधेयस्तुतिरुपपद्यते॥

'धूम एवाग्नेर्दिवा [3]ददृशे' इत्यत्र गुणवादत्वमाह—

दूरभूयस्त्वात् ॥ १२ ॥

1. तत्र स्तेनं मनो—क, ग, घ. 2. गुणशब्दः—क. 3. ददृश्रे—ख.

गुणवाद इत्यनुवर्तते । पूर्ववदर्थद्वयम् । 'धूम एवाग्नेर्दिवा ददृशे' इत्यत्र 'अग्निं वा वादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं ददृशे' इति पूर्वतरवाक्यात् दूरादित्यनुवर्तते । तत्र दूरादिति दूरभूयस्त्वे गौणम । दिवा अग्नेः धूमः अतिदूरादृश्यते । अतः 'उद्यन्तं वावादित्यमग्निरनुसमारोहति' इति पूर्ववाक्योक्तं युज्यते । तस्मात् 'अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येव सायं होतव्यम्, सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः' इति विहितसंसृष्टहोममन्त्रस्तुतिरुपपद्यत इति न विरोधः ।

अथ 'न वैतद्विद्म' इत्यत्र गुणवादत्वमाह—

रूयपराधात्कर्तुश्च पुत्रदर्शनात् ॥ १३ ॥

गुणवाद इत्यनुवर्तते । 'देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे । यस्यास्मि न तमन्तरेमि' इति 'प्रवरे प्रक्रियमाणे यजमानो जपति' इत्यत्र एतच्छ्रूयते 'न चैतद्विद्म' इत्यादि। न विद्म इति ब्राह्मण्यस्य दुर्ज्ञानत्वे गौणम । कुतः । रूयपराधात मातुर्व्यभिचारसंभवात । व्यभिचारश्च जारिणीजारयोरेव सुविज्ञानः । पुत्रस्योत्पादकं तु बीजिनं जारिणी जानाति न तु जारोऽपि, जारान्तरसंभवात । ततश्च 'सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः । ....विन्नास्वेष विधिः स्मृतः' इति स्मृतिसिद्धं ब्राह्मणात्स्वभार्यायां ब्राह्मण्यामुत्पन्नत्वलक्षणं ब्राह्मण्यं मातुरेवैकस्याः सुविज्ञानम । नन्वेवं सति 'श्राद्धे ब्राह्मणान्निमन्त्रयेत' इत्युपक्रम्य कुण्डगोलकयोर्निमन्त्रणनिषेधान्यथानुपपत्त्या ब्राह्मणमातापितृकत्वमेव ब्राह्मण्यम्, तत्तु क्षेत्रिणमादाय सर्वस्यापि सुविज्ञानमित्यत आह,—कर्तुश्च पुत्रदर्शनादिति । 'उत्पादयितुः पुत्र इति हि ब्राह्मणम्' इत्युपक्रम्य 'रेतोधाः पुत्रं नयति' इत्यादिना बीजावापस्य कर्तुर्जारस्यैव पुत्रः, न तु क्षेत्रिण इत्यर्थस्य [2]आपस्तम्बादिभिर्निर्धारणादित्यर्थः । श्राद्धीयब्राह्मणनिमन्त्रणे कुण्डगोलकनिषेधस्तु 'सगुणानामलाभे तु निमन्त्र्या निर्गुणा अपि' इति प्रसक्तत्वात्संगच्छत इति विज्ञानेश्वरादिभिरुक्तं परिहारं अनुक्तसमुच्चयार्थश्चकारः समुच्चिनोति । ततश्च स्वभार्यायां ब्राह्मण्यां ब्राह्मणादुत्पन्नत्वलक्षणमेव ब्राह्मण्यम । तच्च मात्रेकसमधिगम्यम् । इतरस्य तु 'दुर्विज्ञानम । तदेवंविधमपि ब्राह्मण्यमेतन्मन्त्रजपेन अब्राह्मणस्यापि संपद्यत इति स्तुतिरुपपाद्या ॥

अथ 'को हि तद्वेद' इत्यत्राह—

आकालिकेप्सा ॥ १४ ॥

1. अपराधात्. 2. आपस्तम्बादिभिः स्मर्तृभिः—क.

'आकालिकडाद्यन्तवचने' इति पाणिनिः। समानकालावाद्यन्तौ उत्पत्तिविनाशौ यस्येत्यर्थे समानकालशब्दात् ठञ् [1]प्रकृतेराकालादेशश्च निपात्यते। समानशब्द एकत्ववाची। उत्पन्नमात्रविनष्टमित्यर्थ इति तद्भाष्यकैयटयोः स्पष्टम्। इह तु आमुष्मिकफलापेक्षया आशुतरविनश्वरमैहिकं फलं लक्ष्यते। आप्तुमिच्छा ईप्सा। आकालिकस्य ईप्सा आकालिकेप्सा। गुणवाद इत्यनुवर्तते। पूर्ववदर्थद्वयम्। 'अमुष्मिन् लोके अस्ति वा न वा' इति संशयवचनमामुष्मिकस्य कालान्तरदेहान्तरभावित्वलक्षणपरोक्षत्वे गौणम्। विदिश्चेप्सायां गौणः। 'दिक्ष्वतीकाशान्करोति' इति सौमिकशालाया गवाक्षकरणं विहितम्। तस्य च धूमोपद्रवनिवृत्तिरैहिकं फलं सद्यः प्रत्यक्षम्। ज्योतिष्टोमकर्मजन्यमामुष्मिकं तु फलं कालान्तरदेहान्तरभावि परोक्षमेव। प्रत्यक्षत्वात्तात्कालिकत्वाच्च ऐहिक एव फले आगोपालाङ्गनमीप्सा भवति। अत ऐहिकं फलमनादृत्य परोक्षमामुष्मिकं फलं को वेद क ईप्सति। तस्मात्सद्यो धूमनिवृत्तिफलकमतीकाशकरणं श्रेष्ठमिति स्तुतिरुपपद्यते॥

अथ 'शोभतेऽस्य मुखं य एवं वेद' इत्यत्राह—

विद्याप्रशंसा॥ १५॥

गुणवाद इति पूर्ववत्। ब्राह्मणतो गर्गत्रिरात्रस्य ज्ञानादेव मुखशोभाफलं भवति चेत् तदनुष्ठानात्कीदृक्फलं भवेदित्येवं विद्यया ज्ञानेन गर्गत्रिरात्रस्य प्रशंसा क्रियते। यद्यपि पदपदार्थसंगमनव्याप्तक्षुब्धचित्ततया[2] तदानीं मुखवैवर्ण्यमस्ति, तथापि पदवाक्यन्यायविजृम्भितैः शिष्यस्पृहणीयैः शब्दैः शोभमानैर्मुखशोभावचनं गौणम्॥

'पूर्णाहुत्या सर्वान' इत्यत्राह—

सर्वत्वमाधिकारिकम्॥ १६॥

गुणवाद इति पूर्ववत्। तत्तत्सर्वफलसाधकसर्वक्रत्वपेक्षिताहवनीयादिनिष्पादकत्वात् सर्वफलार्थेत्याग्न्याधेयिकी पूर्णाहुतिः स्तूयते। वर्तमानत्वमविवक्षितम्। सर्वपदमाधिकारिकं तत्तदधिकृतसर्वक्रतुफलापेक्षं गौणम्। अतोऽश्वमेधादीनां राजन्यादिमात्राधिकृतत्वेऽपि न दोषः॥

फलवादत्वमभ्युपगम्य यदुक्तम 'अन्यानर्थक्यात्' इति तत्राह—

1. तत्प्रकृतेः—क. 2. व्याप्तचित्तक्षुब्धतया—ख.

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः [1]फलविशेषः स्यात् ॥ १७ ॥

स्वर्गादिफलस्य पूर्णाहुत्यग्निहोत्रादिगुरुलघुकर्मभिर्निष्पत्तिश्रवणात् तेषां कर्मणां परिमाणतः अल्पत्वभूयस्त्वतारतम्यात् फलविशेषः फलतारतम्यं स्यात्, लोकवत् लोके सेवादितारतम्यात्फलतारतम्यवत् । ततश्च पूर्णाहुत्या स्वर्गादिसर्वफलान्यल्पानि भवन्ति, अग्निहोत्रादितस्तु ततस्ततो भूयांसीत्युक्तं भवति ॥

'न पृथिव्याम्' इत्यत्र 'बबरः प्रावाहणिः' इत्यत्र चाह—

अन्त्ययोर्यथोक्तम् ॥ १८ ॥

पूर्वपक्षे 'अभागिप्रतिषेधात्' 'अनित्यसंयोगात्' इत्यन्तिमसूत्रोक्तयोर्दोषयोः उक्तप्रकारेण परिहारो वेदितव्यः ॥ तथा हि— 'स्तेनं मनोऽनृतवादिनी वाक्' इति वाङ्मनसयोर्निन्दा हिरण्यविधिस्तुत्यर्थेत्युक्तं प्राक् । एवमेव पृथिव्यां चयनप्रतिषेधो हिरण्यान्तर्हितचयनविधिस्तुत्यर्थः, 'नान्तरिक्षे न दिवि' इति तु नित्यानुवादः 'अग्निर्हिमस्य भेषजम्' इत्यादिवत् । तथा 'यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इति न्यायेन प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया चन्द्रसूर्यादिवद्वैदिकपदगोचराः सन्तो नैव वेदस्य नित्यतां विरुन्धत इत्यादि पूर्वपादे 'परं तु श्रुतिसामान्यम्' इत्यत्रोक्तम् । अतः 'बबरः प्रावाहणिः' इत्यादावप्यनित्यसंयोगदोषः परिहृतः । न च पौनरुक्त्यम्; चन्द्रसूर्यबबरादीनां प्रवाहनित्यतावचनस्यापि पूर्वपक्षदशायामप्रामाण्यास्कन्दितत्वेन तद्विषये अनित्यसंयोगदोषस्य पुनः समुन्मेषे सति सिद्धान्तदशायामर्थवादजातस्य साधितप्रामाण्यतया 'यथर्तावृतुलिङ्गानि—' इति बबरादीनां प्रवाहनित्यत्वेनानित्यसंयोगदोषपरिहारस्य पुनरुदयावश्यंभावात् । अत्र लोकवेदविरोधाभावे अर्थवादानां स्वार्थेऽपि प्रामाण्यम्, तद्विरोधे तु [2]स्तावकत्वमेव । 'विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥' ततश्च, अचिन्त्यशक्तिकपरमेश्वरतत्कर्तृकसृष्टिप्रलयादिकमप्यस्तीति वार्तिककारैर्वैदिकशिरोमणिभिः प्रपञ्चितम् । अनीश्वरवादिनस्तु प्राभाकरादयो वैदिकैरनादृत्याः । अत्रेदं वक्तव्यम्— 'स्वाध्यायोऽध्येतव्यः' इति वेदार्थज्ञानायाध्ययनविधिः । अत्र हि विधौ कर्मणि तव्यप्रत्ययः । उत्पाद्यत्वमाप्यत्वं संस्कार्यत्वं वा कर्मत्वम्, यथा

1. सारतोवाफल. 2. तु गौण्या—क.

'घटं करोति' 'ग्रामं गच्छति' 'व्रीहीन्प्रोक्षति' इति। अध्ययनं च भावार्थाधिकरणन्यायेन भावनायां करणत्वेनान्वेति। स्वाध्यायस्य च तेनोत्पाद्यत्वासंभवादाप्यत्वं संस्कार्यत्वं वा कर्मत्वं भवति। ततश्चाध्ययनेन स्वाध्यायं प्राप्नुयादिति वचनव्यक्तिः, अध्ययनेन स्वाध्यायं संस्कुर्यादिति वा। तत्राध्ययनेनावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतः अपुरुषार्थत्वात्, फलाकाङ्क्षायामधीतवेदजन्यधर्मावबोधस्य दृष्टस्य स्वर्गादिसाधनतया फलत्वात्, सति च संभवे अदृष्टकल्पनायोगात्, तमेव प्रयोजनवदर्थावबोधापरनामधेयमधीतस्वाध्यायः फलत्वेन गृह्णाति; अनारभ्याधीतस्याप्यध्ययनस्य सामर्थ्यादेव क्रतुविध्याक्षिप्तार्थज्ञाने उपयोगसंभवात्। ततश्चाधीतेन स्वाध्यायेनार्थावबोधं भावयेदिति पर्यवसन्नोऽर्थः। तत्रार्थवादानां वाच्यविधया धर्मप्रमितिजननशक्त्यभावेऽपि कृत्स्नस्य वेदस्य प्रयोजनवदर्थावबोधपर्यवसानं बोधयता अध्ययनविधिनैव विध्यपेक्षितप्राशस्त्यतात्पर्योन्नयनमुखेनोत्थापितलक्ष्यविधया तत्प्रतिपादनद्वारा विध्युपयोगात् धर्मप्रामाण्यमुपपद्यत इति वार्तिकादिग्रन्थेषु स्थितम्। वस्तुतस्तु स्वाध्यायविधिरक्षरानुपूर्व्यवधारणरूपग्रहणार्थः। अर्थावबोधस्तु गृहीतपदपदार्थसंगतिकस्य स्वत एव भवति, न तु तत्राध्ययनविधेर्व्यापारः, धर्मावबोधान्तत्वे अध्ययनाकात्स्न्र्यप्रसङ्गात्। ब्राह्मणस्य राजसूयाद्यभावेन तन्मन्त्रब्राह्मणाध्ययनस्य व्यर्थत्वात्। किंच, अग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात्प्राक्संध्योपासनवत् पित्राद्युपदेशतो ज्ञाने सति ज्ञातत्वादेव तदवबोधस्य काम्यत्वाभावात्फलत्वानुपपत्तिः। ततः प्राक्तदज्ञाने तु न स कामयितुं शक्यः, ज्ञात एवेच्छानियमात्। अथ सामान्यतो ज्ञाते विशिष्याज्ञाते तदिच्छा संभवति; पित्राद्युपदेशतो विशिष्यावगतेऽप्यौपदेशिकज्ञानस्य प्रामाण्यनिश्चयाय पुनर्बोधकामना च युक्तेति चेन्न। अग्निहोत्रादिविशेषज्ञानानां हि न तावदेकबुद्ध्या विशेषाकारेणोद्देशः, अनन्तत्वात्। सामान्याकारेणोद्देशे च सामान्यज्ञानमेव विधिफलं स्यात्, न तु विशेषज्ञानम्। अतः अर्थावबोधस्योद्देश्यत्वायोगान्न फलत्वम्। न चाध्ययनविधेरर्थावबोधान्तत्वाभावे वेदस्य कथं स्वार्थे तात्पर्यावगम इति वाच्यम्। उपक्रमादिसहकृतशब्दबलादेव तत्संभवात्। तस्मादध्ययनविधिरक्षरग्रहणमात्रफलक एव। तथा च पुरुषार्थानुशासनसूत्राणि वेदभाष्योदाहृतानि 'बोधान्तत्वेऽध्ययनाकात्स्न्र्यम्' 'सोऽकाम्यः प्राग्बोध्यभानाभानयोः' 'उद्देशायोगाच्च' इत्यादीनि। एवं च व्याकरणमहाभाष्ये पस्पशाह्निके 'ब्राह्मणेन निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च' इत्युदाहृतायां श्रुतौ ज्ञेयश्चेति पृथग्ज्ञानविधिरर्थवान्भवति। अध्ययनविधेर्बोधान्तत्वे तु तदानर्थक्यं स्पष्टमेव। निष्कारणः, कार्यते अनेनेति कारणं फलम्; दृष्टप्रयोजननिरपेक्षः शिक्षाव्याकरणादिषडङ्गसहितो वेदः अध्ययनेन ग्राह्यः तदर्थश्च प्रतिपत्तव्यः। सोऽयं धर्मो न दृष्टफलः, नित्य इति यावत्। तदभावे हि प्रत्यवायः स्मर्यते 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इत्यादि। न च गृहीतपदपदार्थसंगतिकस्य स्वत एव ज्ञानसंभवात्तद्विधिर्व्यर्थ इति वाच्यम्।

न ह्यवश्यं गृहीतपदपदार्थसंगतिकेन भाव्यमिति लोकतो लभ्यम्, अव्युत्पन्नानामपि बहुलमुपलम्भात्, पदपदार्थसंगतिग्रहणमात्रसत्त्वेऽप्यतिगहनवेदार्थज्ञानस्य न्यायविचारमन्तरा अनुपपत्तेश्च । अतः पदपदार्थसंगतिमधिगम्य न्यायविचारतो यथावद्वेदार्थज्ञानमात्रं नित्यतया विधीयते । तदपि स्वस्वपित्रादिक्रमागतवेदभागशाखामात्रस्य, नेतरस्य वेदभागस्य । स्वाध्यायविधौ स्वपदानर्थक्यापातात् । तथा च स्वशाखाया अध्ययनमर्थज्ञानं च नित्यम् । इतरशाखानां त्वध्ययनमर्थज्ञानं च क्रतुविधिप्रयुक्तमार्थिकमेव । न च तत्र स्वाध्यायविधेर्व्यापारः । एवं च स्वशाखायामपि [1]स्वाधिकृतकर्मविधिभागमात्रस्यार्थज्ञानेनापि कर्मसिद्धिरप्रत्यूहा । पुरुषस्तु परं प्रत्यवेष्यतीति तृतीये 'ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति' इत्यत्र भाष्यवार्तिकयोः स्पष्टम् । न च स्वाध्यायविधिगतस्वशब्दानुसारेण वेदोऽध्येय इति वेदशब्दस्य स्वशाखामात्रपरत्वेऽपि ज्ञेय इत्यंशे वेदशब्दस्य तथा संकोचे मानाभाव इति वाच्यम् । अध्येय इत्यत्रान्वितस्यैव वेदशब्दस्य स्वशाखामात्रपरतया निश्चितस्य ज्ञेय इत्यत्राप्यन्वयवशादेव तथा संकोचलाभात् । कृत्स्नवेदार्थज्ञानस्याध्ययनविधिप्रयुक्तत्वाभावादेव कल्पसूत्रप्रणयनमर्थवत् । उक्तं च भवस्वामिभाष्ये 'ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामपरिसमाप्तत्वादर्थस्य च दुर्बोधत्वादसर्वजनीनत्वाच्च संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्माण्यनुष्ठाय फलानि सर्वे प्राप्नुयुरिति कल्प आरब्ध आचार्येण' इति । किंचैवम् 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वापद्यते पापीयान्भवति प्रवाभीयते यातयामान्यस्य च्छन्दांसि भवन्ति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' इति ताण्डकतलवकारादिशाखासु मन्त्रप्रतिपाद्यदेवतानां विनियोजकब्राह्मणानां च स्मरणविधानं कृत्स्नवेदार्थज्ञानस्यावश्यकत्वेऽनर्थकं स्यात् । मन्त्रेषु देवतावगमस्तु कात्यायनादिप्रणीतसर्वानुक्रमणिकादिग्रन्थतो वेदार्थज्ञानाभावेऽपि सुलभ एव । विनियोजकब्राह्मणवाक्यज्ञानं च कल्पसूत्रतः सुलभमेव, नानाशाखागतविनियोजकब्राह्मणवाक्यसंग्रहात्मकत्वात्कल्पसूत्राणाम् । 'एवंविदमेवाध्वर्युं कुर्वीत नानेवंविदम्' 'एवंविदमेव होतारं कुर्वीत नानेवंविदम्' 'एवंविदमेवोद्गातारं कुर्वीत नानेवंविदम्' 'एवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदम्' इत्यादिवाजसनेयकादिशाखागतानि स्रुगादानादिब्राह्मणतदर्थविदामेवाध्वर्य्वादिवरणपराणि च कृत्स्नवेदार्थज्ञानस्यानावश्यकतां गमयन्ति । अत एव च कल्पसूत्रेषु सर्वाङ्गोपसंहरणाय प्रवृत्तेषु कृत्स्नवेदार्थज्ञानं कर्माधिकारिविशेषणतया नोपनिबद्धम् । किंच, ब्रह्ममीमांसायां तृतीयचतुर्थाद्याधिकरणे 'शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः' इति सूत्रेणात्मज्ञानं कर्मशेषभूतकर्तृद्वारा पर्णतादिवत्कर्माङ्गम् । 'तरति शोकमात्मवित्' इति फलश्रुतिस्तु अपापश्लोकश्रवणादिवदर्थवाद इति

1. स्वाधिकृतकर्मविभागमात्रस्य—ग; कर्मविधिमन्त्रभागस्य—क.

जैमिनिमतं पूर्वपक्षतयोद्भाव्य 'तद्वतो विधानात्' इति सूत्रान्तरेण 'आचार्यकुलाद्वेदमधीत्य' इति श्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिङ्गात्कर्माङ्गमात्मविद्येति स्वयं युक्त्यन्तरमुद्भाव्य 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' इति सिद्धान्तमुपक्षिप्य 'अध्ययनमात्रवतः' इति सूत्रेण आचार्यकुलाद्वेदमधीत्येति वाक्ये वेदाध्ययनमात्रवतः कर्म विधीयते, न तु तदर्थज्ञानवतः; येन कृत्स्नवेदार्थज्ञानवतः कर्मविधानादौपनिषदात्मज्ञानस्य कर्मशेषता स्यात्। क्रतुविधिप्रयुक्तार्थज्ञानं तु आर्थिकत्वान्न कर्माङ्गम्, व्रीह्यादिविधौ कर्षणादिवत्। एवं च क्रतुविधिभिर्यावदुपयुक्तवेदभागमात्रार्थज्ञानस्यापेक्षणान्न तद्विरुद्धनिर्गुणात्मज्ञानस्य कर्मशेषता युज्यत इत्यास्थितं भगवता बादरायणेन। तदेतद्भाष्ये भगवत्पादैस्तद्व्याख्यातृभिश्च वाचस्पतिमिश्रप्रभृतिभिर्बहुधा प्रपञ्चितमिति नेह तन्यते। किंच, 'न प्रथमयज्ञे प्रवृञ्ज्यात्प्रवृञ्ज्याद्वा' इत्युपक्रम्य 'योऽनूचानश्रोत्रियस्तस्य प्रवृञ्ज्यात्' इत्यापस्तम्बसत्याषाढभारद्वाजाद्युदाहृतबह्वृचब्राह्मणे 'एकां शाखामधीत्य श्रोत्रियो भवति' इति लक्षितश्रोत्रियस्य 'साङ्गाध्याय्यनूचानः' इति लक्षितानूचानस्य च प्रथमयज्ञे प्रवर्ग्यनियमविधानात्, अतथाविधस्य प्रथमयज्ञे प्रवर्ग्यानियमविधौ पर्यवसानावगमात्, कृत्स्नवेदार्थज्ञानस्य कर्मशेषता दूरापास्ता। ततश्च स्वाध्यायविधिः स्वशाखामात्राध्ययनं प्रयोजयति। ज्ञेयश्चेति विधिरपि स्वशाखामात्रार्थज्ञानस्य प्रयोजकः। तदनुवर्तनोल्लङ्घनयोः पुरुषस्याभ्युदयप्रत्यवायौ। क्रतुविधयस्तु यावदुपयुक्तवेदतदर्थावगममात्रेणापि कृतार्थाः कृत्स्नवेदतदर्थाधिगमे तावन्नैव व्याप्रियन्ते। एवं च अर्थवादविषये स्वाध्यायविधितः फलवदर्थपर्यवसानालाभात् तेषां विध्युद्देशाकाङ्क्षानुत्थानात् विध्यर्थवादानां परस्पराकाङ्क्षावशादेकवाक्यत्वमिति सिद्धान्तो वार्तिककाराद्युक्तोऽनुपपन्नः। अर्थवादानां स्तुतिपरतया विध्येकवाक्यता त्वन्यतराकाङ्क्षयैवोपपाद्या। तथाहि—यथा रक्तः पटो भवतीति वाक्ये पटो भवतीत्येतावति निराकाङ्क्षेऽपि रक्त इत्यस्य भवतिक्रियान्वयं विना [1]आनर्थक्यापत्त्या संनिधिपाठवैयर्थ्यापत्त्या च पटवाक्यस्थ रक्तपदे आकाङ्क्षोत्थितौ पटविशेषणसमर्पकतया रक्तपदं पटवाक्यान्तर्भावमापद्यते, तथार्थवादानां स्वार्थतो निराकाङ्क्षत्वेऽपि विधिप्रत्ययगम्यायाः शब्दभावनाया अंशत्रयमपेक्षमाणाया विधिप्रत्ययत एव भाव्यांशं पुरुषप्रवृत्तिं करणांशं शक्तिग्रहादिकं च व्याकरणादितो लब्धवत्यास्तृतीयांशं स्तुतिमपेक्षमाणायाः स्तुतिलाभमन्तरानुपपत्त्या विध्युद्देशसंनिध्यान्नानवैयर्थ्यापत्त्या[2] च अर्थवादानां विध्युद्देशाकाङ्क्षोत्तिष्ठति। तद्वशाच्च लक्षणया तेषां स्तुतिपरत्वमिति भाष्यानुयायी सुगमः पन्थाः। किंच 'औषधं पिब, शिखा ते वर्धिष्यते' इत्यादिलौकिकवाक्येष्विव 'स आत्मनो वपामुदखिदत्' 'गावो वा एतत्सत्रमासत' इत्यादावर्थवादवाक्येष्वपि असद्वृत्तावलम्बनेन केवलविधेयस्तुतिपरत्वम्, न तु स्वार्थ-

1. आनर्थक्यान्यथानुपपत्त्या—क, ख, ग. 2. वैयर्थ्यान्यथानुपपत्त्या—ख, ग.

परत्वमपि, तथा सत्यप्रामाण्यप्रसङ्गात् । न हि वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते । तथा च 'तत्सामान्यादितरेषु तथात्वम्' इति न्यायेन तदितरेषामपि 'वायुर्वै क्षेपिष्ठा' इत्यादयर्थवादानां न स्वार्थपरत्वम्, किंतु जहत्स्वार्थलक्षणया केवलविधेयस्तुतिपरत्वमिति प्रच्छन्नबौद्धाः केचिन्मीमांसकंमन्याः संगिरन्ते । वैदिकशिरोमणयो वार्तिककृतस्तु सर्वेष्वप्यर्थवादवाक्येषु अवयवार्थानतिक्रमेणैव अजहत्स्वार्थलक्षणया प्राशस्त्यपरत्वम्, 'स आत्मनो वपाम्—' इत्यत्रापि सर्गादौ परमेश्वर एव स्वमहिम्ना पशुरूपमन्यदेकं स्वीकृत्य तद्वपोत्कर्तनेन कर्म प्रायुङ्क्तेत्येवंप्रकारेण सर्वत्र स्वार्थे सत्यता उन्नेया; 'आत्मा वा इदमेक एवाग्र आसीत्' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यादयर्थवादवाक्यैरचिन्त्यशक्तिकपरमेश्वरतत्कर्तृकसृष्टिप्रलयाद्यङ्गीकारात्, 'आदित्यो यूपः' इत्यादावपि ऊर्ध्वत्वादिगुणयोगात्स्वार्थपरतापि; तथा च 'विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः' इति, मन्यन्ते । युक्तं चैतत्, 'गुणवादस्तु' 'रूपात्प्रायान' 'दूरभूयस्त्वात्' 'स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनात्' 'आकालिकेप्सा' इत्यादिभिरर्थवादाधिकरणगुणसूत्रैः 'स्तेनं मनः' इत्यादिषु गौण्या वृत्त्यावयवार्थपरत्वस्यापि प्रदर्शनात् । किंच अर्थवादानामवयवार्थपरत्वाभावे 'विधिशब्दाश्च' इति मन्त्राधिकरणस्थगुणसूत्रविरोधः । तत्र 'अग्ने गृहपते सुगृहपतिः' इत्यादिमन्त्रेषु 'शतं हिमाः' इत्याद्यंशानाम् 'शतं त्वा हेमन्तानिन्धिषीयेति वा वैतदाह' इत्यादिवाक्यशेषा मन्त्राणां विवक्षितार्थत्वे लिङ्गमिति व्यवस्थापनात् । किंच स्मृतिपादे यववराहाधिकरणविरोधः । तत्र यववराहवेतसशब्दानां क्रमेण प्रियङ्गुवायसजम्बूषु दीर्घशूकसूकरवञ्जुलेषु च लोके प्रयुज्यमानानामपि वेदे 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वैतसे कटे प्राजापत्यान्संचिनोति' इत्यत्र 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' 'वराहं गावोऽनुधावन्ति' 'अप्सुजो वेतसः' इति वाक्यशेषैर्दीर्घशूकसूकरवञ्जुलपरत्वव्यवस्थापनात् । किंच त्रिवृच्चर्वाद्यधिकरणविरोधः । तत्राश्वबालशब्दस्य 'यज्ञो वै देवेभ्योऽधो भूत्वापाक्रामत्; सोऽपः प्राविशत्; स बालधौ गृहीतः; स बलान्मुक्त्वा विवेश; ते बालाः काशा अभवन्' इति वाक्यशेषेण काशपरताव्यवस्थापनात् । किंच चित्राज्याधिकरणविरोधः । तत्र 'यदाजिमयुस्तदाज्यानामाज्यत्वम्' इत्याज्यशब्दनिर्वचनेन 'आपो वा ऋत्वियमार्च्छंस्तासां वायुः पृष्ठे व्यवर्तत' इत्यार्तवयुक्तानामपां वायुस्पर्शाद्रथन्तरादीनामुत्पत्तिप्रतिपादनेन स्पर्शजन्यं पृष्ठमिति निर्वचनेन च आज्यपृष्ठशब्दयोर्नामधेयत्वव्यवस्थापनात् । किंच 'तद्व्यपदेशं च' इत्यधिकरणविरोधः । तत्र 'यथा ह वै श्येनो निपत्यादत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इति वाक्यशेषसिद्धां गौणीं वृत्तिमाश्रित्य नामधेयत्वव्यवस्थापनात् । किंच नामधेयपादे 'वैश्वदेवे विकल्प इति चेत्' इत्यधिकरणविरोधः । तत्र 'यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इति निर्वचनमाश्रित्य वैश्वदेवश-

दस्य नामधेयत्वव्यवस्थापनात्। किंच तत्सिद्धयधिकरणविरोधः। तत्र 'यजमानः प्रस्तरः' ति यजमानशब्दस्य क्रतुनिर्वर्तकत्वगुणयोगाद्यौण्या वृत्त्या प्रस्तरे वृत्तेर्व्यवस्थापनात्। किंच जात्यधिकरणविरोधः। तत्र 'अग्निर्वै ब्राह्मणः' इति अग्निशब्दस्य 'स मुखतस्त्रिवृतं निरभिमीत तमग्निर्देवतान्वसृज्यत गायत्री च्छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणामजः पशूनाम्' इति मुखजात्वगुणयोगाद्यौण्या वृत्त्या ब्राह्मणे वृत्तेर्व्यवस्थापनात्। किंच सारूप्याधिकरणविरोधः। तत्र यजमानो यूपः' इति यजमानशब्दस्य ऊर्ध्वत्वगुणयोगाद्यौण्या वृत्त्या यूपे वृत्तेर्व्यवस्थापनात्। किंच शंसाधिकरणविरोधः। तत्र 'अपशवो वा अन्ये गोअश्वेभ्यः पशवः' इत्यपशुशब्दस्याप्राशस्त्यगुणयोगाद्यौण्या वृत्त्या अजादिपशुषु वृत्तेर्व्यवस्थापनात्। किंच 'संदिग्धेषु वाक्यशेषात्' इत्यधिकरणविरोधः। तत्र 'अक्ताः शर्करा उपदध्यात्' इति विधितः सामान्यावगतमञ्जनसाधनम् 'तेजो घृतम्' इति वाक्यशेषाद्घृते व्यवतिष्ठत इति व्यवस्थापनात्। एवमधिकरणान्तराणि बहूनि विरुध्येरन्। विस्तरभिया विरम्यते[1]। वृत्तमर्थवादाधिकरणम्।

अस्ति काम्यः पशुः 'सोमापौष्णं त्रैतमालभेत पशुकामः' इति। त्रिभिः सहजैः इतः प्रीतः यो वा तिस्रः पिबति। ततः स्वार्थिकोऽण्। तत्रेदमाम्नायते 'औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुद्धयै' इति। अस्मै इति षष्ठ्यर्थे चतुर्थी। अस्य यूपस्य ऊर्जा ऊर्म्रूपेण उदुम्बरेण प्रकृतिद्रव्येण ऊर्म्रूपान्पशूनाप्नोति। ऊर्क् बलं जीवनं वा। अत्र ऊर्ग्वा उदुम्बर इत्यादिराप्नोतीत्यन्तोऽर्थवादः, वैशब्दोपबन्धात् आप्नोतीति वर्तमानादेशाश्रयेति निर्विवादम्। औदुम्बरो यूपो भवति ऊर्जोऽवरुद्ध्या इति तु अप्राप्तत्वात्फलाय औदुम्बरताविधिः, उत अर्थवाद इति संशये पूर्वपक्षयति—

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १९ ॥

वाशब्दः प्रत्यवस्थाने। 'वायुर्वै क्षेपिष्ठा—' इत्यादीनामर्थवादत्वमस्तु। अयं तु फलाय विधिः स्यात्। कुतः, अपूर्वत्वात्। पूर्वं प्रापकं प्रमाणं यस्य नास्ति तदपूर्वम्। ऊर्गवरोधे फले औदुम्बरतायाः साधनस्य प्रमाणान्तरेणाप्राप्तत्वादित्यर्थः। अप्राप्तप्रापकत्वे च वाक्यमर्थवत्, नार्थवादत्वे। कुतः, वादमात्रं ह्यनर्थकम्। हि यस्मात् वादमात्रं कृत्स्नमर्थवादवाक्यम् अनर्थकप्रायम्; निरर्थवादवाक्यादपि प्रवृत्तिदर्शनात्। नन्वौदुम्बरताया: कथमूर्गवरोधं प्रति साधनतावगमः, कथं वा तत्र प्रवृत्तिः, इष्टसाधनतावगमकविधिप्रत्ययाभावादिति चेन्नैवम्। साध्यत्वाव्यभिचरिततादर्थ्यचतुर्थ्या साध्यत्वेन प्रतीतस्य ऊर्गवरोधस्य

२. विधिवाग्निगदाधिकरणम्।

1. विरुध्येरन्नित्यादि तत्र तत्र स्फुटं भविष्यति—क. 2. सहितः त्रीतः—क, ग.

साधनापेक्षतया तन्निर्वाहाय भवेदितिव्यत्ययेन तत्साधनताबोधकविधिप्रत्ययकल्पनया तदुपपत्तेः। ततश्च औदुम्बरतया ऊर्गवरोधं भावयेदिति वचनव्यक्तिः फलति ॥

ननु 'वादमात्रं ह्यनर्थकम्' इत्यनुपपन्नमित्याशङ्क्य निराकरोति—

[1]लोकवदिति चेन्न पूर्ववत्त्वात् ॥ २० ॥

सप्तम्यन्ताद्वतिः। इयं गौर्बहुक्षीरा जीवत्स्त्र्यपत्या नवप्रसूता क्रयणार्हा इत्यादिवाक्यं विधिप्रत्ययरहितं स्तुतिपरमेव प्रवर्तकतया सार्थकं दृश्यते लोके। तद्वदौदुम्बरो यूपो भवतीत्यारभ्य ऊर्जोऽवरुद्ध्या इत्यन्तं स्तुतिपरमेव सार्थकमस्त्विति चेन्न। कुतः, पूर्ववत्त्वात् प्रमाणान्तरविदितत्वादित्यर्थः। लोके बहुक्षीरत्वादिकं विद्यमानमेव क्रयणादिप्रवर्तकतया प्रत्यक्षसिद्धमिति तद्वाक्यं विधिप्रत्ययरहितं स्तुतिपरमपि प्रवर्तकं सत्सार्थकमिति युक्तम्। वेदे त्विहाविद्यमानमूर्गवरोधं फलम्, औदुम्बरतायां तत्साधनत्वं च प्रमाणान्तरानवगतमविद्यमानमेव वर्तमानतयावलम्ब्य क्रियमाणा स्तुतिः कथं प्रवर्तिका स्यादिति वैषम्यम्। अतः कालान्तरभाव्यूर्गवरोधफलसाधनताबोधनपर्यवसन्नं फलविधित्वमेवास्थेयम ॥

इति प्राप्ते सिद्धान्तयति—

उक्तं तु वाक्यशेषत्वम् ॥ २१ ॥

तुः पूर्वपक्षव्यावृत्तौ। विधिवाक्यशेषत्वमर्थवादानामुक्तं पूर्वाधिकरणे। तदिहापि प्रत्येतव्यम् ॥ तथा हि—तादर्थ्यचतुर्थी तावद्ब्राह्मणाय सूप इत्यादौ साध्यत्वं व्यभिचरति। अतो न तद्भाव्यकत्वमौदुम्बरतायाः सा गमयितुमीष्टे, येन तदन्यथानुपपत्त्या विधिः कल्प्येत। ततश्च यूपस्यौदुम्बरतायाः स्वतो भवनासंभवाद्भवतेरन्तर्भावितण्यर्थतामाश्रित्य भावयतीत्यर्थो वक्तव्यः। तत्र च औदुम्बरतैव संनिहितत्वाद्भाव्या स्यात् औदुम्बरं यूपं भावयतीति। न तूर्गवरोधः, व्यवहितत्वात्। न च औदुम्बरताया [2]अपुरुषार्थत्वान्न भाव्यत्वसंभव इति वाच्यम्। प्रवर्तनात्मकविधिप्रत्यये सति हि, अपुरुषार्थे पुरुषस्य प्रवर्तयितुमशक्यत्वात् ऊर्गवरोधफलसंबन्धः सिध्येत्। न चात्रास्ति विधिप्रत्ययः। तस्मादौदुम्बरो यूपो भवतीत्यादिः ऊर्जोऽवरुद्ध्या इत्यन्तोऽर्थवादः। अर्थवादानां च विधिवाक्यशेषत्वं पूर्वाधिकरणे निरूपितम्। अतोऽस्याप्यर्थवादस्य विध्यविनाभूतत्वादौदुम्बरं यूपं कुर्वीतेति विधिः कल्प्यः।

1. लोकवदिति चेत् ॥ २० ॥ न पूर्वत्वात् ॥ २१ ॥ 2. अपुरुषार्थत्वात्—ख, ग.

तदेतद्दृढयति—

विधिश्चानर्थकः क्वचित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्या-दितरेषु तथात्वम् ॥ २२ ॥

'अप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः' 'आपो वै शान्ताः शान्ताभिरेवास्य शुचं शमयति' इति क्वचिच्छाखायां श्रूयते । तत्राप्सुयोनिरश्वः कर्तव्यः अप्सुजो वेतसः कर्तव्य इति विधिरशक्यार्थकः । तस्माद्विधित्वासंभवात् शमयित्रीभिरद्भिरश्वस्य वेतसानां च संबन्धो यजमानस्य कष्टं शमयतीति स्तुतिः अस्माद्वाक्यात् प्रतीयेत ज्ञातव्या । तत्सामान्यात् विध्यसंभवतः स्तुतिसंभवतश्च तत्सादृश्यात् उक्तवाक्यसादृश्यात् इतरेषु औदुम्बरो यूपो भवतीत्यादिषु तथात्वं स्तुतिवादत्वं प्रत्येतव्यम् । इयांस्तु विशेषः । अप्सुयोनिरश्वः कर्तव्य इति विधिरशक्यत्वान्न संभवति । इह त्वौदुम्बरं यूपं कुर्वीतेति विधिकल्पना निर्बाधेति ॥

नन्वेवमर्थवादतो विधिकल्पने 'यो विदग्धः स नैर्ऋतः' इत्यादीनामपि विधिकल्पकता स्यादित्याक्षिप्य समाधत्ते—

प्रकरणे च संभवन्नपकर्षो न कल्पेत विध्या-नर्थक्यं हि तं प्रति ॥ २३ ॥

चोऽवधारणे । केवलस्तुतिवादत्वे सत्येव विदग्धस्य नैर्ऋतत्वनिन्दया 'तस्मादविदहता श्रृतं कृत्यः' इति विधेः शेषीभवन यो विदग्ध इति वाक्यशेषः । दर्शपूर्णमासयोः प्रकरणे इतिकर्तव्यताकाङ्क्षालक्षणे संभवन् लभ्यनिवेशः सन् अपकर्षः, कर्मणि घञ्, अपकृष्यमाणः, दर्शपूर्णमासाभ्यामन्यत्र विकृतिषु निविशमानो भवितुं न कल्पेत न समर्थो भवेत् । विधिकल्पकत्वे तु विकृतिष्वपकर्षः प्रसज्येतेति यावत् । कुतः, हि यस्मात् तं प्रति दर्शपूर्णमासकर्मविशेषं प्रति । दर्शपूर्णमासयोरिति यावत् । विध्यानर्थक्यम् 'यो विदग्धः स नैर्ऋतः' इति विधेरसंभवन्निवेशत्वम् । [1]'तस्मादविदहता श्रृतं कृत्यः' इत्यविदाहविधानेन 'यो विदग्धः' इत्यनुवादस्यासंभवात् । अतो महापितृयज्ञे 'विदह्यमानाः परिशेरते' इति विदग्धविषयतया अपकर्षः स्यात् । [2]अथ प्रकृतौ 'रक्षसां भागोऽसि' इति निरस्तो यस्तुषनिचयः नैर्ऋतः स विदग्धः कर्तव्य इति विधिकल्पनं तु

1. अत्राविदहता—क, घ. 2. 'अथ' इति ख, ग पुस्तकयोर्न दृश्यते ।

यत्तच्छब्दयोर्व्युत्क्रमप्रसङ्गादनुचितम् । एतत्सूचनार्थोऽपि चकारः । ततश्च बाधकसत्त्वान्नैवंजातीयकेभ्यो विधिकल्पनमिति भावः ॥

नन्वौदुम्बरं यूपं कुर्वीतेति कल्पितेऽपि विधौ आर्थवादिक ऊर्गवरोधः कुतो न फलत्वेन संबध्यते । तत्राह—

विधौ च वाक्यभेदः स्यात् ॥ २४ ॥

विधिकल्पनार्थम् 'ऊर्जोऽवरुद्ध्यै' इत्यस्य स्तुतौ तात्पर्यं वक्तव्यम । स्तुतिपरात्व तस्मात् कल्पिते विधौ पुनस्तस्यैव फलसंबन्धे व्यापारात् वाक्यस्य आवृत्तिः स्यात् । चकारोऽनुक्तसमुच्चयार्थः । तथा हि—न तावत्केवलौदुम्बरताया ऊर्गवरोधः फलम्, यूपपदस्यानर्थक्यात् । नापि केवलयूपस्य, औदुम्बरपदस्यानर्थक्यात् । नाप्युभयोः, औदुम्बरतया ऊर्गवरोधं कुर्यात् यूपेनोर्गवरोधं कुर्यादिति वाक्यभेदप्रसङ्गात् । विशिष्टविधौ तु गौरवम् । औदुम्बरत्वलक्षणविशेषणस्य[1] यूपलक्षणविशेष्यान्वयद्वारा फलान्वयस्य विशेष्यान्वयानन्तरभावित्वात् यूपेनोर्गवरोधं कुर्यादौदुम्बरत्वविशिष्टेनेति वाक्यभेदतादवस्थ्यं च । ततश्च औदुम्बरं यूपं कुर्वीतेति कल्पितो विधिः आर्थवादिकमूर्गवरोधं फलमुपेक्ष्य प्रकरणलब्धं क्रतूपकारमेव फलं स्वीकरोति, यूपश्च प्रकृतिप्राप्तोऽनूद्यत इति न तत्कृतोऽपि वाक्यभेदः । औदुम्बरत्वगुणस्य यूपाश्रयसंबन्धमात्रे वाक्यस्य व्यापारात् । तस्मान्नात्र कल्पिते विधौ ऊर्गवरोधः फलत्वेनान्वेतुमर्हतीति अर्थवाद एवेति स्थितम् । 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्' इति चातुर्थिकतृतीयाद्याधिकरणपुनरुक्तिस्तु तत्रैव परिहरिष्यते । इत्यौदुम्बराधिकरणम् ॥

वरुणप्रघासेषु 'करम्भपात्राणि जुहोति' इति प्रकृत्य श्रूयते 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इति । किमत्र होमसाधनत्वे अन्नकरणत्वस्य हेतुत्वं प्रतिपाद्यते उत अर्थवाद इति संशये पूर्वपक्षयति—

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २५ ॥

वाशब्दः प्रत्यवस्थाने । 'ऊर्जोऽवरुद्ध्यै' इत्यर्थवादोऽस्तु । अत्र त्वन्नकरणत्वं होमसाधनत्वे हेतुः प्रतिपाद्यः स्यात् । कुतः, अर्थवत्त्वोपपत्तिभ्याम् अर्थवत्त्वादुपपत्तेश्च, हिशब्दस्य हेत्वर्थकत्वात् निरर्थवादवाक्यादिव प्रवृत्त्युपपत्तेश्च । ननु हेतुवादत्वे आनर्थक्यम्, वैदिकार्थस्य हेत्वनपेक्षत्वात् । तेनेति तृतीयागम्यं साधक-

३. हेतुवन्निगदाधिकरणम् ।

1. विशेषणविशिष्टस्य—ख.

तमत्वलक्षणमन्नकरणत्वमपि शूर्पस्यानुपपन्नम्, अन्नोत्पत्तौ शूर्पस्य प्रकृष्टसाधकत्वाभावात्, ततोऽपि तण्डुलाधिश्रयणादेः प्रकृष्टत्वादित्यत्राप्येतदेवोत्तरमर्थवादत्वोपपत्तिभ्यामिति। अर्थशब्दाद्भूम्नि मतुप्। यतः शूर्पमन्नकरणम् अतस्तेन होतव्यमित्युक्त्या येन येनान्नं क्रियते तेन तेन दर्वीपिठरादिना होतव्यमित्यधिकार्थलाभेन हेतुवादस्य प्रयोजनवत्त्वात् प्रणाडिकया अन्नकरणत्वस्योपपत्तेश्च। स्तुतिपरत्वेऽपि शूर्पस्यान्नकरणताया एवमेवोपपाद्यत्वात्, अन्यथा स्तुतेर्निरवलम्बनत्वापत्तेः। शूर्पं होमसाधनम् अन्नकरणत्वादिति हेतुवादः। एवं च यद्यदन्नकरणं तेन तेन होतव्यमिति व्याप्तिं कल्पयति, तथाविधव्याप्तेर्वेदेषु प्रत्यक्षमनुपलम्भात् लोकतश्च तदवगमासंभवात्। ततश्च श्रुतानुमितैकदेशनिष्पन्नमीदृशं वाक्यजातं संपद्यते—शूर्पमन्नकरणत्वाद्धोमसाधनम्, यद्यदन्नकरणं तेन तेन होतव्यमिति। तत्र शूर्पमित्यादि प्रत्यक्षश्रुतम्, यद्यदन्नकरणमित्यादि त्वनुमितम्। तत्र प्रथमप्रवृत्तेन शूर्पवाक्येन प्रत्यक्षश्रुतेन शूर्पस्य होमसाधनत्वं प्राप्तम्। अनुमितं तु सामान्यव्याप्तिवचनं शूर्पदर्व्यादीनां सर्वेषामेवान्नकरणानां होमसाधनत्वं विदधत् प्राप्ताप्राप्तविवेकेन शूर्पव्यतिरिक्तदर्व्यादिमात्रे पर्यवस्यति। शूर्पांशे तु तस्यानुवादत्वमेव॥

तदेवं हेतुवादत्वे प्राप्ते सिद्धान्तयति—

स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य॥ २६॥

तुः पूर्वपक्षव्यावृत्तौ। 'शूर्पेण जुहोति' इति विधिः। 'तेन ह्यन्नं क्रियते' इति तस्य स्तुतिः, न तु हेतुवादः। कुतः, शब्दपूर्वत्वात् अन्नकरणत्वे होमसाधनतां प्रति हेतुत्वस्य वेदैकसमधिगम्यत्वात्। न हि तल्लोकतो गम्यम्। वेदश्च शूर्पस्य होमसाधनत्वे शूर्पगतमन्नकरणत्वं हेतुरित्याह, न तु दर्व्यादिगतमपि, तेनेति सर्वनाम्ना प्रकृतस्य शूर्पस्यैव परामर्शात्। अतस्तस्य च दर्व्यादिकस्यापि अचोदना यद्यदन्नकरणं तेन तेन होतव्यमिति विधेरभावः॥ यदि हि 'शूर्पेण जुहोति' इति प्रत्यक्षवचनं शूर्पविधायकं 'यद्यदन्नकरणं तेन तेन होतव्यम्' इति कल्पितवचनं च दर्व्यादिविधायकं शूर्पांशे चानुवादकमिति स्यात् तर्हि विषमशिष्टविकल्पापत्तिः। अतोऽधिकार्थलाभासंभवात् 'तेन ह्यन्नं क्रियते' इति शूर्पस्यैवान्नकरणत्वेन स्तुतिपरमित्येव युज्यते। न च विकल्पाभावे आनुमानिकं वचनं व्यर्थं स्यादिति तत्सार्थक्याय विषमशिष्टविकल्पोऽप्यङ्गीकार्य इति वाच्यम्। अपेक्षितस्तुतिसमर्पणेनैव सार्थक्ये संभवति [1]हेतुवादत्वस्यावश्यवक्तव्यत्वाभावेन तन्निर्वाहकसामान्यव्याप्तिवचनस्यानपेक्षितत्वात्। न च निरर्थवादविधेरिव शक्तिद्वयकल्पनोपपत्तौ किम-

1. हेतुवादस्य—ख, ग.

नेनार्थवादेनेति वाच्यम् । सार्थवादस्थले आम्नानबलेनार्थवादत एव प्ररोचनायाः संपाद्यतया तद्वैयर्थ्यकथनस्यायुक्तत्वात् । अतो न हेतुवादः ।

ननु, तेनेति न करणतृतीया, शूर्पापेक्षया तण्डुलाधिश्रयणादेरेव प्रकृष्टत्वात् । नापि हेतुतृतीया, वैतुष्यमुत्पाद्य आशुनष्टेऽपि शूर्पेऽन्नस्योत्पत्त्या कुलालजनकवदन्यथासिद्धत्वात् । तत्र अन्नं प्रति करणत्वेन हेतुत्वेन वा कथं शूर्पस्य स्तुतिः । क्रियत इति लटा वर्तमानान्नक्रियानिष्पादकत्वेन स्तुतिरपि शूर्पस्यानुपपन्ना, होमान्ननिष्पादनयोः शूर्पेण युगपत्कर्तुमशक्यत्वात् । इत्याक्षिप्य समाधत्ते—

[1]व्यर्थे स्तुतिरन्याय्येति चेदर्थस्तु विधिशेषत्वाद्यथा लोके ॥ २७ ॥

अर्थस्याभावो व्यर्थम् । अर्थाभावेऽव्ययीभावः । 'तृतीयासप्तम्योर्बहुलम्' इत्यम्भावाभावः । उक्तरीत्या स्तुत्यवलम्बनस्यार्थस्याभावे सति स्तुतिरनुचितेति चेन्मन्यसे तत्रोत्तरं ब्रूमः । अर्थस्तु, तुरवधारणे । गौणमन्नकरणत्वमत्र तृतीयार्थः स्तुत्यवलम्बनो भवत्येव । [2]विधिशेषत्वात् 'तेन ह्यन्नं क्रियत' इति स्तुतेः शूर्पविधिशेषत्वात् । विधावेव हि लक्षणा दुष्यति, 'न विधौ परः शब्दार्थः' इति न्यायात् । ततश्च गौणमन्नकरणत्वमादाय तेनेति स्तुतिरुपपद्यते । यथा तावल्लोके बलवानयं देवदत्तो यज्ञदत्तादीन्प्रसहत इति अतिशायने मतुबन्तो बलवच्छब्दः प्रकृष्टबले सिंहशार्दूलगजादौ मुख्यो[3] वर्तमानो यज्ञदत्तादीन्निकृष्टबलानपेक्ष्य देवदत्ते प्रयुज्यते, तद्वदिहाप्युत्कृष्टमन्नकरणमग्निसंयोगादिकमपेक्ष्य साधकतमत्वाभावेऽपि लाङ्गलादिकमपेक्ष्य प्रकृष्टमन्नसाधकत्वमवलम्ब्य तेनेति तृतीया प्रयुज्यते स्तोतुम् । वर्तमानापदेशोऽपि स्तुतौ न दुष्यति । प्रत्युत प्ररोचनामुपजनयन्सामञ्जस्यमश्नुते । न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने । इयं गौः पूर्वस्मिन्प्रसवे बहुक्षीरासीदिति वा आगामिनि प्रसवे बहुक्षीरा भविष्यतीति वा उक्तेऽपीदानीं बहुक्षीरेतिवत्प्ररोचनातिशयस्यादर्शनात् । हेतुवादत्वे तु लटा अन्ननिष्पत्तावर्तमानत्वं लक्षयित्वा भविष्यदन्ननिष्पत्तिकरणत्वस्य होमसाधनत्वे हेतुत्वमवलम्ब्य यद्यद्भविष्यदन्ननिष्पत्तिकरणं तेन तेन होतव्यमिति विधौ लक्षणा स्यात् । तद्वरं स्तुतौ लक्षणाश्रयणम् । अतो न हेतुवादः ॥

अभ्युपेत्याप्याह—

यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ २८ ॥

---

1. अन्यत्रेदं सूत्रं द्विधा विभज्य पठ्यते. 2. कुतः, विधि—क, घ. 3. मुख्ये—क, घ.

यद्यपि हेतुवादत्वमभ्युपगम्यते तथापि शूर्पमात्रे होमसाधनत्वं पर्यवस्येत् । कुतः, निर्देशात् तेनेति शूर्पगतस्यैवान्नकरणत्वस्य हेतुत्वनिर्देशात् । विशेषहेतुना च साध्यविशेष एवानुमीयते यथा तृणधूमात्तृणजन्माग्निः, तथा यतोऽयं बलवदुपध्मातोऽग्निरतस्तेन गृहं दग्धमित्युक्ते अग्निरेव बलवदुपध्मातो दहतीति गम्यते, न त्वनग्निरपि बलवदुपध्मातो दहतीति । नन्वन्नकरणत्वस्य शूर्पमात्रगतस्य होमसाधनत्वहेतुत्वकथनवैयर्थ्याद्दर्व्याद्यधिकार्थलाभाय सामान्यरूपेणान्नकरणत्वमात्रस्य हेतुत्वमिति चेद्भूषे, तत्र वदामः । अव्यवस्था विधीनां स्यात् । विधीनां विधेयानां दर्व्यादीनाम् अव्यवस्था अनवधारणं स्यात् । वस्तुमात्रस्य कयाचित्प्रणाड्या अन्ननिष्पत्तिकरणत्वाद्धोमसाधनत्वेन विधानं स्यादिति यावत् । तथा च 'करम्भपात्राणि जुहोति' इत्येतावतैव तत्सिद्धमित्यन्नकरणेन होतव्यमिति सामान्यविधिवैयर्थ्यम् । न च 'जुह्वा जुहोति' इति विहितजुहूनियमव्युदासात्तत्सार्थक्यमिति वाच्यम् । तर्हि करणेन होतव्यमित्येव सिद्धावन्नपदवैयर्थ्यात्, 'शूर्पेण जुहोति' इति वैयर्थ्याच्च । तस्मान्न हेतुवादोऽयम् । इति हेत्वधिकरणम् ॥

मन्त्राः किमुच्चारितमात्रा अविवक्षितार्था अदृष्टद्वारा क्रत्वङ्गतां भजन्ते, उतानुष्ठेयार्थप्रकाशनरूपदृष्टद्वारेति संशयः । तत्र पूर्वपक्षयति—

तदर्थशास्त्राद्वाक्यनियमाद्बुद्धशास्त्रादविद्यमानवचनादचेतनेऽर्थबन्धनादर्थविप्रतिषेधात्स्वाध्यायवदवचनादविज्ञेयादनित्यसंयोगान्मन्त्रानर्थक्यम् ॥ २९ ॥

'तदर्थशास्त्रवाक्यनियमबुद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनार्थविप्रतिषेधस्वाध्यायवदवचनाविज्ञेयानित्यसंयोगेभ्यो मन्त्रानर्थक्यम्' इति केचित्पठन्ति, भाष्ये 'तदर्थशास्त्रात्' इति

४. मन्त्रलिङ्गाधिकरणम् ।

सूत्रभङ्गस्तु व्याख्यासौकर्यायेति च वदन्ति । मन्त्रानर्थक्यमित्यावर्तते । एकं पूर्वपक्षमुख्ययुक्तिपरम् । तथा हि—नानुष्ठेयार्थप्रकाशकता मन्त्राणाम्; यतो मन्त्रानर्थक्यम् अनुष्ठेयार्थप्रकाशनार्थत्वे मन्त्राणां नित्यवदाम्नानानर्थक्यम्, विनियोजकब्राह्मणकल्पसूत्रानुपायान्तरेणाप्यनुष्ठेयार्थप्रकाशनसिद्धेः । न च मन्त्रेणैवानुष्ठेयार्थः प्रतिपत्तव्य इत्युपायनियमलाभाय नित्यवत्तदाम्नानमिति वाच्यम् । उपायनियमस्य दृष्टप्रयोजनाभावात् अदृष्टकल्पनस्य वासंभवात् । मन्त्रोच्चारणजन्यार्थप्रकाशनाश्रयनियमादृष्टकल्पनापेक्षया मन्त्रोच्चारणादेव तत्कल्पनौचित्यात् । किंच, स्वव्यापारगोचरे पुरुषो नियुज्यते मन्त्रेणैवेत्युपायनियमश्च उपायान्तरव्यावृत्त्यात्मा न साक्षात्पुरुषव्यापारगोचरः । मन्त्रोच्चारणमेव च साक्षात्पुरुषव्यापारगोचरः । यत्र

नियुज्यते तत्रैव फलाकाङ्क्षा भवतीत्युच्चारणादेवादृष्टं कल्पयितुमुचितम् । तस्मान्मन्त्रा अविवक्षितार्थाः उच्चारणमात्रेणादृष्टार्थाः । द्वितीयं मन्त्रानर्थक्यमित्येतत्तदर्थशास्त्रादिषु प्रत्येकं संबध्यते । ततश्च, तदर्थशास्त्रान्मन्त्रानर्थक्यं वाक्यनियमान्मन्त्रानर्थक्यमित्यादीनि नव वाक्यान्युक्तेऽर्थेऽभ्युच्चयपराणि । **तदर्थशास्त्रात् ।** मन्त्रानर्थक्यमिति संबध्यते । अर्थप्रकाशनरूपदृष्टप्रयोजनराहित्यं मन्त्राणाम् । कुतः, तदर्थशास्त्रात् मन्त्रप्रकाशितेऽर्थे मन्त्रविधायकशास्त्रात् । सन्ति हि अग्निचयने मन्त्रसमाम्नाये 'देवस्य त्वा' 'अभ्ररसि' 'बभ्ररसि' 'हस्त आधाय' इत्यादयः 'आददेऽङ्गिरःस्वत्' अन्ताश्चत्वारो मन्त्राः । अस्ति तेषां विनियोजकं शास्त्रम् 'चतुर्भिरभ्रिमादत्ते' इति । अभ्रिः कुद्दालविशेषः । मन्त्राणां विवक्षितार्थकत्वे अर्थप्रकाशनसामर्थ्यरूपलिङ्गादेव मन्त्रप्रकाश्ये अभ्रयादाने विनियोगस्य सिद्धत्वात्तद्विनियोजकमिदं शास्त्रमनर्थकं स्यात् । तथा तत्रैवास्ति मन्त्रः 'इमामगृभ्णन्रशनामृतस्य' इति । तस्य चेदं विनियोजकं शास्त्रम् 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति । अभिधीयते बध्यते अनयेत्यभिधानी रशना । मन्त्राणां विवक्षितार्थत्वे लिङ्गादेवाश्वरशनादानेऽस्यापि मन्त्रस्य विनियोगसिद्धेस्तद्विनियोजकमिदमनर्थकं स्यात् । न च गर्दभरशनापरिसंख्यानाय तदिति वाच्यम् । तर्हि 'अश्वाभिधानीमादत्ते' इत्यस्याश्वरशनाग्रहणरूपस्वार्थत्यागः गर्दभरशनाग्रहणनिवृत्तिरूपपरार्थस्वीकारः गर्दभरशनाग्रहणे प्राप्तस्य मन्त्रस्य बाधश्चेति त्रैदोष्यापत्तेः । तथा दार्शपूर्णमासिकमन्त्रसमाम्नाये पठितस्य 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्' इति मन्त्रस्य विनियोजकं शास्त्रं ब्राह्मणभागे पठ्यते 'उरुप्रथस्वेति पुरोडाशं प्रथयति यज्ञपतिमेव तत्प्रथयति' इति । तदिदं मन्त्राणां विवक्षितार्थत्वे लिङ्गादेव विनियोगसिद्धेरनर्थकं स्यात् । न च मन्त्रलिङ्गकल्पितविधेरयमर्थवाद इति वाच्यम् । ब्राह्मणभागे पठितस्यास्य वाक्यस्य मन्त्रसमाम्नायदेशकमन्त्रलिङ्गकल्पितविध्यपेक्षया भिन्नदेशत्वेन तदर्थवादत्वानुपपत्तेः । तस्मादविवक्षितार्था मन्त्राः । यद्यपि तदर्थशास्त्रविरोधो न सार्वत्रिकस्तथापि क्वचित्सत्त्वमुक्तन्याये लिङ्गमित्यदोषः । **वाक्यनियमात् ।** पदसमूहात्मकमन्त्रवाक्यस्य पदक्रमनियमादपि लिङ्गान्नार्थप्रकाशनार्थत्वं मन्त्राणाम्, व्युत्क्रमेण पाठेऽप्यर्थप्रकाशनसंभवात् । अदृष्टार्थत्वे तु यथाक्रममेव प्रयुक्ता अदृष्टमादधते, नान्यथेति क्रमनियमोऽर्थवान । क्रमनियमसहकृतोच्चारणकमन्त्रजन्यमर्थज्ञानमदृष्टायेति कल्पनापेक्षया तदुच्चारणस्यैव अदृष्टार्थत्वकल्पना लघीयसी । यद्यपि पदक्रमनियमोऽपि न सार्वत्रिकः, एकपदात्मकेषु 'भूः' इत्यादिमन्त्रेषु तदसंभवात्, तथापि क्वचित्तत्सत्त्वमुक्तन्याये लिङ्गमित्यदोषः । **बुद्धशास्त्रात् ।** बुद्धस्य शास्त्रान्तरेण ज्ञातस्यैवार्थस्य विषये शासनात् संप्रेषणात् अविवक्षितार्था मन्त्राः । अस्ति हि सोमे आग्नीध्रं प्रति संप्रैषः 'अग्नीदग्नीन्विहर' इति । तत्र 'आग्नीध्राद्विष्णियान्विहरति' इत्यग्निविहरणं सप्रकारमुपदिष्टम् । तत्र [1]संप्रेषमात्रान्न ज्ञातुं

1. सोमे प्रैषमात्रात्—क.

शक्यते। बुद्धे च तस्मिन्किं तज्ज्ञापनार्थसंप्रैषेण। संप्रैषजन्यादर्थज्ञानाददृष्टकल्पनात्तदुच्चारणादेव तत्कल्पनं लघीयः। बुद्धशासनमपि काचित्कमेव। **अविद्यमानवचनात्।** 'चत्वारि शृङ्गा त्रयो अस्य पादाः' इत्यविद्यमानस्य चतुःशृङ्गत्वाद्युपेतवृषभस्य प्रतिपादनादप्रामाण्यप्रसङ्गादविवक्षितार्थत्वम्। इदमपि काचित्कमेव। **अचेतनार्थबन्धनात्।** 'अर्थ' याच्ञायाम्। अर्थनमर्थः प्रार्थना। भावे घञ्। 'शृणोत ग्रावाणः' इत्यादिमन्त्रेषु अचेतने ग्रावादौ श्रवणादिप्रार्थनस्य निबन्धनात् प्रतिपादनात् अविवक्षितार्था मन्त्राः। इदमपि काचित्कमेव। क्वचिद्ग्राव्यपुस्तकेषु 'अचेतने अर्थबन्धनात्' इति अचेतनपदं सप्तम्यन्तं विगृह्यैव पठ्यते। तथा पाठः 'तदर्थशास्त्राद्वाक्यनियमात्' इत्येवं विगृह्य सूत्रपाठस्यानुगुणः। 'अचेतनार्थबन्धनात्' इति क्वचित्समस्तपाठो दृश्यते। स तु 'तदर्थशास्त्रवाक्यानियम' इत्यादिसमस्तपाठस्य न विरुध्यते। **अर्थाविप्रतिषेधात्।** 'अदितिर्द्यौरदितिरन्तरिक्षम्' इत्यदितेर्द्युत्वान्तरिक्षत्वाद्यर्थस्य विरोधादविवक्षितार्थता। इदमपि काचित्कमेव। **स्वाध्यायवदवचनात्।** स्वाध्यायशब्देन तदध्ययनं लक्ष्यते। षष्ठ्यन्ताद्वतिः। वचनशब्देन पुनर्वचनं लक्ष्यते। अर्थप्रकाशनमित्येति शेषः। अध्ययनकाले यावदक्षरानुपूर्व्यवधारणमध्ययनमुच्चारणाभ्यासात्मकं मन्त्राणां यथा, तद्वल्लौकिकावघातपेषणादिकर्मसु तत्तन्मन्त्रैरुच्चारितैरर्थप्रकाशनाभ्यासस्याभावादविवक्षितार्था मन्त्राः। नह्युच्चारणाभ्यासात्मकाध्ययनवदर्थप्रकाशनाभ्यासस्य विधिरस्ति। अर्थप्रकाशनस्यावश्यकत्वे हि तदभ्यासोऽपि विधातव्यः स्यात्। अतो मन्त्राणामुच्चारणाभ्यासमात्रस्य विधेरुच्चारणमेव प्रयोजनवदित्यवगच्छामः। **अविज्ञेयात्।** 'सृण्येव जर्भरी तुर्फरीतू' इत्यादिमन्त्राणां केषांचिदर्थस्य विज्ञातव्यस्याभावान्नार्थप्रकाशकत्वम्। **अनित्यसंयोगात्।** 'नमो वयं वैश्रवणाय कुर्महे' इत्यादिमन्त्रेषु क्वचिन अनित्यैः इदानींतनैः [1]विश्रवस्तदपत्यादिभिः वाच्यतया संयोगात् अविवक्षितार्थता। तथा च मन्त्राणां [2]रथघोषदुन्दुभिघोषादिवदनित्वेऽपि न शब्दविधया प्रमितिजनकत्वमिति पूर्वः पक्षः।

अथ सिद्धान्तयति—

अविशिष्टस्तु वाक्यार्थः ॥ ३० ॥

तुः पूर्वपक्षव्यावृत्तौ। वाक्यतः प्रतीयमानः क्रियाकारकसंबन्धो वाक्यार्थः। स तावल्लोके वेदे च अविशिष्टः। लोके चार्थप्रत्यायनायैव वाक्यानि प्रयुज्यन्ते। तथा वेदेऽपि मन्त्रवाक्यानि प्रत्यायनार्थान्येव भवितुमर्हन्ति। अदृष्टार्थत्वे हि अदृष्टस्य स्वरूपं, तस्योच्चारणफलत्वम्,

1. वैश्रवण—क, ख, ग. 2. जुह्वादिवत्—क.

उच्चारणे च तज्जननसामर्थ्यं कल्पनीयम् । प्रत्यायनार्थत्वे तु प्रत्यायनस्य स्वरूपम् उच्चारणे तज्जनकत्वं प्रत्यायने उच्चारणफलत्वं च तज्जन्यत्वात्सिद्धमिति लाघवम् । अर्थज्ञानस्योपायान्तरेणापि संभवे मन्त्राणां नित्यवदाम्नानं तु तत एव प्रतिपत्तव्यमिति नियमार्थत्वान्नानर्थकम् । न चैवं सति नियमस्य दृष्टप्रयोजनाभावादृष्टकल्पने गौरवं तुल्यमिति वाच्यम् । फलमुखगौरवस्यादोषत्वात् मन्त्राणामदृष्टार्थत्वप्रत्यायनार्थत्वविप्रतिपत्तौ ह्यदृष्टार्थत्वे गौरवं प्रत्यायनार्थत्वे च लाघवं युगपत्पर्यालोच्य लाघवानुगृहीतं प्रत्यायनार्थत्वमेव निश्चिनोति, गौरवदोषानुविद्धमदृष्टार्थत्वं तु परित्यजति तदेवं मन्त्रोच्चारणफलत्वे प्रत्यायनस्य सिद्धे प्रत्यायनस्योपायान्तरतोऽपि सिद्धया तन्नियमार्थत्वे स्थिते तन्नियमस्य कैमर्थ्याकाङ्क्षायामदृष्टार्थत्वे कल्प्यमाने गौरवमुन्मिषति । तच्च प्रत्यायनार्थतां न विरुणद्धि, [1]पूर्वप्रवृत्तलाघवानुगृहीतनिश्चयदशायामस्य गौरवस्यालब्धात्मकत्वात् । तथा च प्रत्यायनात्मकफलसिद्ध्यनन्तरोन्मेषकमिदं गौरवं न दोषावहम् । यथा चैतत्तथा 'स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्' इति षष्ठप्रथमान्याधिकरणे वक्ष्यते । यद्यपि प्रत्यायनाश्रयनियमो न पुरुषस्य साक्षाद्व्यापारगोचरः, तथापि दृष्टलाभानुरोधादुच्चारणादिप्रणाड्या पुरुषव्यापारगोचरस्यापि नियमस्याश्रयणं युज्यते ।

अथ तदर्थशास्त्रादिकं परिहरन्नभ्रयादाने तावदाह—

गुणार्थेन पुनः श्रुतिः ॥ ३१ ॥

अभ्रयादानमन्त्राणां चतुर्णां लिङ्गादेव विनियोगे सिद्धे 'तां चतुर्भिरादत्ते' इति पुनर्वचनं गुणार्थेन । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति तृतीया । चतुष्टयसंख्यारूपगुणलाभलक्षणप्रयोजनायेत्यर्थः । पाठादेव चतुष्टयसिद्धौ चतुर्भिरिति वचनं समुच्चयसिद्ध्यर्थम्, अन्यथा विकल्पः स्यादिति द्वादशस्य तृतीये 'संख्याविहितेषु समुच्चयोऽसंनिपातित्वात्' इत्यधिकरणे व्यक्तं भविष्यति ।

'इत्यश्वाभिधानीमादत्ते' इत्यत्राह-

परिसंख्या ॥ ३२ ॥

मन्त्रेणादाने गर्दभरशनाव्यावृत्तिरनेन विधिना लभ्यत इत्यर्थः । न च त्रैदोष्यप्रसङ्गः, फलतः परिसंख्याभ्युपगमात् । तथा हि — मन्त्रलिङ्गं [2]तावद्रशनाद्वयसाधारणमन्त्रविधायकश्रुति-

1. पूर्व...ग्रहकृततन्नि—क, घ. 2. ताव...साधारणं—क, ग.

कल्पनामुखेन गर्दभरशनायामपि मन्त्रविनियोजकमिति वक्तव्यम् । तत्र यावद्गर्दभरशनायां लिङ्गान्मन्त्रः प्राप्नोति, ततः प्रागेव 'इत्यश्वाभिधानीमादत्ते' इति प्रत्यक्षं वाक्यं झटितिप्रवृत्तिकमश्वरशनायां मन्त्रं प्रापयति । ततश्च मन्त्रस्य निराकाङ्क्षत्वान्न गर्दभरशनायां लिङ्गात्प्राप्तिसंभवः । अतो न प्राप्तबाधः । अश्वरशनायामेव मन्त्रविधानाच्च न स्वार्थत्यागः । अश्वरशनायां विनियोगे सति तत एव मन्त्रस्य शान्ताकाङ्क्षतया गर्दभरशनायां तन्निवृत्तेरार्थिकत्वान्न परार्थग्रहणम् । न चैवं सत्यपूर्वविधित्वापात इति वाच्यम् । यस्य हि विधेः प्रवृत्तिरप्राप्तप्रापणफला सोऽयमपूर्वविधिः, यथा 'व्रीहीन्प्रोक्षति' इति । यस्य तु विधेः प्रवृत्तिरप्राप्तांशपूरणफला स नियमविधिः, यथा 'व्रीहीनवहन्ति' इति । एतदभावेऽपि पुरोडाशविध्याक्षेपादेव अवघातः प्राप्नोति । किंतु नखविदलनादिकमपि पक्षे प्राप्नुयात् । ततश्च नखविदलनादिप्राप्तिपक्षे अवघातस्याप्राप्तत्वात्तदप्राप्तांशपूरणरूपनियम एव विधिप्रवृत्तेः फलम् । न च नखविदलनादिनिवृत्तिरेव फलं किं न स्यादिति वाच्यम् । एवं हि वदन् प्रष्टव्यः, अप्राप्तांशपूरणरूपनियमः किं नावघातविधितात्पर्यगोचरः उत तद्गोचर इति । नाद्यः, तर्ह्यवघातस्य प्राप्तावप्युपायान्तरस्य निराकरणासंभवात् । न द्वितीयः, नियमस्य विधितात्पर्यगोचरत्वे अर्थादेव तदितरनिवृत्तेः सिद्धतया तस्या विधिफलत्वासंभवात् । यस्य तु विधेः प्रवृत्तिरन्यनिवृत्तिफला स परिसंख्याविधिः, यथा 'इत्यश्वाभिधानीमादत्ते' इति । एतद्विध्यभावेऽप्यश्वरशनादाने मन्त्रस्य लिङ्गादेव नित्यप्राप्तत्वात् न तत्प्राप्तिर्नियमो वा फलम् । किंतु गर्दभरशनादाने मन्त्रनिवृत्तिरेव फलत्वेनाश्रीयते । तदेवं फलतः परिसंख्यानान्न त्रैदोष्यप्रसङ्ग इत्यन्यत्र विस्तरः ।

'उरू प्रथस्व' इत्यत्राह—

अर्थवादो वा ॥ ३३ ॥

वाशब्दोऽवधारणे । लिङ्गादेव सिद्धे 'उरू प्रथस्वेति पुरोडाशं प्रथयति' इति पुनः श्रवणम् 'यज्ञपतिमेव तत्प्रथयति' इत्यर्थवादार्थत्वादर्थवाद एव ॥ न चास्य मन्त्रसमाम्नायदेशकमन्त्रलिङ्गकल्प्यविध्यपेक्षया भिन्नदेशत्वात्कथं तदर्थवादत्वमिति वाच्यम् । मन्त्रलिङ्गकल्प्यविधिशेषत्वासंभवेऽपि प्रथनविधिशेषत्वोपपत्तेः । अत्र हि 'पुरोडाशं प्रथयति' इत्यंशेन पुरोडाशप्रथनं विधीयते । तच्च प्रथनमेतन्मन्त्रकरणकत्वाद्यज्ञपतेर्यजमानस्य प्रजापशुवृद्धिसाधनमिति स्तोतुं मन्त्रस्य पुनरुपादानमिति नानर्थक्यम् ।

'वाक्यनियमात्' इत्यत्राह—

अविरुद्धं परम् ॥ ३४ ॥

परं तदर्थशास्त्रादित्यनन्तरोक्तं वाक्यनियमादित्येतत् मन्त्राणामर्थप्रत्यायनार्थत्वे अविरुद्धम् । न च वयं मन्त्रगतपदक्रमादृष्टं निवारयामः । किं तर्हि, नियतपदक्रमकमन्त्रोच्चारणतो जायमानमर्थज्ञानमपि फलं दृष्टत्वान्नोपेक्षणीयमिति ब्रूमः । गौरवं तु फलमुखत्वान्न दुष्यति ॥

'बुद्धशास्त्रात्' इत्यत्राह—

[1]संप्रैषकर्मगर्हानुपालम्भः संस्कारत्वात् ॥ ३५ ॥

ज्ञातावपयेऽपि 'अग्नीदग्नीन्विहर' इत्यत्र संप्रैषमन्त्रे पुनर्ज्ञापनरूपकर्मणः गर्हा निन्दा या अभिहिता सा अनुपालम्भः अदोषः । कुतः, संस्कारत्वात्, संस्क्रियते अतिशयविशेषवत्तया क्रियते अनुष्ठेयोऽर्थः अनेनेति संस्कारः ; पुनर्ज्ञापनस्यादृष्टार्थत्वादिति यावत् । दृष्टसंभवे ह्यदृष्टकल्पना न युज्यते । न चात्र दृष्टं किंचिदुपलभामहे । तस्माददृष्टार्थः संप्रैषः ॥

'अविद्यमानवचनात्' इत्यत्र 'अचेतनेऽर्थबन्धनात्' इत्यत्र चाह—

अभिधानेऽर्थवादः ॥ ३६ ॥

अभिधीयते अनेनेति अभिधानो मन्त्रः । तस्मिन्नविद्यमानवचनत्वेनोदाहृते 'चत्वारि शृङ्गा' इति मन्त्रे, अचेतने अर्थबन्धनत्वेनोदाहृते 'शृणोत ग्रावाणः' इति मन्त्रे च अर्थवादः गौणस्यार्थस्याभिधानम् ॥ तथा हि— अस्य यज्ञस्य होत्रध्वर्युब्रह्मोद्गातारो महर्त्विजश्चत्वारि शृङ्गाणि । प्रातर्माध्यंदिनतृतीयसवनानि त्रयः पादाः । यजमानः पत्नी च द्वे शिरसी । गायत्र्यादिसप्तच्छन्दांसि सप्त हस्ताः । त्रिधा बद्धः त्रिभिर्वेदैर्विहितः अस्य यजमानस्य वृषभः कामानां वर्षिता रोरवीति स्तोत्रशस्त्रादिशब्दैर्गर्जति । सोऽयं यज्ञः महः महान् पाकयज्ञहविर्यज्ञसोमयज्ञभेदैर्विस्तृतः देवः द्योतमानः मर्त्यान् मनुष्यान् आविवेश अधिकारितया स्वीकृतवान, इत्येवं रूपकेण यज्ञः स्तूयते 'चक्रवाकस्तनी हंसदन्ता शैवलकेशिनी । काशाम्बरा फेनहासा नदी कापि विराजते' इत्यादिवत् । 'शृणोत ग्रावाणः' इत्यत्रापि ग्रावाणोऽपि शृण्वन्ति, किमुत विद्वांस इति कर्मोत्साहनार्थं चैतन्यमारोप्य गुणवादेनापि दृष्टार्थत्वोपपत्तौ नोच्चारणमात्रादृष्टकल्पनोचिता । वार्तिकाभिमतदेवताचैतन्यपक्षे तु ग्रावशब्दस्तदभिमानिदेवताविशेषे गौण इति निर्बाधम् ।

'अर्थविप्रतिषेधात्' इत्यत्राह —

गुणादविप्रतिषेधः स्यात् ॥ ३७ ॥

1. संप्रैषे कर्म &c. ; संप्रैषकर्मणि &c.

'अदितिर्द्यौः' इत्यत्र अविप्रतिषेधः अविरोधः स्यात्, गुणवादात् 'त्वमेव माता च पिता त्वमेव' इत्यादिवत्स्तुत्यर्थमारोपितद्युत्वादिगुणकथनादित्यर्थः ॥

'स्वाध्यायवदवचनात्' इत्यत्राह—

विद्यावचनमसंयोगात् ॥ ३८ ॥

विद्यायाः अर्थप्रकाशनस्य अवचनम् अध्ययनवदनभ्यासः मन्त्राणामविवक्षितार्थत्वे लिङ्गं न भवति । कुतः, असंयोगात् तदानीं लौकिकावघातादिक्रियायाः संनिहितत्वेऽपि तस्या यज्ञसंयोगाभावात् । 'यज्ञकर्म प्रधानम्' इति नवमाद्याधिकरणन्यायेन यज्ञसंयुक्ताया एव अवघातादिक्रियाया मन्त्रप्रकाश्यत्वात् ॥

'अविज्ञेयात्' इत्यत्राह—

सतः परमविज्ञानम् ॥ ३९ ॥

परमित्यव्ययं युक्तमित्यर्थे 'खलः प्रमाद्यतु परं सज्जने तदसांप्रतम्' इति यथा । 'सृण्येव जर्भरी' इत्यादिमन्त्रेषु सतः विद्यमानस्यैवार्थस्य तज्ज्ञानोपायभूतनिगमनिरुक्तव्याकरणाद्यध्ययनाभावे सति युक्तमविज्ञानम् । नैतावता तदर्थस्यासत्यत्वं वक्तुं शक्यम्, 'न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति' इति न्यायात् ॥ अधीतनिगमनिरुक्तव्याकरणादिकलापस्य सुलभो हि तत्रार्थावबोधः । तथा हि—'उभाउनूनन्तदिदर्थयेथे' इति सूक्तमाश्विनम्, 'अश्विनोः काममप्रा' इति सूक्तान्ते उपसंहारात् । तत्रेयमृगाम्नायते 'सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी फर्फरीका[1]। उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु' इति । सृणिरङ्कुशः । तत्र साधू सृण्या गजौ । प्रथमाद्विवचनस्य आकारश्छान्दसः । ताविव बलवन्तौ । जर्भरी । भृञो यङन्तात्पचाद्यच् । यङो लुक् । छान्दसोऽभ्यासस्य जकारो विभक्तेरीकारश्च । स्वानुग्राह्याणामतिशयेन भर्तारौ । तुर्फरीतू शत्रूणां हिंसितारौ । 'तुर्फ' हिंसायाम् । औणादिकं रूपम् । नैतोशेव । नितोशतिर्वधार्थकः । पचाद्यजन्तात्स्वार्थे अण् । प्रथमाद्विवचनस्याकारश्छान्दसः । योधाविव तुर्फरीतू इत्यन्वयः । तुर्फरी त्वरमाणौ । त्वरेरौणादिकं रूपम् । प्रथमाद्विवचनस्य ईकारश्छान्दसः । फर्फरीका शोभमानौ । फर्फरौणादिकं रूपम् । प्रथमाद्विवचनस्याकारश्छान्दसः । उदन्यजा । उदन्या पिपासा चातकस्य विवक्षिता । तया च प्रावृट्कालो लक्ष्यते । प्रावृषि जातौ । विभक्तेराकारश्छान्दसः । जेमना जेमानौ उदकलाभेन पिपासाया जेतारौ । छान्दसं रूपम् । मदेरू मत्तौ चातकाविव स्थितौ । ता

1. फर्फरीका—इति ऋग्वेदपुस्तकेषु दृश्यते ।

तौ । विभक्तेराकारश्छान्दसः । प्रसिद्धौ युवां, मे मम, जरायु जराधर्मकं मरायु मरणधर्मकं शरीरम् अजरं जरामरणरहितं कुरुतमिति ।

'अनित्यसंयोगात्' इत्यत्राह—

उक्तश्चानित्यसंयोगः ॥ ४० ॥

प्रतियुगमनुवर्तमाना वैश्रवणादयः प्रवाहनित्यतया नैव वेदस्य अनित्यतामापादयन्तीत्येवं प्रथमे पादे 'परं तु श्रुतिसामान्यमात्रम्' इत्यत्र अनित्यसंयोगः अदोषत्वेनोक्तः ॥

तदेवं मन्त्राणां विवक्षितार्थत्वे न्यायमुपन्यस्य बाधकानि च लिङ्गानि शिथिलीकृत्य साधकमपि लिङ्गमस्तीत्याह—

लिङ्गोपदेशश्च तदर्थवत्[1] ॥ ४१ ॥

चकार उक्तसमुच्चये । 'आग्नेय्यर्चाग्नीध्रमुपतिष्ठते' इत्यादौ आग्नेयीत्वादिविशेषणोपादानेन मन्त्राणामुपदेशोऽपि विधिरपि, तन मन्त्रजातम् अर्थवत् विवक्षितार्थकमिति गमयति । अविवक्षितार्थकत्वे हि 'आग्नेय्या' इत्येवं देवतातद्धितनिर्देशोऽनुपपन्नः स्यात् । मन्त्रान्प्रति हि देवतात्वं तत्प्रतिपाद्यत्वमेव, न तु जातिविशेषः । तथा सत्यौषसं[2] सूक्तं पित्र्यं सूक्तमित्यादौ देवतातद्धितानुपपत्तेः ॥

मन्त्राणां विवक्षितार्थकत्वे लिङ्गान्तरमाह—

ऊहः ॥ ४२ ॥

चेत्यनुवर्तते । प्रकृतावाम्नातमन्त्रगतपदस्य विकृतावर्थान्तराभिधानाय तदुचितपदान्तरप्रक्षेप ऊहः । सोऽपि तावत्कचित्प्रतिपिध्यमानो मन्त्राणां विवक्षितार्थत्वे लिङ्गम् ॥ तथा हि— अस्ति ज्योतिष्टोमे अग्नीषोमीयपशौ अद्भिर्गुनाम कश्चित्प्रैषः 'दैव्याः शमितारः' इत्यादिः । तत्रैवं पठ्यते 'अन्वेनं माता मन्यतामनु पिता' इति । एनं संज्ञपनाय नीयमानं पशुं तस्य पिता अनुमन्यतां माता चानुमन्यतामित्यर्थः । तत्रेदमामनन्ति 'न माता वर्धते न पिता' इति । तत्र पशुमातापित्रोः शरीरस्य वृद्धिरशक्यत्वान्न निषेद्धुं शक्यते । अतस्तत्प्रतिपादकस्य मातृशब्दस्य पितृशब्द-

1. तदर्थत्वात्. 2. औषधं– क, ख, ग.

च वृद्धिः प्रतिषेद्धव्या। तद्वृद्धिश्च द्विबहुपशुषु विकृतिषु प्रसक्तास्ति। सा च न वर्णान्तरोपजन-
तथा सति पदान्तरत्वापातात्। नाप्युच्चैरुच्चारणात्, उच्चैस्त्वस्य नादधर्मत्वेन शब्दवृद्धावु-
पयोगात्। अतो द्विबहुपशुषु विकृतिषु 'एनम्' इत्यस्य 'एनौ' 'एनान' इतिवत् मातृशब्दस्य
पितृशब्दस्य च द्विवचनबहुवचनान्तत्वेन अर्थगताधिक्यद्वारा शब्दवृद्धिरूप ऊहः प्रसक्तः प्रतिषिध्यत
इति वक्तव्यम्। प्रसक्तिश्च मातृशब्दस्य पितृशब्दस्य च प्रकृतौ विवक्षितार्थत्वे सत्येव घटते, नान्यथा।
क्वचिदूहप्रतिषेधश्च सर्वेषां मन्त्राणां विवक्षितार्थत्वं गमयति। अधिकरणप्रयोजनपरं चेदं सूत्रम्।
मन्त्राणां विवक्षितार्थत्वे सत्येव विकृतिषु तदर्थाभिधाननिबन्धन ऊहः सिध्यति, नान्यथेत्यर्थः।
अत्र 'तस्माद्दधं नोहेत्' इत्यप्युदाहार्यम।

लिङ्गान्तरमाह—

विधिशब्दाश्च ॥ ४३ ॥

चशब्द उक्तसमुच्चये। तदर्थवदित्यनुषज्यते। विधिः विधानं व्याख्यानं तदर्थाः शब्दा
मन्त्रव्याख्यानाय प्रवृत्ता वाक्यशेषा अपि तत् मन्त्रजातं विवक्षितार्थमिति गमयन्ति। [1]दर्शपूर्ण-
मासयोर्गार्हपत्योपस्थाने विनियुक्तोऽस्ति मन्त्रः 'अग्ने गृहपते' इत्यादिः। तत्र 'शतं हिमाः'
इति पठ्यते। तदेतत्साकाङ्क्षम्। हिमा इति पदं च दुर्बोधार्थकम्। तदेतद्वाक्यशेषो व्याचष्टे
'शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह' इति। 'वाव' इति वाक्यालंकारे। हेमन्तानिति
संवत्सरोपलक्षणम्। शतं संवत्सरांस्त्वां परिचरेयमिति मन्त्र आहेति तदर्थः। मन्त्राणामवि-
वक्षितार्थत्वे तु तद्व्याख्यानासांगत्यं स्पष्टमेव। तस्माद्विवक्षितार्था मन्त्राः। एवं च मन्त्राणां
श्रुतिलिङ्गादिप्रमाणप्राप्तक्रत्वङ्गभावानां व्यापारं विना स्वरूपेण क्रत्वङ्गत्वानुपपत्तेः व्यापाराकाङ्क्षा-
मुच्चारणमदृष्टार्थत्वादुपेक्ष्य अर्थाभिधानमेव शाब्दबोधरूपमनुष्ठेयार्थस्मरणमनुष्ठानरूपदृष्टप्रयो-
जनार्थत्वाद्व्यापारत्वेनाङ्गीक्रियते। तदेतत् 'अग्नये जुष्टं निर्वपामि' इत्यादिकरणमन्त्रेषु सूपपादम्।
एवं च 'तां चतुर्भिरादत्ते' इत्यादितृतीयाविभक्तिरुपपन्ना भवति। यत्र तु स्वरसतो नानुष्ठेय-
क्रियावगतिः, अथ च विनियुज्यते 'इषे त्वोर्जे त्वेति शाखामाच्छिनत्ति' इत्यादिना; तत्रापि
'छिनद्मि' इत्यध्याहारेणानुष्ठेयक्रियाभिधानं संभावनीयम्। क्रियमाणानुवादिषु 'युवा सुवासाः'
इत्यादिषु यूपपरिव्याणादिक्रियाया दीर्घकालव्यासक्तत्वेन कदाचिन्मध्ये 'परिवीरसि' इति परिव्या-
मन्त्रजन्यस्मरणविच्छेदे प्रसक्ते सति तत्स्मृतिदार्ढ्यार्थं स्मारकापेक्षायामनुष्ठेयस्मृतिदार्ढ्यहेतुत्वेन
मन्त्रार्थाभिधानमर्थवत्। कर्मणः स्मारकानपेक्षायामपि मन्त्राकाङ्क्षयैव तदाकाङ्क्षोत्थापनान्न दोषः।
एव 'युवा सुवासाः परिवीत आगादित्यन्वाह' इत्यादिविनियोगवचने आहेत्युपपद्यते। तस्य

1. तथाहि—दर्श...घ.

ब्रूआदेशत्वात्, [1]ब्रूञश्चाभिधानार्थत्वात्, 'ब्रूञ् व्यक्तायां वाचि' इति स्मरणात्, वचेश्च परिभाषणार्थत्वात्। परिभाषणं चाभिधानम्। 'अग्ने महाँ असीत्याह' इत्यादिब्राह्मणेषु आहशब्दोपनिबन्धात्तथाविधमन्त्राणामप्यभिधानार्थता। तदुक्तं तन्त्रसारे 'इत्याहोपनिबन्धश्च मन्त्राणां दृश्यते विधिः। ब्रूआदेशश्चाहशब्दः सोऽभिधानाभिधायकः॥' इति। तत्र 'अग्नेरहं देवयज्ययान्नादो भूयासम्' इति हुतानुमन्त्रणादिमन्त्रेषु कृतस्य यागादेरकृतत्वशङ्काविच्छेदाय कृतत्वप्रत्यवेक्षार्थापेक्षितानुष्ठितकर्मस्मृतिदार्ढ्यहेतुत्वकल्पनादभिधानस्य दृष्टार्थता। यत्र तु 'यज्ञस्य घोषदसि' इत्यादिगार्हपत्याभिमन्त्रणादिमन्त्रेष्वर्थाभिधाने किंचिदपि न दृष्टमुपलभ्यते, तत्रादृष्टमेव कल्प्यते। नैतावतैषां[2] दृष्टार्थत्वहानिः, अर्थाभिधानमादाय तदुपपत्तेः। न च तेषामुच्चारितमात्राणां साक्षादेवादृष्टार्थत्वमस्तु, किमर्थाभिधानस्य द्वारत्वकल्पनयेति वाच्यम्। 'अनुमन्त्रयते' इत्यादिश्रुतिबलादेव तदर्थाभिधानस्यावश्यकत्वात्। अत एव 'मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्॥ उद्देश्याभिमुखत्वे तु स्यात्तदेवाभिमन्त्रणम्। उपस्थितिस्तु बोधः स्याद्बोधान्तोच्चारणं जपः॥' इति तल्लक्षणमाहुः। ये तूपस्थानं समीपावस्थानमिति मन्यन्ते, ते 'इति गार्हपत्यमुपतिष्ठते' इत्यादिद्वितीयाविरोधादुपेक्ष्याः। इति मन्त्रेण गार्हपत्यं जानीयादित्यर्थः। स्तोत्रशस्त्रादिमन्त्राणामपि स्तौतिशंसतिशब्दाभ्यामभिधानार्थता। प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तुतिः। अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रमिति प्रसिद्धेः। यद्यपि स्तुतशस्त्राधिकरणे स्तोत्रशस्त्रयोरदृष्टार्थत्वं वक्ष्यते, तथापि तयोरभिधानात्मकयोरदृष्टार्थत्वेऽपि तन्मन्त्राणामभिधानरूपदृष्टार्थत्वं न विरुध्यते। हुंफडादिस्तोभानामपि कात्यायनादिकृतस्तोभभाष्यरीत्या अर्थाभिधानार्थता। अभिधानं तु [3]स्तोत्रशस्त्रादिवददृष्टार्थम्। यद्यपि नवमे स्तोभानामनर्थकत्वं वक्ष्यते, तथापि सामयोनिभूतया ऋचा एकवाक्यत्वाभावाभिप्रायकं तदित्यदोषः। तदेवं कृत्स्नस्य मन्त्रभागस्य विवक्षितार्थत्वं सिद्धम्। अत्रेदं प्रतिभाति। अस्मिन्नधिकरणे तदर्थशास्त्रादित्यादिपञ्चदशभिः सूत्रैर्मन्त्रा अर्थप्रत्यायका इत्येतावदवगतम्। मन्त्रार्थप्रतिपत्तिः मन्त्रप्रयोक्तुर्वा मन्त्रश्रोतुर्वेत्येतत्तु सूत्राक्षरतः स्पष्टं न निर्धारितम्। तत्रानुष्ठानहेतुभूतानुष्ठेयस्मरणार्थत्वं करणमन्त्राणां वदन्तो भाष्यवार्तिकादिकृतो मन्त्रप्रयोक्तुरेव मन्त्रजन्यं शाब्दबोधं मन्यन्ते। तत्तु वयं न मृष्यामहे, किंतु श्रोतुरेव मन्यामहे। शब्दोच्चारणस्य परं प्रत्येव शाब्दबोधजनकत्वस्वाभाव्यात्। न हि स्वस्मिन्नेव शाब्दबोधाय वाक्यप्रयोगोऽर्थवान्भवति, वक्तुस्तदर्थावबोधस्य शब्दप्रयोगात्पूर्वमवश्यं भावित्वात्। न ह्यबुद्धेऽर्थे वाक्यरचना युज्यते। सूत्रकारोऽपि 'अविशिष्टस्तु वाक्यार्थः' इति लौकिकस्य वैदिकस्य च वाक्यस्य अर्थावबोधं निर्विशेषं ब्रुवन् श्रोतुरेव मन्त्रजन्यं शाब्दबोधमभ्युपगच्छति। अन्यथा लोके श्रोतुः शाब्दबोधः, मन्त्रेषु तु उच्चारयितुरिति वैरूप्यापत्तेः।

1. ब्रूञश्च वचनार्थत्वात्—क. 2. नैतावता तेषां—क, घ. 3. स्तोत्रशस्त्रवत्—क, ग.

किंच श्रोतुरेव मन्त्रतः शाब्दबोध इत्ययमर्थो मन्त्रगतपदशक्त्यैव स्पष्टं लभ्यते । प्रायेण हि सर्वे मन्त्राः संबोध्यविषयाः । तथा हि—'इषे त्वोर्जे त्वा' इत्ययं मन्त्रः शाखाच्छेदने विनियुक्तः । तत्र शाखाकर्तृत्वान्त्वाशब्दस्य संबोध्यैकविषयत्वाद्विनियोगबलाच्च 'शाखे च्छिनद्मि' इत्यध्याहार्यम् । शाखे इति संबोधने प्रथमा 'संबोधने च' इति व्याकरणसूत्रेण विहिता । संबोधनं ज्ञापनम् । इषे ऊर्जे त्वा च्छिनद्मीति शाखां प्रति ज्ञाप्योऽर्थः । मन्त्रं प्रयुञ्जानो ज्ञापयति । तज्ज्ञात्वा शाखा अनुजानाति । शाखाशब्देन हि तदभिमानिनी देवता अभेदेनोपचर्यते । ततश्च च्छेदनस्य तज्ज्ञापनस्य च तत्रान्वयो न विरुध्यते । 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' इति बादरायणसूत्रे तद्भाष्यादौ च स्पष्टमेतत् । 'विष्णो हव्यं रक्षस्व' इत्यादौ तु सूपपादमेतत् । ननु देवताविग्रहचैतन्यादिकं नवमे निराकरिष्यते । सत्यं निराकरिष्यत उत्सूत्रं भाष्यकृता, न तु सूत्रकृता । प्रत्युत सूत्रकारस्य देवताविग्रहादिकमभिमतं वार्तिकाभिमतं चेति [1]पाष्टतिर्यगधिकरणे प्रपञ्चयिष्यते । किंच स्तोत्रशस्त्रीया ऋचो देवतास्तुतिपराः स्तुत्यदेवताः प्रत्येव तद्गुणबोधिकाः । स्तुतिवाक्यानां स्तुत्यं प्रत्येव बोधकत्वस्य लोकसिद्धत्वात् । लोके हि स्तोता गद्यपद्यादिभिः स्तुत्यं स्तौति । स्तुत्यश्च तत्कृतं चमत्कारं जानानः प्रसीदति । वेदेऽपि तथा भाव्यम । न च सामानि गातुः शस्त्राणि च शंसितुः अग्निवायुसूर्यादिस्तुत्यगुणबोधं स्तोत्रीयाः शस्त्रीयाश्च ऋचः शक्नुवन्ति कर्तुम, 'अग्न आयाहि वीतये' इत्यादिसंबोधनविभक्त्यनुपपत्तेः । किंच शस्त्रीयाणामृचां सांतत्यं विहितम 'संततमन्वाह' इति । पूर्वपूर्वस्या ऋच उत्तरमुत्तरमर्धर्चं प्रणवान्तमुक्त्वा अविरतमेवोत्तरोत्तरस्या ऋचः पूर्वपूर्वमर्धर्चमुक्त्वा विरमतीति सांतत्यलक्षणम । न चैवं शंसितुः होतुः प्रत्यृचमर्थावबोधः कथमपि संभवति । तत्तद्गवसाने तत्तदर्थावबोधव्याप्तचित्तस्य उत्तरोत्तरस्या ऋचः सांतत्येन स्फुरणासंभवात् । तत्तत्स्तुत्यदेवताया एव प्रत्यृचमर्थावबोधे तु न किंचिद्विरुध्यते । किंच द्वादशस्य तृतीये 'मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसंनिपातः स्यात्सर्वस्य वचनार्थत्वात्' इत्यधिकरणे करणमन्त्रेषु मन्त्रान्तेन कर्मादिसंनिपातः सिद्धान्तितः । मन्त्रार्थस्मरणस्य प्रयोक्तृगतस्यानुष्ठानहेतुत्वे च आदौ मन्त्रोच्चारणं ततोऽनुष्ठेयार्थस्मरणं ततोऽनुष्ठानमिति क्रमः स्यात् । ततश्चानुष्ठेयार्थस्मरणेन व्यवहितत्वात्कथं मन्त्रान्तेन कर्मादिसंनिपातो घटेत । मन्त्रबोध्यदेवताया एव मन्त्रतः शाब्दबोधाभ्युपगमे तु न कश्चिद्विरोधः । न चैवं सति करणमन्त्राणामदृष्टार्थत्वापत्तिः, देवतागतशाब्दबोधस्य मन्त्रजन्यस्यानुष्ठानहेतुत्वाभावादिति वाच्यम् । देवतागतं शाब्दबोधमादायैव दृष्टार्थत्वसंभवात्, जपानुमन्त्रणादिमन्त्रेषु कर्मसमवेतानभिधायिषु तथैवाभ्युपगतत्वाच्च । न च श्रोतृदेवतागतशाब्दबोधस्य कथं दृष्टत्वम्, देवतानामप्रत्यक्षत्वादिति वाच्यम । तर्हि लोकेऽपि वाक्यस्य परप्रत्यायकतया दृष्टत्वानुपपत्तिः, परबुद्धेरप्रत्यक्षत्वात् । अनुमानादिना लोके परस्मिन् शाब्द-

1. षष्ठे तिर्यगधिकरणे—क, घ.

बोधस्य दृष्टत्वमिति चेत्, वेदेऽपि तुल्यम; देवतासंबोधनादिलिङ्गात्तस्य तदुपपत्तेः। 'देवानां परिपूतमसीत्याह। यद्वा इदं किंच। तद्देवानां परिपूतम्। अथो यथा वस्यसे प्रतिप्रोक्ष्याहेदं करिष्यामीति एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोक्ष्य बर्हिर्दोति। आत्मनो हिंसायै', 'अग्नाविष्णू मावामवक्रमिषमित्याह। अग्निः पुरस्तान्। विष्णुर्यज्ञः पश्चात्। ताभ्यामेव प्रतिप्रोक्ष्यात्याक्रामति', अग्निं होतारमिह तं हुवे इति देवेभ्य एव प्रतिप्रोक्ष्य यज्ञेन यजते', 'यदाह। ब्रह्मन्नश्वं मेध्यमन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति। ब्रह्म वै ब्रह्मा। ब्राह्मण एव देवेभ्यः प्रजापतेः प्रतिप्रोक्ष्याश्वं मेध्यं बध्नाति। न देवताभ्य आवृश्च्यते। वसीयान्भवति' इत्यादिवाक्यशेषेऽप्यत्रानुकूलाः। इयांस्तु विशेषः। लोके वाक्यरचनस्य प्रयोक्तृपुरुषाधीनत्वादज्ञाते वाक्यरचनायोगात्प्रयोक्तुरर्थज्ञानं नान्तरीयकमस्ति। न तु तत्प्रयोक्तृतात्पर्यविषयीभूतम, [1]परप्रत्यायनेच्छयैव वाक्यप्रयोगात्। मन्त्राणां त्वपौरुषेयत्वेन नित्यसिद्धतया तत्प्रयोक्तुरर्थज्ञानं नावश्यकम तथा चाव्युत्पन्नस्यापि मन्त्रप्रयोगो न विरुध्यते। न हि वक्तुरर्थज्ञानमपि श्रोतुर्वाक्यार्थबोधे प्रयोजकम। अव्युत्पन्नपुरुषशुकशारिकाद्युदीरितकालिदासादिरचितगद्यपद्येभ्यो व्युत्पन्नानां शाब्दबोधदर्शनात्। 'देवदत्त घटमानय' इत्यत्र संबोधने प्रथमा। संबोधनमभिमुखीकृत्य ज्ञापनम। ज्ञानं श्रोतरि, ज्ञापनं प्रयोक्तरि। ततश्चाभिमुखीभूतदेवदत्तनिष्ठं यद्घटानयनज्ञानं तदनुकूलः प्रयोक्तृगतव्यापारो वाक्यार्थः। एवंविधबोधश्च संबोध्यस्य तदितरेषां श्रोतृणां प्रयोक्तुश्च संभाव्यमानोऽपि न सर्वेषां कार्यकारी। संबोध्यगतं घटानयनज्ञानमेव कार्यकारि, अन्यथा देवदत्तेत्यस्य वैयर्थ्यात्। एवमत्रापि। न च च्छान्दोग्यब्राह्मणे 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा' इत्युपक्रम्य 'तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' इति विधानात्प्रयोक्तुरप्यर्थज्ञानमावश्यकमिति वाच्यम। न ह्यत्र देवताज्ञानं वाक्यार्थज्ञानरूपं विधेयम, व्युत्पन्नस्य मन्त्रोच्चारणादेव तत्सिद्धेः; ऋषिच्छन्दोविषये तदसंभवाच्च। किंत्वस्य मन्त्रस्याग्निर्देवता इन्द्रो देवतेत्येवं व्युत्पन्नाव्युत्पन्नसाधारण्येन देवतापरिज्ञानमात्रमृषिच्छन्दोज्ञानवद्विवक्षितम। तच्च कात्यायनादिप्रणीतसर्वानुक्रमणिकादिग्रन्थतो मन्त्रार्थज्ञानाभावेऽपि सुलभमेव। प्रयोक्तुर्मन्त्रार्थज्ञानस्यावश्यकत्वे देवताज्ञानविधिवैयर्थ्यादपि न प्रयोक्तुस्तदावश्यकमिति प्रतीमः। अत एव चोपनीयमानस्य वटोरुपनीतमात्रस्य च मन्त्रविधयः संगच्छन्ते। न हि तस्य मन्त्रार्थज्ञानं कथमपि संभाव्यते। अस्य मन्त्रस्येयं देवतेत्येतावन्मात्रं तु कथंचिदपि ग्राहयितुं शक्यते। ग्राहयन्ति च शिष्टाः। यथा 'गायत्र्या विश्वामित्र ऋषिः गायत्री च्छन्दः सविता देवता' इत्यादि। अत एव च सर्वाङ्गोपसंहरणाय प्रवृत्तेषु कल्पसूत्रेषु क्वापि मन्त्रार्थ

1. परप्रत्यायनायैव—क, घ.

रणमङ्गतया नोपनिबद्धम । न च तेषु ऋषिच्छन्दोज्ञानस्याप्यनुपबन्धादङ्गत्वं न स्यादिति वाच्यम । इष्टापत्तेः । न हि कर्मकाले प्रतिमन्त्रमृष्यादिज्ञानं तत्र विवक्षितम, शर्करीयास्वृक्षु सांतपनं शस्यमानासु तदसंभवात । किंतु बहिर्भूतं याजयित्रध्यापयितृपुरुषयोग्यताविधायकं तत् । किंच संकर्षकाण्डे चतुर्थस्य तृतीये 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन' इति वाक्यमुदाहृत्य इतिहासपुराणमन्त्रार्थवादप्रत्यायितदेवतारूपध्यानमत्र विवक्षितमिति पूर्वपक्षयित्वा आग्नेयमैन्द्रमित्यादौ देवताप्रतिपादकस्य अग्न्यादिशब्दस्य श्रवणात तस्य च प्रथमोपस्थितस्य आगे प्रमाणाभावाच्छब्दे कार्यासंभवे सत्येवार्थे कार्यविज्ञानात इह च शब्दे ध्यानसंभवाद्देवताशब्दस्यैव ध्यानमिति सिद्धान्तितम । तदयायेन मन्वे मन्त्रे विद्यादित्यत्रापि देवताशब्दध्यानस्यैव विवक्षितत्वान्मन्त्रजन्यवाक्यार्थज्ञानरूपं तदिति दूरापास्तम । न च मन्त्रजन्यशाब्दबोधस्य देवतागतत्वानुप्रेयक्रियानुपयोगात्करणमन्त्रत्वव्यवहारानुच्छेदः, 'इति शाखामाच्छिनत्ति' इत्यादाविति करणागतकरणत्वविरोधः, 'चतुर्भिरभ्रिमादत्ते' इत्यादौ तृतीयाविरोधश्चेति वाच्यम । प्रयोक्तुरर्थज्ञानाभ्युपगमेऽपि तुल्यत्वात । 'इषे त्वा' इति मन्त्रो हि साकाङ्क्षः 'शाखं छिनद्मि' इत्यध्याहारेण शाखाच्छेदनप्रकाशकः । तदध्याहारश्च 'इति शाखामाच्छिनत्ति' इति विनियोजकवाक्यलभ्यः । एवं चादौ विनियोजकवाक्यत एव शाखाच्छेदनेऽवगते पुनर्मन्त्रतस्तत्स्मरणस्यादृष्टार्थत्वमवश्यमास्थेयम । एवं च मन्त्रजन्यार्थस्मरणस्य अनुप्रेयक्रियास्वरूपनिष्पत्तावनुपयोगात्कथं तद्द्वारा मन्त्राणां करणत्वसंभवः । तस्मादतिशयविशेषवत्त्वेन छेदनादुत्पत्तौ मन्त्राणां साधनतया तृतीयाश्रुत्यादेरविरोध उपपादः । अन्यथा 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इत्यादौ तृतीयायाः का गतिः । 'व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियते । इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै यज्ञस्य समृद्धयै । संभृत्या एव संभाराः कर्तव्यं यजुः यज्ञस्य समृद्धयै' इत्यादिवाक्यशेषा अप्यत्रानुकूलाः । न च मन्त्रजन्यशाब्दबोधस्य प्रयोक्तृगतत्वाभावे दृष्टोपकाराभावादहोच्छेद इति वाच्यम । न ह्यदृष्टे शाब्दबोधस्य दृष्टार्थत्वमपि प्रयोजकम, शाब्दबोधसामान्ये तस्य व्यापारात । किंतु प्राकृतस्य वैकृतार्थाभिधानशक्त्यभावस्तत्र बीजम । तथा च 'अग्नये वो जुष्टं प्रोक्षामि' इति प्राकृतस्याग्निदेवत्यव्रीहिप्रोक्षणमन्त्रस्य अग्निं प्रति व्रीहिप्रोक्षणज्ञापने समर्थस्य सौर्यष्टौ सूर्यदेवत्यव्रीहिप्रोक्षणाभिधानेऽशक्त्या अग्निपदस्य स्थाने सूर्यपदं प्रक्षेप्यम । 'न माता वर्धते न पिता । तस्माद्दृष्टं नोहेत' इत्यादृष्टदर्शनमत्रैव लिङ्गं भवति । अनुमन्त्रणादिमन्त्रा अपि तत्तुल्यदेवताया एव शाब्दबोधजनकाः, न तु प्रयोक्तुः । 'प्रस्थिता गा अनुमन्त्रयते— अभिसंधाय मन्त्रं जपति' 'स्पयमभिमन्त्रयते— अभिमृश्य मन्त्रं जपति, अभिमुखेनाभिसंधाय वा जपति' इति कल्पभाष्यकृतः । 'मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन

1. माहेन्द्रस्तोत्रम— क.

संस्मरेत् । शेषिणं तन्मना भूत्वा ' इति लक्षणस्य प्रामाणिकत्वेऽपि संस्मरेदित्यनेन वाक्यार्थविषय मन्त्रजन्यज्ञानं न विवक्षितम् । किंतु मन्त्रार्थत्वप्रकारकमेव विवक्षितम् । तच्च विनियोगव लादव्युत्पन्नस्यापि सुलभम् । अत एव मन्त्रोच्चारणतदर्थस्मरणयोः [1]समानकालकत्वबोधकस्य ' उच्चारयन्नेव ' इति शतुरुपपत्तिः । ' इति गार्हपत्यमुपतिष्ठते ' इत्यस्य च इति मन्त्रेण गार्हपत्य मुपेत्य तद्गुणान्प्रख्यापयतीत्यर्थः । ' तदाहुर्नाग्निरुपस्थेयः कः श्रेयांसं सुप्तं बोधयिष्यति ' इत्या दिवाक्यशेषश्चेह लिङ्गम् । ' उपस्थितिस्तु बोधः स्यात् ' इत्यत्र च ण्यन्ताद्धि ज्ञापनमुच्यते वस्तुतस्तु समीपं प्राप्यावस्थानमुपतिष्ठतेरर्थः । मन्त्रेण गार्हपत्यमुपेत्य तिष्ठतीत्यर्थः । अतस्तत्रापि मन्त्रार्थज्ञानं न प्रयोक्तुर्विवक्षितम् । तथा च कर्मकाले कल्पसूत्रादितो विनियोगमात्रं जानानस्य अर्थ ज्ञानशून्यस्यापि मन्त्रप्रयोगः सिद्धः । मन्त्रार्थज्ञानपूर्वकमनुष्ठाने त्वभ्युदयः । ' योऽर्थज्ञ इत्सकलं भद्रमश्नुते ' इति श्रवणात् । ' स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ' इत्यादिनिन्दा तु नहिनिन्दान्यायेन ज्ञानप्रशंसार्थेति निरुक्ते यास्काचार्यैः स्पष्टमेवाभिहितम् । एतेन 'मन्त्रार्थज्ञो जपञ्जुह्वत्तथैवाध्यापयन्द्विजः । स्वर्गं लोकमवाप्नोति नरकं तु विपर्यये ' इत्याद्यपि व्याख्यातम् ॥

इति प्रथमाध्याये द्वितीयः पादः ॥



1. समानकालार्थ—क.

तृतीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

प्रमाणाध्यायेऽस्मिन्प्रथमपादे साक्षाद्धर्मप्रमाणत्वादादौ विधिभागस्य प्रामाण्यं विचार्य द्वितीयपादे तदेकदेशभूतयोरर्थवादमन्त्रभागयोः प्रामाण्यं विशिष्य विचारितम् । इदानीं वेदमूलकस्मृतिपुराणेतिहासकल्पसूत्राचारादिप्रामाण्यं विचार्यते । यद्यपि नामधेयभागस्यापि वेदैकदेशत्वात्तद्विचारानन्तरमेव स्मृत्यादिविचारो युक्तः तथापि नामधेयभागस्याल्पत्वान्मन्त्रार्थवादमूलकस्मृतिपुराणवचसां बहुलत्वात्तत्प्रामाण्यविचारात्प्राङ्मन्त्रार्थवादमूलकस्मृत्यादिविचार एव [1]तदुपजीव्यकत्वायुज्यते । नामधेयभागस्तु न स्मृत्यादिमूलमिति वैषम्यम् ।

तत्राष्टकादिस्मृतिः प्रमाणं न वेति संशये, पूर्वपक्षयति—

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् ॥ १ ॥

स्मृतिवाक्यजातं धर्मप्रमाणतया अनादरणीयं स्यान् । कुतः । धर्मस्य शब्दमूलत्वात् धर्मस्य वेदैकप्रमाणकत्वात् स्मृतिवाक्यानां च पौरुषेयत्वात् । ननु तेषां वेदमूलकतया धर्मे प्रामाण्यमस्तु, तत्राह —अशब्दमिति । स्मृतिवाक्यजातं मूलभूतवेदवाक्यरहितम्, अतो वेदमूलकतयापि न तेषां प्रामाण्यसंभवः, तन्मूलभूतवेदवाक्यानां श्रावणान्यप्रत्यक्षागोचरत्वात्, श्रावणप्रत्यक्षस्य च अपठ्यमानेषु तेष्वप्रसरात्, पठ्यमानत्वे च स्मृतिप्रत्ययनवैयर्थ्यात् । स्मृतयस्तु न तल्लिङ्गं भवितुमर्हन्ति, तासां श्रुत्यविनाभावाभावात् । स्मृतयः प्रमाणमित्येवंविधागमोऽपि कृतकश्चेन्न विस्रम्भणीयः । नित्यस्तु नोपलभ्यते । उपमानं त्वदृष्टे दृष्टासदृशे चार्थे न प्रसर्तुमीष्टे । अर्थापत्तिरपि स्मर्तॄणां मन्वादीनां संभवद्भ्रमप्रमादकतया अप्रामाण्यस्याप्युपपत्तेः अन्यथानुपपत्त्यभावान्न संभवत्प्रमा । अतः पठ्यप्रमाणगोचरत्वमेव स्मृतीनां धर्मे प्रामाण्यम् ॥

१. स्मृतिप्रामाण्याधिकरणम् ।

इति प्राप्ते, सिद्धान्तयति—

1. तदुपजीवकत्वात् - क.

अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ॥ २ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । श्रुतिमूलकतया स्मृतिः प्रमाणं स्यात्, यतः स्मृतिमूलभूतश्रुतावनुमापकं लिङ्गमस्ति स्मृतिरेव । ननु संभवद्भ्रमप्रमादमूलकत्वात्स्मृतेः कथं तथाविधश्रुत्यनुमापकता; तत्राह—कर्तृसामान्यादिति । 'धन्वान्निव प्रपा असि' 'स्थलयोदकं परिगृह्णन्ति' इत्यादिमन्त्रार्थवादात्मकास्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितकर्मसु अस्मदाद्यनुपलब्धवेदमूलकस्मृतिविहितकर्मसु च तत्कर्तृणां सकलवैदिकशिष्टानां वेदमूलकतया दृढपरिगृहीतस्मृतिविहितत्वस्य समानत्वादित्यर्थः । न हि वेदमूलकतया सकलवैदिकशिष्टपरिग्रहणं स्मृतेर्भ्रान्त्यादिमूलकतया वेदमूलकत्वाभावे घटते । तथा च अष्टकादि कर्म वेदमूलकं भवितुमर्हति, वेदमूलकतया वैदिकदृढपरिगृहीतस्मृतिविहितत्वात्, अस्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितप्रपादिवत् इति प्रयोगो बोध्यः । एवमितिहासपुराणाद्यप्युदाहार्यम् । इति स्मृत्यधिकरणम् ॥

२. श्रुतिप्राबल्याधिकरणम् ।

'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिविरुद्धा 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः प्रमाणमप्रमाणं वेति संशयः । प्रत्यक्षश्रुतिविरुद्धापि स्मृतिः प्रमाणम्, पूर्वाधिकरणन्यायेन अनुमितवेदमूलकत्वात् । न ह्यनुमितेत्येवानुमिता श्रुतिर्दुर्बला प्रत्यक्षेत्येव प्रत्यक्षा प्रबला । बाधितावाधितार्थकत्वमेव हि तत्र बीजम् । न चेहान्यतरत्र तत्संभवः, उभयोरपि प्रत्यक्षानुमितयोः श्रुतित्वाविशेषात् । तथा च षोडशिग्रहणाग्रहणवद्व्रीहियवत्वच्च विकल्प इति प्राप्ते, सिद्धान्तयति—

विरोधे त्वनपेक्षं[1] स्यादसति ह्यनुमानम् ॥ ३ ॥

तुरष्टकादिस्मृतिवैषम्ये । प्रत्यक्षश्रुतिविरोधे सति अनपेक्षं मूलप्रमाणानपेक्षं श्रुतिवाक्यमेव प्रमाणं स्यात् न तु स्मृतिवाक्यम्, तस्य मूलश्रुत्यपेक्षत्वात् तथाविधश्रुतौ च प्रमाणाभावात् । ननु स्मृत्या श्रुतिरनुमीयताम्; तत्राह—असति ह्यनुमानमिति । असति हि प्रत्यक्षविरोधे अनुमानमुदेति । अस्ति चात्र प्रत्यक्षश्रुतिविरोधः । तथा च वह्नावौष्ण्यप्रत्यक्षेणेव शैत्यानुमानस्य स्पर्शनश्रुतिप्रत्यक्षेण सर्ववेष्टनश्रुत्यनुमानस्य बाधिततया सर्ववेष्टनश्रुतेर्गगनकुसुमायमानत्वात्स्पर्शनसर्ववेष्टनयोरभित्तिचित्रायितो विकल्पः । ग्रहणादिविषये तु तच्छास्त्रयोः प्रत्यक्षत्वाद्विकल्पो युक्तः ॥

इतोऽपि सर्ववेष्टनश्रुतिरप्रमाणमित्याह—

हेतुदर्शनाच्च ॥ ४ ॥

1. अनपेक्ष्यं ।

लोभादिना हेतुना सर्ववेष्टनस्मृतेः प्रवृत्तिसंभवादित्यर्थः । सर्ववेष्टनस्य महतैव वाससा साध्यत्वात्तद्ग्रहणलोभेन सर्ववेष्टनस्मृतिः प्रवृत्ता स्यात् । अतो लोभादिमूलिका एवंजातीयका स्मृतिरप्रमाणम् । चकारोऽभ्युच्चये । प्रत्यक्षश्रुतिविरोधे सति स्मृत्यनुमानस्यानुन्मेषे पूर्वसूत्रेण वर्णिते परिशेषादेव यथोचितं लोभादिमूलकत्वकल्पनस्य सिद्धेः ॥

अत एव वाधिकरणान्तरपरमस्तु । तथा हि—सन्ति ज्योतिष्टोमे वैसर्जनाख्या होमाः 'वैसर्जनानि जुहोति' इति । तत्र 'अध्वर्यु यजमानोऽन्वारभते यजमानं पत्नी पत्नीमितरे पुत्रभ्रातरोऽहतेन वाससा संप्रच्छन्ना भवन्ति' इति विहितं वासः प्रकृत्य स्मरन्ति 'वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति' इति । तदिदं वैदिकपरिगृहीतत्वात्प्रत्यक्षश्रुतिविरोधाभावाच्च प्रमाणम् । न च सर्ववेष्टनादिस्मृतिवल्लोभादिमूलकल्पनसंभवः । तत्र हि प्रत्यक्षविरोधात्तथा कल्पनम् । न चात्र तद्विरोधोऽस्ति येन तथा कल्प्येत । संभावनामात्रेण च लोभादिमूलकत्वकल्पनायां दानविषयस्मृतिमात्रस्य प्रामाण्योच्छेदापत्तिः । अत एवंजातीयकं स्मरणं प्रमाणम् । इति प्राप्ते, सिद्धान्तयति—

३. दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम् ।

हेतुदर्शनाच्च ॥ ४ ॥

चोऽप्यर्थे । प्रत्यक्षश्रुतिविरुद्धा स्मृतिरप्रमाणमित्युक्तम् । एषा स्मृतिस्तदविरुद्धापि न प्रमाणम् । कुतः । हेतुदर्शनात् । उक्तोऽर्थः । प्रकीर्णकतया[1] पठ्यमानत्वेन वैसर्जनस्मृतेर्लोभादिमूलकत्वकल्पनसंभवेऽपि मन्वादिप्रणीताष्टकादिसहपठिततया दानादिस्मृतीनां न लोभादिमूलकत्वावकाशः । ततश्च वस्त्रलोलुपेन केनचिदध्वर्युणा प्रवर्तितयं स्मृतिरप्रमाणम् । तदेवं प्रत्यक्षश्रुतिविरुद्धं लोभादिमूलकमपि स्मरणमप्रमाणमिति भाष्यानुयायी पन्थाः ॥

तत्र प्रत्यक्षश्रुतिविरुद्धं स्मरणमप्रमाणमिति प्रथमाधिकरणमनुपपन्नम् । तथा हि—औष्ण्यशैत्ययोः स्वरूपेण परस्परविरोधित्वाद्ह्रदावौष्ण्यप्रत्यक्षेण शैत्यानुमानबाधो युज्यते । स्पर्शनश्रुतिप्रत्यक्षेण तु सर्ववेष्टनश्रुत्यनुमानस्य बाधो न संभवति, तयोः श्रुत्योः स्वरूपेण विरोधाभावात् । अर्थतो विरोधस्तु सर्ववेष्टनश्रुत्यनुमानोत्तरकालिकस्फूर्तिको न तदनुमानप्रवृत्तिं बाधितुं क्षमते, विरोधस्य तदानीमलब्धात्मकत्वात् । प्रवृत्ते तु तदनुमाने प्रत्यक्षानुमितश्रुत्योरुभयोरपि श्रुतित्वाविशेषात्सन्नप्यर्थतो विरोधो युगपदेव तदनुष्ठानद्वयं बाधते, स्पर्शनसर्ववेष्टनयोर्युगपत्कर्तुमशक्यत्वात् । कस्मिंश्चित्प्रयोगे स्पर्शनं प्रयोगान्तरे सर्ववेष्टनमित्येवं कालभेदेन

1. प्रकीर्णतया—ख.

तदुभयानुष्ठानं तु निर्बाधमेव, विरोधाभावात् । तथा च व्रीहियवादिशास्त्रवत्कालभेदेन स्पर्शनसर्ववेष्टनश्रुत्योरपि प्रामाण्यं निर्बाधमिति सर्वदा तदप्रामाण्यवर्णनमनुपपन्नम् । तथा द्वितीयाधिकरणमप्यनुपपन्नम्, प्रकीर्णकस्मृतीनामपि सकलवैदिकशिष्टैर्धर्मबुद्धया तदर्थानुष्ठानस्वाद्रियमाणतया दानादिस्मृतिवत्प्रामाण्यस्वावश्याङ्गीकार्यत्वादित्यादिदूषणान्युद्भाव्य सूत्रद्वयमिदमन्यथा योजितं वार्तिके। तद्यथा—प्रथमसूत्रे अनुष्ठाने इत्यध्याहियते । प्रमाणमिति पूर्वसूत्रादनुवर्तते । श्रुतिस्मृत्योर्विस्रम्भाविस्रम्भाभ्यामनुष्ठानविरोधे सति विस्रम्भानपेक्षं प्रत्यक्षश्रुतिवाक्यमेवानुष्ठाने प्रमाणम्; न तु स्मृतिः, तस्या मूलभूतश्रुत्यपेक्षत्वात् । मूलभूतश्रुतिप्रत्यक्षस्य च परकीयतया तद्विस्रम्भविषये मूलानुसंधानापेक्षत्वात् । विस्रम्भणीयस्वप्रत्यक्षश्रुतिवाक्ये असति स्मृतिमूलश्रुतिप्रत्यक्षस्य परकीयस्य विस्रम्भविषये अनुमानं मूलानुसंधानं क्लिष्टमपेक्ष्यते । स्वप्रत्यक्षस्य हि विस्रम्भणीयत्वात् तस्मिन्सत्यनुष्ठानप्रतीतिः स्वारसिकी । परकीयप्रत्यक्षस्य तु विस्रम्भमूलानुसंधानसापेक्षत्वात्तस्मिन्सति नैवम् । अस्ति चात्र विस्रम्भणीया स्वप्रत्यक्षा श्रुतिः । अतः सैवानुष्ठाने प्रमाणं यावत्स्मृतिमूलश्रुतिः प्रत्यक्षतो नोपलभ्यते । तदुपलम्भोत्तरं तु द्वयोरपि व्रीहियवादिश्रुतिवद्विकल्प आदर्तव्यः । ततश्च कदाचित्फलतः अप्रामाण्यं प्रत्यक्षश्रुतिविरुद्धस्मृतेरिति सिद्धम् । हेतुदर्शनादिति सूत्रमप्यत्रैवार्थे युक्त्यन्तरपरं योज्यम्—स्मर्तृणां सर्ववेष्टनश्रुतिप्रत्यक्षे सत्यपि न्यायाभासात्मकहेतुदर्शनसंभावनया विस्रम्भः प्रतिबध्यत इति ॥

तदेवं योजनायामनुष्ठानपदाध्याहारे गौरवं मत्वा वर्णकान्तरं वर्णितं वार्तिके । तद्यथा—यानि वैदिकैः शिष्टैरपरिगृहीतानि शाक्यादिनिबन्धनानि त्रयीविपरीतार्थानि अहिंसासत्यवचनशमदमदानादिप्रतिकञ्चुकच्छायाबहुलानि सांख्ययोगपाञ्चरात्रादीनि च धर्मशास्त्राभासानि तेषां प्रत्यक्षादिमूलकतया प्रामाण्यं निराकृतं तर्कपादे 'सत्संप्रयोगे पुरुषस्येन्द्रियाणाम्' इत्यादिसूत्रे वार्तिके । इदानीं संभावितवेदमूलकतया प्रामाण्यं तेषां निराकर्तुमधिकरणमिदमारभ्यते । मन्वादिस्मृतिवत्तेषामप्यस्ति वेदमूलकतया प्रामाण्यम् । न च तन्मूलश्रुतीनां मन्वाद्यदृष्टतया कथं तत्प्रामाण्यमिति वाच्यम् । मन्वादिदृष्टवेदचतुष्ट्याद्भिन्नप्रस्थानानामेव वेदानां तत्र मूलत्वसंभवात् । न च 'चत्वारो वेदाः' इति, लोकवेदप्रसिद्धिविरोधः, प्रसिद्धेर्मन्वादिदृष्टमात्राभिप्रायकत्वात् । सर्वदा च प्रवाहनित्यतया मन्वादिस्वीकारान्नानित्यसंयोगः । अत एव 'यद्वै किंच मनुरवदत्' इत्यादि संगच्छते । अस्तु वा चत्वार एव वेदा इति; तथापि वेदमूलकत्वमेषां न विरुध्यते । ऋग्यजुःसामवेदेषु हि धर्मबोधकेषु असंख्येयाः शाखाः सन्ति । तत्र काश्चिदेव ऋषिभिर्दृष्टाः । नहि सर्वा अपि शाखाः पुरुषायुषेणापि कथमपि केनचिद्द्रष्टुं शक्याः, आनन्त्याच्छाखानामल्पत्वाच्च पुरुषायुषस्य । अत एव भरद्वाजस्य महानुभावस्यापि सर्ववेदाध्ययनाय[1] सगर्वं प्रवृत्तस्य कतिपयशाखाध्ययनमा-

1. अध्ययने —क, ग.

त्रेण जराप्रवृत्तिमनधीतानां च शाखानामानन्त्यादशक्याध्ययनत्वं च दर्शयति काठकश्रुतिः—"भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास । त ꣳह जीर्णꣳ स्थविरꣳ शयानमिन्द्र उपव्रज्योवाच, भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमेनेन कुर्या इति । ब्रह्मचर्यमेवैनेन चरेयमिति होवाच । त ꣳह तीन्गिरिरूपानविज्ञातानिव दर्शयांचकार । तेषा ꣳ हैकैकस्मान्मुष्टिमाददे । स होवाच । भरद्वाजेत्यामन्त्र्य । वेदा वा एते । अनन्ता वै वेदाः । एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः । अथ त इतरदननूक्तमेव" इति । अन्ववोचथाः अधीतवानसि । अननूक्तम् अनधीतम् । स्पष्टमन्यत् । तथा च मन्वाद्यदृष्टवेदमूलकत्वसंभवादेषामस्ति प्रामाण्यम् । यद्यपि वेदा अप्रमाणमित्यभ्युपगच्छद्भिः शाक्यादिभिस्तद्ग्रन्थानां वेदमूलकतया प्रामाण्यानङ्गीकारात्ते कथं वेदमूलकत्वमाशङ्क्येरन् तन्निराकरणाय वा किमर्थमधिकरणप्रवृत्तिः । तथापि न शाक्यादीनामियं शङ्का । किंतु वैदिकानामेव मध्ये केषांचिन्मन्दानामष्टकादिस्मृतिवत्तेषामपि वेदमूलकतया प्रामाण्यशङ्कया तत्परिग्रहः प्रसज्येतेति तामिमां शङ्कां मन्दविषन्यायेन निराकरोति— **विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्** । प्रमाणमित्यनुवर्तते । तुशब्दः शङ्काव्यावृत्तौ । शाक्यादिग्रन्थानां वैदिकशिष्टपरिगृहीतप्रत्यक्षश्रुतिविरोधे सति मूलान्तरानपेक्षं श्रुतिवाक्यजातमेव प्रमाणं न तु तद्विरुद्धशाक्यादिग्रन्थजातम्, पौरुषेयत्वात् । न च श्रुतिमूलकतया प्रामाण्यम्, मूलश्रुतौ प्रमाणाभावात् । ननु स्मृत्यैव श्रुतिरनुमीयताम्, तत्राह—असति ह्यनुमानमिति । असति हि प्रत्यक्षश्रुतिविरोधे मूलश्रुत्यनुमानमुदेतुमुत्सहेत । अयं भावः—वेदेषु दृढविस्रब्धमन्वादिस्मृतीनां तथाविधवैदिकदृढपरिग्रहान्यथानुपपत्त्या मूलश्रुतिकल्पकत्वं युज्यते । शाक्यादिग्रन्थेषु त्विदं विपरीतम्, वैदिकपरिग्रहाभावात् वेदविद्वेषिपरिग्रहाच्च । न च वैदिकपरिग्रहाभावेऽपि अहिंसादिकतिपयवैदिकार्थगन्धवासितत्वेन हेतुना मूलश्रुत्यनुमानं स्यादिति वाच्यम् । वेदविद्वेषिजनपरिग्रहेण वेदमूलकत्वव्यतिरेकस्य निश्चिततया हेत्वन्तरेणापि मूलश्रुत्यनुमानाप्रवृत्तेः । सांख्ययोगादिशास्त्रेषु वैदिकपरिग्रहो यदंशेऽस्त्युपासनादिविषये तदंशे प्रामाण्यमिष्टमेव । यदंशे तु प्रपञ्चसत्यत्वमिथ्यात्वद्वैताद्वैतादिविषये[1] विहितस्य [2]हिंसादोषास्तित्वादिविचारविषये च प्रत्यक्षश्रुतिविरोधोऽस्ति तदंशेऽप्रामाण्यमेव । पाञ्चरात्राद्यागमानां तु वैदिकविरुद्धवामागमप्रचुरत्वात्सर्वथैवाप्रामाण्यम् । 'भरद्वाजो ह त्रिभिः' इत्यादिः सावित्रार्थवादः । तत्रानन्तपदमेकविंशतिर्बाह्वृच्यमित्यादिशाखापरिमाणस्यातिविस्तृतत्वपरमित्यदोषः । अत एव श्वेतकेतुं प्रकृत्य 'सर्वान्वेदानधीत्य' इति छान्दोग्यश्रुतिः संगच्छते । यदपि शाक्यादिनिबन्धनेषु पाञ्चरात्राद्यागमेषु च क्वचित्क्वचिद्वेदबोधितमेवाहिंसादिकमुपासनादिकं चोपनिबद्धं तदागमप्रचारसिद्ध्यर्थमेवोपनिबद्धमिति तदनुष्ठानं वैदिकानां न तन्मूलकतया, किंतु वेदमूलकतयैवेति । तदेवं

1. विचारविषये—क, ग. 2. हिंसादोषास्तित्वनास्तित्वादि—क, ग.

शाक्यादिग्रन्थानामविगीतवैदिकशिष्टपरिग्रहाभावाद्वेदविद्वेषिजनपरिग्रहाच्च न वेदमूलकतया प्रामाण्यम्। इतोऽपि तेषामप्रामाण्यमित्याह—हेतुदर्शनाच्च। असद्धेतुदर्शनाच्चेत्यर्थः। शाक्यादिभिर्हि स्वप्रतिपाद्यानि सर्वाणि हेतुभिरेव प्रायेणोपन्यस्यन्ते "अष्टका पितृदैवत्या इत्ययं प्रसृतो जनः। अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति। यदि भुक्तमिहान्येन देहमन्यस्य गच्छति। दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत्। निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते। स्वपिता यजमानेन किं नु तेन न हन्यते। जीवस्यावरणं देहो देहस्यावरणं कुतः। यदि तस्यापि कार्यं स्यात्तस्यापि ह्यनवस्थितिः। मलभाण्डं शुचि भवेद्बहिः क्षालनतः कथम्। गव्यं पयश्चेत्पीयेत मांसैः किमपराध्यते" इत्यादिना। न च मन्वादयः स्वप्रतिपाद्ये सर्वत्र हेतूनुपन्यस्यन्ति। न चैवं हेतुमूलकतयैव शाक्यादिग्रन्थानां प्रामाण्यं किं न स्यादिति वाच्यम्। तदीयहेतूनामसद्धेतुत्वेनासाधकत्वात्। अतोऽपि शाक्यादिग्रन्थानामप्रामाण्यमिति स्थितम्। इति विरोधाधिकरणम्॥

प्रत्यक्षश्रुतिविरोधे स्मृतीनां स्वरूपेणैव अप्रामाण्यं भाष्यकारमते, वार्तिककारमते त्वननुष्ठानलक्षणमप्रामाण्यमिति स्थितम्। संप्रति स विरोधः कास्ति नास्तीति विचार्यते। इदं स्मरन्ति

४. पदार्थप्राबल्याधिकरणम्।

'क्षुतजृम्भणादिनिमित्ते आचान्तेन कर्म कर्तव्यम्' इति। तथा च कर्ममध्येऽपि निमित्ते सत्याचमनं प्राप्यते। तथा 'यज्ञोपवीतिना कर्तव्यम्' इति स्मरन्ति। तथा च कर्ममध्ये यज्ञोपवीतस्य स्रंसनच्छेदादौ पुनर्धारणं प्राप्यते। तथा 'दक्षिणाचारेण कर्तव्यम्' इति स्मरन्ति। दक्षिणेन हस्तेनाचरतीति दक्षिणाचारः। कर्तृविशेषणस्यापि लोहितोष्णीषादिवद्विधिः। तथा च कर्मणि सव्यहस्तो निवर्तते। तदेवंजातीयकानि स्मरणानि किं प्रत्यक्षश्रुत्या विरुध्यन्ते न वा विरुध्यन्त इति संशये सिद्धान्तमुपाक्षिप्य निराकुर्वन्पूर्वपक्षी प्रत्यवतिष्ठते—

[1]शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्॥ ५॥

अहिनकुलवन्न श्रुतिस्मृत्योः स्वरूपेण विरोधः। किंतु तदर्थानुष्ठानयोरन्यतरेणान्यतरस्य बाधादेव तयोर्विरोधः। कर्ममध्ये च स्मार्ताचमनाद्यनुष्ठाने सति न कस्यचिच्छ्रौतपदार्थस्य अन्वाधानादिकस्य बाधोऽस्ति। अबाधाच्च न श्रुतिविरोधः। तथा च शिष्टस्य श्रुतिविहितस्य अकोपे स्मार्तपदार्थैरनुष्ठीयमानैरबाधे सति श्रुत्या अविरुद्धं भवत्याचमनादिस्मरणम्। अविरोधाच्च तत्प्रमाणमिति सिद्धान्ती मन्येत चेत्, तन्न। कुतः। शास्त्रपरिमाणत्वात्। परिमीयते अवगम्यत इति परिमाणम्। कर्मणि ल्युट्। श्रुत्यवगतत्वादित्यर्थः। स्मार्ताचमनादिविरुद्धानां क्रमकालपरिमाणा-

1. इदं सूत्रं अन्यत्र द्विधा विभज्य पठ्यते।

नामिति शेषः । तत्र क्रमस्तावत् 'वेदं कृत्वा वेदिं कुर्यात्' इत्यादिश्रुतिगम्य इति निर्विवादम् । वेदो नाम शयानवत्सजान्वाद्याकृतिविशिष्टो दर्भमुष्टिविशेषः । वेदिस्तु संमार्जनखननोद्धननादिसंस्कारविशेषैः परिष्कृता भूमिः । कालस्तु त्रिविधः प्रधानसंनिकर्षलक्षणः, प्रयोगप्राशुभावलक्षणः, पूर्वाह्णादिलक्षणश्च । तत्र पूर्वाह्णादिकालः 'पूर्वाह्णो वै देवानाम्' इत्यादिश्रुतिगम्य इति निर्विवादम् । इतरौ तु प्रयोगविधिना सर्वाङ्गसहितप्रयोगानुष्ठापकेन एकस्मिन्क्षणेऽसंभवात्साहित्यनिर्वाहार्थमाक्षिप्तत्वात्प्रयोगविधिगम्यौ । परिमाणं नाम प्रयोज्यपदार्थेयत्तारूपं तत्पदार्थविधिसंघातावगतम् । तच्च किं कश्चित्पदार्थो विस्मृतः किं वा सर्वमनुष्ठितमिति संशयनिराकरणाय प्रयोगविधिरपेक्षमाणः स्वीकरोति । अतस्तदपि प्रयोगविधिगम्यम् । तत्र यदि वेदवेद्यनुष्ठानमध्ये स्मार्तं क्षुतादिनिमित्तमाचमनमनुष्ठीयेत तदा क्रमः प्रधानसंनिकर्षश्च विरुध्येत, आचमनेन व्यवधानात् । तथा अनुष्ठेयपदार्थाधिक्याच्छ्रौतः पूर्वाह्णादिकालः परिमाणं च विरुध्येत । एवं वेदवेद्यनुष्ठानमध्ये दैवाद्यज्ञोपवीतच्छेदनस्रंसनादिनिमित्ते सति तस्य यथापूर्वकरणे क्रियमाणे क्रमकालौ विरुध्येते । तथा दक्षिणहस्तेनैव कर्मकरणे प्रयोगप्राशुभावो विरुध्येत इत्येवं यथायथमूह्यम् । तथा च श्रुतिविरोधादाचमनादिस्मृतिरप्रमाणमिति पूर्वः पक्षः । अत्र भाष्यादौ व्याख्यासौकर्याय सूत्रमिदं छित्त्वा चेदन्तं पृथगुपात्तम् । 'तदर्थशास्त्रात्' इत्यादिवत् । चेदन्तस्य साकाङ्क्षत्वेन वाक्यत्वानुपपत्तेः सूत्रान्तरत्वासंभवात् । अत एव 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' इत्यादिबादरायणसूत्रं चेदन्तेनाविभक्तमेव पठित्वा व्याचख्युर्भगवत्पादाः । एवमग्रेऽपि द्रष्टव्यम् ॥

सिद्धान्तयति—

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ६ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । विरोधकारणस्य अनुष्ठानबाधस्य अग्रहणे अदर्शने सति शिष्टैः प्रयुक्तानि आचमनादीनि श्रौतक्रमाद्यविरुद्धत्वेन प्रतीयेरन । विरोधबीजस्याचमनादिभिः [1]क्रमादिबाधस्याभावान्न विरोधोऽत्रेत्यर्थः । तथा हि—क्रमस्तावत्तत्तत्पदार्थगोचरप्रातिस्विकविधिभिर्न संबध्यते, अनाकाङ्क्षितत्वात् । किंतु प्रयोगविधिना । स हि सर्वपदार्थाननुष्ठापयन्क्रममपेक्षते । प्रयोगविधिश्चोत्पत्तिविध्युत्पादितान्विनियुक्तांश्च पदार्थाननुष्ठापयन तेषु सर्वेषु प्राप्तेष्वात्मानं लभत इति निर्विवादम् । ततश्च श्रौतेषु स्मार्तेषु च पदार्थेषु सर्वेषु प्रवृत्तेषु प्रयोगविधिः प्रवर्तते । तस्मिंश्च प्रवृत्ते तदपेक्षितः क्रमः प्रवर्तमानो न तैः पदार्थैर्विरुध्यते । न च प्रयोगविधिः श्रौतसकलपदार्थप्राप्त्यैव लब्धात्मको न जघन्यप्रमाणकस्मार्तपदार्थप्राप्तिमपेक्षत इति वाच्यम् । समाख्यादिदुर्बलप्र-

1. क्रमबाधाभावात्—ख, घ.

माणकानारभ्याधीतशाखान्तरविहितयावदङ्गकलापप्राप्त्युत्तरमपि प्रयोगविधिप्रवृत्तेः शाखान्तराद्यधिकरणे वार्तिकादिषु व्यवस्थापयिष्यमाणत्वात्। एवं च स्मार्तपदार्थप्राप्तिमपि प्रयोगविधिरपेक्षत इत्यभ्युपेयम्। तथा प्रयोगप्राशुभावरूपस्य प्रधानसंनिकर्षरूपस्य च कालस्य प्रयोगविधिलभ्यत्वादविप्रतिपन्नं प्रयोगाङ्गत्वम्। पूर्वाह्णादिकालस्य चाकाङ्क्षावशात्प्रयोगविधिनैवान्वयो न तु तत्तत्पदार्थविधिभिरिति तस्यापि प्रयोगाङ्गत्वमित्येकादशद्वितीयाद्याधिकरणे व्यवस्था भविष्यति। ततश्च त्रिविधस्यापि कालस्य प्रयोगाङ्गत्वात्सकलपदार्थप्राप्त्यपेक्षत्वं सिद्धम्। परिमाणस्यापि प्रयोगविधिलभ्यत्वात्सकलपदार्थप्राप्त्यपेक्षत्वमविवादम्। न चैवं स्मार्तानामपि पदार्थानामनुष्ठाने पूर्वाह्णाद्यतिक्रमापत्तिः, तदनतिक्रमस्यापि कथंचित्संपाद्यत्वात्। अन्यथा भिन्नस्कन्नहोमादौ का गतिः। ततश्च क्रमकालपरिमाणानां श्रौतस्मार्तसकलपदार्थप्रवृत्त्युत्तरकालप्रवृत्तिकत्वात्कथं तैर्विरोधः? अविरोधाच्च कर्ममध्ये क्षुतादिनिमित्ते आचमनादिस्मरणं प्रमाणम्। इति प्रथमं वर्णकम्॥

अत्र क्रमादेः पदार्थगुणस्य पदार्थापेक्षया दुर्बलतया प्रबलैः पदार्थैर्दुर्बलक्रमादिबाधेन शाखान्तरोपसंहारस्य शाखान्तराधिकरणे व्यवस्थापयिष्यमाणत्वात्तेनैव गतार्थमिदमित्यस्वरसाद्विरोधमभ्युपगम्य प्रकारान्तरेण संशयमुद्भाव्याधिकरणमिदमुत्प्रेक्षितमाकरे। तद्यथा—श्रौतानि क्रमकालपरिमाणानि प्रबलप्रमाणगम्यतया स्मार्ताचमनाद्यर्थापेक्षया प्रबलानि, स्वरूपेण तु दुर्बलानि पदार्थान्प्रति गुणभूतत्वात्। स्मार्तास्त्वाचमनादिपदार्था दुर्बलप्रमाणगम्यतया श्रौतक्रमाद्यपेक्षया दुर्बलत्वेऽपि पदार्थत्वात्स्वरूपेण प्रबलाः। तदेवं प्रमाणप्रमेयबलाबलविसंवादे किं प्रमाणबलं ज्याय उत प्रमेयबलमिति संशयः। तत्र सिद्धान्तमुपक्षिप्य पूर्वपक्षी प्रत्यवतिष्ठते—**शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्।** प्रमेयबलस्य ज्यायस्त्वादुर्बलप्रमाणगम्यस्याप्याचमनादिपदार्थस्य स्वरूपतो बलवत्तरस्य श्रौतैरपि क्रमादिभिर्विरोधो[1] न युज्यते। ततश्च शिष्टैः श्रुतिविहितैः क्रमादिभिः पदार्थगुणैः स्मार्ताचमनादिपदार्थस्य अकोपे अबाधे सति तत्स्मरणं श्रुतिप्रमाणेन अविरुद्धं प्रतीयते। बलवतैव हि विरोधः श्रुतिप्रमाणं चात्र दुर्बलमिति सिद्धान्ती मन्यसे चेत्, तन्न। कुतः। शास्त्रपरिमाणत्वात्. क्रमादीनां श्रुतिसिद्धत्वात्, श्रुतेश्च प्रबलप्रमाणत्वात्, प्रमेयबलापेक्षया च प्रमाणबलस्य ज्यायस्त्वात्। स्वरूपतो दुर्बलैरपि प्रबलतरप्रमाणश्रुतिगम्यैः क्रमादिभिराचमनादि बाध्यत इति न तत्स्मरणं प्रमाणम्। तथा हि— प्रमेयबलात्प्रमाणबलं ज्यायः, प्रमेयावगमस्य प्रमाणाधीनत्वात्। न चैवमपि प्रमेयबलापेक्षया प्रमाणबलस्य उपस्थित्यलाभात्कथं तस्य ज्यायस्त्वमिति वाच्यम्। श्रुतिस्मृतिलक्षणं हि प्रमाणं न चक्षुरादिवदनवगतमपि प्रमेयावगतिहेतुः, किंत्ववगतमेव। ततश्च प्रमेयावगमात्पूर्वमेव श्रुतिलक्षणप्रमाणावगमावश्यंभावेन तदवगमदशाया-

1. बाधो—क.

तद्गतबलाबलावगमात् श्रुतिस्मृतिप्रमाणबलाबलं प्रमेयबलावगमात्पूर्वमेवावगम्यते । ततश्चासंजातविरोधिप्रथमोपस्थितिकेन श्रुतिबलेन स्मृत्यबलेन च क्रमादिप्राबल्ये आचमनादिदौर्बल्ये च निर्णीते सत्याकाङ्क्षाशान्तेः, पश्चात्स्मार्तप्रमेयबलस्यानादरः फलति । तस्मादाचमनादिस्मरणमप्रमाणमिति पूर्वः पक्षः । सिद्धान्तयति—**अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्** । अपि वेति पूर्वपक्षव्यावृत्तौ । स्मार्तप्रमेयाचमनादिबाधे कारणस्य प्रमाणबलस्य स्मार्तप्रमेयाचमनाद्यवगमात्पूर्वम् अग्रहणे अनवगमे सति तस्य ज्यायस्त्वाभावात् कर्ममध्ये स्मर्तृभिः प्रयुक्तानि आचमनादीनि आदरणीयतया प्रतीयेरन् । तथा हि— श्रुतिस्मृतिप्रमाणयोर्न स्वरूपेणाहिनकुलवद्विरोधः, किंतु विरुद्धप्रमेयप्रमापकतयैव । ततश्च प्रथमं प्रमाणस्वरूपालोचनेऽपि प्रमेयस्वरूपालोचनं विना विरोधस्याप्रतीतेः प्रमेयस्वरूपालोचनानन्तरमेव विरोधप्रतिसंधानं वाच्यम् । तत्र प्रमेयस्वरूपावगमवेलायां तद्गतबलस्यावगततया तेनासंजातविरोधिप्रथमोपस्थितिकतया अधिकेन स्मृतिप्रमेयबलेन आचमनादीनां श्रौतक्रमादिभिरबाध्यत्वे प्रत्युत तद्बाधकत्वे तत्स्मरणस्य च प्रामाण्ये निश्चिते सति तत एवाकाङ्क्षाशान्तेस्तदुत्तरमवगम्यमानमपि प्रमाणबलमकिंचित्करमेव भवति । न चैवमाचमनादिभिः क्रमादिबाधे श्रुतेरत्यन्तबाधापत्तिरिति वाच्यम् । तस्याचमनादिनिमित्तोपनिपाताभावे सावकाशत्वात् । तस्मात्सत्यपि विरोधे बलवद्विरोधाभावाद्युक्तमाचमनादिस्मृतीनां प्रामाण्यम् । इति द्वितीयं वर्णकम् ॥

तदिदमप्यनुपपन्नम् . क्रमादीनामाचमनादीनां च विरोधाभावस्य स्फुटमनुपदमुपपादितत्वेनाभ्युपगम्य विरोधं पूर्वपक्षप्रवर्तनायोगात् । एवमन्यान्यपि दूषणानि भाष्योत्प्रेक्षिते शिष्टाकोपाधिकरणद्वयेऽस्मिन्नुद्भाव्य वार्तिककारः सूत्रद्वयमन्यथा व्याचष्ट । तत्राद्यं सूत्रं पूर्वाधिकरणचोद्यनिराकरणपरगुणसूत्रतया व्याचख्यौ । 'अपि वा कारण' इत्यादि द्वितीयसूत्रं चाधिकरणान्तरपरतयायोजयत् । यथा—'विरोधे त्वनपेक्षं स्यात्' इति सूत्रे शाक्यादिग्रन्थानां वेदवादविरोधादप्रामाण्यमुपक्षिप्तम् । तत्राक्षिप्य समाधत्ते—**शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्** । शाक्यादिग्रन्थेषु यः अंशः वेदवादैर्विरुध्यते तत्राप्रामाण्यमस्तु । शिष्टाकोपे शिष्टं वेदोपदिष्टं न कोपयति न बाधते यः तस्मिन्नंशे तु अहिंसासत्यवचनशमदयावैराग्यध्यानाभ्यासादिधर्मबोधके प्रामाण्यमविरुद्धम् । तत्र वैदिकशिष्टपरिग्रहस्य मुख्यस्य प्रामाण्यहेतोः सत्त्वेन मन्वादिस्मृतिवत्प्रामाण्यावश्यंभावात् इति चेत्, तन्न । कुतः । शास्त्रपरिमाणत्वात् । परिमाणेति कर्मणि ल्युट् । धर्मप्रतिपादकशास्त्राणां परिमितत्वात् । याज्ञवल्क्यादिभिर्हि[1] धर्मस्थानानि परिगणितानि 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' इत्यादिना । न च तदन्तर्गताः शाक्यादिग्रन्थाः । अतस्तत्र अहिंसादिवादा अपि श्ववराहादिचर्मदृतिनिक्षिप्तक्षीरघृतादिवद्धर्मप्रमाण-

1. हि शिष्टैः—क, ग.

तया नादर्तव्याः। ततश्च शाक्यादिग्रन्थेषु निबद्धमप्यहिंसादिकं न ततो ज्ञातं सदनुष्ठितं श्रेयसे भवति, किंतु वेदतस्तन्मूलकस्मृत्यादितो वा परिगणितादेव प्रमाणात्। न चाहिंसादिविषये तेषां संवादादेव प्रामाण्यं किं न स्यादिति वाच्यम्। एवं सत्यधिगतार्थविषयतया शाक्यादिग्रन्थानां सुतरां प्रामाण्यानुपपत्तेः। अत एवेदानींतनसंग्रहवाक्यावगतमपि वेदाविरुद्धमनुष्ठितं न श्रेयसे भवति। तदाहुर्भट्टपादाः—'यथैवान्यायविज्ञाताद्वेदाल्लेख्यादिपूर्वकात्। श्रमेणाधिगताद्वापि धर्मज्ञानं न संमतम्। तथातिक्रान्तवेदोक्तमर्यादाव्यवहारिणाम्। संवादिष्वपि वाक्येषु नेष्यते धर्महेतुता' इति। एतेन वेदाविरुद्धेष्वपि पाञ्चरात्रादिभागेषु धर्मप्रामाण्यं दूरत एव निरस्तम्, पाञ्चरात्रादीनां परिगणितेषु धर्मस्थानेष्वनन्तर्भावात्। तथा च मन्वादिस्मरणम् 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः' इत्यादि। वेदबाह्याः वेदेषु तन्मूलकस्मृत्यादिषु परिगणितेष्वनन्तर्भूताः। तथा च पौराणिकाः—'स्वतन्त्रा आगमाः सर्वे निर्मूलाः परिकीर्तिताः। पाञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके। न हि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे। तथापि योंशस्तन्त्रेषु वेदैस्तु न विरुध्यते। सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम्। तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम्। विमोहनाय शास्त्राणि करिष्यावो वृषध्वज। पाञ्चरात्रादयो मार्गाः कुण्डादीनां हितावहाः' इत्यादि। तदेवं पाञ्चरात्रादीनां वैदिकान्प्रत्यननुष्ठापकत्वान्न धर्मे प्रामाण्यमित्यन्यत्र विस्तरः। इति विरोधाधिकरणशेषः॥

वसन्तोत्सवादिसदाचाराः प्रमाणमप्रमाणं वेति संशयः। तत्राचाराणां स्मृतिवदेव वैदिकपरिग्रहादेः प्रामाण्यहेतोः सत्त्वेऽपि स्मृतिवन्मन्वादिभिरनिबद्धत्वादप्रामाण्यम्। यदि हि वसन्तोत्सवादिमूलश्रुतयो मन्वादीनां प्रत्यक्षाः स्युस्तदा अष्टकादिवदेव निबध्येरन्। यदि तेषामप्यप्रत्यक्षास्तर्हि तत्सत्त्वे प्रमाणाभावः। 'आचारश्चैव साधूनाम्' इत्यादि सामान्यतो निबन्धनं तु श्रुतिसंवाद्याचारप्रामाण्यपरं भविष्यति। किंच श्रुतिस्मृतिविरुद्धस्याप्यर्थस्य शिष्टैः पूर्वैरिदानींतनैश्चाचरणान्न तदाचाराणां प्रामाण्यसंभवः। तथा हि—'प्रजापतिरुषसमभ्यैत्स्वां दुहितरम्' इति प्रजापतेः स्वदुहितृगमनम्, इन्द्रस्याहल्यागमनम्, नहुषस्य शचीवाञ्छा, वसिष्ठस्य पुत्रशोकार्दितस्यात्महत्योपक्रमः, पुरूरवस उर्वशीवियोगादात्महत्योपक्रमः, विश्वामित्रस्य चण्डालयाजनम्, भीष्मस्यानाश्रमिणोऽवस्थितिः, तस्य दाशरथेश्चापत्नीकस्य क्रतुहरणम्, धृतराष्ट्रस्यान्धस्य यागः, युधिष्ठिरस्यार्जुनभार्यापरिणयः. तस्यैवाचार्यविप्रद्रोणवधार्थमनृतभाषणम्, अर्जुनस्य मातुलदुहितृसुभद्रापरिणयः, व्यासस्य गृहीतब्रह्मचर्यस्य भ्रातृभार्ययोरम्बिकाम्बालिकयोर्विधवयोर्धृतराष्ट्रपाण्डूत्पादनम्, तस्यैव दास्यां विदुरोत्पादनम्, इदानींतनानामप्याहिच्छत्रमथुरानिवासिब्राह्मणानां सुरापानम्, उदीच्यानां केसर्यश्वतरखरोष्ट्रोभयतोदत्क्रयविक्रयभार्यानुपनीतसहभोजनम्, दाक्षिणात्यानां मातुल-

हितृपरिणयः आसन्दीस्थभोजनादीनि च, एवं [1]प्रतिपुरुषजातिकुलावस्थितान्यधर्माचरणान्यन्तानि । [2]ततश्च श्रुतिस्मृतिविरुद्धान्याचरतां वसन्तोत्सवाद्याचारविषये कथं प्रामाण्यम् । किंच सदाचारानुष्ठातारः शिष्टाः शिष्टानुष्ठिताश्च सदाचारा इत्यन्योन्याश्रयात्सदाचारस्वरूपमेव दुर्निरूपम् । तस्मान्न सदाचाराणां धर्मप्रामाण्यमिति प्राप्ते सिद्धान्तयति— **अपि वा कारणाग्रहणे प्रयुक्तानि दर्शयेयुः ।** अपि वेति पूर्वपक्षव्यावृत्तौ । आचारप्रामाण्यविरोधकारणस्य उक्तदोषसमूहस्य अग्रहणे । निमित्तसप्तम्येषा । अग्रहणाद्धेतोः शिष्टैः प्रयुक्तानि वसन्तोत्सवाद्याचरणानि प्रमाणतया दर्शयेयुः, पूर्वपक्षोक्तदोषाभावात् । आचारस्य प्रामाण्यमविरुद्धमिति यावत् । तथा हि—यदुक्तं मन्वादिभिर्विशिष्यानिबद्धाः सदाचारा इति तन्न । मन्वादिभिर्हि लाघविकैर्मूलश्रुतीर्विशिष्य दृष्ट्वैव 'सदाचारः प्रमाणम्' इति सामान्यतो निबद्धम् । न चैतावता कश्चिद्विरोधः । यदपि सामान्यनिबन्धनं प्रत्यक्षश्रुतिसंवाद्याचारविषयं भविष्यतीति, तदपि न । तथा सति श्रुत्यैव तदवगमसंभवेन निबन्धनवैयर्थ्यात्, 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम्' इति त्रयगुपादानवैयर्थ्यात्, चकारवैयर्थ्याच्च । यत्तु प्रजापत्यादेर्विरुद्धाचरणमुपन्यस्तं तत् 'प्रजानां पतिरादित्यः उषसं प्रातःसंध्याम् [3]आदित्यादुद्भूतत्वेन स्वां दुहितरम् उद्यन्नभ्यैत्[4]' इत्येवमर्थान्तरपरतया, अमनुष्यत्वेन शास्त्रीयविधिनिषेधाविषयत्वाद्वा तेजोविशेषाद्वा तेषां न दोषावहम्; इतरेषां तु दोषावहमेवेति नातिप्रसङ्गः । उक्तं च भट्टपादैः—'श्रुतिसामान्यमात्राद्वा न दोषोऽत्र भविष्यति । मनुष्यप्रतिषेधाद्वा तेजोबलवशेन वा । यथा वा न विरुद्धत्वं तथैतद्गमयिष्यते' इति । प्रजापतीन्द्रहुषाद्याचरणेषूदाहृतेषु विशिष्य दोषोद्धारस्तु वार्तिकादावेवानुसंधेयः । प्रत्यक्षवेदादिविहितानुष्ठातृत्वेन च शिष्टत्वस्यान्यतः सिद्धेर्नान्योन्याश्रयः । अतः सदाचारोऽपि धर्मे प्रमाणम् । इति सदाचाराधिकरणम् ॥

इदमामनन्ति 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वैतसे कटे प्राजापत्यान्संचिनोति' इति । तत्र यववराहवेतसशब्दान्केचित्प्रियंगुवायसजम्बूषु प्रयुञ्जते । अन्ये तु दीर्घशूकसूकरवञ्जुलेषु प्रयुञ्जते । तत्र किमुभयत्र यवादिशब्दा मुख्याः अतश्च विकल्पः, उत दीर्घशूकादिष्वेव मुख्या अन्यत्र गौणाः अतश्च दीर्घशूकादय एव ग्राह्याः इति संशये, पूर्वपक्षयति—

५. शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम् ।

[5]तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ ७ ॥

तेषु शब्दार्थेषु प्रियंग्वादिषु दीर्घशूकादिषु च विप्रतिपत्तिः विविधा शब्दस्य प्रतिपत्तिः

1. प्रतिपुरुषजातिकालावस्थितानि—ख, ग. 2. तथा च—ख. 3. आदित्योद्भूतत्वेन—
4. अभ्येति— ख, क, ग. 5. तेष्वदर्शनाद्विरोधस्येत्ययमंशः पूर्वसूत्रशेष इति केचित् ।

समा स्यात् । यवादिशब्दानामुभयत्राभिधायकता मुख्येति यावत् । कुतः, विरोधस्य उभयत्रापि अदर्शनात् ततश्च प्रयोगद्वयस्यापि तुल्यबलत्वात् उभयेषामपि शब्दार्थत्वाध्यवसायाद्विकल्पेन ग्रहणम् ॥

इति प्राप्ते, सिद्धान्तयति—

शास्त्रस्था वा तन्निमित्तत्वात् ॥ ८ ॥

वाशब्द एवार्थः पूर्वपक्षव्यावृत्तौ । शास्त्रस्था शास्त्रानुसारिण्येव विप्रतिपत्तिः विशिष्टा प्रतिपत्तिः दीर्घशूकाद्यभिधायकता बलीयसी । कुतः । तन्निमित्तत्वात् शास्त्रस्य तन्निश्चायकत्वात् । यवान्हि प्रकृत्य वाक्यशेषः श्रूयते 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इति । अतो दीर्घशूका यवा निश्चीयन्ते, अन्यौषधिम्लानिकाले वसन्ते दीर्घशूकानामेव मोदमानत्वात् प्रियंगूणां च शारदानां वसन्ते रूपगन्धस्याप्यभावात् । 'वराहं गावोऽनुधावन्ति' इति वाक्यशेषाद्वराहशब्दस्य सूकरार्थत्वं निश्चिनुमः । गावो हि सूकरं वत्सबुद्ध्यानुधावन्ति, न तु वायसम् । 'अप्सुजो वेतसः' इति वाक्यशेषाच्च वेतसशब्दस्य जलवृक्षवञ्जुलवाचकत्वमवसीयते[1], जम्ब्वाः स्थलवृक्षत्वात् । अतोऽत्र दीर्घशूकादीनामेव ग्रहणम् । इति यववराहाधिकरणम् ॥

तदिमानि भाष्योदाहृतान्यनुदाहरणानि, प्रियंग्वादिषु यवादिशब्दानां लोके सर्वत्राप्रसिद्धेः, यवादिष्वेव च प्रसिद्धेः, 'संदिग्धे तु वाक्यशेषात्' इत्यधिकरणे वाक्यशेषतो निर्णयस्य वक्ष्यमाणत्वेन तेनैव गतार्थत्वाच्च इत्यादिदूषणान्युद्भाव्य वार्तिककारो विषयान्तरे सूत्रद्वयमिदं योजयामास । यथा— पील्वादिशब्दानार्या वृक्षादिषु प्रयुज्यते, म्लेच्छा हस्त्यादिषु । तत्र किमार्यम्लेच्छप्रसिद्धयोस्तुल्यबलत्वम् उतार्यप्रसिद्धिर्बलीयसीति संशये पूर्वपक्षयति— **तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्** । तेषु वृक्षादिषु हस्त्यादिषु च पील्वादिशब्दानां विविधा प्रतिपत्तिः प्रतिपादकता बलतः समा स्यात् । कुतः । विरोधस्य अदर्शनात् आर्यव्यवहारसिद्धस्य वृक्षादेर्वा म्लेच्छव्यवहारसिद्धस्य हस्त्यादेर्वा शब्दार्थतया अध्यवसाने विरोधाभावात् । शास्त्रप्रमाणके हि धर्मे शास्त्रपथातिवर्तिम्लेच्छापेक्षया [2]शास्त्रपथवर्तिनामार्याणामस्ति बलीयस्त्वम । शब्दार्थस्य तु लोकव्यवहारगम्यत्वात्तद्विषये आर्यम्लेच्छप्रसिद्धयोस्तुल्यबलत्वमेव । तथा च 'पैलवो दण्डः' इत्यत्र गजदन्तमयो वा वृक्षविशेषप्रकृतिको वा दण्डो ग्राह्यः इति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमित्तत्वात्** । वा शब्दः, पूर्वपक्षव्यावृत्तौ । व्यवहाराच्छब्दार्थनिर्णये शास्त्रस्थाः शास्त्रानुवर्तिनः शिष्टा एव

1. अवधार्यते—क, घ. 2. शास्त्रपथानतिवर्तिनाम्—ख.

बलीयांसः। कुतः। तन्निमित्तत्वात् तस्मिन्व्यवहाराच्छब्दार्थनिर्णये तेषामेव हेतुत्वात्। तथा हि—न तावदेकस्य शब्दस्योभयार्थत्वं युज्यते, अनेकशक्तिकल्पनाप्रसङ्गात्, तथा सति प्रयुक्ते शब्दे अन्यतरनिर्धारणाभावेन व्यवहारानुपपत्तेश्च, अष्टदोषदुष्टविकल्पापत्तेश्च। तथा हि; पीलुशब्दप्रयोगे सति यदा हस्ती गृह्यते तदा वृक्षार्थत्वग्राहकप्रमाणे प्राप्तप्रामाण्यपरित्यागः अप्राप्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्, पुनः प्रयोगे यदा वृक्षो गृह्यते तदा वृक्षार्थत्वग्राहकप्रमाणे परित्यक्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यपरित्यागश्चेति दोषद्वयम्, हस्त्यर्थत्वग्राहकप्रमाणे च प्राप्तप्रामाण्यपरित्यागः अप्राप्ताप्रामाण्यस्वीकारश्चेति दोषद्वयम्, ततस्तृतीयवारं प्रयोगे यदा हस्ती गृह्यते तदा हस्त्यर्थत्वग्राहकप्रमाणे स्वीकृताप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्, तदेवं पर्यायत्रयेण एकैकस्मिन्प्रमाणे चत्वारो दोषा इत्यष्टदोषदुष्टता विकल्पस्य स्यात्। म्लेच्छप्रयोगस्तु गौण्या वृत्त्यैवोपपद्यते। तेषां तत्र मुख्यत्वाभिमानस्त्वन्धपरंपरया भविष्यति। यत्र हि कश्चिदङ्गुल्या किंचिन्निर्दिश्य हस्तिनि पीलुशब्दं प्रयुङ्क्ते तत्र श्रोता उन्नतत्वसादृश्येन असौ प्रयुक्त इति गौणार्थं प्रतिपद्यते। तटस्थस्तु तयोर्व्यवहारं पश्यन्मुख्यत्वं भ्राम्यति, स च मुख्यतया परानपि बोधयतीत्यन्धपरंपरया मुख्यत्वाभिमानानुवृत्तिसंभवात्। न चैवं [1]सत्यादिशब्देष्वपि नानार्थत्वं न स्यादिति वाच्यम्। देवनरथावयवेन्द्रियादिषु तेषामार्यप्रयोगस्य निर्विशेषत्वेनागत्या तत्र तथा स्वीकारात्। पील्वादिशब्दास्तु म्लेच्छैरेव हस्त्यादिषु प्रयुज्यन्ते, न चार्यैः। न च विनिगमनाविरहाच्छब्दार्थनिर्णये म्लेच्छादीनामपि नियामकतेति वाच्यम्। अभिनिवेशानभिनिवेशयोरेव विनिगमकत्वात्। तथा हि—शिष्टास्तावच्छब्दैकसमधिगम्यं धर्मं लिप्सवः अधर्मं च परिजिहीर्षवः श्रुतिमिव तदर्थतत्त्वं च विविच्य पालयन्तस्तत्राभिनिविशन्ते। म्लेच्छास्तु दृष्टार्थव्यवहारस्य यथाकथंचित्संभवे सति प्रयोजनाभावान्न तत्राभिनिविशन्ते। ततश्च विप्लवसंभवान्न म्लेच्छप्रसिद्धया शब्दार्थतत्त्वनिर्णयः; किंत्वार्यप्रसिद्धयैव निर्दोषया बलीयस्या शब्दार्थतत्त्वनिर्णयः इति पील्वादिशब्दा वृक्षादिवाचका एव। अतः 'पैलवो दण्डः' इत्यत्र वृक्षविशेषप्रकृतिकदण्डस्यैव ग्रहणम्, न तु गजदन्तदण्डस्येति सिद्धम्। इत्यार्यम्लेच्छाधिकरणम्॥

विषयान्तरे चेदं सूत्रद्वयं योजितं वार्तिककृता। यथा—'मातुलस्य सुतामूढ्वा मातृमित्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्' इति शातातपादिस्मृतिनिषिद्धमातुलसुतापरिणयाद्याचाराः प्रमाणमप्रमाणं वेति संशयः। तदर्थं च स्मृत्याचाराणां विरोधे तुल्यबलत्वम्, न स्मृतय एव बलीयस्य इति चिन्त्यते। तत्र पूर्वपक्षयति—तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्। तेषु स्मृत्याचारेषु विप्रतिपत्तिः विशिष्टा अधिका प्रतिपत्तिः विप्रतिपत्तिः महत्त्वबुद्धिः।

1. सति हर्यक्षादि—क.

बलवत्तेति यावत्। सा समा स्यात्। कुतः। विरोधस्यादर्शनात्। न ह्याचारात्स्मृतीरनुमाय ताभि श्रुतिरनुमीयते, येन तेषां द्वयन्तरितप्रामाण्यकतया साक्षाच्छ्रुत्यनुमापिकाभ्य एकान्तरितप्रामाण्यकाभ्य स्मृतिभ्यो बलवत्ता विरुध्यते। नैवमस्ति, प्रमाणाभावात्। धर्मबुद्ध्या शिष्टपरिग्रहस्य श्रुतिकल्प कताबीजस्य स्मृतिष्वाचारेषु चाविशिष्टत्वादिति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमि त्तत्वात्।** वाशब्दः पूर्वपक्षव्यावृत्तौ। मन्वादिधर्मशास्त्रगतैव बलवत्ता, न त्वाचारगता। कुतः तन्निमित्तत्वात् आचाराणां वेदमूलकत्वस्य स्मृतिकल्पनद्वारकत्वात्। तथा हि—आचारास्तावः नित्यानुमेयश्रुतिकल्पकाः, अन्धपरंपराप्रसङ्गात्। किंतु स्मृतिवदेव कस्यचित्प्रत्यक्षाः श्रुतीः कल्प यन्ति। न चेदानींतनानामाचरितृणां प्रत्यक्षस्वस्वशाखागतवाक्यान्यप्युपसंहर्तुमर्थतश्च प्रतिपत्तुम समर्थानां तद्विषयेऽपि स्मृतिकल्पसूत्राण्यपेक्षमाणानामितस्ततो विप्रकीर्णपरःसहस्रशाखागततदुप संहारदुर्बोधानन्तश्रुतिवाक्येषु प्रत्यक्षस्य तदर्थानुभवस्य वा संभावनाप्यस्ति। अतोऽर्वाचीनाचारेभ्य साक्षान्न श्रुतिकल्पनम्, बाधितत्वात्। किंतु महर्षिभिरेव तादृशश्रुतिवाक्यान्युपलभ्य स्मृत्वा शिष्या णामुपदिष्टम्। तैरन्येषामाचाराः प्रवर्तिताः। तान्हृद्वान्येऽप्याचरन्तीत्येवं परंपरया इदानींतनपर्य न्तमाचाराः प्रवृत्ता इत्यास्थेयम्। ततश्चाचाराणां स्मृतिकल्पनामुखेनैव श्रुतिकल्पकत्वेन द्वयन्तरित प्रामाण्यकतया स्मृतिभ्यो दुर्बलत्वम्। किंच, आचारेषु कर्मस्वरूपमात्रमवगतम्। कर्त व्यता तु विमर्शपूर्वकं लोभादिकारणान्तरसम्भावनाविरहकृतेन धर्मतया शिष्टपरिग्रहेण कल्पयितव्या तां च कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रकर्षः। सनिबन्धनासु स्मृतिषु तु झटिति ग्रन्थत एः कर्तव्यतावगम्यते। मूलमात्रं तु कल्पनीयमिति संनिकर्षाद्बलवत्ता। किंच, कामादिहेत्वन्तरसंभ वान्न मातुलसुतापरिणयनाद्याचाराणां श्रुतिकल्पकत्वसंभावनाकथापि। 'मातुलस्य सुतामूढ्वा' इत्या दिस्मृतिविरोधादपि न तेषां श्रुतिकल्पकता। न च, भाष्यकारीयविरोधाधिकरणभङ्गावसरे श्रुतिविरु द्धानामपि स्मृतीनां प्रामाण्यं व्यवस्थापितं वार्तिके; तद्वत्स्मृतिविरुद्धानामप्याचाराणां प्रामाण्यं किं स्यादिति वाच्यम्। तत्र विकल्पेनोभयानुष्ठानसंभवात्प्रामाण्यम्, इह तु वस्तुनि विकल्पासंभवा प्रामाण्यमिति वैषम्यात्। मातुलसुताद्याचाराणां हि श्रुतिविहितत्वेन प्रत्यवायकरत्वाभावो वक्त व्यः। निषेधबलाच्चावश्यं प्रत्यवायकरत्वं वक्तव्यम्। न चैतदुभयमेकत्र संभवति, विरोधात्। त ईदृशस्थले विधिप्रतिषेधाभ्यां विकल्पो नाभ्युपगन्तुं युक्तः। क्रत्वर्थेषोऽशिग्रहणाग्रहणविषये तु निषे धेन ग्रहणस्य क्रतूपकारकत्वाभावो न बोध्यते; किंतु ग्रहणाभावस्य क्रतूपकारकतामात्रं बोध्यते ततश्च तत्र विधिनिषेधाभ्यामेकस्यैव वस्तुनो [1]विरुद्धस्वरूपद्वयानापादनात्संभवति विकल्पः। एवं स्पर्शनसर्ववेष्टनादिष्वपि श्रुतिस्मृतिविरुद्धेषु क्रत्वर्थेषु विकल्पः संभवतीति वैषम्यम्। अतः स्मृति विरुद्धाचाराणामक्रत्वर्थानां न प्रामाण्यम्। इति स्मृत्याचारविरोधाधिकरणम्॥

1. विरुद्धस्वभाव—क, ग, घ.

इतोऽपि विषयान्तरे सूत्रद्वयमिदं योजितं वार्तिके । यथा—यत्र त्रिवृदादिशब्देषु लोकवेदयोः शब्दार्थविप्रतिपत्तिः तद्विषयमिदं सूत्रद्वयम । त्रिवृच्छब्दो हि लोके त्रिभिर्वर्तते इति व्युत्पत्त्या 'त्रिवृद्रज्जुः' 'त्रिवृद्ग्रन्थिः' इत्यादौ त्रैगुण्यवाचितया प्रसिद्धः। वेदे तु क्वचिच्छाखायाम् 'त्रिवृद्बर्हिष्पवमानम्' इत्युक्त्वा 'उपास्मै गायतानरः' इति नवर्चानुक्रमणात् 'नवभिः स्तुवन्ति' इति शाखान्तरे श्रवणाच्च स्तोत्रीयानवकपरता प्रतीयते । चरुशब्दस्तु लोके स्थाल्यां प्रयुज्यते 'चरुमग्नावधिश्रित्य तण्डुलानावपति' 'चरुर्भिन्नः' इत्यादौ । वेदे तु 'आदित्यः पयसि चरुः प्रायणीयः' इति विधाय 'आज्यस्यैनं चरुमभिपूर्य चतुर आज्यभागान्यजति । पश्चात्स्वस्ति पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सुवितारमुत्तरतो मध्येऽदितिमोदनेन' इति क्रमदेशादिविधिपरे वाक्ये सिद्धवदोदनानुवादादोदनपरता विज्ञायते । आज्यस्येति करणस्य शेषत्वविवक्षया षष्ठी । आश्ववालशब्दश्चाश्वपुच्छकेशसंघाते अवयवव्युत्पत्त्या लोके प्रयुज्यते । वेदे तु 'आश्ववालः प्रस्तरः' इत्यधिकृत्य 'यज्ञो वै देवेभ्योऽश्वो भूत्वापाक्रामत् । सोऽपः प्राविशत् स वालधौ गृहीतः । स वालान्मुक्त्वा विवेश । ते वालाः काशा अभवन' इति वाक्यशेषश्रवणात् काशपरता प्रतीयते । 'ऐक्षवी विधृती' इत्यत्र ऐक्षवीशब्दस्यावयवव्युत्पत्त्या इक्ष्ववयवपत्रादिपरता लोकतोऽवगम्यते । वेदे तु वाक्यशेषात्काशमूलपरता । तादृशवाक्यशेषस्तु वार्तिकबलादेव क्वचिदुन्नेयः । तथा स्तोमशब्दः 'ब्राह्मणस्तोमः' इत्यादौ समुदायमात्रे प्रयुज्यते लोके । वेदे तु 'पञ्चदशः स्तोमो भवति' इत्यादिसामानाधिकरण्यनिर्देशात्स्तोत्रीयासंख्याकृतस्तुतिसंख्यापरता प्रतीयते । स्तुतेर्मानं स्तोमः । पञ्चदश संख्या अस्य पञ्चदशः । 'स्तोमे डविधिः पञ्चदशाद्यर्थः' इति डप्रत्ययः । तदेतेषु शब्देष्वर्थविप्रतिपत्तौ किं लोकवेदयोः साम्यम्, उत वेदो बलवानिति संशये, पूर्वपक्षयति— **तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्** । तेषु त्रिवृदादिशब्देषु लोकवेदतो विलक्षणतया जायमाना अर्थप्रतिपत्तिः समा तुल्यबला स्यात् । कुतः । विरोधस्य अदर्शनात् अदृष्टधर्मप्रमितौ स्मृत्याचारेभ्यो वेदस्य बलवत्त्वेऽपि दृष्टे शब्दार्थावधारणे अनादिवृद्धव्यवहाररूपाचारात् तथाविधवृद्धस्मरणाद्वा वेदस्याधिक्ये प्रमाणाभावेन उभयार्थत्वे विरोधस्यादर्शनादित्यर्थः । एतेन धर्मप्रमितौ वेदस्यान्तरङ्गतया तत्प्रसिद्धेः प्रबलत्वात्कथमयं पूर्वपक्ष इति निरस्तम् । न च सकृच्छ्रुतत्वात्कथमुभयार्थकत्वमिति वाच्यम् । अन्यतरनिर्धारकाभावेनानध्यवसाये अप्रामाण्यापत्त्या चानन्यगत्या सकृच्छ्रुतत्वेऽपि आवृत्त्या उभयार्थकत्वस्य वाच्यत्वात् । अतोऽत्र लौकिकवैदिकार्थग्रहणे विकल्पः । ततश्च 'त्रिवृद्बर्हिष्पवमानम्' इत्यलौकिकार्थग्रहणपक्षे बर्हिष्पवमानाख्यस्तोत्रं त्रिवारं कर्तव्यमिति वा त्रिभिर्ऋग्भिः कर्तव्यमिति वा लभ्यते । ऋगन्तरान्नानम् 'नवभिः स्तुवन्ति' इति वचनं च पाक्षिकतयोपपद्यते । चरुशब्देन तु स्थाली कृष्णलवत्प्रदेयत्वेन विधीयते, पयश्च दधिकरणतया । 'अदितिमोदनेन' इति वाक्यशेषश्च पाक्षिकानुवादः । एवमाश्ववालैक्षवीस्तोमशब्दार्थेषु च विकल्पः । अर्थवादश्च पाक्षिकानुवादः ।

इति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमित्तत्वात्** । वाशब्द एवार्थे । शास्त्रं वाक्यशेषः । तज्जन्यतया तत्र विद्यमाना स्तोत्रीयानवकाद्यवगतिरेवाश्रयणीया, न तु लोकानुसारिणी त्रैगुण्याद्यवगतिः । कुतः । तन्निमित्तत्वात्, वाक्यशेषस्य विधेयस्तुतिप्रयोजनकत्वात् । यदि ह्यत्र लौकिकोऽर्थ आश्रीयेत, तर्हि विधिस्तुत्योर्भिन्नविषयत्वेन विध्यविषये स्तुत्यानर्थक्यं प्रसज्येत । ततश्च 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन वाक्यशेषानुगुण एवात्रार्थनिर्णयः । यद्यपि, 'त्रिवृद्बर्हिष्पवमानम्' इत्यत्र नार्थवादरूपो वाक्यशेषः, किंतु स्तोत्रीयानवकाम्नानम् 'नवभिः स्तुवन्ति' [1]इति वाक्यम्, तच्च स्तोत्रीयानवकविधानार्थमेव । तेन च 'त्रिवृद्बर्हिष्पवमानम्' इति विधेरङ्गाङ्गित्वेनैकवाक्यता । सा च असत्यपि तयोर्विषयैक्ये संभवतीति कथमत्र वाक्यशेषान्निर्णय इति;—तथापि स्तोत्रीयानवकाम्नानस्य 'नवभिः स्तुवन्ति' इत्यस्य च तद्विधिमात्रार्थत्वे [2]विध्युद्देशे त्रिवृच्छब्दोऽनुपपन्नः स्यात्, स्तोत्रीयानवकगुणप्रापकेण नवर्चविधिना स्तोत्रे त्रैगुण्यविधेः ऋक्त्रयविधेश्च विरोधात् । अतो विध्युद्देशगतत्रिवृच्छब्दसहितं स्तोत्रीयानवकाम्नानं 'नवभिः स्तुवन्ति' इति वाक्यं च त्रिवृच्छब्दस्य स्तोत्रीयानवकपरताकथनपरमप्यध्यवसीयत इति वाक्यशेषादत्रापि निर्णयः[3] । न च 'संदिग्धे तु वाक्यशेषात्' इत्यनेन गतार्थमिदमधिकरणमिति वाच्यम् । इह हि वाक्यशेषप्रवृत्तेः[4] प्राक्कोट्यन्तरोपस्थापकाभावाल्लोकतस्त्रैगुण्यादिकमेव निश्चितम् । 'अक्ताः शर्कराः' इत्यत्र तु विध्युद्देशस्य द्रवद्रव्यमात्रसाधारण्यात्प्राग्वाक्यशेषात्संदेहः । ततश्च वाक्यशेषस्य संदेहनिवर्तकत्वेऽपि प्रबलविपरीतनिश्चयनिवर्तकत्वं न संभवतीत्यधिकाशङ्कानिराकरणार्थमिदमधिकरणमिति न गतार्थता, वाक्यशेषानर्थक्यतस्तच्छङ्कापरिहारस्योपपादितत्वात् । यववराहाधिकरणे तु वाक्यशेषात्प्राक्संदेह एव, यवादिशब्दानां प्रियंग्वादिषु सार्वत्रिकप्रसिद्धेरभावात् । न तु विपरीतनिश्चयः । अतो भाष्यकारमते प्रागुक्तगतार्थत्वस्य नानुपपत्तिः । इति त्रिवृदधिकरणम् ॥

आर्यम्लेच्छप्रसिद्ध्योर्विरोधे म्लेच्छप्रसिद्धेरप्रामाण्यमिति स्थितम् । इदानीमविरोधे सति म्लेच्छप्रसिद्धेः प्रामाण्यसंभवः अस्ति न वेति विचार्यते । 'पिकमालभते' 'प्र नेमस्मिन्दृशे' 'सते हिरण्यं निधाय' इत्यादौ पिकादिशब्दाः श्रूयन्ते । तांश्चार्याः क्वापि न प्रयुञ्जते । म्लेच्छास्तु कोकिले, अर्धे, शतच्छिद्रदारुमये पात्रे, इत्यादौ प्रयुञ्जते । तत्र म्लेच्छानां शब्दार्थनिर्णये अभिनिवेशाभावात्तत्प्रसिद्धिरप्रमाणम् । न हि यथा शिष्टा धर्मलिप्सवः अधर्मभीरवः श्रुत्यर्थतत्त्वं विविच्य पालयन्तस्तत्राभिनिविशन्ते तथा म्लेच्छा दृष्टार्थव्यवहारस्य यथाकथंचित्संभवे सति प्रयोजनाभावात्तत्राभिनिविशन्ते । ततश्च विप्लवसंभवान्न म्लेच्छप्रसिद्ध्या शब्दार्थतत्त्वनिर्णयः । ततश्च निरुक्तव्याकरणादितो धातुप्रत्ययादिकल्पनया अर्थो निर्णेयः

1. इति वाक्यं न्न तत्र—ख. 2. विध्युद्देशगतत्रिवृत्सहित—क, घ. 3. एवं च न पाक्षिकानुवादत्वदोषः इति क, घ, ङ पुस्तकेषु अधिकतया दृश्यते । 4. प्रयुक्तेः—ख, ग.

इति प्राप्ते, सिद्धान्तयति—

चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ ९ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । अपिशब्दोऽध्याहर्तव्यः । म्लेच्छप्रसिद्ध्या पिकादिशब्दवाच्यतया चोदितम् अवगतमपि कोकिलादिकं प्रमाणेन श्रुत्यादिना अविरोधात् आर्यैरपि प्रतीयेत

६. म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम् ।

आद्रियेत । पिकादिपदानि हि वेदेषु तदङ्गेषु च स्थितानि नित्यानि । तेषां च केनचिदर्थेन नित्येन भवितव्यम् । न च निरुक्तव्याकरणादितः प्रकृतिप्रत्ययादिकल्पनया तल्लाभः संभवति, प्रकृतिप्रत्ययादिकल्पनाया बहुप्रकारत्वसंभवेन ततो नियतस्य कस्यचिदर्थस्यालाभात् । 'मृण्येव जर्भरी' इत्यादौ तु अगत्या तदनुसरणम् । अस्ति चात्र गतिर्म्लेच्छप्रसिद्धिः । अतस्तयैवार्थनिर्णयः । तत्सिद्धमविरोधे म्लेच्छप्रसिद्धेरप्यस्ति प्रामाण्यम् । इति पिकनेमाधिकरणम् ॥

कल्पसूत्राणां तावद्वेदमूलकतया प्रामाण्यं स्मृत्यधिकरणे तुल्यन्यायतयावगतम् । तदाक्षिप्य समाधातुमिदमारभ्यते । कल्पसूत्राणि किं स्वतन्त्रतया प्रमाणम्, उत परतन्त्रतयेति संशयः ।

७. कल्पसूत्रास्वतःप्रामाण्याधिकरणम् ।

तदर्थं चेदं चिन्त्यते किमिमानि पौरुषेयाणि, उत अपौरुषेयाणीति । अपौरुषेयाणीति भ्रमः । कल्पसूत्रतो हि जायमाना धर्मावगतिः स्वत एव प्रमाणतया ज्ञायते । पौरुषेयत्वे च पुरुषदोषादप्रामाण्यापत्तेर्ज्ञातं प्रामाण्यं व्याहन्येत । तस्मादपौरुषेयत्वं कल्पसूत्राणाम् । एवं च शाक्यादिग्रन्थानामप्यपौरुषेयत्वं साधितं भवति । किंच कल्पसूत्राणां वैदिकपरिग्रहाद्धर्मप्रामाण्यमविवादम् । तदेषामेवापौरुषेयतया नित्यत्वं कल्पनीयम् । न तु मूलभूतं वाक्यान्तरं कल्पयित्वा तस्यापौरुषेयतया नित्यत्वं कल्पयितुमुचितम्, गौरवात् । एतेन मन्वादिस्मृतीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । किंच 'मन्त्रब्राह्मणयोर्वेदनामधेयं षडङ्गमेके' इति स्मरणात्कल्पसूत्राणामपौरुषेयत्वं स्पष्टमेवावगतम् । एतेन शिक्षाव्याकरणादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । किंच यानि वाक्यानीदानीं वेदेष्वध्यापकपरंपरया प्रत्यक्षाणि पठ्यमानानि 'प्राचीनवंशं करोति' इत्यादीनि तान्येव बहुलं कल्पसूत्रेषूपलभ्यन्ते । न हीदं पौरुषेयत्वे घटते, प्रत्यक्षवेदवाक्यनिबन्धनवैयर्थ्यात् । अतः शाखान्तरवदपौरुषेयत्वमेषां युक्तम् । न चैवं सति 'बोधायनीयम्' 'आपस्तम्बीयम्' इत्यादिसमाख्याविरोधः शङ्कनीयः । 'शाकलम्' 'बाष्कलम्' 'तैत्तिरीयम्' इतिवदुपपत्तेः । 'यश्चोऽधीते' इत्युपक्रम्य 'पुराणानि कल्पान्' इति कल्पानामप्यध्ययनविधिदर्शनाच्चापौरुषेयत्वम् । अन्यथा पौरुषेयतया अनित्यत्वे नित्यविधिविषयत्वं न घटेत । एतेन इतिहासादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । तथा च अपौरुषेयत्वेन नित्यत्वादेषां स्वतन्त्रतया प्रामाण्यम् इति पूर्वपक्ष-

मुपक्षिप्य[1] निराकरोति—

[2]प्रयोगशास्त्रमिति चेन्नासन्नियमात् ॥ १० ॥

प्रयोगस्य क्रत्वनुष्ठानस्य बोधकं शास्त्रं प्रयोगशास्त्रं बोधायनापस्तम्बादिकल्पसूत्रजालं स्वतन्त्रतया प्रमाणमस्त्विति चेत्, तन्न। कुतः। असन्नियमात्, पूर्वमसद्भिः अविद्यमानैः जनिमद्भिः बोधायनादिभिः नियमात् निबन्धनात्। पौरुषेयत्वादित्यर्थः॥ 'बोधायनीयम्' 'आपस्तम्बीयम्' इत्यादिसमाख्याबलात्पौरुषेयाण्येव कल्पसूत्राणि। 'इति बोधायनकृते, इत्यापस्तम्बकृते, इति भरद्वाजकृते, इत्याश्वलायनकृते, सूत्रे प्रथमोऽध्यायः, प्रथमः पटलः' इत्येवं तेष्वेव ग्रन्थेषु कर्तृनिबन्धनेन तन्मूलकर्तृस्मृतिपरंपरायाः भ्रान्तिमूलकत्वस्य संभावयितुमशक्यत्वात्। ततश्च दृढकर्तृस्मरणात्समाख्या एताः कर्तृनिबन्धना एव, न प्रवचननिबन्धनाः। अतः पौरुषेयत्वादेषां न स्वतन्त्रतया प्रामाण्यम्, किंतु वेदमूलकतयैव। एतेन मन्वादिस्मृतिशिक्षादीनां शाक्यादिनिबन्धनानामपि स्वतन्त्रतया प्रामाण्यं निरस्तम्। तत्र वैदिकपरिग्रहवशात्स्मृत्यादीनां वेदमूलकतया प्रामाण्यं निर्बाधम्। शाक्यादिनिबन्धनानां तु वेदविद्वेषिजनप्रणीतपरिगृहीतानां वेदमूलकत्वासंभवादप्रामाण्यमेव परिशिष्यते। यत्तु प्रत्यक्षशाखागतवाक्यनिबन्धनानर्थक्यमुक्तम्, तन्न। श्रुतिलिङ्गादिप्रमाणदुर्बोधानन्तशाखागतवाक्यान्युपसंहृत्य सुबोधकैः शब्दैस्तदर्थप्रथनाय तदावश्यकत्वात्। यच्च कल्पानां नित्यब्रह्मयज्ञविधिविषयत्वान्यथानुपपत्त्या पौरुषेयत्वमनुपपन्नमिति, तन्न। 'पश्चावत्तं जमदग्नीनाम्' 'ववरः प्रावाहणिरकामयत' इत्यादिवत्प्रवाहनित्यतया तदुपपत्तेस्तर्कपादे 'परं तु श्रुतिसामान्यमात्रम्' इत्यत्र, अर्थवादाधिकरणे 'अन्त्ययोर्यथोक्तम्' इत्यत्र, मन्त्राधिकरणे 'उक्तश्चानित्यसंयोगः' इत्यत्र च प्रपञ्चितत्वात्। यच्च 'षडङ्गमेके' इति वेदत्वं कल्पसूत्राणामिति, तन्न। तस्य स्वानभिमतपरमतोपन्यासमात्रत्वात्। न च मतान्तरे वेदत्वं स्वमते अवेदत्वं च युज्यते, वस्तुद्वैविध्यासंभवात् अङ्गशब्दविरोधाच्च।

अत्रैव युक्त्यन्तरमाह—

अवाक्यशेषात्[3] ॥ ११ ॥

वाक्यस्य विधिवाक्यस्य शेषः अर्थवादः, तस्य विध्यपेक्षितप्राशस्त्यसमर्पकत्वात्। तस्याभावात् अवाक्यशेषात्। अर्थाभावेऽव्ययीभावः। 'अपश्चम्याः' इति पर्युदासादभावो न। वेदेषु हि वाक्यानि[4] सर्वाण्यर्थवादबहुलान्येव पठ्यन्ते। कल्पसूत्रेषु तु प्रायेण विधिवाक्यान्येव

1. उत्थाप्य—क, घ, ङ. 2. अन्यत्रेदं द्विधा विभज्य पठ्यते। 3. पाठ्य। 4. विधिवाक्यानि—क, घ.

पठ्यन्ते। अर्थवादास्तु 'समुद्रो वा एष यदहोरात्रस्तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यम्' इत्यादयः क्वचिदेव पठ्यन्ते। अतो वैलक्षण्यान्न वेदत्वं कल्पसूत्राणाम्, किंतु वेदमूलकतयैव प्रामाण्यम्॥

ननु वेदतया वेदमूलकतया वा कल्पसूत्राणां प्रामाण्ये कः फलभेद इत्याशङ्क्य प्रत्यक्षश्रुतिविरोधे अप्रामाण्यमेवैषां वेदमूलकत्वे फलतीत्याह—

सर्वत्र च [1]प्रयुक्तत्वात्संनिधानशास्त्राच्च ॥ १२ ॥

नेत्यनुवर्तते। निदानसूत्रे 'सर्वोऽपरपक्षः पूर्णमासस्य कालः सर्वः पूर्वपक्षो दर्शस्य' इति पूर्वपक्षापरपक्षतिथिषु सर्वत्रापि दर्शपूर्णमासयागत्रिकद्वयस्य प्रयुक्तत्वात् प्रयोगविधानात्, न तदंशे प्रमाणं कल्पसूत्रमिति शेषः। कुतः। संनिधानशास्त्रात्, संनिधाने दर्शपूर्णमासविधिसंनिधौ विद्यमानं प्रत्यक्षं श्रुतिवाक्यं संनिधानशास्त्रम्। 'अमावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादिति यावत्। चकारो ह्यर्थो हेतौ,—यतो वेदमूलकतयैव कल्पसूत्राणि प्रमाणं न स्वतन्त्रतया, तानि च प्रत्यक्षश्रुतिविरोधे अप्रमाणमिति। द्वितीयश्चकारस्तु 'अविशेषादुभौ वा' इत्यादिविषयान्तरसमुच्चयार्थः॥ अत्रेदं चिन्त्यम्—'सर्वोऽपरपक्षः पूर्णमासस्य सर्वः पूर्वपक्षो दर्शस्य' इति कल्पसूत्रम् 'अमावास्यायाममावास्यया यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादप्रमाणमित्यनुपपन्नम्, पूर्वपक्षापरपक्षयोरपि दर्शपूर्णमासकर्मकालत्वस्य प्रत्यक्षश्रुतिसिद्धत्वात्। एवं ह्युदाहरन्ति श्रुतिवाक्यं बोधायनापस्तम्बसत्याषाढभारद्वाजाः—'अथैकेषां वि वा एतस्य यज्ञश्छिद्यते। यस्य यज्ञे प्रततेऽन्तरेतामिष्टिं निर्वपन्ति। य एवासावाग्नेयोऽष्टाकपालः पौर्णमास्यां योऽमावास्यायां तमग्नये पथिकृते कुर्यात्तेनैव पुनः पन्थानमवैति न यज्ञं विच्छिनत्तीति विज्ञायते' इति। अस्यार्थः—'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्' इत्यादिना दर्शपूर्णमासयोः स्वकालातिक्रमे पाथिकृतीष्टिः प्रायश्चित्तत्वेन विहिता तैत्तिरीयादिशाखासु। तस्यास्तावदतिपन्नेन पूर्णमासेन दर्शेन च समानतन्त्रता शाखान्तरे विहिता। तन्निन्दापूर्वकं दार्शपूर्णमासिकाग्नेययागस्यैव पथिकृद्गुणकत्वं शाखान्तरे विधीयते 'यस्य यज्ञे' इत्यादिना। यस्य यजमानस्य दर्शपूर्णमासयोरन्यतरस्मिन्नतिपन्ने यज्ञे प्रतते कालान्तरे प्रक्रान्ते सति अन्तः मध्ये एतां पाथिकृतीमिष्टिं निर्वपन्ति कुर्वन्ति ऋत्विजः; एतस्य यजमानस्य उपक्रान्तो यज्ञो विच्छिद्यते विगुणः स्यात्; अतः योऽयमाग्नेययागः अमावास्यायां च पौर्णमास्यां चाच्युतो विहितः तम् अग्नये पथिकृते

1. प्रयोगात्।

कुर्यात् । तेन पथिकृत्त्वगुणेन पन्थानं कालातिक्रमतः प्रच्युतं[1] स्वर्गस्य पन्थानं पुनरवैति प्राप्नोति । न चोपक्रान्तं यज्ञं विच्छिनत्ति न विगुणीकरोति इति अन्येषां शाखिनां श्रुतिवाक्यं विज्ञायते प्रत्यक्षं ज्ञायत इति । अत्र शाखान्तरे समानतन्त्रतानिन्दा नहिनिन्दान्यायेन पथिकृत्त्वगुणविधिप्रशंसार्थैव, न त्वेतन्निषेधार्था। समानतन्त्रता ह्येषा शाखान्तरे विद्यते वा न वा । न द्वितीयः, अप्रसक्तत्वेन तन्निषेधायोगात् । नाद्यः, शाखान्तरे विहितत्वेन नित्यवत्प्रतिषेधानुपपत्तेः । पाक्षिकनिषेधे च पक्षान्तरे तत्सत्त्वात्तन्निन्दानुपपत्तेः । न हि विहितत्वे निन्दा युज्यते । अतः प्रशंसार्थैव सा । तया च निन्दया समानतन्त्रतापि शाखान्तरेऽनुमीयते । अतो विकल्पः । तदाहुर्बोधायनादयः कल्पकाराः 'समानतन्त्रे वा मुख्यः कार्यः' इति । यदि च स्वकालातिक्रमे सति कालान्तरे अतिपन्नयोर्दर्शपूर्णमासयोरनुष्ठानमेव न स्यात्[2], तर्हीदं सर्वमभित्तिचित्रायितमेव स्यात् । अतो बोधायनादिबहुमुनिदृष्टश्रुत्यन्यथानुपपत्त्या कालान्तरेऽपि दर्शपूर्णमासयोः करणमनुमीयते । किंच, 'अथातोऽनुग्रहान्व्याख्यास्यामः' इत्युपक्रम्य 'सायं होमं वोपोदयं जुहुयात् । प्रातर्होमं वोपास्तमयं कालेन कालमनतिक्रम्य दर्शपूर्णमासयोरग्निहोत्रस्य च न स्कन्दते न व्यथत इति विज्ञायते' इति संक्षेपश्रुतिमुदाहृत्य तां व्याकुर्वन्नुदाहरणेषु विस्तारयामास बोधायनः । 'आ प्रातराहुतिकालात् सायमाहुतिकालो नातीयात्' इत्यादिना 'ओत्तरवसन्तज्योतिष्टोमस्य कालात्पूर्ववसन्तज्योतिष्टोमस्य कालो नातीयात्' इत्यन्तेन पूर्वस्य कर्मणः कालेनोत्तरस्य कर्मणः कालमनतिक्रम्य अन्तरालकाले दर्शपूर्णमासयोरग्निहोत्रस्य चकारात्तज्जातीयानामाग्रयणवैश्वदेववरुणप्रघाससाकमेधशुनासीरीयानिरूढपशुबन्धज्योतिष्टोमानां चानुष्ठानं शाखान्तरे विज्ञायत इत्यर्थः । अतः '[3]सर्वोऽपरपक्षः पूर्णमासस्य' इति कल्पसूत्रमिदं प्रत्यक्षश्रुतिविरोधादप्रामाण्ये कथमुदाहृतं भाष्यकृता । यच्च वार्तिकादिग्रन्थेषु—'अविशेषादुभौ वा' इति कात्यायनसूत्रे सर्वपुरोडाशानां [4]चतुर्धाकरणवचनम् 'आग्नेयं चतुर्धा करोति' इति प्रत्यक्षश्रुतिविरोधात् 'शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत' इति तृतीयाद्यपादीयान्त्याधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणम्; तथा 'स कृताकृतः' इत्यापस्तम्बादिसूत्रे सवनीयपशौ पशुपुरोडाशविकल्पवचनं 'सवनीये च्छिद्रापिधानार्थत्वात्पुरोडाशो न स्यात्, अन्येषामेवमर्थत्वात्' इति द्वादशिकद्वितीयपादीयद्वितीयाधिकरणपूर्वपक्षमूलकमप्रमाणम्, 'वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यंदिने सवने अङ्गैस्तृतीयसवने' इति प्रत्यक्षश्रुतिविरोधात्; तथा तीव्रसुति 'यावद्यूपं वेदिमुद्धन्ति' इत्यापस्तम्बादिसूत्रे वेदेर्यूपाङ्गत्ववचनम्, 'अर्धमन्तर्वेदि अर्धं बहिर्वेदि' इति प्रत्यक्षश्रुतिविरोधात्, 'तथा यूपस्य वेदिः' इति तार्तीयीकसप्तमपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणम्; तथा

1. स्वर्गपथात्प्रच्युतं—ख, ग, घ. 2. अननुष्ठानमेव स्यात्—क, ग, घ, ङ. 3. अथ—क. 4. चतुर्धाकरणम्—क, ख.

यूपैकादशिन्याम् 'जाघनीभिश्च पत्नीः संयाजयन्ति' इत्यापस्तम्बादिवचनं 'जाघन्या पत्नीः संयाजयन्ति' इति प्रत्यक्षश्रुतिविरोधात् 'द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्' इति द्वादशिकचतुर्थपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणमित्यादि प्रपञ्चितम् । तदुद्धारस्तु तत्तदधिकरणे निरूपयिष्यते । तथा च किंचित्कल्पसूत्रवाक्यान्तरमुदाहरणान्तरमत्रान्वेषणीयमित्यास्तां तावत् । इति कल्पसूत्राधिकरणम् ॥

सन्ति देशाचाराः प्राच्यानां होलाकादयः, दाक्षिणात्यानामाह्नीनैवुकादयः, प्रतीच्यानां गणपूजादयः, उदीच्यानामुद्वृषभादयः । ते किमाचारविशेषा यथादेशं व्यवतिष्ठन्ते उत सर्वे सर्वत्रेति संशयः । तत्र पूर्वपक्षयति—

८. होलाकाधिकरणम् ।

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् ॥ १३ ॥

अनुमीयते श्रुतिरनेनेत्यनुमानं लिङ्गम् आचारः । तस्य व्यवस्थानात् देशभेदेन व्यवस्थितत्वात् तत्संयुक्तं देशभेदसंयुक्तमेव श्रुतिरूपं प्रमाणं मूलभूतं कल्पनीयं स्यात् ॥

सिद्धान्तयति—

अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य ॥ १४ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । न देशविशेषेणाचाराणां व्यवस्था, किंतु सर्वधर्मः स्यात् सर्वे आचाराः सर्वेषां स्युः । कुतः । विधानस्य तन्न्यायत्वात् । विधीयते अनुमीयते यत्तद्विधानं मूलभूतश्रुतिवाक्यम्, तस्य तन्न्यायत्वात् । नीयते प्राप्यते अनेनेति न्यायः । सर्वधर्मत्वप्रापकत्वादित्यर्थः । कल्पिता मूलभूता हि श्रुतिः न प्राच्यत्वादिकर्तृविशेषणमादाय होलाकाद्यधिकारं व्यवस्थापयितुं शक्नोति । आकृतिव्यक्तिगुणसंस्थानक्रिया हि कर्तृपरिच्छेदिकाः । प्राच्यत्वादि च 'ब्राह्मणो बृहस्पतिसवेन यजेत' इत्यत्रैव न जातिः, नापि 'भार्गवो होता भवति' इत्यत्रैव व्यक्तिः, 'शुक्लो होता' इतिवच्च न गुणः, 'अन्यूनानतिरिक्ताङ्गा ऋत्विजः' इत्यत्रैव च नावयवसंनिवेशः, 'सोमयाजी संनयेत्' इत्यत्रैव क्रिया च न भवति ॥

ननु तर्हि एकद्वित्रिपञ्चशिखाचाराणामपि कुलभेदेन व्यवस्था न स्यादित्यत आह—

दर्शनाद्विनियोगस्य[1] ॥ १५ ॥

उपपत्तिरिति शेषः । विविधं व्यवस्थया नियुज्यत इति विनियोगः । 'यत्र बाणाः

1. विनियोगः स्यात् ।

संपतन्ति कुमारा विशिखा इव' 'यथर्षि शिखा निदधाति' इति शिखार्थवादस्मृतिदर्शनात्। 'पञ्चावत्तं जमदग्नीनाम्' इत्यवदानकल्पवद्गोत्रभेदेन व्यवस्थितस्य शिखाकल्पनस्योपपत्तिः, गोत्रभेदस्य व्यवस्थितत्वात्। न हि प्राच्यत्वादिकं व्यवस्थितम्, तद्व्यवस्थापकलिङ्गाभावात् ॥

ननु दाक्षिणात्यादौ बृहत्त्वश्यामत्वलोहिताक्षत्वादिलिङ्गमस्तीत्यत आह—

लिङ्गाभावाच्च नित्यस्य ॥ १६ ॥

नित्यस्य व्यवस्थितस्य कर्तुः यत् लिङ्गं व्यवस्थापकं तस्याभावात्। अदाक्षिणात्यादिष्वपि बृहत्त्वादिसत्त्वादिति भावः ॥

ननु प्राच्यादिसमाख्या कर्तारं विशिनष्टु। तत्राह—

आख्या हि देशसंयोगात् ॥ १७ ॥

प्राच्यत्वादिसमाख्यापि न कर्तृविशेषणम्। हि यतः देशविशेषसंयोगात्प्राच्यादिसमाख्या प्रवर्तते। न ह्येवंविधा समाख्या कर्तृविशेषणं भवितुमर्हति, देशसंयोगस्याव्यवस्थितत्वात् ॥

ननु प्राच्यादिसमाख्याया देशनिमित्तत्वे दक्षिणदेशादिगतेषु प्राच्यादिषु प्राच्यादिव्यवहारो न स्यात्। अतो निमित्तान्तरप्रयुक्तैव समाख्या वाच्या। सा कर्तृविशेषणं भवत्वित्याशङ्क्य परिहरति—

[1]न स्यादेशान्तरेष्विति चेत्स्याद्योगाख्या हि माथुरवत् ॥ १८ ॥

चेदन्तं व्याख्यातम्। दक्षिणदेशादिगतेष्वपि प्राच्यादिषु प्राच्यादिव्यवहारः संभवति। कुतः। हि यस्मात्कारणात् योगाख्या 'सोऽस्य निवासः' 'तत्र जातः' 'तत आगतः' इति व्याकरणसिद्धेषु योगेष्वन्यतमयोगयुक्ता प्राच्यादिसमाख्या देशान्तरगतेष्वपि न विरुद्धा देशसंयोगं न व्यभिचरति। माथुरवत् यथा मथुरानिवासनिमित्तः माथुरशब्दः तद्वत्। अतो देशविशेषप्रयुक्तैव प्राच्यादिसमाख्या। न त्वेषा कर्तृविशेषणमाचारान्व्यवस्थापयितुमीष्टे; यः प्राच्यो दक्षिणदेशादिगतः तस्य कथंचित् 'तत आगतः' इत्यादियोगसंभवेऽपि तत्पुत्रपौत्रप्रपौत्रादीनां कथमपि प्राच्यादिसमाख्याया असंभवेन तदाचारस्य दर्शनेन व्यभिचारात्। अतः प्राच्यत्वादिकं न कर्तृविशेषणमिति न तत आचारस्य व्यवस्था युज्यते।

1. अन्यत्रेदं द्विधा विभज्य पठ्यते।

ननु मास्तु प्राच्यत्वादिकं कर्तृविशेषणतया आचारव्यवस्थापकम्, कर्मधर्मतया तद्व्यवस्थापकमस्तु इति शङ्कते—

कर्मधर्मो वा प्रवणवत् ॥ १९ ॥

वाशब्दः शङ्कायाम् । प्राच्यदेशो होलाकादेः दक्षिणदेश आह्वीनैबुकादेः इत्येवं देशविशेषः कर्मधर्मः[1] तस्य तस्याचारस्य व्यवस्थितमङ्गम्, प्रवणवत् यथा 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति वैश्वदेवाङ्गं प्राचीनप्रवणो देशः तद्वत् । प्राचीनप्रवणः प्राचीनावनतः ॥

परिहरति—

तुल्यं तु कर्तृधर्मेण ॥ २० ॥

तुशब्दः शङ्कानिवृत्तौ । न प्रागादिदेशजातमाचारव्यवस्थापकमङ्गं भवितुमर्हति । तद्धि कर्तृधर्मेण श्यामत्वादिना तुल्यमव्यवस्थापकत्वे तन्निवासिभिस्तदनाचरणात् ततो निर्गतैश्चाचरणात्। तस्माद्धोलाकाद्याचारः सर्वधर्मः । इति होलाकाधिकरणम् ॥

एकस्मिन्नर्थे गोगावीगोण्यादिशब्दाः प्रयुज्यन्ते । ते किं सर्वे प्रयोक्तव्याः, उत व्याकरणानुगता एव प्रयोक्तव्या इति चिन्त्यते; तदर्थं च किमेते सर्वेऽपि साधवः, उत व्याकरणानुगता वेति; तदर्थं च किं व्याकरणं प्रमाणमप्रमाणं वेति; तदर्थं च किं व्याकरणस्य मूलभूता श्रुतिः भवति उत न वेति । तत्र पूर्वपक्षयति—

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥ २१ ॥

अपशब्दपरिहारेण साधुशब्दानां प्रयोगस्य उत्पत्तिः व्यवस्थापनं यत्र सा प्रयोगोत्पत्तिः व्याकरणस्मृतिः । तस्या अशास्त्रत्वात् मूलभूतश्रुतिरहितत्वात् गोशब्द एव प्रयोज्यो न गाव्यादि-

१. साधुपदप्रयुक्त्य- धिकरणम् ।

शब्दा इति व्यवस्था न स्यात् ॥ व्याकरणस्मृतेरप्रामाण्ये हि सति गोगाव्यादिशब्दानां सर्वेषामविच्छिन्नपारंपर्यप्रयोगजत्वेन साधुत्वात्प्रयोज्यत्वं चलति । तथा हि— व्याकरणं तावत् 'साधूनेव प्रयुञ्जीत नासाधून्' इति प्रयोगनियमपरम्, गावोदय एव साधवो न गाव्यादय इति साधुत्वस्वरूपनियमपरं च । तत्र नाद्यो नियमः संगच्छते । स हि किं शब्दप्रयोगस्य यत्कार्यं तदर्थः, उत शब्दप्रयोगाश्रितादृष्टार्थः । नाद्यः । शब्दप्र-

1. कर्मधर्मतया—ख ; कर्मधर्मतः—ग.

योगस्य हि कार्यमर्थप्रत्यायनम् । अर्थश्च असाधुभ्योऽपि गम्यते वा न वा । नाद्यः, असाधुभ्योऽप्यर्थप्रतीतौ साधूनेव प्रयुञ्जीतेति नियमानर्थक्यात् । न द्वितीयः, असाधुभ्योऽर्थप्रत्ययाभावेन तत्प्रयोगस्याप्रसक्तेस्तन्निवृत्त्यै साधुशब्दप्रयोगस्य नियमविधानानर्थक्यात् नियमफलस्यासाधुप्रयोगव्यावृत्तेः स्वतः सिद्धत्वात् । अथ असाधुभ्योऽप्यर्थस्य गम्यमानत्वेऽपि प्रयोगमाश्रित्य धर्माय साधुनियमः क्रियते तृप्त्यर्थभोजनाश्रितप्राङ्मुखत्वनियम इवेत्यस्तु पक्ष इति चेत्, मैवम् । व्याकरणप्रणेतृभिः दृष्टार्थशब्दप्रयोगाश्रितसाधुनियमस्य धर्मार्थत्वं ज्ञात्वा तच्छास्त्रं प्रणेतव्यम् । तेषां तज्ज्ञानमेव न संभवति, मूलाभावात् । न हि तत्र लौकिकप्रमाणानि प्रत्यक्षानुमानोपमानानि क्रमन्ते धर्माधर्मयोरलौकिकत्वात् । नापि श्रुतिस्तत्र मूलं भवितुमर्हति । वेदवाक्यानि हि किं तथाविधानि गवाश्वादिषु भेदेन कल्प्यन्ते, उत केनचित्साधारणधर्मेण सर्वान्धर्मान्क्रोडीकृत्य गवाश्वादिशब्दविषयमेकमेव श्रुतिवाक्यं कल्प्यते । आद्ये किं प्रतिपदं कल्पितानि वाक्यानि कस्यचित्प्रत्यक्षाणि वा नित्यानुमेयानि वा । नाद्यः, अपाठे प्रत्यक्षानुपपत्तेः पाठस्य च शब्दानामनन्तत्वेन प्रतिपदमसंभवात् । न द्वितीयः, अन्धपरंपरापातात् । न च प्रतिपदपाठो महानुभावानां केषांचित्संभाव्यत इति वाच्यम् । तस्य श्रुत्युदाहरणेन पातञ्जलभाष्ये निरस्तत्वात् । यथा—"अनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां शब्दानां पारायणं प्रोवाच, नान्तं जगाम' इति । बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे गतायुषि प्रजायाम्" इत्यादि । अथ केनचित्सामान्यधर्मेण सर्वान्क्रोडीकृत्य गवाश्वादिविषयकमेकमेव श्रुतिवाक्यं कल्प्यते यथा 'साधूनेव प्रयुञ्जीत नासाधून' इति पक्षोऽस्विति चेन्मैवम् । साधुत्वं हि जातिरुपाधिर्वा नाद्यः । जातित्वे हि योग्यवृत्तिजातेर्योग्यत्वात्प्रत्यक्षेण गृह्येत । न द्वितीयः, निर्वक्तुमशक्यत्वात् साधुत्वं हि वाचकत्वं वा, अनादित्वं वा, अदृष्टसाधनत्वं वा । नाद्यः । गाव्यादिष्वतिव्याप्तेः तेषामपि प्रयोगप्रत्ययान्यथानुपपत्त्या वाचकत्वस्य लोकसिद्धत्वात् । न द्वितीयः । अनादित्वं हि नित्यशब्दार्थसंबन्धत्वम् । तच्च गाव्यादिष्वप्यविशिष्टम्, तत्रापि संबन्धकर्तुरस्मरणात् । न तृतीयः । अदृष्टसाधनत्वं हि वेदैकगम्यम् । तद्बोधकवाक्ये चोपलक्षणान्तराभावात्साधुत्वमेवोपलक्षणं वाच्यम् । तथा च 'अदृष्टसाधनभूताञ्शब्दानदृष्टार्थं प्रयुञ्जीत' इत्येवमुपलक्षणस्य प्रमेयस्य चैक्यादात्माश्रयापत्तिः । एतेन गवादय एव साधवो न गाव्यादयः इति द्वितीयोऽपि नियमो निरस्तः । अशास्त्रत्वादित्यस्य विगीतत्वादिना प्रामाण्यासंभवादित्यर्थः । विगीतत्वं परस्परविरोधः । पाणिनिकात्यायनपतञ्जलिप्रणीतसूत्रवार्तिकभाष्यसंदर्भो हि व्याकरणम्, 'त्रिमुनि व्याकरणम्' इति प्रसिद्धेः सूत्रकारस्तावत् 'तुल्यास्यप्रयत्नं सवर्णम्' इति वदन ऋकारलृकारयोः स्थानभेदात्सवर्णसंज्ञां नानुमन्यते । वार्तिकभाष्यकृतौ तु ऋकारलृकारयोः सावर्ण्यविधिरित्याहतुः । तथा 'अप्तृन्तृच्स्वसृनप्तृ

नेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इति नप्त्रादिपरिगणनात् अन्यत्र पितराविन्यादौ दीर्घ नानुन्यते सूत्रकृत् । भाष्यकारस्तु समर्थसूत्रे 'उद्गातारः' इति प्रायुङ्क्त । एवं परस्परविरोधाः परःसहस्रं सन्ति । निष्फलं चेदं शास्त्रम्[1], उक्तरीत्या निर्मूलत्वेनाप्रमाणतया ततः कस्यचिदपि फलस्यासंभवात् । वेदविरुद्धं चेदं व्याकरणम् । 'दृष्टं साम' इत्यधिकारे 'वामदेवाड्ड्यड्ड्यौ' इति दिन्पाणिनिः वामदेवेन दृष्टं साम वामदेव्यमिति मन्यते । वेदे तु 'वामं वा इदं देवेभ्योऽजनीति तस्माद्वामदेव्यम्' इति निरुच्यत इति विरोधः । पूर्वोत्तरविरुद्धं चेदं व्याकरणम् । पाणिनिर्हि 'चोः कुः' इति पदान्ते चवर्गस्य कवर्गं शास्ति । स एव च 'वृद्धिरादैच्' इत्याह—इत्यादि । अतश्च, 'निर्मूलत्वाद्विगीतत्वान्नैष्फल्याद्वेदबाधनात् । पूर्वापरविरोधाच्च नास्य प्रामाण्यसंभवः ॥' तदेवं व्याकरणस्य वेदमूलकत्वासंभवादप्रामाण्ये 'साधूनेव प्रयुञ्जीत' इति नियमाभावादसाधुभ्योऽपि प्रयुक्तेभ्यः अर्थप्रत्ययस्य अनादिपारंपर्यसिद्धत्वात् गोगाव्यादिशब्दाः सर्वेऽपि प्रयोक्तव्या इति पूर्वः पक्षः ।

सिद्धान्तयति—

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २२ ॥

गाव्यादिशब्दे प्रयुज्यमाने अपराधस्य अयथोच्चारणस्य भागित्वम्, भागः भजनं प्रवृत्तिः, जनकतासंबन्धेन तद्वान्भागी, तस्य भावः तत्त्वम् । प्रवर्तकत्वमिति यावत् । कुतः । प्रयत्ननिष्पत्तेः प्रयत्नविशेषत एव शब्दस्वरूपस्य यथावदभिव्यक्तेः ॥ तथा च शिक्षायाम्—'आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते' इत्यादि । आत्मा अन्तःकरणं संस्काररूपेण स्वगतानर्थान बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया युक्तं मनः करोति । तन्मनः कायाग्निं जाठराग्निमभिहन्ति । सः अग्निः मारुतं प्रेरयति । सोदीर्णः । सः मारुतः । 'सोऽचि लोपे चेत्पादपूरणम्' इति सुलोपः । उदीर्णः ऊर्ध्वं प्रेरितः मूर्ध्न्यभिहतः प्रावृत्त्य वक्त्रं तालवादिस्थानं प्राप्य वर्णानभिव्यनक्तीति तदर्थः । एवं च शब्दप्रयोगेच्छोत्पन्नयत्नाभिहताग्निप्रेरितनाभिप्रदेशगतवायुर्वेगान्मूर्धानं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य यत्नविशेषसहायः तालवादितत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकमभिहतो वर्णविशेषानभिव्यनक्तीति त एते आभ्यन्तरप्रयत्नाः । ततो यत्नविशेषैर्गलविवरविकासादीन करोति । त एते बाह्यप्रयत्नाः । एतैश्च प्रयत्नैर्वर्णा यथावदभिव्यज्यन्ते । एतत्प्रयत्नशैथिल्यमपशब्दान्प्रवर्तयतीत्यर्थः । अयं भावः—गवादिशब्दा एव साधवो

[1] शास्त्रम्—क, घ.

न गाव्यादिशब्दा इति स्वरूपनियमः, साधूनेव प्रयुञ्जीत नासाधूनित्यदृष्टार्थः प्रयोगनियम इत्युभय-विधोऽपि नियमो व्याकरणगम्यः। तत्र प्रयोगनियमे मन्वादिस्मृतिवत्प्रत्ययिततमपाणिन्यादि-प्रणीतत्वान्मूलश्रुत्यनुमानं सुलभम, प्रत्यक्षं च वाजसनेयशाखादिषु श्रूयते 'ब्राह्मणेन न म्लेच्छि-तवै' 'म्लेच्छो ह वा एष यदपशब्दः' इत्यादि। 'कृत्यार्थे' इत्यादिना कर्मणि तवैप्रत्ययः। प्रकृतिभूतम्लेच्छधातोर्विवरणम् 'म्लेच्छो ह वा एष यदपशब्दः' इति। ब्राह्मणेनापशब्दो न प्रयोज्य इत्यर्थः। तैत्तिरीयके च श्रूयते—'वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' इति। वाक् पराची एकरूपा अव्याकृता साध्वसाधुविवेचनशून्या अवदन् अभवत्। ते देवा इत्यादि स्पष्टम्। तां वाचम् इन्द्रः मध्यतः शरीरस्य मध्यम् उरःकण्ठादिकं प्रदेशम् अवक्रम्य व्याकरोत् साधुतया विभक्तवान। तस्मादियं व्याकृता साधुतया विभक्ता उद्यते प्रयुज्यत इत्यर्थः। शाखान्तरीयं च वाक्यं पातञ्जल-भाष्ये उदाहृतम्—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत' इति। एव-मादिभिश्च प्रयोगनियमपरैर्वाक्यैरर्थप्रत्यायनरूपदृष्टार्थं शब्दप्रयोगमाश्रित्य 'एकः शब्दः सुष्ठु ज्ञातः सम्यक्प्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति नियमोऽभ्युदयाय विधीयते, भोजनमाश्रित्य 'आ-युष्यं प्राङ्मुखो भुङ्क्ते' इति नियमवत्। 'साधूनेव शब्दान्प्रयुञ्जीत, नासाधून' इति वाक्याभ्यामेव समस्तसुशब्दापशब्दप्रयोगविधिप्रतिषेधसिद्धेर्नानन्तवाक्यकल्पनापत्तिः। साधुत्वासाधुत्वाभ्यामेव विधेयनिषेध्यसंग्रहान्ननुगमः। अनादित्वे सत्यर्थप्रत्यायकत्वमेव साधुत्वम। तद्विपर्ययश्चासाधु-त्वम। गाव्यादिष्वतिप्रसङ्गवारणाय सत्यन्तम। हुंफडादिस्तोभेषु पादपूरणाद्यर्थतुहिचस्मेत्यादिषु चातिप्रसङ्गवारणाय विशेष्यम्। न चेदमाधुनिकीषु टिघुभादिसंज्ञासु[1] देवदत्तादिसंज्ञासु चाव्या-प्तमिति वाच्यम। 'व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नित्य एव तु संबन्धो डित्था-दिषु गवादिवत्' इति गोत्रसंज्ञासूत्रभाष्यकैयटसंमते पक्षे तासामप्यनादित्वात्। 'यास्त्वेताः स्वे-च्छया संज्ञाः क्रियन्ते टिघुभादयः। अनपभ्रंशरूपत्वान्नास्त्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा संकेतिता मताः। नासां प्रयोगेऽभ्युदयः प्रत्यवायोऽपि वा भवेत्' इति पक्षे तु तासामलक्ष्य-त्वान्नाव्याप्तिः। आधुनिकसंज्ञानां साध्वसाधुबहिर्भावादेव 'रघुनाथः' इत्याधुनिकसंज्ञोपपत्तिः। अन्यथा 'पूर्वपदात्संज्ञायामगः' इति विहितस्य णत्वस्याकरणादसाधुत्वापत्तेः। [2]तदन्तर्भावपक्षेऽपि तत्र न णत्वम्। तथा सति संज्ञात्वभङ्गापत्तेः। णत्वेन चेत्संज्ञा रूढ्यर्थो गम्यते इति हि सूत्रार्थः। तदाहुरभियुक्ताः—'संज्ञाशब्दा अनादिप्रयुक्ता नियतानुपूर्वीका एव सिद्धाः। तत्रेदानीं कस्तद्विप-

1. आधुनिकटिघुभादिसंज्ञासु—क. 2. तदन्तर्भाव...इति हि सूत्रार्थः—घ पुस्तके न दृश्यते।

रीतं प्रयोक्तुमर्हति' इति । तदेतत् 'भृञोऽसंज्ञायाम्' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । विस्तरस्तु शब्देन्दुशेखरादावनुसंधेय इत्यलमतिप्रसङ्गेन । प्रकृतमनुसरामः । न च गाव्यादिशब्दानामप्यनादिपरंपरया गवादिप्रत्यायकत्वात्तेषामपि साधुत्वापत्तिरिति वाच्यम् । आदौ हि कदाचित्केनचित् गामानयेति प्रयोक्तव्ये करणापाटवादिना गावीमानयेत्युक्ते श्रोतृपुरुषेण गोशब्दं प्रयोक्तुमुद्यतस्य अशक्तिजोऽयं शब्द इति निश्चित्य सास्नादिमदर्थे आनीते व्युत्पित्सवस्तदुभयव्यवहारं पश्यन्तः अशक्तिजत्वमजानाना गावीशब्दस्यैव सास्नादिमदर्थे संज्ञासंज्ञिसंबन्धं व्युत्पद्य व्यवहरन्ति । तेभ्यश्च [1]शिक्षित्वा अन्येऽपीत्येवं प्रयोगप्रत्ययोः प्रयोक्तृपुरुषकरणापाटवादिरूपवाचकाशक्तिजतया मूलभूतगोशब्दोपस्थापनेनान्यथासिद्धत्वान्न गाव्यादिशब्दानामनादिवाचकत्वरूपं साधुत्वमध्यवसातुं शक्यते ।

ननु अशक्तिजत्वं वा कल्पनीयं वाचकत्वं वा । कोऽत्र विशेष इत्यत आह—

अन्यायश्चानेकशब्दत्वम् ॥ २३ ॥

चशब्द उक्तसमुच्चये । अनेकः शब्दो वाचको यस्य एकस्यार्थस्य सः अनेकशब्दः । तस्य भावस्तत्त्वम् । नीयत इति न्यायः । कर्मणि घञ् । 'घञबन्ताः पुंसि' इति नित्यपुंलिङ्गता । नञ्तत्पुरुषे 'परवल्लिङ्गम्—' इति पुंस्त्वम् । एकस्यानेकशब्दवाच्यत्वं युक्तं न भवतीति यावत् ॥ अदृष्टानेकशक्तिकल्पनापेक्षया प्रयोक्तृपुरुषाशक्तिजत्वस्यैव दृष्टस्य कल्पयितुमुचितत्वान् प्रयोगवेलायामष्टदोषदुष्टविकल्पापत्तेश्च । वाच्यवाचकयोरैककर्म्यावधारितस्य नियमस्य वाचकानेकत्वे बाधप्रसङ्गाच्च । तथा हि—गोशब्देन सास्नादिमानभिधीयते इत्याप्तवाक्याद्वाचकत्वग्रहदशायामभिधानक्रियाद्वारा तत्कर्मकरणयोर्वाच्यवाचकयोः 'अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्' इति तार्तीयीकाधिकरणन्यायेन क्रयद्वारा एकहायन्यरुणिम्नोरिव नियमः परस्परान्वयरूपः संबन्धोऽवगतः । ततश्च गाव्यादेरपि सास्नादिमदर्थवाचकत्वस्वीकारे सास्नादिमत्कर्मकाभिधानक्रियायां गोशब्द एव करणमित्येवंरूपस्य नियमस्य व्युत्पत्तिकालावगतस्य बाधः स्यात् । तस्मादेकस्यैव वाचकता । इतरेषां तु पुरुषाशक्तिजतया वाचकशब्दोपस्थापकतैव, न वाचकता । हस्तपाणिकरादिशब्देषु त्वगत्यानेकशब्दत्वम् ।

ननु, अस्त्वेकस्य वाचकता इतरेषां त्वशक्तिजता । तथापि गवादिशब्दा एव वाचकाः साधवः, गाव्यादिशब्दास्त्वशक्तिजा इत्यत्र विनिगमकं किमित्यत आह—

1. शिक्षितत्वात् - क.

तत्र तत्त्वमभियोगविशेषात्स्यात् ॥ २४ ॥

तत्र गोगाव्यादिशब्देषु वाचकत्वावाचकत्वविसंवादे, तत्त्वं गवादिशब्दा एव वाचका न गाव्यादिशब्दा इति साध्वसाधुतत्त्वविवेचनम्, अभियोगविशेषात्स्यात् । व्याकरणशास्त्राभ्यासहेतुकं कूलंकषं ज्ञानमभियोगः । तत्कृतो विशेषः विविधलक्ष्यभेदपरिज्ञानम् । तस्मादभियोगविशेषात् निर्धारितं स्यात् ॥ गवादिशब्दा एव साधवो न गाव्यादिशब्दा इत्येवंरूपेषु साध्वसाधुस्वरूपनियमेषु व्याकरणस्मृतिरेव प्रमाणम् इत्युक्तं भवति । साधुस्वरूपनियमे च व्याकरणस्मृतेरन्या स्मृतिर्मूलम्, तस्याश्चान्येत्येवं स्मृतिपरंपरानुसंधेया । न चान्धपरंपरापातः । साधुत्वस्य [1]तत्तत्कालीनपुरुषगम्यत्वेन केवलानुमानगम्यत्वाभावात् । सर्वे हि स्वे स्वे काले गवादिशब्दान्प्रत्यक्षत उपलभन्ते । तत्र पूर्वतरवृद्धेभ्यो गवादिशब्दसत्तां गाव्यादीनां चासत्तामवधारयन्ति । सर्वकालमपि केचन वृद्धाः सन्तीति तत्प्रत्यक्षसंभवान्न कदाचिदपि प्रत्यक्षविच्छेदः न चैतावता सर्वस्मिन्काले शब्दस्वरूपप्रत्यक्षमात्रसिद्धावपि साधुत्वस्य प्रत्यक्षतोऽसिद्धेर्नान्धपरंपरापरिहार इति वाच्यम् । न हि सर्वकालवर्तित्वादनादित्वमतिरिच्यते येन सर्वस्मिन्काले प्रत्यक्षतया सिद्धेषु साधुत्वं प्रत्यक्षतो न गृह्यते । सर्वकालवर्तित्वरूपानादित्वं च साधुत्वमभियुक्तस्मरणपरंपरया तत्तत्कालीनवृद्धप्रत्यक्षसर्ग्वीचीनया सास्नादिमदर्थेषु गवादिशब्दानां स्वध्यवसानम् । गाव्यादिशब्देषु तु केवलप्रत्यक्षमात्रपरंपरा संभाव्येतापि । न च तन्मात्रेण साधुत्वनिश्चयः, अशक्तिजत्वस्यापि संभवात् । अतोऽभियुक्तस्मरणाभावान्न गाव्यादिशब्दानामनादित्वनिश्चय इति भवति वैषम्यम् ।

ननु गवादिशब्दोच्चारणाशक्तिर्गाव्यादिशब्दानामेव प्रयोगे निमित्तं न त्वन्येषाम् 'अय्या' 'अप्पा' इत्यादीनां प्रयोगे इत्यत्र किं विनिगमकमित्यत्राह—

तदशक्तिश्चानुरूपत्वात्[2] ॥ २५ ॥

चकार उक्तसमुच्चये । गवादिशब्दोच्चारणाशक्तिः गाव्यादिशब्दानामेव प्रयोगे निमित्तम्, न त्वन्येषाम्, 'अय्या' 'अप्पा' इत्यादीनाम् । कुतः । अनुरूपत्वात् । गाव्यादिशब्दा एव हि गाव्यादिशब्दस्वरूपमूलभूतगवादिशब्दस्मारणद्वारा अर्थं प्रत्याययन्ति, न तु तद्विजातीयाः । सारूप्यस्य स्मरणप्रयोजकत्वात् ॥

तदेतद्दृष्टान्तेन द्रढयति—

एकदेशाच्च विभक्तिव्यत्यये प्रत्ययः स्यात् ॥ २६ ॥

1. तत्तत्कालीनतत्तत्पुरुष —क, घ. 2. तदनुरूपत्वात् ।

चशब्दो व्युत्क्रमो विभक्तिव्यत्यये इत्यनन्तरं द्रष्टव्यः । व्याकरणशिक्षितेष्वेव शब्देषु विभक्तिविपर्यासेऽपि अर्थप्रत्ययो दृश्यते । यथा कुत इति पृष्टे 'अश्मकेभ्य आगच्छामि' इति वक्तव्ये 'अश्मकैरागच्छामि' इति मूर्खेणोक्ते श्रोतार एकदेशादश्मकशब्दात्प्रातिपदिकादुपलब्धात् 'अश्मकेभ्यः' इति शब्दस्मरणादर्थं प्रतियन्ति, तद्वद्गाव्यादिशब्दतोऽपि गवादिशब्दस्मृत्यार्थप्रत्ययो युक्तः स्यात् ॥ नापि 'तुल्यास्यप्रयत्नं सवर्णम्' 'ऋकारलकारयोः सावर्ण्यविधिः' इति परस्परविरोधादप्रमाणमिति । विरोधाद्विकल्पोपपत्तेः । एतेन 'उद्गातारः' इत्यादावपि विरोधः परिहृतः । 'यथोत्तरं मुनीनां प्रामाण्यम्' इति तु वैयाकरणसमयः । तथा सति परस्परविरोधे पूर्वपूर्वस्याप्रामाण्यमेव, सर्ववेष्टनस्मृतिवत् । अविरोधे तु प्रामाण्यमेव । एतेन 'वामदेवाङ्गयङ्गौ' इत्यपि व्याख्यातम् । 'आदैच्' इति निर्देशादेव कुत्वशास्त्रं तद्व्यतिरिक्तविषयमिति न विरोधः । रश्नोहादिकमपि महाभाष्ये स्थितम् । तत्र दूषणभूषणानि वार्तिके भट्टाचार्यैः प्रपञ्चितानि तत एवानुसंधेयानि । तदेवं गवादिशब्दा एव साधवः, न एव प्रयोज्याः । गाव्यादिशब्दास्त्वशक्तिजत्वादसाधवः अप्रयोज्याः । उभयत्र च व्याकरणं प्रमाणमिति सिद्धम् । इति व्याकरणाधिकरणम् ॥

व्याकरणं प्रमाणं तदनुगता गवादिशब्दा एव वाचकाः साधवः प्रयोज्या इति स्थितम् । इदानीं वाचकप्रसङ्गाद्वाच्यांशनिर्धारणाय प्रवर्तिष्यमाणाकृत्यधिकरणोपोद्घातत्वेन लौकिकानां वैदिकानां च शब्दानां तदर्थानां चानन्यत्वं निर्णेतुं लोकवेदाधिकरणमारभ्यते । आकृत्यधिकरणे हि व्यक्तिः शब्दार्थ इति पूर्वपक्षः, सामान्यात्मा जातिरिति सिद्धान्तः । तत्र व्यक्तेः शब्दार्थत्वे आहवनीयशास्त्रं सकृच्छ्रुतमपि विनिगमनाविरहात्प्रतिव्यक्त्युपतिष्ठासया एकत्वे च तदनुपपत्त्या यावद्व्यक्ति भिन्नमेव सत्सर्वासु व्यक्तिषूपतिष्ठते । यथाहुर्वैयाकरणाः 'प्रतिलक्ष्यं शास्त्राणि भिद्यन्ते' इति । एवं च सामान्यविशेषशब्दयोरुभयोरपि व्यक्तिवाचित्वाविशेषेण सामान्यविशेषशास्त्रयोस्तुल्यबलत्वान्न बाध्यबाधकभावः । किंतु विकल्पः । आकृतेः शब्दार्थत्वे तु सामान्यशास्त्रेण होमत्वरूपव्यापकजातावभिहितायां तद्द्वारा यावत्सकलव्यक्त्युपस्थितिः, ततः प्रागेव विशेषशब्दाभिहितावान्तरजातिद्वारा तक्रकौण्डिन्यादिशब्दवद्विशेषशब्दस्य व्यक्तिविशेषवाचित्वाद्वा व्यक्तिविशेषप्रतीतिरिति शीघ्रप्रवृत्तेन विशेषशास्त्रेण मन्थरप्रवृत्तसामान्यशास्त्रस्य बाध इति फलभेदः । न ह्येवंफलकमिदमधिकरणं लोकवेदयोः पदपदार्थानामनन्यत्वे लौकिकशब्दविषये तावदर्थवद्भवितुमर्हति । न हि 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यादौ [1]पुमिच्छानुसारिलौकिकवाक्यार्थनिर्णये धर्मानुपयुक्ते न्यायापेक्षास्ति, येन तत्रार्थवत्तदधिकरणं स्यात् । तथा वैदिकविषयेऽपि नार्थवद्भवितुमर्हति । लोकव्यवहारादेव हि वैदिकानामपि

१०. लोकवेदाधिकरणम् ।

1. इच्छानुसारि—क.

शब्दानामर्थनिर्णयेन भवितव्यम् । न चैतद्वैदिकानां लौकिकान्यत्वे घटते, तेषां लोकव्यवहारानुपातित्वेनोपायाभावात् । न च लोकव्यवहाराननुपातित्वेऽपि यूपादिशब्दवदर्थनिर्णयोऽस्त्विति वाच्यम् । लोकसिद्धतक्षणादिसमभिव्याहारलक्षणोपायाद्धि यूपादिशब्दार्थनिर्णयः । तत्र समभिव्याहृततक्षणादिपदानामपि लौकिकान्यत्वे तादृशोपायाभावात्स कथं स्यात् । तस्माल्लौकिकवैदिकानामन्यत्वे अनारम्भणीयमेवेदमाकृत्यधिकरणं स्यात् । तदुभयेषामनन्यत्वे तु लोके कृतः शब्दार्थनिर्णयस्तत्रानुपयुक्तोऽपि वेदे उपयुक्तो भविष्यति इत्याकृत्यधिकरणोपोद्घातत्वेन लोकवेदयोः पदपदार्थानामन्यत्वानन्यत्वे विचार्येते । वर्णाभेदेऽपि नियतानियतस्वरादिभेदाल्लोकवेदयोः पदान्यत्वम् । वेदे हि नियतः स्वरः । लोके त्वनियतः । यद्यपि व्याकरणे स्वरविधौ छन्दोऽधिकाराभावाद्भाषायामपि स्वरनियम आवश्यकः; अत एव 'झल्युपोत्तमम्' इति स्वरविशेषं प्रकृत्य 'विभाषा भाषायाम्' इति लोके विकल्पविधानं संगच्छते, तथापि 'एकश्रुति' इत्यनुवृत्तौ 'विभाषाच्छन्दसि' इति लोके ऐकश्रुत्यस्य चातुःस्वर्येण विकल्पविधानान्न दोषः । अत्र हि 'अच्छन्दसि' इति च्छेदः । अत एव पस्पशाह्निकभाष्ये 'श्वेतो धावति' इति द्वयर्थं वाक्यमित्युक्तं संगच्छते । तत्र हि 'श्वा' इत्यन्तोदात्तम् 'ऊडिदम्' इत्यादिना । 'इतः' इत्यपि तथा । 'एकादेश उदात्तेनोदात्तः' इति एकार उदात्तः । तथा च 'श्वा इतः' इत्यर्थे एकाराकारावुदात्तौ । 'शुक्लः' इत्यर्थे तु घृतादित्वादन्तोदात्तत्वे अकार उदात्तः । 'अनुदात्तं पदमेकवर्जम्' इत्येकारोऽनुदात्तः । तथा च स्वरभेदात्सकृदुच्चारितस्य कथं द्वयर्थता स्यात् । अत एव च 'एकश्रुतिःस्वरसर्वनाम' इति 'दाण्डिनायन—' इति सूत्रे भाष्यं संगच्छते । यथा सर्वनामशब्दास्तदेतदादयः सर्वपदस्थाने प्रयुज्यन्ते, एवं सर्वस्वरस्थाने एकश्रुतिः प्रयोक्तव्येत्यर्थः । 'विभाषा भाषायाम्' इत्यत्र भाषाग्रहणं तु चातुःस्वर्येण प्रक्रमे पाश्निकानुदात्तलाभायेत्यन्यत्र विस्तरः । 'देवाः' इति लोके, 'देवासः' इति वर्णागमश्छन्दसि 'आत्मना' इति लोके, 'त्मना देवेषु' इत्यादौ आकारलोपश्छन्दसि । 'उद्ग्राहः' 'निग्राहः' इति लोके, 'उद्ग्राभं च निग्राभं च' इति भकारविकारश्छन्दसि । तथा वेदवाक्यान्यध्याय एवोच्यन्ते लौकिकानि त्वनध्यायेऽपि । तथा वेदवाक्यान्युपनीतत्रैवर्णिकैरेव प्रयुज्यन्ते, लौकिकानि तु तदन्यैरपि तथा इमे लौकिका इमे वैदिका इति भेदेन व्यपदेशः । इत्येवं नियतस्वरादितद्विपर्ययतो लोकवेदयोः स्पष्टः पदभेदः । स्पष्टभेदकस्वरुयूपादिशब्दसाहचर्यादपि लोकवेदयोः पदभेदः । पदभेदादेव चार्थोऽपि भिद्यते । 'संज्ञा चोत्पत्तिसंयोगात्' इति द्वैतीयीकाधिकरणन्यायात्, 'उत्ताना वै देवगवा वहन्ति' इति वाक्यशेषे लोकविलक्षणार्थदर्शनाच्च । ये उत्ताना वहन्ति ते देवानां गोशब्दवाच्याः इत्येवं लोकविलक्षणवस्त्वन्तरस्यैवानेन गोशब्दवाच्यत्वप्रतिपादनेन वाच्यभेदावश्यंभावात् । त्रिवृच्चर्वाश्ववाल्लादिशब्दानां च लोकतोऽर्थान्तरपरत्वं स्पष्टमुपपादितमनुपदमेव । अतो लोकवेदयोः पदपदार्थानामन्यत्वमिति प्राप्ते, सिद्धान्तयति—

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ २७ ॥

अर्थस्य शब्दरूपस्य अभिधेयरूपस्य च वस्तुनः एकत्वं लोकवेदयोरङ्गीकर्तव्यम् । कुतः । प्रयोगचोदनाभावात् । प्रयुज्यत इति प्रयोगः वाक्यम् । तस्य चोदना उच्चारणा । तस्याः भावात्[1], अभावात् इति च च्छेदः । लोकवेदयोः पदपदार्थानामन्यत्वे वैदिकपदानां लोकव्यवहाराननुपातित्वेन अगृहीतसंगतिकतया वेदवाक्यार्थबोधाय वाक्योच्चारणस्यासंभवात् . अनन्यत्वे तत्संभवाच्चेत्यर्थः ।

नियतस्वरादिभेदात्पदान्यत्वम् , ततश्चार्थान्यत्वमिति तत्राह—अविभागादिति । वर्णानामभेदादित्यर्थः ॥ तथा हि— य एव लौकिका वर्णास्त एवामी वेदेऽपीति लौकिकाभेदेन प्रत्यभिज्ञायन्ते वैदिका वर्णाः । वर्णात्मकं च पदं तदभेदान्न भिद्यते । तथा वर्णसमूहात्मकं वाक्यम् । तदेकत्वाच्चार्थैकत्वम् । [2]पदैकत्वाच्च संज्ञाधिकरणन्यायस्यात्राप्रवृत्तिः । ननु वर्णैक्येऽपि धर्मभेदात्पदभेदो दुर्वारः । उक्तं च—'पदावधारणोपायान्बहूनिच्छन्ति सूरयः । क्रमन्यूनातिरिक्तत्वस्वरवाक्यादिश्रुतिः' इति । जरा राजेत्यादिषु क्रमभेदादन्यत्वम । ब्रह्मब्राह्मण इत्यादिषु न्यूनातिरेकवशादन्यत्वम् । इन्द्रशत्रुरित्यादौ पूर्वपदप्रकृतिस्वरान्तोदात्तत्वाभ्यामन्यत्वम । पदान्तरसमभिव्याहाररूपवाक्यादप्यन्यत्वम् । यथा 'पचते' इति पदं नामत्वेनाख्यातत्वेन च संभाव्यमानम् 'भोक्तुकामः पचते दक्षिणां देहि' इति समभिव्याहाराद्भेदेन निश्चीयते । व्याकरणस्मृतेरपि पदान्यत्वम । 'अश्वस्त्वम्' इत्यत्र 'अश्वः' इति सुबन्तम् 'टुओश्वि गतिवृद्धयोः' इति धातूत्पन्नं तिङन्तमध्यमपुरुषैकवचनं च । प्रथमान्ताख्यातपदयोः सामानाधिकरण्यमिह श्रुतिः । 'यातः पुनरायाति' इत्यत्र 'आयाति' इत्याख्यातपदसामानाधिकरण्यात् 'यातः' इति प्रथमान्तं नाम, 'देवदत्तयज्ञदत्तौ यातः' इत्यत्र च द्विवचनान्तप्रातिपदिकसामानाधिकरण्यात् 'यातः' इत्याख्यातं निश्चीयते, [3]इत्यस्ति श्रुत्या पदभेदः । एवं च क्रमादिनियतानियतस्वरत्वादिधर्मभेदात्पदभेदः स्यादिति चेत्, नैष दोषः । पद्यते गम्यते अनेनेति व्युत्पत्त्या गमकं पदम, तद्रूपस्य च न धर्ममात्रभेदाद्भेदः । किंतु अर्थप्रतीत्यौपयिकधर्मभेदादेव । जरा राजा, ब्रह्म ब्राह्मणः, इन्द्रशत्रुः इत्यादौ च क्रमादिभेदलोकसिद्धः । नैवं लोकवेदयोरर्थौपयिकधर्मभेदोऽस्ति । नियतस्वरत्वानियतस्वरत्वानर्जनावर्जनलौकिकवैदिकव्यपदेशभेदानामर्थप्रतीतिविशेषौपयिकत्वासंभवात् । 'देवासः' 'त्मना' लौकिकेभ्यो न्यूनातिरेककृतस्वरूपभेदे सत्यपि अर्थप्रतीत्यौपयिकधर्मभेदाभावान्न पदभेदः । तेभ्योऽर्थभेदानवगमात् एकदेशन्यूनातिरेकमात्रेऽपि तदभेदप्रत्यभिज्ञानाच्च, चतुरङ्गुलषडङ्गुलवत् । यदुक्तं स्वरयूपादिसाहचर्यात्सर्वेषामपि वैदिकपदानां लौकिकान्यत्वमिति, तन्न । न हि केषांचिल्लौकिकभेदमात्रेण सर्वेषां तथात्वम , प्रमाणाभावात् । अन्यथा सर्वेषां वैदिकपदानां लौकि-

1. भावात्संभवात्—क, ख. 2 तदेकत्वात्—ख, ग. 3. इत्यत्र— ख, ग.

कान्यत्वे व्यवहारानुपातित्वाभावेन तेभ्योऽर्थावगम एव न स्यात्। यच्चोक्तम् 'उत्ताना वै देवगवा वहन्ति' इत्यर्थभेदज्ञापकमिति, तदपि न। तत्र ये उत्ताना वहन्तीत्युद्दिश्य गोशब्दवाच्यत्वं न विधातुं शक्यम्, उत्तानवहनस्याप्रसिद्धत्वात्। अतो वायुपुराणोक्तरीत्या त्रैलोक्यभ्रमणवशादेव अपि कदाचिदिमं लोकमुपरि पश्यन्तीत्येतां दृष्टिमाश्रित्य एतेषामेव गवां दक्षिणात्वादिना देवसंबन्धिनामुत्तानवहनं स्तुत्यर्थमनुकीर्त्यत इति न तद्भेदे ज्ञापकम्। त्रिवृत्त्वर्वाश्वबालाद्यर्थभेदे सत्यपि सर्वेषां भेदस्तु स्वरूपादिभेदस्य तद्भेदनिरासेनैव निरस्तः। अतः सिद्धमेकत्वं लोकवेदयोः पदपदार्थानाम् इति लोकवेदाधिकरणम्॥

तदेवं सिद्धे लोकवेदयोः पदपदार्थानन्यत्वे गवादिशब्दानधिकृत्येदं विचार्यते। किं व्यक्तिः शब्दार्थः, उत आकृतिविशिष्टा व्यक्तिः, अथवा आकृतिरेवेति। तत्र पूर्वपक्षयति—

प्रयोगचोदनाभावादर्थैकत्वमविभागात्॥ २८॥

व्यक्तिः शब्दार्थो नाकृतिः। कुतः। प्रयोगचोदनाभावात्, अभावादिति च च्छेदः। 'व्रीहीनवहन्ति' 'पशुं संज्ञपयन्ति' 'अश्वं नयन्ति' इत्यादिप्रयोगविधयो हि व्यक्तिवाचित्व

११. आकृत्यधिकरणम्।

एव संभवन्ति नाकृतिवाचित्वे, आकृतेरवहननाद्ययोग्यत्वात्। ननु सति संभवे आकृतिः शब्दार्थो भवतु 'गाः पश्य' इत्यादौ; 'व्रीहीनवहन्ति' इत्यादौ त्वसंभवे व्यक्तिः शब्दार्थ इत्यत आह—अर्थैकत्वमिति। एकस्य शब्दस्य एकार्थत्वमेव युक्तं न त्वनेकार्थत्वम्, अनेकशक्तिकल्पनाप्रसङ्गात्, प्रयुक्ते शब्दे अन्यतरनिर्धारणाभावेन व्यवहारानुपपत्तेश्च। अष्टदोषदुष्टविकल्पापत्तेश्च। 'गोशब्देन सास्नादिमानभिधीयते' इत्याप्तवाक्याद्वाच्यवाचकताग्रहदशायामभिधानक्रियाकरणकर्मणोः सास्नादिमद्व्यक्तिगोशब्दयोरभिधानक्रियाद्वारा 'ऐककर्म्यान्नियमः स्यात्' इति तार्तीयीकन्यायात्प्रथममवगतस्य संबन्धस्य नियमरूपस्य कदाचिद्व्यक्तिपरिहारेणाकृतिवाचित्वे बाधप्रसङ्गाच्च। ननु केवलव्यक्तेः शब्दार्थत्वे यस्यां व्यक्तौ गोशब्दशक्तिग्रहः तत्रोऽन्यत्र तत्प्रयोगो न स्यात्। न च गोत्वजात्या सर्वव्यक्तीः क्रोडीकृत्य शक्तिग्रहान्न दोष इति वाच्यम्। जातिर्हि शब्दादप्रतीयमाना न क्रोडीकर्तुं प्रभवति। केवलव्यक्तिवाचित्वे चाशब्दार्थत्वात्सा कथं शब्दात्प्रतीयेतेत्यत आह—अविभागादिति। तादात्म्यादविनाभावाच्च जातेः प्रतीतिः संभवतीत्यर्थः॥ शक्तिग्रहे च जातिरुपलक्षणं न तु विशेषणमिति तस्याः प्रतीतिमात्रेण शब्दार्थत्वं न शङ्क्यम् 'योऽयं शुक्लवासाः स देवदत्तः' इतिवत्। तत्र हि उपलक्षणभूतं वासोऽनभिधायैव देवदत्तोऽभिधीयते। एवमत्राप्युपलक्षणमात्रत्वान्न जातिरभिधीयते। व्यक्तय एव केवला अभिधीयन्ते। एकोपलक्षणत्वादेव व्यक्तिवाचित्वे अनेकार्थत्वदोषोऽपि निरस्तः

किमेतावता श्रमेण । आकृतिविशिष्टा एव व्यक्तयोऽभिधीयन्ताम् । सूत्रं चैवं योजनीयम् । 'हीनवहन्ति' इत्यादिप्रयोगविध्यनुसाराद्व्यक्तीनामभिधेयता । आकृतिविशिष्टानामेव व्यक्तीनां शब्दार्थत्वादर्थैकत्वं न त्वनेकार्थता, आकृत्या व्यक्तीनामनुगमात् । आकृतेश्च व्यक्तितादात्म्यादवि-
प्रतीतिसत्त्वाद्विशेषणत्वं युज्यते । तथा च विशेषणभूतया क्रोडीकृतासु सर्वासु व्यक्तिषु शक्तिग्रहश्चोपपद्यते इति । तदेवं केवलव्यक्तीनां वा जातिविशिष्टानां वाभिधेयता, न तु केवलमाकृतेः ।

आकृतिमात्रवाचित्वे बाधकमाह—

अद्रव्यशब्दत्वात् ॥ २९ ॥

द्रव्यम् आश्रयव्यक्तिः । तद्वृत्तिधर्मवचनः शब्दः द्रव्यशब्दः । तस्य भावस्तत्त्वम् । एकार्थवृत्तित्वस्यासंभवादिति यावत् । 'षड्भावो देयाः, द्वादश देयाः' इत्यादौ षडादिशब्दानां गोशब्देन एकार्थवृत्तित्वलक्षणं सामानाधिकरण्यं गम्यते । तदेतदाकृतेरेव शब्दार्थत्वेऽनुपपन्नं स्यात्, गोशब्दस्य षडादिशब्दानां च जातिसंख्यावचनानां भिन्नार्थवृत्तित्वात् । व्यक्तिवचनत्वे तु तेषां तदुपपद्यते । विशिष्टव्यक्तिवाचित्वे तु विशेषणभेदे सत्यपि विशेष्याभेदात्तदुपपद्यते । अतो न केवलमाकृतिवाचिता ॥

आकृतिमात्रवाचित्वे बाधकान्तरमाह—

अन्यदर्शनाच्च ॥ ३० ॥

'यदि पशुरुपाकृतः पलायेतान्यं तद्वर्णं तद्वयसमालभेत' इत्यन्यशब्दो दृश्यते । यद्याकृतिरेव वाच्या, तर्ह्यन्यस्मिन्नालभ्यमानेऽपि सैवाकृतिरित्यन्यशब्दो नोपपद्येत । केवलव्यक्तिवाचित्वे तूपपद्यते । विशिष्टव्यक्तिवाचित्वेऽपि विशेष्यभेदमादाय तदुपपत्तिः । तस्मादपि नाकृतिरेव वाच्या ॥

इति प्राप्ते, सिद्धान्तयति—

आकृतिस्तु क्रियार्थत्वात् ॥ ३१ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । आकृतिः गोत्वादिजातिः । सैव शब्दार्थः, न तु व्यक्तिः । कुतः । क्रियार्थत्वात् आकृतेर्वाच्यत्वे सत्येव 'श्येनचितं चिन्वीत' इत्यादिवाक्यानां श्येनसदृशान्याख्यस्थण्डिलविशेषनिष्पादकचयनादिक्रियाप्रतिपादकत्वसंभवात्, व्यक्तेर्वाच्यत्वे तदसंभवात् ॥

तथा हि—चेः, क्विप्, इति चानुवृत्तौ 'कर्मण्यग्न्याख्यायाम्' इति सूत्रात्कर्मण्युपपदे चिनोतेरग्न्याख्यस्थण्डिलविशेषे कर्मण्येव वाच्ये क्विप्प्रत्ययो भवतीत्यर्थकात् श्येनशब्दे कर्मवाचके उपपदे चिनोतेः क्विप्। श्येनशब्दस्तत्सदृशे लाक्षणिकः। श्येन इव चीयते श्येनचित् अग्न्याख्यस्थण्डिलविशेषः। तं चिन्वीत चयनेन कुर्यात्। 'ज्योतिष्टोमेन यज्ञेन यजेत' 'टित्करणं करोति' इत्यादिवत्सामान्यविशेषभावेन कथंचित्पुनरुक्तिपरिहारः। श्येनसदृशमग्न्याख्यस्थण्डिलविशेषं चयनेन निष्पादयेदित्यर्थः। श्येनसादृश्यं च नैकया व्यक्त्या, तदत्यये शब्दार्थविलोपप्रसङ्गात्। नापि सर्वाभिर्व्यक्तिभिः; असंभवात्, अतीतानागतानां वर्तमानानां च व्यवहिताव्यवहितानां सकृदुच्चारितेन श्येनशब्देन युगपद्बुद्धयनारोहात्, सकृदुच्चरितस्य सकृदर्थप्रत्यायकत्वनियमात्, एकस्य पदस्यानेकार्थत्वापाताच्च। तथा चानन्तशक्तिकल्पनाद्युक्तदोषापातात्। न च जातेरुपलक्षणत्वान्न दोष इति वाच्यम्। एवमपि शक्त्यानन्त्यस्य तदवस्थत्वात्। तथा हि—देवनविभीतकरथावयवात्मकमक्षत्रयमेकापवरकस्थमधिकृत्य कश्चिदाह 'य एतेऽस्मिन्नपवरके [1]स्थितास्तेऽक्षशब्दवाच्याः[2]' इति। तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिरुपलक्षणमासीत्तथापि तदनादरेणान्यत्र स्थिता अपि व्यक्तीरक्षशब्दोऽयं स्वरूपेणैवाभिधत्ते इति भवति शक्तित्रयम्। एवमिहापि व्युत्पत्तिसमये जातेरुपलक्षणत्वेऽपि तामस्पृशन्नेव सर्वा अपि व्यक्तीः प्रातिस्विकतत्तत्स्वरूपेणैवाभिधत्ते इति शक्त्यानन्त्यं दुर्वारम्। अभिधानसमये जातिसंस्पर्शाभावेन शब्दान्निर्विकल्पकस्यैवापाताच्च। जात्यादिधर्मविशिष्टज्ञानं हि सविकल्पकम्। न चैतदोषपरिहारायाभिधानसमयेऽपि जातेरुपलक्षणत्वं स्वीक्रियत इति वाच्यम्। एवं तर्हि 'नागृहीतविशेषणा विशेष्यबुद्धिरुत्पद्यते' इति न्यायेन जात्यभिधानावश्यंभावे तत एव व्यक्तेः प्रतीतिसिद्धेः अभिधेयत्वासंभवात्। एतेन विशिष्टाभिधानमपि प्रत्युक्तम्। किंच 'गामानय' इत्युक्ते 'गोव्यक्तिषु का गौरानेया' इति भवति संशयः इति न व्यक्तीनामभिधेयता, शब्दस्य निश्चयजनकत्वात्। गोसामान्यरूपजातेस्तु गोशब्दान्निश्चयात्मिका बुद्धिर्भवतीति स्यात्तस्या अभिधेयता। एवं श्येनादिशब्देऽप्यूह्यम्। एवं च श्येनजातिसदृशाग्न्याख्यस्थण्डिलविशेषनिष्पादकचयनक्रियाद्यनुग्रहाय जातेरभिधेयता। जातिसादृश्यं च तदुपस्थितव्यक्तिद्वारा।

अथ जातिवाचित्वे उक्तबाधकान्यनूद्य निराकरोति—

न क्रिया स्यादिति [3]चेन्नार्थान्तरे विधानं न द्रव्यमिति चेत्तदर्थत्वात्प्रयोगस्याविभागः॥ ३२॥

'विधानमित्यनन्तरम् 'इति चेत्' इत्यनुषज्यते। न द्रव्यमित्यत्र तु तस्यानुषङ्गो न भवति,

1. अधुना स्थिताः—क, घ. 2. शब्दाभिधेयाः—क, ग, घ. 3. चेदर्थान्तरे।

वाक्यान्तरेण व्यवहितत्वात् । तथा च सूत्रकारो वक्ष्यति 'व्यवायान्नानुषज्यते' इति । अतस्तत्र 'इति चेत्' इति पृथगुपात्तम् । बाधकत्रयमप्येकेनैव हेतुना परिहियत इति युगपत्तदनुवादः । तदर्थत्वादित्यतः पूर्वं नेत्यध्याहारः । तथा च, न क्रिया स्यादिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः, नार्थान्तरे विधानमिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः, न द्रव्यमिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः इति त्रीणि वाक्यानि संपन्नानि । तत्र प्रथमस्यायमर्थः—जातेर्वाच्यत्वे तत्र अवहननादिक्रिया न स्यादिति चेत्तन्न । कुतः । अवहननादिप्रयोगस्य तदर्थत्वात् व्यक्त्यर्थत्वेनैव बोधनात् । ननु तत्र व्रीह्यादिशब्दानामाकृतिवाचित्वे कथमवहननादेर्व्यक्त्यर्थता, तत्राह—अविभाग इति । न हि जातिर्नाम व्यक्तितः पृथग्भूता पदार्थान्तरं शब्दाद्गम्यते, किंतु व्यक्तितादात्म्यापन्नैव । एकमेव हि वस्तु विशेषात्मना सामान्यात्मना च गम्यते । तत्र शब्दतः सामान्यात्मनैव गम्यत इति सामान्यमेव शब्दार्थः । सामान्यात्मना प्रतीते विशेषवस्तुनि च क्रियासंबन्धो न विरुध्यते, सामान्यस्य विशेषानतिरेकात् । द्वितीयं तु वाक्यमेवं योजनीयम— जातेर्वाच्यत्वे 'अन्यं तद्वर्णं तद्वयसम्' इत्यर्थान्तरे विधानं न स्यादिति चेत्तन्न, तदर्थत्वात् इत्यादि पूर्ववत् । जातिव्यक्त्योरनतिरेकात् व्यक्त्यभिप्रायेणान्यत्वमुपपद्यत इति भावः । तृतीयं त्वेवं योज्यम्—आकृतेर्वाच्यत्वे 'षड्ढावो देयाः' इत्यादौ गवादिद्रव्यं षट्त्वाद्याश्रयतयोपदिश्यमानं युक्तं न स्यात् । 'न द्रव्यवचनम्' इति पाठे तु गवादिद्रव्याश्रयषट्त्वादिप्रतिपादनं न स्यादिति चेत्तन्न, तदर्थत्वादिति पूर्ववत् । यदा तु जातिव्यक्त्योर्भेद एवाश्रीयते, तदा जातौ प्रोक्षणादिबाधादेव लक्षणया तत्र व्यक्तिपरत्वम् । न तदर्थत्वादित्यादि त्वेवं योज्यम् । प्रयुज्यत इति प्रयोगः । प्रोक्षणादिसंयोगेन प्रयुज्यमानस्य गवादिपदस्य तदर्थत्वात् लक्षणया व्यक्तिवाचित्वान्नोक्तदोषत्रयम् । अविभागः जातिव्यक्त्योरविनाभावश्च लक्षणापादकः शक्यसंबन्धः इति । तत्र 'पशुना यजेत' 'अरुणया गवा क्रीणाति' इत्यादौ यत्र करणत्वश्रवणं तत्रामूर्तयोरपि जातिगुणयोर्द्रव्यपरिच्छेदद्वारा मुख्यमेव करणत्वम् । द्वारवदेव हि कारणं करणमित्युच्यते । 'स्थाल्यामपो गृह्णाति' इत्यादावधिकरणत्वमपि द्रव्यस्यैव ; न जातेः, असंभवात् । तथा 'विप्राय गां ददाति' इत्यादौ संप्रदानत्वादिकमपि द्रव्यप्रतिग्रहीतृत्वादिलक्षणं जातेरमूर्तत्वान्न संभवतीति व्यक्तिपरतैव विप्रादिशब्दानामित्याशूह्यम् । इत्याकृत्यधिकरणम् ॥

इति प्रथमाध्याये तृतीयः पादः ॥



चतुर्थः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

प्रमाणाध्याये प्रथमपादे विध्यर्थवादमन्त्रनामधेयात्मकवेदस्य विध्यंशे प्रामाण्यं विचार्य, द्वितीये अर्थवादमन्त्राणां प्रामाण्यं विचार्य, विध्यर्थवादमन्त्रमूलकस्मृत्यादीनां तृतीये प्रामाण्यं विचार्य, चतुर्थपादेऽस्मिन्नामधेयभागस्य[1] प्रामाण्यं विचार्यते ॥

तदिह 'उद्भिदा यजेत' इत्याद्युदाहृत्य चिन्त्यते, किमत्रोद्भिदादिपदानां धर्मप्रामाण्यमस्ति, उत नेति। नेति ब्रूमः। तथा हि—विध्यर्थवादमन्त्रभागानां विधानस्तुतिप्रकाशनैर्धर्मे प्रामाण्यं व्यवस्थापितं प्राक् । तत्र नामधेयभागस्य किं विधिभागेऽन्तर्भावः, उतार्थवादभागे, आहोस्विन्मन्त्रभागे। आद्येऽपि नामधेयभागस्य विध्यन्तर्भावः किं साध्याभिधानात्, साधनाभिधानाद्वा, गुणविधानेनेतिकर्तव्यतान्तर्भावाद्वा, स्वरूपेणैव तदन्तर्भावाद्वा । नाद्यः, उद्भिदादिशब्दस्य फलेष्वप्रसिद्धत्वात् । न द्वितीयः, भावनायाः समानपदोपात्तधात्वर्थावरुद्धत्वेन तत्र साधनान्तरसमर्पकत्वासंभवात् । न च धात्वर्थ एव यागो नाम्ना परिच्छिद्यत इति वाच्यम्, प्रवृत्तिविशेषकरत्वाभावेन वैयर्थ्यात् । न तृतीयः, उद्भिदादिरूपस्य लोके गुणत्वेनाप्रसिद्धत्वात्, 'यागेन पशून्कुर्यात्' 'उद्भिदा यागं कुर्यात्' इति वाक्यभेदप्रसङ्गात्, उद्भिद्वता यागेनेत्यर्थे मत्वर्थलक्षणादोषाच्च। न चतुर्थः, जुह्वादिवदङ्गविधिविधेयत्वाभावेन नामस्वरूपस्य इतिकर्तव्यतान्तर्भावानुपपत्तेः । न हि 'जुह्वा जुहोति' इत्यादिवत् 'नाम्ना इदं कुर्यात्' इति विधिरस्ति । उद्भिदादिशब्दस्य नामत्वासंभवाच्च । न ह्युद्भिदादिशब्दो रूढ्या कर्मणि प्रसिद्धः । नापि योगेन, ऊर्ध्वविदारणसाधनखनित्रादावेव तस्य सत्त्वात् । नापि मुख्यद्वितीयः, उद्भिदादिनामधेयतः स्तुतेरनवगमात् । नापि मुख्यतृतीयः, वैदिकानां तत्र मन्त्रप्रसिद्ध्यभावात् । अतो नामधेयभागस्य न धर्मे प्रामाण्यमिति पूर्वः पक्षः ।

सिद्धान्तयति—

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

1. नामधेयस्य—क, घ.

समाम्नायस्य समस्तस्य वेदस्य ऐदमर्थ्यम् अस्मै धर्मप्रमितिजननायायमिदमर्थः अर्थेन नित्यसमासः, तस्य भावः ऐदमर्थ्यम्। उक्तम् अध्ययनविधिवशादर्थवादाधिकरणे व्यवस्था-

१. उद्भिदादिशब्दानां यागनामतयाप्रामा-ण्याधिकरणम्।

पितम्। तस्मात् तथा व्यवस्थापितत्वात्। उद्भिद्बलभिदादिसर्वनामधेयमपि तदर्थं धर्मप्रमितिजननार्थं स्यात्। ततश्चाध्ययनविधिपरिगृहीतस्य नामधेयभागस्यापि विध्येकवाक्यतया प्रामाण्येन भाव्यमित्येतावदिहाधिकरणे स्थितम्॥ तदेतदर्थवादाधिकरणे विचारितमपि करिष्यमाणगुणविधिनामधेयविचाराय स्मार्यते। यदि हि उद्भिदादिपदानां प्रामाण्यमविचार्यैव गुणविधिनामधेयविचारः क्रियेत, तर्हि तद्विचारस्य स्वातन्त्र्यापत्त्या प्रमाणाध्यायासंगतिः स्यात्। नामधेयप्रामाण्यविचारपूर्वकमेव गुणविधिनामधेयविचारे तु विचारितनामधेयप्रामाण्यप्रतिष्ठार्थत्वाद्गुणविधिनामधेयविचारस्य नासांगत्यमिति फलति। अतोऽत्र नामधेयभागस्य व्यवस्थापितमपि धर्मप्रामाण्यमिहावश्यं स्मारणीयम्। तदेतत् 'उक्तम्' इत्यनेन ध्वनितम्। तस्य हि उक्तं न विस्मर्तव्यमित्यर्थः।

तदेवं नामधेयभागस्य विध्येकवाक्यतया सिद्धे प्रामाण्ये 'उद्भिदा यजेत' इत्यत्र भवत्येषा चिन्ता, किमुद्भिच्छब्दो गुणविधिः, उत नामधेयमिति। गुणविधिरिति ब्रूमः। नामधेयत्वे हि यजिना यावती प्रवृत्तिः, तावत्येव नाम्नापि भवति न ततोऽतिशयितेति नाम्नो नैरर्थक्यं स्यात्। अतः उद्भिनत्ति ऊर्ध्वं विदारयतीति व्युत्पत्त्या उद्भिच्छब्दस्य खनित्रादिपरत्वमाश्रित्य प्रकृतज्योतिष्टोमयागानुवादेन खनित्रलक्षणगुणविधिरिति युक्तमाश्रयितुम्। प्रकृतो हि ज्योतिष्टोमयागः, ताण्डकब्राह्मणे ज्योतिष्टोमानन्तरमेव उद्भिदाद्याम्नानात्। यद्यपि, ताण्डके एकाहब्राह्मणे प्रथमेऽध्याये 'प्रजापतिर्वा इदमेक आसीत्' इत्यादिना ज्योतिष्टोमं प्रस्तुत्य, 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इति तस्य प्राथम्यं विधाय, 'गौश्चाश्वतरश्च' इत्यादिना दक्षिणाविधानेनोपसंहृत्य, 'अथैष गौः अथैष आयुः' इत्यादिना गवायुर्विश्वजिदाद्येकत्रिकान्तान्क्रतूननुक्रम्य, द्वितीयाध्याये व्रात्यस्तोमादीश्चातुर्मास्यसोमान्तान्क्रतूननुक्रम्य, तृतीयेऽध्याये उपहव्यादीन्द्विरात्रान्तान्क्रतूननुक्रम्य, चतुर्थेऽध्याये 'अथैष राट्' इत्यादिना राड्विराडौपशदपुनःस्तोमचतुष्टोमान्क्रतूननुक्रम्य, सप्तमखण्डिकायाम् 'असुराणां वै बलः' इत्यादिना उद्भिद्बलभिदावनुक्रान्तौ। अतः उद्भिद्वाक्ये यजिना बहुव्यवहितस्य ज्योतिष्टोमस्य कथमनुवाद इति, तथापि गवायुरादीनामप्यत्रोदाहरणत्वान्न दोषः। नन्वेवमुद्भिच्छब्दस्य गुणविधित्वे तत्र यागस्य साध्यत्वेनान्वयात्पशुकामपदस्यानन्वयापत्तिरिति चेत्, तर्हि ज्योतिष्टोममाश्रित्य उद्भिद्गुणस्य फलाय विधिरस्तु। तत्र तृतीयानिर्देशात्करणभूतमुद्भित्फले विधीयते। तच्च कुत्र करणभूतमित्यपेक्षायां संनिधानात्प्रकृतयागं प्रतीति गम्यते। ततश्च ज्योतिष्टोमयागसाधनेन उद्भिदा पशून्भावयेदिति वचनव्यक्तिः संपद्यते। इति प्राप्ते, सिद्धान्तयति—

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् ॥ २ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । उद्भिदेति न गुणविधिः, किंतु नामधेयं स्यात् । यत् यतः कारणात् । नामधेयत्वे सति, उत्पत्तौ 'उद्भिदा यजेत' इति विधिवाक्ये । अपूर्व ज्योतिष्टोमाद्यागान्तरं विधेयतया लभ्यते । गुणविधित्वे तु ज्योतिष्टोमयागोऽनूद्येतेति यागान्तरविधिर्न लभ्येत । एवं च नामधेयत्वे आनर्थक्यमिति निरस्तम् ।

२. उद्भिदादिशब्दानां यागनामधेयताधिकरणम् ।

ननु लोकवेदयोरुद्भिच्छब्दस्य कर्मणि कथंचिदप्यप्रसिद्धत्वेन नामधेयत्वासंभवाद्गुणविधानमेव युक्तमित्यत आह—अविधायकत्वादिति । सति नामत्वसंभवे गुणविधायकत्वासंभवादित्यर्थः । तथा हि— फलाय गुणविधौ धातोर्न विधेयसमर्पकत्वम्, धात्वर्थस्याविधेयत्वात् । नाप्युद्देश्यसमर्पकत्वम्, धात्वर्थोद्देशेन कस्यचिदविधानात् । अतो न धातोः स्वार्थमुच्चारणम् । किंतूद्भित्पशुसंबन्धविधानाय विधिप्रत्ययस्यावश्यकत्वे केवलस्य तस्य प्रयोगानर्हत्वात्तदर्थं धातूच्चारणमित्यत्यन्तपारार्थ्यं यजेः प्रसज्येत । विधायकप्रत्ययस्य समानपदोपात्तसंनिहितधात्वर्थमुल्लङ्घ्य पदान्तरोपात्तगुणविधायकत्वे विधिविधेययोर्विप्रकर्षश्चापद्येत । यद्यपि कर्मणि गुणविधिपक्षे धातोरुद्देश्यसमर्पकत्वेन विध्युपयोगान्नात्यन्तपारार्थ्यम्, तथापि विधिप्रत्ययस्य समानपदोपात्तधात्वर्थमुल्लङ्घ्य पदान्तरोपात्तगुणविधायकत्वात्स्यादेव किंचित्पारार्थ्यं विप्रकर्षः । पशुकामपदानर्थक्यं च दुर्वारमेव । न चैवं सति 'दर्भैरिन्द्रियकामस्य जुहुयात्' इत्यादौ फलाय गुणविधिः 'व्रीहिभिर्यजेत' इत्यादौ कर्मणि गुणविधिश्च न स्यादिति वाच्यम् । दधिव्रीह्यादिशब्दानां निरूढत्वेन कथंचिदपि धातुसामानाधिकरण्यासंभवेन तथाश्रयणेऽप्युद्भिच्छब्दस्य उद्भिनत्ति पशून्प्रकाशयतीति व्युत्पत्त्या यागवाचकस्य धातुसामानाधिकरण्येन नामधेयत्वसंभवेन गुणविधानासंभवात् । धातूनामनेकार्थत्वादुपसर्गवशाच्च उत्पूर्वकभिदेः प्रकाशनार्थत्वात्, 'उद्भिन्नविद्युद्वलयो घनस्ते' इत्यादिप्रयोगदर्शनाच्च । न च धातुपारार्थ्यादिदोषाभावादुद्भिद्वता यागेनेति गुणविशिष्टकर्मविधिः किं न स्यादिति वाच्यम्, मत्वर्थलक्षणादोषप्रसङ्गात् । 'सोमेन यजेत' इत्यादौ सोमादिशब्दानामर्थान्तरेऽत्यन्तरूढानां यागे कथंचिदप्यप्रसिद्धत्वादप्रसिद्धकल्पनातो वरं प्रसिद्धार्थद्वारेण लक्षणाश्रयणमित्यगत्या मत्वर्थलक्षणामाश्रित्य सोमवता यागेन समीहितं कुर्यादिति विशिष्टविधानमङ्गीकृतम् । इह त्ववयवद्वारेण कर्मणि प्रसिद्धेर्नामधेयत्वमेव युक्तम् । ननु अत्र किमुद्भित्त्वेन यागस्य बोधः, उत उद्भिन्नामकत्वेन । नाद्यः, उद्भित्त्वं हि न जातिः, लौकिकानुगतव्यवहाराभावात् । नापि पशूद्भेदनसाधनत्वम् । तर्हि पशूद्भेदनसाधनेन यागेन पशून्भावयेदित्यर्थपर्यवसानेन पौनरुक्त्यापातात् । न द्वितीयः, उद्भिन्नाम्नः उद्भिच्छब्दानभिहितत्वेन शाब्दबोधे प्रकारत्वानुपपत्तेः, शब्दोपस्थितस्यैवान्वयबोधविषयत्वनियमात् इति चेत्, सत्यम् । उद्भिन्नामकत्वेन यागस्य बोधः । उद्भित्पदं हि स्वेना-

'नभिहितमपि प्रत्यक्षश्रुतत्वमात्रेण स्ववाच्यकर्मविशेषमन्यस्माद्व्यावर्तयद्विशेषणभावमनुभवति, शब्दोपस्थितस्यैवान्वयबोधविषयत्वनियमस्य संज्ञाशब्दव्यतिरिक्तविषयत्वात्। न चैवं सति पशूद्देदनसाधनत्वस्य शाब्दप्रतीतिविषयत्वाभावात्तदर्थकयोगाश्रयणवैयर्थ्यमिति वाच्यम्। उद्भिच्छब्दस्य योगेन स्वनिष्पादिलक्षणगुणविध्यर्थत्वस्यैव प्रसक्तौ योगस्य कर्मण्यपि समानत्वान्न गुणविधित्वनिर्णायकतेति दर्शयितुं योगोपपादनोपपत्तेरित्यन्यत्र विस्तरः। न च नामधेयत्वे [1]उद्भिच्छब्दस्यानर्थक्यमिति वाच्यम्। कर्मभेदाख्यापनार्थत्वस्य[2] सूत्रे 'यदुत्पत्तावपूर्वम्' इत्यनेन दत्तोत्तरत्वात्। यथा चैतत्तथा द्वितीयस्य द्वितीये 'संज्ञा चोत्पत्तिसंयोगात्' इत्यत्र स्फुटीभविष्यति। वस्तुतस्तु ताण्डकतलवकारवाजसनेयकादिब्राह्मणेषु नाम्नामेवंजातीयकानां निर्वचनं बहुलमुपलभ्यते। तत्र ताण्डके तावत् 'यद्वै तद्देवाँ असुरानेभ्यो लोकेभ्योऽगोपयत्तदेव गोर्गोत्वम्' 'अथैष आयुरायुषा वै देवा असुरानयुवत यद्विश्वमजयत्तस्माद्विश्वजित्। स एतमभिजितमपश्यत्तेनानभिजितमभ्यजयत्' इत्यादि, तलवकारब्राह्मणे च 'वलभिदैव वलमभिदन्' 'उद्भिदा गा उदसृजन्त' 'यत्पृतनामजयंस्तत्पृतनाजितः पृतनाजित्त्वम्' 'यदुपाह्वयत तदुपहव्यस्योपहव्यत्वम्' इत्यादि, वाजसनेयके च 'स वै दक्षो नाम। तद्यदनेन सोऽयजत तस्माद्दाक्षायणयज्ञ इत्याख्या। तदुहैके वसिष्ठयज्ञ इत्याचक्षते। स वा एकेन नाम्ना वसिष्ठस्तमेनमन्वाचक्षते' इत्यादि, तैत्तिरीयके च 'तं वा एतं वाजपेय इत्याहुः। वाजाप्यो वा एषः। वाजं ह्येतेन देवा ऐप्सन्' 'यद्वयहन्, तद्विघनस्य विघनत्वम्' इत्यादि। ततश्च यत्रैवं निर्वचनं नोपलभ्यते, तद्विषयेयमधिकरणप्रवृत्तिः। इत्युद्भिदधिकरणम्॥

'चित्रया यजेत पशुकामः' 'त्रिवृद्बर्हिष्पवमानम्' 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' इत्यत्र किं चित्राबर्हिष्पवमानाज्यपृष्ठशब्दा गुणविधयः, उत नामधेयानीति संशयः।

३. चित्रादिशब्दानां यागनामधेयताधिकरणम्।

तत्रोद्भिदादिशब्दस्य यौगिकस्य कर्मण्यपि संभवद्योगस्य कर्मनामधेयत्वं युज्यते। चित्रादिशब्दास्तु व्रीह्यादिशब्दवद्रूढ्यार्थान्तरवाचिनः कथं कर्मनामतां भजेरन्। अतो गुणविधय एवैते। तथा हि—'चित्रया यजेत' इत्यत्र स्त्रीत्वस्य प्राणिन्येव मुख्यत्वात्तदनुसारेण प्राणिद्रव्यकाग्नीषोमीयपशुयागविषयकत्वं वाक्यस्य गम्यते। न तु 'दधि मधु घृतमापो धानाः' इत्यादिवाक्यलब्धप्रकृतयागपरत्वं कर्मान्तरपरत्वं वा। ततश्च बहुरूपत्वलक्षणचित्रत्वं स्त्रीत्वं करणकारकमिति त्रीण्यग्नीषोमीययागानुवादेन विधीयन्ते। न चैवं सति विध्यावृत्तिलक्षणवाक्यभेदः स्यादिति वाच्यम्। चित्रत्वस्त्रीत्वविशिष्टकारकस्य पृथग्विधिव्यापारं विनैवैकपदोपादानतो लाभात्। न चैवमपि यागे चित्रत्वस्त्रीत्वविशिष्टकारकस्य फले यागस्य च विधानाद्वाक्यभेदो दुष्परिहर इति वाच्यम्। पशुयागं कुर्वतोऽवश्यं पश्वर्जनेच्छावत्त्वेन

1. उद्भित्पदस्य—क, ग, घ. 2. व्याख्यानार्थत्वस्य—क.

पशुकामपदस्य तदनुवादत्वोपपत्तेः । 'त्रिवृद्बहिष्पवमानम्' इत्यत्र च 'सदसो बहिर्व्यजनादिन त्रिगुणं वायुं संपादयेत्' इति गुणविधित्वं स्तुतावुपपाद्यम् । 'पञ्चदशान्याज्यानि' इत्यत्र च आज्यस्य संसर्गिद्रव्यस्य स्वतः संख्यायोगासंभवात्पञ्चदशपात्रनिहितत्वेन पञ्चदशपलादिपरिमितत्वेन वा संख्यायोगो भवति । आज्यस्य च स्वरूपेण स्तोत्राङ्गत्वासंभवात्संनिधानेन तद्वाच्यम् । तच्च संनिधापनं विना न संभवतीति पञ्चदशत्वसंख्याकान्याज्यानि स्तोत्रकाले संनिधापयेदिति पर्यवसानात्सुगमं गुणविधानम् । 'सप्तदशानि पृष्ठानि' इत्यत्रापि स्तोत्रकाले सप्तदश पुरुषाः स्वस्वपृष्ठानि प्रदर्शयेयुरिति स्तोत्रसाधनत्वमुपपाद्यम् । एषु च त्रिवृत्त्वादिविशिष्टपवमानादिविधानान्न वाक्यभेदः । एवं च 'बहिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इति वाक्येषु बहिष्पवमानादिपदं प्रदर्शितगुणवाक्यप्राप्तगुणानुवादकमेव, न तु नामधेयमिति प्राप्ते सिद्धान्तयति—

यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः ॥ ३ ॥

नामधेयं स्यादित्यनुवर्तते । यस्मिन् 'चित्रया यजेत' इत्यादिवाक्ये गुणोपदेशः अनेकगुणविधानं संभाव्यते, तत्र वाक्यभेदप्रसङ्गेन तस्यायुक्तत्वान्नामधेयं स्यात् । गुणविधित्वे बाधकमुक्त्वा नामधेयत्वे साधकमाह—प्रधानतोऽभिसंबन्ध इति । प्रधानेन धात्वर्थेन अभिसंबन्धः सामानाधिकरण्यं यतः, यतश्च प्रधानेन धात्वर्थेन अभिसंबन्धः वाचकत्वम् अन्वाख्यानार्थवादतो गम्यत इत्यर्थः । तथाहि—'चित्रया यजेत' इत्यत्र गुणविधिरिति वदन्प्रष्टव्यः । किं पश्वनुवादेन चित्रत्वस्त्रीत्वविधिः, उत यागानुवादेन तयोर्विधिः, उत पशुयागानुवादेन तदुभयविशिष्टकारकविधिः नाद्यद्वितीयौ, वाक्यभेदप्रसङ्गात् अग्नीषोमीयपशौ केवललोहितत्वलोहितसारङ्गत्वकृष्णसारङ्गत्वविधिभिर्विरोधप्रसङ्गाच्च । विकल्पस्य चाष्टदोषदुष्टत्वात् अग्नीषोमीययागस्य उत्पत्तिशिष्टपुंस्त्वविशिष्टपशुलक्षणकारकावरुद्धत्वेन तत्र स्त्रीत्वादिविधानानुपपत्तेश्च । अत एव न तृतीयः उत्पत्तिशिष्टकारकान्तरावरुद्धत्वादुभयविशिष्टकारकविधाने गौरवाच्च । पशुकामपदस्यानर्थक्यप्रसङ्गाच्च । न चायं द्रव्यार्जनाङ्गपशुकामानुवाद इति युक्तम्, तदनुवादत्वस्य स्वर्गकामाधिकरणे निराकरिष्यमाणत्वात्; अग्नीषोमीययागगुणविधित्वे 'दधि मधु घृतमापो धाना भवन्ति' इति प्रकृतदध्यादियागातिक्रमापत्तेश्च । अतश्चित्रापदस्य प्रकृतदध्यादिविचित्रद्रव्यकेष्टिनामधेयत्वमेव युक्तम् । 'त्रिवृद्बहिष्पवमानम्' इत्यत्रापि त्रिवृत्त्वबहिष्पवमानानामनेकपदोपात्तानां विशिष्टप्रतिपत्तिनियमाभावे सति विध्यन्वयस्यापेक्षितत्वेन त्रिवृद्बहिष्पवमानानां परस्परसंबन्धं विनैव स्वातन्त्र्येण विधिसंबन्धार्थं स्तुतिविधानेन वाक्यभेदापत्तेर्न गुणविधिः । अतो बहिष्पवमानशब्देन स्तोत्रमनूद्य त्रिवृत्त्वमात्रस्य विधिरिति वक्तव्यम् । तच्च 'बहिष्पवमानेन स्तुवते' इत्युत्पत्तिवाक्ये बहिष्पवमानशब्दस्य नामधेयत्वे सत्येव संगच्छते, नान्यथा । उत्पत्तिवाक्येऽस्मिन्बहिष्पवमानशब्दस्य नामधेयत्वाभावे हि

उत्पन्नं स्तोत्रं गुणवाक्यगतबहिष्पवमानशब्दः कथमनुवदितुं शक्नुयात्। एवम् 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' इत्यत्रापि 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इत्याज्यपृष्ठशब्दकत्वेन श्रुतानि स्तोत्राण्यनूद्य पञ्चदशत्वसप्तदशत्वयोर्विधानमूह्यम्। तदेवं चित्राबहिष्पवमानाज्यपृष्ठशब्दानां नामधेयत्वे 'चित्रया यजेत' 'बहिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इति तृतीयानिर्देशगम्यं भावनाकरणीभूतयजिस्तुतिसामानाधिकरण्यमप्यनुगृहीतं भवति। शक्नुवन्ति च चित्रादिशब्दाः कर्मण्यपि योगेन वर्तितुम्। तथाहि—चित्राशब्दस्तावद्दध्यादिविचित्रद्रव्यकत्वलक्षणयोगेन इष्टिविशेषे वर्तत इति प्राञ्चः। वस्तुतस्तु तैत्तिरीयके चित्रेष्टौ दध्यादिद्रव्याणि न श्रुतानि, किंतु 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्' इत्युपक्रम्य 'दधि मधु घृतमापो धानाः' इत्यादिना इष्ट्यन्तर एव विहितानि। चित्राशब्दश्च तत्र प्रकारान्तरेण निरुक्तः 'यद्वा अस्यां विश्वं भूतमधिप्रजायते तेनेयं चित्रा' इति। चीयते द्विपाच्चतुष्पात्पशुलक्षणं सर्वं प्राणिजातमस्यामिष्टौ साध्यसाधनभावसंबन्धेन वर्तत इति व्युत्पत्त्येत्यर्थः। दध्यादिविचित्रद्रव्यकत्वयोगाश्रयणे तु शाखान्तरमन्वेषणीयम्। पवमानसोमदेवत्यमन्त्रसाध्यत्वात्सदसो बहिः क्रियमाणत्वाच्च बहिष्पवमानः स्तोत्रम्। यैर्देवा इमाँल्लोकानाजयंस्तान्याज्यानि स्तोत्राणि। आङ्पूर्वाज्जयतेरौणादिकं रूपम्। यद्वा आजिर्गन्तव्योऽवधिः काष्ठेति पर्यायः। येषु निमित्तेषु देवाः परस्परं कलहायमाना गिरिमेकं काष्ठां कृत्वा ये तामग्रे धावन्तः प्रतिपद्यन्ते तेषामिमानि स्तोत्राणीति समयं कृत्वा धावन्तः कतिपये देवाः प्रत्यपद्यन्त तान्याज्यानि। आजिमर्हन्तीत्यर्थे च्छान्दसो यः। एवं हि तलवकारब्राह्मणे 'त एतान्याज्यानि स्तोत्राण्यपश्यन' इत्युपक्रम्य श्रूयते 'यदिमान् लोकानाजयन् तदाज्यानामाज्यत्वम्' इति, 'तेऽब्रुवन्, आजिमेषामयाम गिरिं काष्ठां कृत्वेति यदब्रुवन्नाजिमेषामयामेति तदेषां द्वितीयमाज्यत्वम्' इत्यादि। द्वितीयं निर्वचनमित्यर्थः। ताण्डकब्राह्मणे 'आपो वा ऋत्वियमार्च्छन् तासां वायुः पृष्ठे व्यवर्तत' इत्यार्तवयुक्तानामपां पृष्ठे वायोः स्पर्शनं निमित्तमुपक्रम्य वामदेव्यतो रथन्तरादिपृष्ठानामुत्पत्तिरनुक्रान्ता। ततश्च स्पर्शाज्जन्यत इति पृष्ठमिति व्युत्पाद्यम्। 'तिथपृष्ठ' इत्यादिना औणादिकस्थप्रत्ययः सकारलोपश्च। अतश्चित्रादिपदानि नामधेयानीति स्थितम्। इति चित्राज्याधिकरणम्॥

'अग्निहोत्रं जुहोति' 'आधारमाधारयति' इति श्रूयते। तत्राग्निहोत्रपदमाधारपदं च गुणविधिर्नामधेयं वेति संशयः। तत्र गुणविधायकत्वमुद्भिदादिपदानां यौगिकानां मत्वर्थलक्षणा-

* ४. अग्निहोत्रादिशब्दानां यागनामधेयताधिकरणम्।

दोषान्निराकृत्य कर्मणि योगेन संभवद्वृत्तिकत्वात्कर्मनामधेयत्वं साधितम्। तदेतदत्र विपरीतम्, मत्वर्थलक्षणाभावेन गुणविधित्वे बाधकाभावात्कर्मनामत्वे बाधकसत्त्वाच्च। तथाहि—हूयत इति होत्रं पयोदध्यादि द्रव्यम्। 'हुयामाश्रुभसि' इत्यादिना त्रन्प्रत्ययः। अग्नये होत्रमस्मिन्निति बहुव्रीहिणैव मत्वर्थस्य लाभान्न

मत्वर्थलक्षणा। 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः, 'कण्ठेकालः' 'उरसिलोमा' 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादिवत्। ततश्चाग्न्युद्देश्यकपयोदध्यादिहूयमानद्रव्यकहोमोऽवगतः। तत्राग्निहोत्रपदे होमो न विधेयः, जुहोतिनैव तल्लाभात्। नापि पयोदध्यादि द्रव्यम्, 'पयसा जुहोति' इत्यादिभिस्तल्लाभात्। अत उपसर्जनीभूतोऽप्यग्निरेव विधेय इति प्राञ्चः। वस्तुतस्तु होत्रशब्दो भावसाधनः। अग्नये होत्रं होमः अग्निहोत्रम्। यद्वा, हूयते यस्मिन्कर्मणि तद्धोत्रम्। अग्नये होत्रमग्निहोत्रम्। प्रकृतिविकारभाव एव चतुर्थीसमासविधावपि 'सुप्सुपा' इति समासः। 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु' इति वार्तिकव्याख्यानावसरे 'धर्माय नियमो धर्मनियमः' इति पातञ्जलभाष्ये चतुर्थीसमासप्रदर्शनात् व्यक्तोक्तत्वाच्च कैयटादिभिः। ततश्च मत्वर्थलक्षणां विनैव गुणविधिसंभवः। बहुव्रीह्याश्रयणे तु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति बहुव्रीहिस्वरेण अग्निशब्दे इकारस्य उदात्तत्वे सतिशिष्टस्वरेण अवशिष्टानामचामनुदात्तत्वे ओकारस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वे रेफादकारस्य 'स्वरितात्संहितायामनुदात्तानाम्' इति प्रचयः स्यात्। 'सुप्सुपा' इति समासाश्रयणे तु 'समासस्य' इत्यन्तोदात्तं भवति। अन्तोदात्तमेव चाग्निहोत्रपदं प्रयुञ्जते तैत्तिरीयादय इत्यन्यदेतत्। प्रकृतमनुसरामः। अग्निहोत्रपदस्य नामधेयत्वे कर्मणो विधेयस्यारूपत्वं स्यात्। द्रव्यदेवते हि यागस्य रूपम्, देवतोद्देश्यकद्रव्यत्यागात्मकत्वाद्यागस्य। तत्र द्रव्यं यद्यपि 'पयसा जुहोति' इत्यादिभिः प्राप्तम्। देवता तु नामधेयत्वे सति न प्राप्नोतीत्यरूपत्वं कर्मणः प्रसज्येत। न च 'यदग्नये च प्रजापतये च सायं जुहोति, यत्सूर्याय च प्रजापतये च प्रातः' इति वाक्याभ्यां देवतालाभान्नारूपत्वमिति वाच्यम्। तयोर्हि वाक्ययोः किमग्न्यादयो गुणा[1] विधीयन्ते, उताग्निप्रजापत्योः सूर्यप्रजापत्योश्च समुच्चितयोर्विधिः, उत तयोः समुच्चयः, उताग्निसमुच्चितस्य सूर्यसमुच्चितस्य च प्रजापतेर्विधानम्, उत प्रजापतिमात्रविधानम्। नाद्यद्वितीयौ, वाक्यभेदात्। न तृतीयः, चशब्दार्थस्य समुच्चयस्य स्वातन्त्र्येणोपस्थित्यभावेन विशेष्यत्वानुपपत्तेः। न चतुर्थः, 'पञ्चदशान्याज्यानि' इत्यत्र संख्याविशिष्टाज्यानामिव समुच्चयविशिष्टप्रजापतेरपि विधानायोगात् न पञ्चमः। प्रजापतिमात्रविधौ हि 'अग्नये' इत्यस्य 'सूर्याय' इत्यस्य च विधित्वासंभवादनुवादत्वं वक्तव्यम्। तच्च न संभवति, प्रापकाभावात्। न च 'अग्निर्ज्योतिः' 'सूर्यो ज्योतिः' इति मन्त्रवर्णतस्तत्प्राप्तिरिति वाच्यम्। प्रबलब्राह्मणगतचतुर्थ्युपात्तदेवतावरुद्धे कर्मणि दुर्बलमन्त्रवर्णतस्तद्विरुद्धदेवतानिवेशायोगात्। न च प्रजापतिदेवताके कर्मणि कथमग्निसूर्यप्रकाशनसमर्थयोर्मन्त्रयोर्निवेशसंभव इति वाच्यम्। 'वचनान्वयार्थमैन्द्री स्यात्' इति तार्तीयीकाधिकरणन्यायेन वाचनिकविनियोगबलेन प्रजापतिलक्षकतया तदुपपत्तेः, प्रजापतिमात्रविधौ 'यत्सूर्याय प्रजापतये'

1. गुणाश्चत्वारो— क, घ.

इति पुनर्विधानवैयर्थ्याच्च। न च 'यदग्नये च प्रजापतये च सायम्' इत्येवोच्यमाने प्रातर्होमे प्रजापतिदेवता न स्यात्, 'यत्सूर्याय' इत्युच्यमाने सायंहोमे न स्यादित्युभयोद्देशेन तद्विधिरिति वाच्यम्। योऽयं होमः स चेत्सायं तर्हि 'प्रजापतये' इति विशिष्टोद्देशे वाक्यभेदापातात्। ततश्च 'यदग्नये च' इत्यादिवाक्यद्वये अग्निसूर्यसायंप्रातर्विशिष्टकर्मान्तरविधिरिति वक्तव्यम्। एवं च ततः कथमग्निहोत्रवाक्यविहितकर्मणि देवतालाभः स्यात्। न च 'अग्निर्ज्योतिः' 'सूर्यो ज्योतिः' इति मन्त्रवर्णतस्तल्लाभसंभव इति शङ्क्यम्। 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति मन्त्रविध्योः सायंप्रातःप्रत्यभिज्ञाबलेन 'यदग्नये च—' इति वाक्यद्वयविहितविशिष्टकर्मान्तरविषयत्वावगमेनाग्निहोत्रवाक्यविहिते कर्मणि ततो देवतालाभासंभवात्। तस्मादत्राग्निहोत्रशब्दस्य नामधेयत्वे कर्मणोऽरूपत्वापातादनुवादविधानमेव युक्तम्। एवं चाग्निहोत्रमिति द्वितीयाप्युपपन्ना भवति। नामधेयत्वे हि भावनाकरणीभूतधात्वर्थवाचित्वात्तृतीया स्यात् 'उद्भिदा यजेत' इत्यादिवत्। गुणविधित्वे तु अग्नये होमं कुर्यादित्यर्थपर्यवसानात्सा न विरुध्यते। न च, कस्मिन्होमेऽयं देवताविधिः; न तावत् 'यदग्नये च—' इति विहिते कर्मणि, उत्पत्तिशिष्टदेवतान्तरावरुद्धत्वात्[1]; अत एव न दर्शपूर्णमासादिगतहोमेषु इति वाच्यम्। अविहितदेवताकेषु नारिष्टादिदर्वीहोमेष्वग्निदेवताविधिसंभवात्। न च मान्त्रवर्णिकदेवतान्तरावरोधात्तत्र[2] नाग्निविधिः संभवतीति वाच्यम्। मन्त्रवर्णप्रवृत्तेः प्रागेव झटिति प्रवृत्तेनाग्निहोत्रवाक्येन तत्राग्नेरेव निवेशादेवतान्तरपदानां च तत्सत्यमङ्गगतानामैन्द्रीन्यायेनाग्निलक्षकत्वोपपत्तेः। वस्तुतस्तु यत्र दर्वीहोमेषु न देवताविधिः, न वा मन्त्राम्नानं तत्र गुणविधानं भविष्यति। अस्ति हि वाजसनेयके हव्यवाहकाण्डे सप्तमाध्यायान्ते 'दर्शपूर्णमासयोरुक्तममनूयाजमिष्ट्वा समानीय जुहोति' इति तादृशदर्वीहोमविधिः। औपभृतमाज्यं जुह्वां समानीय जुहोतीति तदर्थः। एवं चाग्निहोत्रमिति गुणविधिरेव, न तु नामधेयम्। 'यदग्नये च' इत्यादिवाक्यद्वयं तु विशिष्टकर्मान्तरविधायकम्। 'दध्ना जुहोति' इत्यादिस्तु तत्रैव गुणविधिः। 'सायं जुहोति' 'प्रातर्जुहोति' इति च तयोरेव विशिष्टकर्मणोर्विश्वजिन्न्यायकल्प्ये फले समुच्चयविधिः। अन्यथा 'यदग्नये च' इति 'यत्सूर्याय च' इति पृथग्विधिबलात्पृथगेव फलं कल्प्येत। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'यावज्जीवमग्निहोत्रं जुहुयात्' इति च दर्वीहोमाश्रिताग्निदेवताफले निमित्ते च विधीयते, यावज्जीवानुष्ठितदर्वीहोमाश्रिताग्निना फलं कुर्यादिति। तदेवमग्निहोत्रपदं गुणविधिः, न तु नामधेयमिति स्थितम्। तथा क्षरणार्थकहृधातुतः कर्मणि घञन्ताधारशब्दोपात्तक्षरणसमर्थद्रव्यमाज्यपयोमध्वादि द्वितीयानिर्देशतः क्षरणक्रियासंस्कार्यतयावगम्यमानं प्रयोजनाकाङ्क्षालक्षणप्रकरणाद्दर्शपूर्णमासार्थतामुपगतमाग्नेयादीनामुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धत्वादुत्पत्तावद्रव्यकमुपांशुयाजान्तकं प्रधानमास्कन्दतीति तत्र गुणविधित्वम-

1. अवरोधात्—क, ग, घ. 2. देवतावरोधात्तत्र —क, घ.

व्यवस्थामः । 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति त्वाज्यभागादिविषयं भविष्यति । ततश्चोपांशुयाजवाक्ये उपांशुयाजं विधाय पर्यवसिते सति उपांशुयाजमनूद्य प्रकरणकल्पितवाक्येन द्रव्यविधिः, क्षरणसंस्कृतेनाधारेण उपांशुयाजं कुर्यादिति । अतो वैयधिकरण्येनैव गुणस्य विधेयतया मतुप्प्रत्ययकल्पनाभावान्न मत्वर्थलक्षणावकाशः । यदि चोपांशुयाजवाक्यमेव प्रकरणसनाथं संस्कृताधारद्रव्यविशिष्टोपांशुयाजविधायकं तदापि न मत्वर्थलक्षणा, क्षरणसंस्कृताधारवता उपांशुयाजेन भावयेदिति मतुप्प्रत्ययप्रयुक्तस्यैव वाक्यस्य प्रकरणेन कल्पनात् । न च, प्रकरणतो वाक्यकल्पनापेक्षया अस्मिन्नेव वाक्ये यागविधिर्युक्तः; ततश्चाधारपदं नामधेयमेव भविष्यतीति वाच्यम् । प्रत्यक्षयज्यश्रवणात् द्रव्यदेवतारूपालाभाच्च । 'चतुर्गृहीतं वा एतदभूत्तस्याधारमाधार्यं' इति प्रयाजार्थचतुर्गृहीताज्यस्यैकदेशमाधारं क्षरणसमर्थमुद्दिश्य क्षारणं विधीयत इति न ततो द्रव्यलाभः । 'इत इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इत्यनेन तु मन्त्रमात्रं क्षारणसंस्काराङ्गतया विधीयते, 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति निर्वापे हस्ताभ्यामित्यन्तसावित्रमन्त्रवत् । न तु मान्त्रवर्णिकदेवताकल्पनं तद्बलेन वा यागकल्पनम्, गौरवात् । अस्तु वा देवताकल्पनं तद्बलाद्यागकल्पनं च । तथापि तन्नामधेयत्वमाधारपदस्य न संगच्छते, तथा सति यजेः करणत्वेन तद्वाचकनामधेयस्यास्य तृतीयान्तत्वापातात् । गुणविधित्वे तु आधारस्य संस्कार्यत्वाद्द्वितीया न विरुध्यते । अतः 'आधारमाधारयति' इत्यपि गुणविधिः । इति प्राप्ते, सिद्धान्तयति—

तत्प्रख्यं चान्यशास्त्रम् ॥ ४ ॥

'यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः' इति 'नामधेयं स्यात्' इति चानुवर्तते । यस्मिन् 'अग्निहोत्रं जुहोति' इत्यादिवाक्ये अग्न्यादिगुणविधिः संभाव्यते तत्र नामधेयमेव स्यात् । कुतः । यतो नामधेयत्वे प्रधानतोऽभिसंबन्धः विधेयेन धात्वर्थेन विधिप्रत्ययस्य अभिसंबन्धः एकपदवृत्तित्वं लभ्यते । गुणविधित्वे तु विधेयस्य गुणस्य विधिप्रत्ययस्य च भिन्नपदवृत्तित्वं लभ्यते । तथा च गुणस्य विधेश्च संबन्धः पदद्वयसमभिव्याहारवाक्यगम्यः, न तु धात्वर्थविधिसंबन्धवच्छ्रुतिगम्यः । न हि समानपदवृत्तित्वलक्षणश्रुत्या धात्वर्थस्य विधिसंभवे वाक्येन गुणविधानं युक्तम् । यद्यप्याधारवाक्ये क्षरणसमर्थाज्यादिद्रव्योद्देशेन विधेयस्याधारणसंस्कारस्य विधिप्रत्ययस्य च समानपदवृत्तित्वान्नोक्तदोषः, तथापि प्रकरणपरिकल्पिते क्षारणसंस्कृताज्यादिद्रव्येणोपांशुयाजं कुर्यादिति वाक्ये आधारद्रव्यवता उपांशुयाजेन भावयेदिति वाक्ये वा विधिप्रत्ययस्य विधेयाज्यादिद्रव्यस्य च भिन्नपदवृत्तित्वाद्वाक्येन विधानं वाक्यार्थस्य विशिष्टस्य च विधानं दोषः । ननु नामधे-

'यत्वे अरूपत्वं दोषः स्यादित्यत्र उत्तरम्— तत्प्रख्यं चान्यशास्त्रमिति । चशब्दो ह्यर्थः, उक्तसमुच्चयार्थो वा । तच्छब्देन 'गुणोपदेशः' इत्युपात्तो गुणः परामृश्यते । यागनामधेयत्वे यागस्य रूपलाभाय यो गुणो विधेयतयापेक्षितः, तं प्रचष्टे विधत्त इति तत्प्रख्यम् । 'आतश्चोपसर्गे' इति कः । विधित्सितस्याग्न्यादिगुणस्य विधायकमन्यच्छास्त्रमस्ति । अतस्तदग्निहोत्रादिपदमपि नामधेयं स्यादित्यर्थः । तथाहि— 'अग्निहोत्रं जुहोति' इत्यग्निहोत्रनामधेयकस्य होमस्य विधिः । 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति विहितमन्त्रवर्णतोऽग्निसूर्यदेवतालाभः । न च योऽयं होमः स चेत्सायमिति वाक्यभेदः शङ्क्यः, होमस्य प्रकरणत एवोपस्थित्या तदंशे शब्दस्य व्यापाराभावात् । 'यदग्नये च प्रजापतये च' इत्यादिवाक्यद्वये अग्निसमुच्चितः सूर्यसमुच्चितश्च प्रजापतिर्विधीयते । तत्र मन्त्रवर्णप्राप्ताग्निसूर्यांशे विधिव्यापाराभावान्न विशिष्टविधिगौरवम् । एवं चाग्निसूर्यानुवादेन प्रजापतिसमुच्चयविधिः[1] पर्यवस्यति । एतेन समुच्चयस्य चार्थस्य विशेष्यत्वाभावान्न विधेयत्वमिति निरस्तम्, तद्विधेरार्थिकत्वात् । 'सायं जुहोति' 'प्रातर्जुहोति' इति कालविधिः । सायंप्रातर्व्यवस्थितमन्त्रवर्णलब्धाग्निसूर्यानुवादेन प्रजापतिसमुच्चयो विधीयमानोऽपि तदनुवाद्यदेवतानुसारेण व्यवस्थयैव प्राप्नोतीति 'यदग्नये च' इति वाक्यद्वये सायं प्रातरित्यनुवादः । अग्निहोत्रमिति द्वितीया तु फलभावनाकरणस्यापि यागस्य 'नासाधितं करणम्' इति न्यायेनार्थाक्षिप्तसाध्यत्वाभिप्रायेति प्राञ्चः । अत्रेदं वक्तव्यम्— तैत्तिरीयकब्राह्मणे 'प्रजापतिरग्निमसृजत' इत्युपक्रम्य 'तं प्रजापतिरब्रवीज्जायस्वेति सोऽब्रवीत्किं भागधेयमभिजनिष्य इति । तुभ्यमेवेदꣳ हूयाता इत्यब्रवीत् । स एतद्भागधेयमभ्यजायत । यदग्निहोत्रम् । तस्मादग्निहोत्रमुच्यते । तद्धूयमानमादित्योऽब्रवीत् । मा हौषीः । उभयोर्वै नावेतदिति । सोऽग्निरब्रवीत् । कथं नौ होष्यन्तीति । सायमेव तुभ्यं जुहवन् । प्रातर्मह्यमित्यब्रवीत् । तस्मादग्नये सायꣳ हूयते । सूर्याय प्रातः' इति देवताविधिः, केवलाग्निसूर्ययोर्देवतयोर्विधानात् । मन्त्रवर्णप्राप्तो ज्योतिष्टोमगुणो नादर्तव्यः, आग्नेयादियागे 'अग्निर्मूर्धा दिवः' इत्यादियाज्यापुरोनुवाक्यागम्यगुणवत् । 'तूष्णीमुत्तरामाहुतिं जुहोति' 'यत्तूष्णीं तत्प्राजापत्यम्' इति द्वितीयाहुतिरङ्गत्वेन विधीयते, अग्निसूर्यहोमयोरेव प्राधान्यावगमात् । श्रूयते हि वाजसनेयके 'यामग्रे जुहोति सा तस्यै देवतायै यस्या अग्निहोत्रम् अथ या द्वितीया स्विष्टकृद्वाजनमेव सा' इति । एवं च 'यदग्नये च प्रजापतये च' इति वाक्यद्वयमपि यच्छब्दबलादनुवाद एव । एतेन 'चतस्रो गार्हपत्ये जुहोति चतस्रोऽन्वाहार्यपचने द्वे आहवनीये दश संपद्यन्ते दशाक्षरा विराड्विराजा यज्ञः संमितः' इति बह्वृचब्राह्मणे विराट्संपत्तिश्रवणादहानामपि होमानां प्राधान्यमिति वदन्तो निरस्ताः । यदि हि विराट्संपत्तिरेव प्राधान्यप्रयोजिका, तर्हि वैश्वदेवे पर्वणि

1. विधौ—क, ब.

'नव प्रयाजा इज्यन्ते, नवानूयाजाः, अष्टौ हवींष्यि, द्वावाधारौ, द्वावाज्यभागौ, त्रिःशत्संपद्यन्ते त्रिःशदक्षरा विराट्' इति श्रवणात्प्रयाजादीनामपि प्राधान्यापत्तिः। अतः 'अग्निहोत्रं जुहोति इत्यग्निहोत्रपदं पूर्वाहुतेरेव नामधेयम्। एकस्यैवाग्निहोत्रस्य 'सायं जुहोति' 'प्रातर्जुहोति' इत्यभ्यासविधिः। अतः प्रातर्होमस्य सूर्यदेवत्यत्वेऽपि सायंहोमस्याग्निदेवत्यत्वमात्रेण अग्निहोत्रशब्दस्योपपत्तिः। कदाचिदग्निदेवत्यत्वयोगेन समाख्यानोपपत्तेः, श्रवणादिनक्षत्रयोगाभावेऽपि श्रावणी पौर्णमासीत्यादिव्यपदेशवत्। आघारवाक्येऽपि श्रुत्या विधिसंभवे वाक्यतो विधानस्यायुक्तत्वान्न गुणविधित्वमित्युक्तमेव। आङ्पूर्वात् घृधातोर्भावघञन्तमाघारपदमुपसर्गवशाद्यागोत्तरक्षारणरूपहोमस्य नामधेयम्। यागोत्तरक्षारणमेव हि होमः। तथा च सूत्रकारो वक्ष्यति 'जुहोतिरासेचनाधिकः स्यात्' इति। 'प्राञ्चमाघारयति' 'संततमाघारयति' इत्यादिस्तु गुणविधिः। तथा च आघारसंज्ञकेन होमेनोपकुर्यादित्यर्थः। तत्र 'चतुर्गृहीतं वा एतदभूत्' इत्यत्र आघारपदेनाघारमनूद्य 'चतुर्गृहीतं वा एतदभूत्तस्य' इत्यंशेन द्रव्यविधिः। तस्येत्यवयवषष्ठी। यच्चतुर्गृहीतं प्रयाजार्थमाज्यमभूत्तस्यैकदेशेनाघाराख्यं कर्माभिनिर्वर्त्येत्यर्थः। एवं च एकमेवाधारणं लभ्यत इति लाघवम्। गुणविधित्वे तु 'चतुर्गृहीतं वा एतत्' इति जौहवाज्यस्याधारणम्, आघारवाक्येन उपांशुयाजाज्यस्याधारणमित्याधारणविधिद्वयकल्पनागौरवम्। तथा 'इत इन्द्र ऊर्ध्वोऽध्वरः' इति मन्त्रवर्णादेवतालाभः। न च निर्वापे सावित्रमन्त्रवन्न देवताकल्पकत्वमिति वाच्यम्, वैषम्यात्। निर्वापे तावत् 'यदाग्नेयोऽष्टाकपालः' इति वाक्यगतदेवतान्तरावरुद्धत्वान्न सावित्रांशस्य देवताकल्पकत्वम्। इह तु देवताकल्पकत्वे न किंचिद्बाधकमस्ति। तथा च 'सूक्तवाकेन प्रस्तरं प्रहरति' इति करणतया निर्दिष्टसूक्तवाकप्रतिपाद्याग्न्यादिदेवताकल्पनवदिहापि इतिकरणेन मन्त्रस्य करणतया विनियोगबलात्तत्प्रतिपाद्यस्येन्द्रस्यापि देवतात्वकल्पनं न विरुध्यते। न च नामधेयत्वे प्रयाजादिवदारादुपकारकत्वमेव स्यात्, न तु संस्कारकर्मत्वमिति वाच्यम्। 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्' इति प्रयाजार्थतया विहितस्य चतुर्गृहीतस्य स्वतन्त्रकर्मणि विनियोगासंभवेन प्रयाजार्थाज्यसंस्कारत्वस्याप्यवश्यंभावात्। उपपद्यते च पीतशेषस्य पुनः पास्यमानस्य जलस्येव प्रयाजेषूपयोक्ष्यमाणस्याज्यस्य किंचित्क्षारणेन संस्कारः। एवं च प्रस्तरप्रहरणवत्स्विष्टकृद्वच्च यागरूपत्वं संस्कारकर्मत्वं च न विरुध्यते। न च संस्कारकर्मणां नाम्ना विधानं क्वापि न दृष्टमिति वाच्यम्। 'अंशुं गृह्णाति' 'अदाभ्यं गृह्णाति' इत्यादौ तथा दृष्टत्वात्। आघारमिति द्वितीया त्वग्निहोत्रमितिवदर्थाक्षिप्तसाध्यत्वाभिप्राया। तस्मादाघारपदमपि नामधेयमिति। प्रयोजनं पूर्वपक्षे अविहितदेवताकेषु दर्वीहोमेष्वग्निदेवतालाभः, उपांशुयाजाज्यस्य संस्कारलाभश्च। सिद्धान्ते तु दर्वीहोमेषु तथाविधेषु माञ्चवर्णिकीभिः प्राकरणिकप्रधानदेवताभिरेव वा स्वरूपलाभः। तथा च नैरुक्ताः 'येऽन्येनादिष्टदेवता मन्त्रा यद्देवतः स यज्ञो यज्ञाङ्गं वा तद्देवता भवन्ति' इति। उपांशुयाजार्थस्याज्यस्य क्षारणसंस्काराभावः कर्मान्तरलाभश्चेत्याद्यूह्यम्। इति तत्प्रख्याधिकरणम्॥

'श्येनेनाभिचरन्यजेत' इत्यत्र गुणविधिर्नामधेयं वेति संशयः। तत्राभिचरणं शत्रुवधः। 'लक्षणहेत्वोः क्रियायाः' इति फलस्यापि हेतुत्वात् शतृप्रत्ययः 'अधीयानः श्वसिति' इतिवत्। यजिश्च प्रकृतज्योतिष्टोमपरः। तथा च ज्योतिष्टोमसाधनेन श्येनेन शत्रुवधं कुर्यादित्यर्थः। तथा च वैयधिकरण्यान्वयेन मत्वर्थलक्षणाभावात्पक्षिविशेष एवात्यन्तनिरूढत्वाच्च श्येनशब्दस्य कर्मणि कथंचिदप्यप्रसिद्धत्वान्नोद्भिदन्यायः। वाक्यभेदाभावाच्च न चित्राज्याधिकरणन्यायः। तत्प्रख्यशास्त्रान्तराभावाच्च न पूर्वाधिकरणन्यायः। श्येनगुणश्चायं काम्यत्वाद्रोदोहनगुणश्चमसमिव 'सोमेन यजेत' इत्युत्पत्तिशिष्टमपि सोमं बाधते। तथा चागत्या गुणविधिरिति प्राप्ते, सिद्धान्तयति—

५. श्येनादिशब्दानां यागनामधेयताधिकरणम्।

तद्व्यपदेशं च ॥ ५ ॥

'यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः' इति 'नामधेयं स्यात्' इति चानुवर्तते। यस्मिन् श्येनवाक्ये गुणविधानमाशङ्क्यते तत्र श्येनपदं नामधेयमेव स्यात्, न तु गुणविधिः। यतः तद्व्यपदेशं वाक्यं प्रधानतोऽभिसंबन्धश्चास्ति तत इति योजना। तद्व्यपदेशमिति बहुव्रीहिः। तस्माद्विधेयत्वेनाभिमताच्छ्येनाद्व्यपदेशः भेदेनाभिधानं वस्तुतो विधेयकर्मणः यत्र तत् तद्व्यपदेशं वाक्यम् 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्येवंरूपम्। अत्र च अयमिति निर्दिष्टस्य विधेयस्य प्रतीयमानं श्येनसादृश्यं श्येनगुणविधौ कथं घटेत। इदंशब्दो हि न तावद्यागपरः। न ह्यन्यस्य विधेयता अन्यस्य च स्तुतिरिति युक्तम्। न च 'अयम्' इति श्येनस्यैव निर्देशो युक्तः। स्वस्यैव स्वसादृश्यानुपपत्तेः। ननु तर्हि, श्येनविशिष्टकर्मविधानमेवास्तु, श्येनविशिष्टस्य यागस्य श्येनरूपविशेषणाद्भिन्नत्वेन सादृश्योपपत्तेः। न चैवं सति सामानाधिकरण्यनिर्वाहाय मत्वर्थलक्षणा स्यादिति वाच्यम्। कर्मण्यप्रसिद्धनामधेयत्वकल्पनापेक्षया प्रसिद्धार्थापरित्यागिन्या मत्वर्थलक्षणाया एव युक्तत्वात्। न च नामधेयत्वेऽपि यथा श्येनो मत्स्यादीन्निपत्यादत्ते एवमयमपि यज्ञो द्विषन्तं भ्रातृव्यं निपत्यादत्ते इति वाक्यशेषगम्येन निपत्यादानक्रियासादृश्येन गौण्या वृत्त्या श्येनशब्दस्य कर्मण्यपि प्रसिद्धया नाप्रसिद्धार्थकल्पनमिति वाच्यम्। एवं हि श्येनगतनिपत्यादानसदृशनिपत्यादानवत्त्वेन कर्मणः श्येनशब्देनोपस्थितिर्वाच्या। तथा सति श्येनशब्दोऽयं स्वमुख्यार्थश्येनगतनिपत्यादानं लक्षयित्वा तन्मुखेन तत्सदृशं निपत्यभ्रातृव्यादानमपि लक्षयित्वा तद्वन्तं यागमपि लक्षयेदित्यत्यन्तविप्रकृष्टार्थः स्यात्। तद्वरं साक्षान्मुख्यार्थसंबन्धिनि यागे मत्वर्थलक्षणाश्रयणम्। किंच गौणत्वे मुख्यार्थश्येनस्य भावनान्वयाच्छ्रुत्यर्थपरित्यागः स्यात्। श्येनवता यागेनेति मत्वर्थलक्षणायां तु श्येनशब्दस्य तद्वल्लक्षकत्वे-

ऽपि विशेष्यांशस्य धातुनैव लाभाद्विशेषणीभूतमुख्यार्थश्येनपरत्वमेवेति भवेच्छ्रुत्यर्थानुग्रहः। तस्माद्गुणविशिष्टकर्मविधिरित्यत आह—प्रधानतोऽभिसंबन्ध इति। चशब्दोऽत्र संबद्ध्यते। यतस्तद्वयपदेशं वाक्यमस्ति अतो न गुणविधिः। यतश्च नामधेयत्वे प्रधानतः धात्वर्थेन केवलेन विधिप्रत्ययस्य संबन्धो लभ्यते। केवलस्य धात्वर्थस्य विधिर्लभ्यत इति यावत्। विशिष्टविधौ तु—श्येनविशिष्टस्य धात्वर्थस्य विधानं स्यात्। न चैतद्युक्तम्। तथाहि—श्येनविशिष्टस्य यागस्य पदद्वयसमभिव्याहारलक्षणवाक्यगम्यत्वाद्वाक्यार्थविधाने उपस्थितिगौरवम्। नामधेयत्वे तु यागस्य केवलस्य एकेनैव पदेन गम्यमानत्वादुपस्थितिलाघवम्। तथा विशिष्टविधौ विशेषणांशेऽपि विधिप्रत्ययस्य व्यापारो वाच्यः। तथा च तदंशे विधिप्रत्ययस्य विधेयस्य च समानपदवृत्तित्वलक्षणश्रुतिबाधः स्यात्। नामधेयत्वे तु धात्वर्थस्य समानपदोपात्तस्यैव विधानमिति श्रुत्यनुग्रहः। अतो विधिलाघवानुसरणादत्यन्तक्लिष्टामपि गौणीं वृत्तिं वाक्यशेषसिद्धामाश्रित्य श्येनशब्दस्य कर्मनामधेयत्वमेव युक्तमाश्रयितुम्। ननु केवलगुणविधौ तद्वयपदेशमित्यनेन सादृश्यप्रतिपादकवाक्यशेषविरोधोद्भावनमनुपपन्नम्, 'इन्दुरिन्दुरिव श्रीमान्' इत्यादिवदनन्वयालंकारोपपत्तेरिति चेन्न। अनन्वयालंकारस्य धर्मैक्ये धर्म्यैक्ये च प्रवृत्तेः। आहुश्चालंकारिकाः 'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः' इत्यादि। प्रकृते च श्येनात्पृथगेवायमिति धर्मिनिर्देशात् मत्स्याद्यादानभ्रातृव्यादानरूपधर्मभेदाच्च न तदवकाशः। एतेन 'धर्मार्थकामेषु समं प्रपेदे यथा तथैवावरजेषु वृत्तिम्' इत्यादाविव धर्मिभेदनिबन्धनोपमालंकारोऽपि प्रत्युक्तः, तस्यापि धर्मैक्यविषयत्वात्। तस्माच्छ्येनपदं नामधेयम्। एवम् 'संदंशेनाभिचरन्यजेत' 'यथा संदंशेन दुरादेयमादत्ते' इत्याद्यप्युदाहृतं भाष्यादौ। वस्तुतस्तु संदंशेनेत्यनुदाहरणम्। तथाहि—'जातिशब्दा इमे न शक्नुवन्ति यागमभिवदितुम्' इति भाष्यात् 'अत्यन्तरूढा इहोदाहरणम्' इति वार्तिकादिग्रन्थतश्च यौगिकानां क्रियानिमित्तानामिहानुदाहरणत्वमवगतम्। संदंशशब्दश्च संदश्यते पार्श्वद्वये निपीड्य दुरादेयं परिगृह्यते अनेनेति व्युत्पत्त्या तप्तायोगोलादीन्संदंशेन गृह्णातीत्यादौ दुरादेयादानसाधनविशेषे प्रसिद्धः, कर्मण्यपि दुरादेयशत्रुप्राणादानसाधने वर्तितुमर्हतीति उद्भिद्न्यायेनैव तस्य नामधेयत्वं सिद्धमिति कथमिह तदुदाहरणमित्यास्तां तावत्। इति तद्वयपदेशाधिकरणम्॥

६. वाजपेयादिशब्दानां नामधेयताधिकरणम्।

तदेवम् 'अपि वा नामधेयं स्यात्' इत्यादिभिश्चतुर्भिः सूत्रैरुद्भिदादिपदानां नामधेयत्वं व्यवस्थापितम्। एभिरेव न्यायैरन्येषामपि सर्वेषां ज्योतिर्गौरायुर्वाजपेयोऽश्वमेध इषुर्वज्र इत्यादीनां यथायोगं नामधेयत्वं सिद्धम्। तत्र 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यत्र वाजपेयपदस्य यौगिकस्योद्भिद्न्यायेन सिद्धमपि नामधेयत्वमाक्षिप्य समाधातुमिदमारभ्यते— वाजपेयपदं गुणविधिर्नामधेयं वेति

संशयः। गुणविधिरिति ब्रूमः। न चोद्विश्यायान्नामधेयत्वनिश्चयसंभवः। तत्र ह्यधिकरणे सामानाधिकरण्येनान्वये मत्वर्थलक्षणादोषः। वैयधिकरण्येनान्वये तु यागाश्रितेन गुणेन फलं कुर्यादिति फलाय गुणविधौ गुणेन यागं कुर्यादिति कर्मणि गुणविधौ च यजेरुद्देश्यविधेयसमर्पकत्वाभावात्समानपदोपात्तधात्वर्थं परित्यज्य भिन्नपदोपात्तगुणस्य विधानाच्च धातोः पारार्थ्यं विधिविधेययोर्विप्रकर्षश्च दोषः। कर्मणि गुणविधौ तु कर्मपदानन्वयश्चेति स्थितम्। तत्र कर्मणि गुणविधौ वैयधिकरण्येनैवान्वयाभ्युपगमान्नात्र मत्वर्थलक्षणा प्रसज्यते। नापि कर्मपदानन्वयः। न ह्यत्र केवलं कर्मणि गुणविधिः येन कर्मपदानन्वयः स्यात्। किंतु कर्मणोऽपि करणत्वेन फले विधानम्। न च वाक्यभेदः शङ्क्यः। वाजपेयेन यागं कुर्यात्, यागेन स्वाराज्यं कुर्यादिति विध्यावृत्तौ हि वाक्यभेदः प्रसज्यते। विध्यावृत्तिश्च यागस्य कर्मत्वेन करणत्वेन च पृथगुपस्थितौ सत्यां संभाव्यते। नात्र तथा पृथगुपस्थितिः, कर्मत्वकरणत्ववाचकशब्दाभावात्। यजेतेत्यत्र हि लिङा भावनोच्यते। यजिना यागः। तयोः संबन्धस्तु सामान्यरूपेणैव समभिव्याहाराद्गम्यते। तेन च संबन्धसामान्यरूपेण कर्मत्वकरणत्वयोः संभवति युगपदुपस्थितिः। तथा च यागं यागेन च कुर्यादिति यागस्य कर्मत्वकरणत्वाभ्यां युगपदेव भावनान्वयः। एकाप्येषा भावना विषयभेदाद्भिद्यते यागं कुर्याद्यागेन कुर्यादिति। न तु वस्तुतः। तत्र यागकर्मकांशे यजिद्वारा गुणसंबन्धं यागकरणकांशे फलसंबन्धं च युगपदेव भावना लभते वाजपेयगुणसाध्ययागेन स्वाराज्यं कुर्यादिति। अतो न विध्यावृत्तिलक्षणवाक्यभेदः। यजेरुद्देश्यविधेयसमर्पकत्वाच्च नात्यन्तपारार्थ्यम्। नापि विप्रकृष्टविधानम्, यागकरणकांशे समानपदोपात्तधात्वर्थस्यैव विधानात्। यागकर्मकांशेऽपि वाजपेयगुणस्य करणत्वेन तृतीयानिर्दिष्टस्य फलकरणे यागेऽन्वयो न संभवति, कारकाणां मिथः संबन्धाभावात्। नापि साक्षात्फलभावनायाम्, समानपदोपात्तयागरूपकरणान्तरावरुद्धत्वात्। अतो वाजपेयसाध्येन यागेन कुर्यादिति यजिद्वारा गुणस्य संबन्धो वाच्यः। ततश्च शाब्दमर्यादया वाजपेयसाध्यत्वेन रूपेण यागस्यैव फले विधानम्। कर्मणि गुणविधानं त्वार्थिकम्। तथा च समानपदोपात्तधात्वर्थस्यैव विधानान्न विप्रकृष्टविधानम्। किंच नामधेयत्वे सामानाधिकरण्यादेव करणत्वलाभात्तृतीया तदनुवादिन्यनर्थकप्राया। अतो वाजपेयशब्दो गुणविधिः। एवं च यवाग्वौषधद्रव्यकत्वात् 'वायव्यां यवागूं निर्वपेत्' इत्यादिवदैष्टिको विध्यन्तः प्रवर्तत इति पूर्वपक्षमुद्भाव्य निराकरोति—

नामधेये गुणश्रुतेः स्याद्विधानमिति चेत्तुल्यत्वात्क्रिययोर्न ॥ ६ ॥

प्राचीनैश्चतुर्भिरधिकरणैः सर्वत्र नामधेयत्वे विचारितेऽपि वाजपेयवाक्ये गुणविधिरेव स्यात्। कुतः। गुणश्रुतेः गुणात्तृतीयाश्रुतेः। गुणविधौ हि वैयधिकरण्येनान्वीयमानवाजपेयशब्दात्तृतीया वाजपेयलक्षणगुणगतं करणत्वं बोधयन्ती साफल्यमश्नुते। नामधेयत्वे तु यजिना वाजपे-

यशब्दस्य सामानाधिकरण्येनान्वयाद्यागगतं करणत्वमनुभाषमाणा भवेदनर्थकप्राया। अतस्तृतीया-श्रुत्या वैयधिकरण्येनैवान्वयलाभान्न मत्वर्थलक्षणादोषः। किंच गुणयोर्धर्मयोर्यागगतसाध्यत्वकरण-त्वरूपयोः संबन्धसामान्यरूपेण यजिलिङ्समभिव्याहारतोऽवगमादित्यर्थः। ततश्चोक्तरीत्या धातोर-त्यन्तपारार्थ्यं विप्रकृष्टविधानं कर्मपदानर्थक्यं वाक्यभेद इत्येते दोषा निरस्ताः। अतो गुणविधिः स्यात् इति चेत् तन्न। कुतः। क्रिययोस्तुल्यत्वात् गुणविधौ वाजपेयशब्दलभ्ययवाग्वादिद्रव्यकस्याङ्ग कर्मणो दर्शपूर्णमासकर्मणश्चौषधद्रव्यकत्वेन तुल्यत्वापातात्। ततश्च दार्शपूर्णमासिकविध्यन्तापत्तौ 'सप्तदशदीक्षो वाजपेयः' 'सप्तदशोपसत्को वाजपेयः' इति सोमाङ्गदीक्षोपसदनुवादेन संख्याविधानं नोपपद्येत। न च दीक्षोपसदोऽप्यपूर्वास्तत्र विधीयन्तामिति शङ्कयम्। सप्तदशत्वस्य दीक्षोपसदां च विधाने वाक्यभेदापत्तेः॥

अथ यदुक्तं साध्यत्वकरणत्वाभ्यां संबन्धसामान्यरूपेणोपस्थिताभ्यां यागस्य युगपदेक-भावनायामन्वयाद्यागकर्मकयागकरणकोभयरूपायां तस्यां गुणफले युगपदेवान्वयं लभेते। ततश्च न वाक्यभेदधातुपारार्थ्यादिदोष इति। तत्राह—

[1]ऐकशब्द्ये परार्थवत् ॥ ७ ॥

शब्दनं शब्दः। भावे घञ्। एकः शब्द उच्चारणं यस्य यजेः स एकशब्दः। तस्य भावः ऐकशब्द्यम्। परार्थवदिति स्वार्थिको वतिः 'नित्यवदाम्नानम्' इतिवत्। यजेस्तावद्यागकर-णकांशे स्वार्थमुच्चारणं स्वाभिधेययागविधानार्थत्वादित्युभयवादिसंप्रतिपन्नमेव। यागकर्मकांशे तु परार्थमपि तस्योच्चारणं स्यात्, स्वानभिधेयवाजपेयगुणविधानार्थत्वात्। स्वार्थं परार्थं च यजेरुच्चारणं स्यादिति यावत्, साध्यत्वेन करणत्वेन च यागस्य यजिनाभिधानादिति फलितम्। न चैत-दैकशब्द्ये युज्यते। सकृदुच्चारिताद्यजेः साध्यत्वकरणत्वोभयरूपेण यागस्योपस्थितिर्न संभवतीति सूत्रस्य निर्गलितोऽर्थः॥ तथाहि— संबन्धसामान्यरूपेणोपस्थितस्य यागस्य गुणफलाभ्यां न संबन्धयोग्यता। करणत्वेनोपस्थितस्यैव हि तस्य फलाकाङ्क्षा, साध्यत्वेनोपस्थितस्य च साधना-काङ्क्षा। अतः साध्यत्वेन करणत्वेन च यागस्य भावनायामन्वयो वाच्यः। स च क्रमेण युगपद्वा। नाद्यः। यदि हि साध्यत्वेन यागस्य भावनायामन्वयो यागं कुर्यादिति तदा वाजपेयेनेति गुण एवान्वीयते, न तु फलम्। यदि च करणत्वेनान्वयः तदा यागेन स्वाराज्यं कुर्यादिति फलमेव यागेनान्वीयेत, न तु गुणः। उभयथाश्रयणे तु विध्यावृत्तिलक्षणो भवेद्वाक्यभेदः। न द्वितीयः, यस्मिन्नेव क्षणे यागस्य साध्यतया बोधस्तस्मिन्नेव क्षणे करणतया बोधस्यानुभवपराहतत्वात्। किंच गुणफलाभ्यां यागस्यान्वये सति न केवलं साध्यत्वसाधनत्ववैरूप्यकृत एव वाक्यभेदः, किंतु

1. एकशब्दे।

विरुद्धत्रिकद्वयकृतोऽपि । तथाहि—यागस्य स्वाराज्यं प्रति साधनत्वे साध्यसिद्ध्यर्थत्वात्मकशेषत्वापरपर्यायं गुणत्वम्, तस्य च पारतन्त्र्यरूपत्वात्परार्थोत्पाद्यत्वलक्षणमुपादेयत्वम्, तस्य च विध्यधीनत्वाद्विधेयत्वम्, इति साधनत्वे गुणत्वोपादेयत्वविधेयत्वात्मकमेकं त्रिकम् । गुणं प्रति यागस्य साध्यत्वे च शेषित्वलक्षणं प्राधान्यम्, तस्य च कृत्युद्देश्यत्वं विनानुपपत्तेस्तदुद्देश्यत्वम्, अप्राप्तस्य चोद्देष्टुमशक्यत्वात्प्राप्तानुकीर्तनरूपमनुवाद्यत्वमित्यपरं त्रिकम् । [1]तदेवंविधत्रिकद्वयाक्रान्तो याग एकेन गुणतया प्रधानतया च उपादेयतया उद्देश्यतया च विधेयतया अनुवाद्यतया च वाक्यभेदमन्तरा कथं लभ्येत । अतो वाजपेयगुणस्य यागे यागस्य च स्वाराज्यफले विधिरित्ययुक्तम् । फलाय गुणविधौ केवलगुणविधौ च धातुपारार्थ्यादयो दोषा उक्ताः प्रसज्येरन् । विशिष्टविधौ च मत्वर्थलक्षणादोषः । तस्मात्कर्मनामधेयमेव वाजपेयशब्दः । तृतीयाविभक्तिश्च यागगतं करणत्वं बोधयति । न चार्थात्तदवगमः । ततः प्रागेवास्याः प्रवृत्तेः । अस्तु वा यागगतकरणत्वानुवादिन्येव सा, अगतेः, स्वाराज्यकरणत्वविशिष्टं केवलं च यागं प्रति केवलं च फलं प्रति वाजपेयगुणकरणत्वस्योक्तरीत्या निरस्तत्वात् । 'देवा वै यथादर्शं यज्ञानाहरन्त' इत्युपक्रम्य 'ते सहैव सर्वे वाजपेयमपश्यन्' इति प्रस्तुत्य 'स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञः तं वा एतं वाजपेय इत्याहुः' इति प्रवृत्तो वाक्यशेषोऽपि नामधेयत्व एवानुकूलः । तस्मान्नामधेयं वाजपेयशब्दः । एवमुद्भिदादिवाक्यमप्यत्रोदाहार्यम् । वाजपेयवाक्यमेव प्राचामनुरोधेनोदाहृतम् । यत्तु 'तुल्यत्वात्क्रिययोर्न' इति सोमाङ्गदीक्षोपसदादिलिङ्गोपन्यासाय तदुदाहरणमिति सोमनाथादयस्तन्न । तलवकारीयताण्डकादिब्राह्मणेषु उद्भिदादिष्वपि 'अथैष उद्भित्सम्पदशो भवति बृहत्सामा निषेधब्रह्मसामा' 'पञ्चदशो वलभिद्भवति रथन्तरसामा उत्सेधब्रह्मसामा' इत्यादिना स्तोत्रपरिमाणब्रह्मसामादिसोमाङ्गदर्शनात् । माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्राय गीयमानं साम ब्रह्मसाम । उत्सेधाख्यब्रह्मसामकः निषेधाख्यब्रह्मसामकः भवेदित्यर्थः । यदपि वदन्ति, वाजः अन्नं पेयं सुराग्रहविधिलब्धसुरारूपं यस्येति बहुव्रीह्याश्रयणेन तत्प्रख्यतया नामधेयत्वं वाजपेयस्येति तन्न । तथा सति बहुव्रीहिपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वापत्तेः, 'सप्तमीविशेषणे बहुव्रीहौ' इति पेयशब्दस्य पूर्वनिपातापत्तेश्च । जातिक्रियासमभिव्याहारे क्रियाशब्दस्य विशेषणताया एव तत्र व्यवस्थापितत्वात् । वस्तुतस्तु, पिबन्ति सोमं यस्मिन्सः पेयः । 'अचो यत्' इत्यधिकरणे यत्प्रत्ययः । 'ईद्यति' इतीत्त्वम् । ईकारस्य गुणः । वाजाय अन्नाय पेयः वाजपेय इति तादर्थ्यचतुर्थ्या 'सुप्सुपा' इति समासः, धर्माय नियमो धर्मनियम इतिवत् । कृदुत्तरपदप्रकृतिस्वरत्वेन 'यतोऽनावः' इत्याद्युदात्तत्वम् । वाजार्थं होमं हुतशेषं यत्र पिबन्ति स

1. तदेवं विरुद्धत्रिक—क, घ.

वाजपेय इति फलितम्। एवं हि तैत्तिरीयके श्रूयते— 'स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञः। तं वा एतं वाजपेय इत्याहुः। वाजाप्यो वा एषः। वाजं ह्येतेन देवा ऐप्सन्' इति, 'वाजं वा एषोऽवरुरुत्सते यो वाजपेयेन यजते' इति च। वाजः आप्यते अनेनेति वाजाप्यः। करणे कृत्यप्रत्ययः। तदाह वाजं ह्येतेनेति। ऐप्सन् प्राप्तुमैच्छन्। अवरुरुत्सते प्राप्तुमिच्छति। तथा च अन्नप्राप्तिफलको वाजपेय इति फलितम्। तदेतद्भट्टभास्करीये वेदभाष्ये स्पष्टम्। 'वाजपेयेनान्नाद्यकामो यजेत' इत्येव तलवकारीयम्। स्वाराज्यफलकत्वेऽपि कदाचिदन्नफलकत्वयोगेन प्रातर्होमादावग्निहोत्रादिशब्दवन्नामधेयत्वोपपत्तिः। यद्वा वाजाय अमृताय पेयः वाजपेयः। अन्नकाम इत्यत्रापि अन्नशब्दस्यामृतमेवार्थः। स्वाराज्यकाम इति पर्यवस्यति। परमार्थतस्तु वाजश्चासौ पेयश्चेति कर्मधारयसमासे पेयशब्दस्य पूर्वनिपातापत्तेः बहुव्रीहेश्चोक्तरीत्या निरस्तत्वेन विशिष्टविधिमाश्रित्य विशेषणे पर्यवसानस्याप्यलाभात् उक्तवाक्यशेषे प्रकारान्तरेण तन्निर्वचनेन नामधेयत्वसिद्धेः गुणविधिपूर्वपक्षस्यैवानुन्मेषादुदाहरणान्तरमेवात्रापि युक्ततरं पश्यन्तु। इति वाजपेयाधिकरणम्॥

नामधेयत्वं क्वचिदपवदितुमिदमारभ्यते। इदमामनन्ति 'आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति। अग्नीषोमीयादियागो दर्शाच्च्यवते। ऐन्द्रादिः पूर्णमासाच्च्यवते। आग्नेयस्तु नोभयस्माच्च्यवत इत्यच्युतः। तत्राग्नेयशब्दो गुणविधिः कर्मनामधेयं वेति संशयः। नामधेयत्वमेव स्यात्। आग्नेयत्वस्याष्टानां कपालानाममावास्यापौर्णमासीकालयोरिति बहूनां गुणानां विधौ वाक्यभेदापत्तेः। न च विशिष्टविधौ न वाक्यभेद इति वाच्यम्, गौरवात्, बहुष्वपि विशेषणांशेषु गुणेषु विधिपर्यवसानस्य विध्यावृत्तिं विना असंभवेन वाक्यभेदस्य तदवस्थत्वाच्च। न च 'उद्भिदा यजेत' इत्यत्र नामार्हकर्मविशेषस्य यजिनोपात्तत्वात्तन्नामधेयमुद्भित्पदमिति युक्तम्; इह तु नामार्हकर्मविशेषानुपादानात्कथमाग्नेयपदं नामधेयमिति वाच्यम्। अष्टाकपाल इत्यनेनैव तल्लाभात्। तेन ह्यष्टाकपालद्रव्यकर्किंचिद्धात्वर्थविशिष्टभावना गम्यते। धात्वर्थानुरागमन्तरेण द्रव्यस्य तस्य भावनान्वयानुपपत्तेः। स च धात्वर्थः 'शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीयः' इति वाक्यशेषे उपांशुयाजादिसमभिव्याहाराद्यागरूप उन्नीयते। न च प्रवृत्तिनिमित्तस्याग्निदेवतागुणस्यान्यतोऽप्राप्तेः कथं नामधेयत्वमिति वाच्यम्। 'अग्निर्मूर्धा भुवो यज्ञस्य' इति मन्त्रवर्णतस्तत्प्राप्तेः। अतोऽग्निहोत्रादिशब्दवत्कर्मनामधेयमाग्नेयशब्दः इति प्राप्ते, सिद्धान्तयति—

७. आग्नेयादीनामनामताधिकरणम्।

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः॥ ८॥

तुशब्दोऽवधारणे। गुणशब्दसमभिव्याहृततच्छब्दः प्रधानभूतधात्वर्थं यागं परामृशति। स च गुणाश्च तद्गुणाः यागः अग्न्यादयश्च अत्रावश्यं विधीयेरन्, न तु नामधेयमाग्नेयस्य-

ऽदः। कुतः। न चेदन्येन शिष्टाः। चेच्छब्दो ह्यर्थे 'ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः। ज्ञास्यन्ति चेत्प्रमाणं स्युस्ते यान्ति परमां गतिम्' इति यथा। यतः अन्येन प्रमाणान्तरेण न शिष्टाः। 'शासु' अनुशिष्टौ। अनुशासनं विधानम्। न विहिताः यागे अग्न्यादयश्च गुणाः। अतः अग्निदेवतागुणयोगं निमित्तीकृत्य आग्नेयशब्दस्य नामधेयत्वमाश्रयितुं न युक्तम्। न च 'अग्निर्मूर्धा' इत्यादिमन्त्रवर्णतो देवताप्राप्तिसंभवः। तथाहि—अष्टाकपालभवनाक्षिप्तभावनायामष्टाकपालद्रव्यस्य धात्वर्थानुरागमन्तरेणान्वयासंभवाद्धात्वर्थः कश्चित्कल्प्यमानः पुरोडाशस्वरूपनिर्माणरूप एव पर्यवस्यति। स च स्वानुष्ठानाय मन्त्रानपेक्षमाणोऽपि 'मखस्य शिरोऽसि' इत्यादिपुरोडाशस्वरूपनिर्माणमन्त्रैः शान्ताकाङ्क्षत्वाद्देवतोद्देश्यकद्रव्यत्यागरूपयागत्वानिश्चयाच्च देवताप्रतिपादकमन्त्रानपेक्षतया तत्र मन्त्रान्वयासंभवेन कथं मन्त्रवर्णतो देवताप्राप्तिसंभवः। न च 'शिरो वा एतद्यज्ञस्य यदाग्नेयः' इति वाक्यशेषे उपांशुयाजसाहचर्याद्यागत्वनिश्चयसंभवः। तत्र हि वाक्यशेषे आग्नेयशब्दस्य कर्मनामधेयत्वे निश्चिते सत्याग्नेयशब्दाभिधेयस्य कर्मण उपांशुयाजसाहचर्याद्यागत्वनिश्चयः। यागत्वनिश्चये च मान्त्रवर्णिकदेवताप्राप्त्या आग्नेयशब्दस्य कर्मनामधेयत्वमित्यन्योन्याश्रयः प्रसज्यते। न च प्रथमं यागत्वानिश्चयेऽप्याधारवन्मन्त्रान्वयोऽप्यस्त्विति वाच्यम्। वैषम्यात्। आधारे हि प्रथमं यागत्वानिश्चयेऽपि 'इत इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इति विनियोगवचनबलान्मन्त्रान्वयः। नात्र तथा याज्यापुरोनुवाक्यायुगलस्याष्टाकपालद्रव्यव्यापारे विनियोजकं वचनमस्ति, येन तत्र मन्त्रोऽन्वीयेत। ततश्च मन्त्रवर्णतो देवतालाभासंभवादाग्नेयशब्देन देवताविधिरेव स्वीकर्तव्यः। ननु, अष्टत्वादिगुणानां यागस्य च विधानाद्वाक्यभेदः; न च विशिष्टविधानान्न दोष इति वाच्यम्, यज्यश्रवणेन तदसंभवात् इत्यत आह—अविभागाद्विधानार्थ इति। द्रव्यदेवतादिविशिष्टविधानपरेऽस्मिन्वाक्ये प्रत्यक्षयज्यश्रवणेऽपि अष्टाकपालद्रव्यस्याग्नेय इति तद्धितेन गम्यमानादग्निदेवतासंबन्धाद्यागः कल्प्यते। कुतः। अविभागात् द्रव्यदेवतासंबन्धस्य यागेनाविनाभावात् देवतात्वस्य त्यज्यमानद्रव्योद्देश्यतारूपत्वात्। ततश्च विशिष्टविधौ नानुपपत्तिः। तत्र विशेषणानामार्थिकानेकविधिविधेयत्वेऽपि श्रूयमाणविधेरावृत्त्यभावान्न वाक्यभेददोषः। विशेषणेष्वार्थिकविधिभेदनिबन्धनं च गौरवमगत्या स्वीकार्यम्। तस्माद्गुणविधिरेवाग्नेयशब्दः, न तु नामधेयम्। प्रयोजनमाग्नेयशब्दस्य नामधेयत्वे 'तस्माद्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेत्' इत्यादिविकृतावग्न्यन्वाधानयाजमानमन्त्रे 'पौर्णमासं हविरिदमेषां मयि' इत्यत्र पौर्णमासमित्यस्य स्थाने आग्नेयमित्यूहः। गुणविधौ तु तदभावः। ऐष्टमित्येवोह्यम्। नामधेयत्वे याज्यानुवाक्यामन्त्रवर्णाद्धूयवदानमात्रस्यैवाग्निदेवतासंबन्धः, तावन्मात्रस्य याज्यान्ते क्रियमाणहोमसंबन्धात्। गुणविधौ तु कृत्स्नस्य पुरोडाशस्याग्निदेवतासंबन्धः सिध्यति। यथा चैतत्तथा निवीतपादे 'सर्वप्रदानं हविषस्तदर्थत्वात्' इत्यत्र व्यक्तं भविष्यति। इति तद्गुणाधिकरणम्॥

कर्मनामधेयप्रसङ्गाद्द्रव्यनामधेयेषु विचार्यते। 'बर्हिर्लुनाति' 'आज्यं निर्वपति' इत्यादौ बर्हिराज्यशब्दौ संस्कारनिमित्तौ जातिनिमित्तौ वेति संशयः। यूपाहवनीयादिशब्दवत्संस्कारनिमित्तौ

८. बर्हिरादिशब्दानां जातिवाचिताधिकरणम्।

स्याताम्। तथाहि— नात्र बर्हिराज्योद्देशेन लवननिर्वपणादिविधिः; किंतु 'वृक्षं छिनत्ति यूपं कर्तुम्' 'अग्निमादधात्याहवनीयं कर्तुम्' इत्यादिवत् लुनाति बर्हिः कर्तुम्, निर्वपत्याज्यं कर्तुमित्येवं संस्कारविधानम्। न च 'पालाशो यूपो भवति' 'अग्नीनादधीत' इत्यादिविधिपर्यालोचनया पलाशादिवृक्षस्याग्नेश्च कर्मतया लाभाद्वृक्षं छिनत्ति यूपीकर्तुमग्निमादधात्याहवनीयीकर्तुमिति संस्कारविधिर्युज्यते। इह तु बर्हिराज्यशब्दौ विना लवननिर्वपणकर्मसमर्पकस्य शब्दान्तरस्याभावात्कथं संस्कारविधिरिति वाच्यम्। 'दर्भैः स्तृणीत हरितैः' इति मन्त्रैर्दर्भाणाम् 'घृतं च वै मधु च प्रजापतिरासीत्' इत्यादिवाक्यशेषे घृतस्य च प्रस्तुतत्वेन कर्मत्वोपपत्तेः। अतो दर्भाल्लुनाति बर्हिः कर्तुम्, घृतं निर्वपत्याज्यं कर्तुमिति बर्हिराज्यात्मकसंस्कारविधानाद्बर्हिराज्यशब्दौ संस्कारनिमित्तौ। यद्यपि 'बर्हिरादाय गावो गताः' 'आज्यं वणिजो विक्रीणन्ति' इति लोके असंस्कृतेऽपि प्रयोगो दृश्यते, तथापि 'शास्त्रस्था वा तन्निमित्तत्वात्' इत्यनुपदमेव लोकप्रसिद्धयपेक्षया शास्त्रप्रसिद्धेर्बलवत्त्वस्य निर्णीतत्वेन याज्ञिकप्रसिद्ध्यनुसारेण संस्कारनिमित्तत्वमेवाश्रयितुं युक्तम् इति प्राप्ते, सिद्धान्तयति—

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः[1] ॥ ९ ॥

संस्काराभावेऽपि बर्हिराज्यशब्दयोरस्ति वृत्तिः। कुतः। शब्दलाभात् असंस्कृतेऽपि 'बर्हिरादाय गावो गताः' 'आज्यं वणिजो विक्रीणन्ति' इति लोके बर्हिराज्यशब्दप्रयोगदर्शनात्। तस्मात् बर्हिःशब्दः आज्यशब्दश्च अतच्छब्दः संस्कारवाचको न भवति। न च शास्त्रप्रसिद्धेर्बलवत्त्वाल्लोकप्रसिद्धिबाधः शङ्क्यः। आश्ववालादिशब्दस्य हि काशादावश्वपुच्छादौ च याज्ञिकलौकिकप्रसिद्धयोर्विरोधाद्याज्ञिकप्रसिद्धेर्लौकिकप्रसिद्धिबाधनं युक्तम्। नेह तथा, याज्ञिकानामपि जातिविशेषं विना क्वापि प्रयोगाभावात्। न च जात्यवच्छिन्ने सर्वत्र याज्ञिकानां प्रयोगाभावादस्त्येव विरोध इति वाच्यम्। न हि यो यत्र शक्तः स तत्र सर्वैः प्रयोक्तव्य इति नियमोऽस्ति, आलस्यादिना प्रयोगाभावस्य सर्वत्र संभवेन क्वापि शब्दे तथा नियमासंभवात्। तस्माज्जातिनिमित्तावेव बर्हिराज्यशब्दौ। अत्र पुरोडाशामिक्षाधानादिशब्दा अप्युदाहार्याः, 'पुरोडाशेन मे माता प्रहेलकं ददाति' 'आमिक्षया बालकाः क्रीडन्ति' 'मासं गुडधानाः खादन्ति' इत्यादिप्रयोगदर्शनात्। प्रयोजनं संस्कारनिमित्तत्वे 'बर्हिषा यूपावटं स्तृणाति' 'आज्येन यूपमनक्ति' 'एककपालेन

1. शब्दः स्यात्।"

'पुरोडाशेन प्रातरनुवाकमुपाकरोति' 'आमिक्षा वैश्यस्य व्रतं भवति' 'धानाभिर्हरियोजनं श्रीणाति' इत्यादौ संस्काराणां प्रवृत्तिः। जातिनिमित्तत्वे तु तदप्रवृत्तिः। इति बर्हिराज्याधिकरणम् ॥

'प्रोक्षणीरासादय' इत्यत्र 'प्रोक्षणीरुत्पुनाति' इत्याद्युत्पवनादिसंस्कारनिमित्तः प्रोक्षणीशब्दः, उत अम्वजातिनिमित्तः, किं वा यौगिकः क्रियानिमित्तः इति संशये 'प्रोक्षणीभिरुद्वेजिताः स्मः' इति संस्कारविहीनास्वप्यप्सु प्रोक्षणीशब्दस्य प्रयोगदर्शनाद्बर्हिराज्यादिशब्दवत्पूर्वाधिकरणन्यायेन जातिनिमित्तत्वं प्राप्तम्। न च प्रपूर्वात् 'उक्ष' सेचने इति धातोः करणे ल्युटि व्युत्पन्नस्यास्य प्रकृष्टसेचनसाधनतावाच्यकत्वस्य योगेनैव संभवाद्यौगिकत्वमेव न्याय्यमिति वाच्यम्। योगापेक्षया रूढेर्बलवत्त्वात् तत्तत्पदार्थशक्तपदसमूहरूपाद्वाक्याद्धि पदार्थसंसर्गरूपवाक्यार्थप्रतीतिस्तत्तत्पदशक्त्युपस्थापितमुख्यार्थरूपपदार्थनिबन्धनत्वाल्लाक्षणिकी। तथा अवयवद्वारेण पदार्थप्रतीतिरपि वाक्यार्थतुल्ययोगक्षेमत्वाल्लाक्षणिकी। समुदायप्रसिद्धिरूपया रूढ्या त्वर्थप्रतीतिः पदश्रवणमात्रनिबन्धनत्वाच्छ्रौती। तस्मात्प्रोक्षणीशब्देनापि रूढ्या अम्वजात्यभिधानमिति प्राप्ते, सिद्धान्तयति—

९. प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम्।

प्रोक्षणीष्वर्थसंयोगात् ॥ १० ॥

स्त्रीलिङ्गबहुवचनान्तप्रोक्षणीशब्दे अवयवार्थसंयोगाद्योग एवाश्रयणीयः, न तु रूढिः। न च रथकारशब्दवद्रूढिरिति युज्यते, वैषम्यात्। कल्पितैव रूढिर्योगं बाधते। रथकारशब्दस्य च त्रैवर्णिकबहिर्भूतऋभुसौधन्वनसात्त्वतादिनामधेये जातिविशेषे 'ऋभूणां त्वा देवानां व्रतपते' इत्याधानमन्त्रवर्णात् 'सौधन्वना ऋभवः' इति मन्त्रे सामानाधिकरण्यनिर्देशाच्च रूढिः कल्पिता योगं बाधत इति कृत्वा 'व्रात्यात्तु जायते वैश्यात्सुधन्वाचार्य एव च। कारूषश्च विजन्मा च मैत्रः सात्त्वत एव च' इति स्मृतिसिद्धजातिविशेषवाचित्वं युज्यते। अश्वकर्णादिशब्देषु त्ववयवार्थासंभवादेव रूढिराश्रीयते। न हि प्रोक्षणीशब्दे अप्त्वजातिरूढिसाधकं वचनमवयवार्थासंभवो वास्ति, येन रूढिर्योगं बाधेत। न च 'प्रोक्षणीभिरुद्वेजिताः स्मः' इति प्रयोगबलादेवाप्त्वजातौ रूढिः कल्पिता स्यादिति वाच्यम्। अवयवार्थयोगेनैव प्रयोगस्योपपन्नत्वेन तस्य रूढिकल्पकत्वानुपपत्तेः। न च योगाश्रयणे अर्थप्रतीतिर्लाक्षणिकी स्यादिति वाच्यम्। दृष्टमुख्यार्थसंबन्धरूपलक्षणाश्रयणापेक्षया अदृष्टसमुदायशक्तिकल्पनाया एव गरीयस्त्वात्। न च योगार्थसंभवेऽपि पङ्कजादिवद्योगरूढत्वमस्त्विति वाच्यम्, वैषम्यात्। पङ्कजनिकर्तृत्वरूपयोगार्थसंभवेऽपि पद्मत्वजातिं विहाय कुमुदादौ पङ्कजशब्दप्रयोगाभावेन तत्र योगरूढिराश्रीयते। प्रकृते तु 'आज्यं प्रोक्षणम्' इत्यम्वजात्यभावेऽपि प्रयोगदर्शनेन योगरूढ्यसंभवः। तथा च यत्र रूढिसाधकं प्रमाणमस्ति रथकारादिशब्दे, यत्र वा अव-

यवार्थो न संभाव्यते अश्वकर्णादिशब्दे तत्र केवला रूढिः। यत्र अवयवार्थे संभवत्यपि क्वचिदेव प्रयुज्यते न सर्वत्र यथा पङ्कजादिशब्दे तत्र योगरूढिरिति निष्कर्षः। प्रकृते चात्वजातौ प्रोक्षणीशब्दस्य न रूढिबोधकं शास्त्रमस्ति अवयवार्थश्च संभवति। अतो न केवलरूढिः। आज्येऽपि प्रयोगदर्शनान्न योगरूढिः। अतः केवलयौगिक एवायं प्रोक्षणीशब्दः क्रियानिमित्तः। न च घृतक्षीरादेरपि 'प्रोक्षणीरासादय' इत्यत्र प्रतीतिः शङ्क्या। स्त्रीलिङ्गबहुवचनाभ्याम् 'आपो वै रक्षोघ्नीः' इति वाक्यशेषोपात्तानामपामेव विशेष्यत्वेनोपस्थितेः। तदेतत्सूत्रे स्त्रीलिङ्गबहुवचनान्तप्रोक्षणीशब्दोपादानेन सूचितम्। प्रयोजनं संस्कारनिमित्तत्वे स्त्रीलिङ्गबहुवचनान्तस्यैव संस्कारवाचित्वात्सोमारौद्रचरौ 'आज्यं प्रोक्षणम्' इति विहिते आज्येऽपि प्रोक्षणीरित्यविकृत एव प्रयोज्यः। जातिनिमित्तत्वे आज्यत्वजातिप्रकाशनाय 'आज्यमासादय' इति प्रयोज्यम्। यौगिकत्वे तु 'प्रोक्षणमासादय' इति लिङ्गवचनोहेन प्रयोगः इति। यत्त्वत्र सोमनाथदीक्षिताः 'रथकारस्तु माहिष्यां करण्यां यस्य संभवः' इति स्मृत्या रथकारशब्दस्य रूढिमाचख्युस्तद्रथकाराधिकरणे 'सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्' इति सूत्रभाष्यवार्तिकतन्त्ररत्नादिग्रन्थविस्मरणविजृम्भितमेवेत्यास्तां तावत्। इति प्रोक्षण्यधिकरणम्॥

'निर्मन्थ्येनेष्टकाः पचन्ति' इत्यत्र किम् 'गायत्रं छन्दोऽनुप्रजायस्वेति त्रिः प्रदक्षिणमग्निं मन्थति' इत्यादिसंस्कारनिमित्तो निर्मन्थ्यशब्दः, उत अग्नित्वजातिनिमित्तः, किं वा योगनिमित्त इति

१०. निर्मन्थ्यशब्दस्य यौगिकताधिकरणम्।

संशये 'निर्मन्थ्यमानय ओदनं पक्ष्यामहे' इत्यसंस्कारेऽपि प्रयोगदर्शनाद्बर्हिराज्यादिशब्दवत्संस्कारनिमित्तत्वनिरासेन जातिनिमित्तत्वमेवावतिष्ठामहे। न च निष्पूर्वान्मन्थतेः 'ऋहलोर्ण्यत्' इति कर्मणि ण्यति निष्पन्नस्य निर्मन्थ्यशब्दस्यावयवार्थयोगेन मन्थनकर्मतावाचित्वसंभवात्प्रोक्षणीशब्दवद्यौगिकत्वमेव स्यादिति वाच्यम्, वैषम्यात्। प्रोक्षणीशब्दस्य ह्यप्सु सेचनसाधनत्वस्य सर्वदा सत्त्वाद्यौगिकत्वं युज्यते। [1]अरण्यस्थदण्डादिसाधारण्याय अनन्यथासिद्धनियतपूर्ववृत्तिजातीयत्वस्यैव कारणतात्वस्वीकारात्। प्रकृते तु मन्थनकर्मत्वं मन्थनजन्यनिष्पत्त्यवस्थालक्षणफलशालित्वम्। तच्च निष्पन्नावस्थायां न संभाव्यते। निष्पन्ने चाग्नौ निर्मन्थ्यशब्दं प्रयुञ्जते लोके। न च भूतपूर्वगत्या प्रयोगस्योपपत्तिसंभवः। व्यक्त्यैक्ये हि भूतपूर्वगतिः। अग्निस्तु प्रतिक्षणमधिकतुषकाष्ठादिव्यापनप्रयुक्तपरिमाणभेदाद्भिद्यते। ततश्च यस्यां व्यक्तौ निर्मन्थ्यशब्दः प्रयुज्यते न तस्यां भूतपूर्वगत्या मन्थनकर्मत्वमस्ति, निष्पत्त्यवस्थापन्नव्यक्तेर्निष्पन्नव्यक्तेश्च भिन्नत्वात्। अतो योगार्थाभावेऽपि प्रयोगदर्शनादश्वकर्णादिशब्दवद्बर्हिराज्यादिशब्दवच्च केवलाग्नित्वजातिनिमित्त एव निर्मन्थ्यशब्द इति प्राप्ते, सिद्धान्तयति—

1. वनस्थ—ख.

तथा निर्मन्थ्ये ॥ ११ ॥

यथा प्रोक्षणीशब्दोऽवयवार्थसंभवाद्यौगिकः तथा निर्मन्थ्यशब्दोऽपि [1]स्यात्। प्रतिक्षणं व्यक्तिभेदेऽपि मन्थनकर्माग्निसंतानस्यैकत्वेन व्यक्तीनामप्येकत्वमापाद्य भूतपूर्वगत्या निष्पन्नावस्थाया-मप्यवयवार्थयोगसत्त्वेन यौगिकत्वे बाधकाभावात्। न च विनिगमनाविरहः। यथाकथंचिदवयव-योगेनैवोपपत्तावत्यन्तादृष्टरूढिशक्तिकल्पनाया अयुक्तत्वात्। एतेन प्रोक्षण्यधिकरणेन गतार्थता नि-रस्ता, उक्तरीत्या अधिकशङ्कानिराकरणार्थत्वात्। प्रयोजनं संस्कारनिमित्तत्वे संस्काराणां प्राप्तिः, जातिनिमित्तत्वे अग्निमात्रस्य प्राप्तिः, यौगिकत्वे अचिरमन्थनजन्यस्यैवाग्नेः प्राप्तिः इति भाष्यकृतः। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इति न्यायेन निरित्युपसर्गवशादचिरत्वलाभः। किंच 'इष्टकाः पचन्ति' इति पाकादेवाग्निविशेषे प्राप्ते लोहितोष्णीषादिवद्विशेषणपरो निर्मन्थ्यशब्दो मन्थनक्रियामेवाङ्गतया विदधदङ्गानां प्रधानदेशकालकर्तृकत्वनियमादचिरतां मन्थनस्य गमयति। तस्मादचिरमन्थनक्रियानिमित्तो निर्मन्थ्यशब्द इत्यास्तां तावत्। इति निर्मन्थ्याधिकरणम्॥

११. वैश्वदेवादिशब्दानां नामधेयताधिकरणम्।

सन्ति चातुर्मास्यानि 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति। तत्र सन्त्यष्टौ यागाः 'आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, पौष्णं चरुम्, मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षाम्, द्यावापृथिव्यमेककपालम्' इति। तत्संनिधाविदमाम्नायते 'वैश्वदेवेन यजेत' इति। तत्र वैश्वदेवशब्दो गुणविधिः कर्मनामधेयं वेति संशयः। तत्र देवतातद्धितस्य 'सूक्तहविषोरेवेष्यते' इति वार्तिककृता कात्यायनेन नियमितत्वेन वैश्वदेवशब्दस्य यागनामत्वासंभवात्प्रकृताष्टाकपालादिद्रव्याण्येव वैश्वदेवशब्देनाभिधीयन्ते। तत्र द्रव्याणामाग्नेयादि-वाक्यैरेव प्राप्तत्वान्निर्मन्थ्यशब्दे मन्थनवदुपसर्जनीभूतापि विश्वे देवा देवता विधीयते। न चाग्न्यादिदेवतावरुद्धेषु तेषु यागेषु देवतान्तरविधानं विरुद्धमिति वाच्यम्। अत एव विरोधाद्वि-कल्पोपपत्तेः। अतो वैश्वदेवशब्दो गुणविधिरिति पूर्वपक्षमुद्भाव्य निराकरोति—

वैश्वदेवे विकल्प इति चेन्न[2] प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य ॥ १२ ॥

वैश्वदेवशब्दे विश्वदेवलक्षणदेवतागुणो विधीयते। ततश्चाग्न्यादिभिस्तस्य गुणस्य विकल्पः स्यादिति चेत्, तन्न। कुतः। प्रकरणात् प्रत्यक्षविधानाच्च। वैश्वदेववाक्ये हि यजिना यागसामान्यं

1. निर्मन्थ्ये स्यात्—ख, ग. 2. न वा प्रकरणात्.

शब्दशक्त्या गम्यते । आग्नेयादिवाक्योत्पन्नप्रकृतयागीयद्रव्यपरत्वं तु तस्य प्रकरणाल्लभ्यमिति विश्वदेवलक्षणगुणः प्रकरणगम्यः । अग्न्यादयस्तु प्रकरणनिरपेक्षतया प्रत्यक्षशिष्टाः । चशब्दोऽनुक्तसमुच्चये । विश्वदेवगुणस्तावद्यागाननूद्य विधानादुत्पन्नशिष्टः । अग्न्यादयस्तूत्पत्तिशिष्टाः । अतो न विकल्पो युज्यते । कुतः । हि यस्मात्कारणात् प्रकरणम् उत्पन्नशिष्टप्रकरणानुगृहीतविश्वदेवगुणः द्रव्यस्य अष्टाकपालादिद्रव्यसंयोगेन उत्पत्तिवाक्येषु श्रुतस्य अग्न्यादिदेवतागुणस्य न पक्षे बाधकं भवितुमर्हति । उत्पत्त्युत्पन्नशिष्टयोर्गुणाधिकरणे श्रुतिप्रकरणयोश्च श्रुतिलिङ्गादिसूत्रे प्राबल्यदौर्बल्ये व्यवस्थापयिष्येते ।

गुणविधौ दोषान्तरमाह—

मिथश्चानर्थसंबन्धः ॥ १३ ॥

अयुक्तोऽर्थसंबन्धः अनर्थसंबन्धः । गुणविधावामिक्षायां विश्वदेवदेवताकत्वस्य 'वैश्वदेवीमामिक्षाम्' इत्युत्पत्तिवाक्यत एव प्राप्तत्वात्तद्व्यतिरिक्तेषु सप्तस्वेव हविःषु विश्वे देवा विधीयन्त इति वक्तव्यम् । तथा च एकस्यैव वैश्वदेवशब्दस्य विधित्वानुवादत्वयोरर्थयोः मिथः परस्परं संबन्धः स्यात् । न चैतद्युज्यते ॥

इतोऽपि गुणविधौ दोषान्तरमाह—

परार्थत्वाद्गुणानाम् ॥ १४ ॥

एकैवाहुतिः स्यादिति शेषः । 'याज्याया अधि वषट्करोति' 'वषट्कृते जुहोति' इति यागानुष्ठानं विहितम्, प्रक्षेपशिरस्कदेवतोद्देश्यकद्रव्यत्यागस्यैवाहुतिशब्दार्थत्वात् । तथा च सूत्रम् 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' इति । तच्च यागानुष्ठानं द्रव्यभेदेऽपि न भिद्यते, बहूनामपि द्रव्याणां युगपदेव त्यागे विरोधाभावात् । न च विरोधाभावेऽपि द्रव्यभेदादेव यागानुष्ठानभेदः शक्यते वक्तुम् । पुरोडाशादिद्रव्याणां यागं प्रति परार्थत्वेन गुणभूतानां स्वरूपेण प्रधानभूतयागानुष्ठानभेदप्रयोजकत्वानुपपत्तेः गुणावृत्त्या प्रधानावृत्तेरयुक्तत्वात् । देवताभेदस्तु परं तत्प्रयोजकः, देवताप्रकाशकयाज्यादीनां युगपत्प्रयोगासंभवात् । तथा च गुणविधिपक्षे अष्टानामपि यागानां विश्वदेवदेवताकत्वे सति संप्रतिपन्नदेवताकतया वाजपेयिकप्राजापत्यवपादिवत्पुरोडाशचर्वादीनामनुष्ठानामपि हविषामेकैवाहुतिः स्यात् । तथा सति 'नव प्रयाजा इज्यन्ते, नवानूयाजाः, अष्टौ हवींषि, द्वावाधारौ, द्वावाज्यभागौ, त्रिंशदाहुतयः संपद्यन्ते' इत्याहुतीनां त्रिंशत्त्वसंपत्तेर्नित्यवदनुवादो विरुध्येत । यद्यपि तैत्तिरीयशाखायां वाक्यशेषे 'त्रिंशत्संपद्यन्ते' इत्येव दृश्यते नाहुतय

इति, तथापि भाष्यादिबलात्तथाविधवाक्यशेषः शाखान्तरे उन्नेयः। न च सूक्तहविषोरेव देवतातद्धितस्य कात्यायनेन वार्तिककृता नियमितत्वाद्वैश्वदेवशब्दस्य कथं यागनामत्वमिति वाच्यम्, तथाविधवार्तिकस्य पातञ्जलभाष्यादावदृष्टत्वेनोपेक्ष्यत्वात्। ननु नामत्वे वैश्वदेवशब्दस्य विधेयधात्वर्थपरिच्छेदकत्वेन विध्युपयोगो वक्तव्यः। वैश्वदेववाक्ये च धात्वर्थो न विधेयः। तथा सति तस्य प्रकृतयागेभ्यः कर्मान्तरत्वापत्तावष्टौ हवींषीति विरुध्येत, तद्धविषा सहाग्नेयादीनां नवत्वापातात्। यदि त्विह प्रकृता एव यागा यजिनानूद्यन्ते तर्हि विधेयपरिच्छेदकस्य नाम्न आनर्थक्यम्, विधेयस्य परिच्छेद्यस्यालाभात्। ततश्चागत्या विषमशिष्टविकल्पमङ्गीकृत्य प्रकृतकर्मगुणविधायकत्वमेव वैश्वदेववाक्यस्याभ्युपेयम्, 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायादिति चेत्, मैवम्। वैश्वदेववाक्ये हि सकृदुच्चारितेन यजिना तन्त्राभिधानशक्तिमहिम्ना आग्नेयादियागाः समुदिताः केवलमनूद्यन्ते वैश्वदेवसंज्ञां बोधयितुम्। तथा च वैश्वदेवसंज्ञक आग्नेयादियागसमुदाय इत्यर्थः पर्यवस्यति। तथा च 'वसन्ते वैश्वदेवेन यजेत' 'पशुकामो वैश्वदेवेन यजेत' इत्यादौ समुदायस्यैव ग्रहणम्। अन्यथा उत्पत्तिवाक्यसिद्धवैश्वदेवत्वप्रत्यभिज्ञानादाभिक्षायागस्यैव तत्र ग्रहणं स्यात्। न चाग्नेयादियागसमुदायस्य कथं वैश्वदेवशब्दो नामधेयं स्यात्, आभिक्षायागमात्रस्य विश्वदेवदेवत्यत्वादिति वाच्यम्। छत्रिन्यायेन वैश्वदेवावैश्वदेवेषु लक्षणया तदुपपत्तेः। नन्वेवं लक्षणाश्रयणमेव दोष इति चेत्तर्हि वैश्वदेवशब्दोऽयं न देवतातद्धितान्तः येन लक्षणा शङ्क्येत, 'यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम' इति वाक्यशेषोपदर्शितया विश्वदेवकर्तृकत्वरूपसंबन्धविशेषे 'तस्येदम्' इत्याणि व्युत्पत्त्या योगवशेन श्रुत्यैव यागसमुदायनामत्वाभ्युपगमात्। न च वाक्यशेषदर्शितयोगेनैव नामत्वसिद्धेर्वैश्वदेववाक्यानर्थक्यं शङ्क्यम्। वाक्यशेषतो हि संज्ञामात्रमवगम्यते, न तु संज्ञिस्वरूपम्। तत्र प्रकरणादिना आग्नेयादीनामुपस्थितौ प्रत्येकमेव तेषां संज्ञा स्यात्, न तु समुदायस्य। सति त्वस्मिन्वैश्वदेववाक्ये यजिना सकृदुच्चारितेन तन्त्राभिधानशक्त्या आग्नेयादियागसमुदायस्यैवोपस्थितिमुखेन भवति वैश्वदेवपदं समुदायनामधेयम्। एतेन 'गुणश्चापूर्वसंयोगः' इति सूत्रेण श्रुतिलिङ्गादिसूत्रेण च गतार्थता निरस्ता, उक्तानर्थक्यशङ्कापरिहारार्थत्वादित्यास्तां तावत्। इति वैश्वदेवाधिकरणम्॥

१२. वैश्वानरेऽष्टत्वार्थवादताधिकरणम्।

इदमाम्नायते 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते, यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति, यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति' इति। तत्र संशयः किमष्टाकपालादिशब्दाः

प्रकृतस्य वैश्वानरयागस्य नामधेयानि, उत गुणविधयः, अथवा फलेषु गुणविधयः, आहोस्विदर्थवादाः इति। तत्राग्निहोत्रवैश्वदेवादिशब्दवत्तत्प्रख्यन्यायेन द्वादशत्वान्तर्भूताष्टत्वाद्याश्रित्य नामधेयत्वमाशङ्क्य निराकुर्वन्गुणविधिपक्षमुत्थापयति—

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १५ ॥

अग्न्यादिगुणास्तावत् पूर्ववन्तः प्रापकशास्त्रवन्तः। मन्त्रवर्णादिभिः प्राप्ता इति यावत्। अतस्तेषाम् अविधानार्थाः अग्निहोत्रादिशब्दाः, किंतु तत्प्रख्यन्यायेन नामधेयानीति युक्तम्। इह तु समाम्नाये अष्टाकपालादिशब्दसमूहे तत्सामर्थ्यं गुणविधानसामर्थ्यं स्यात् न तु नामधेयत्वम्, अष्टाकपालादिशब्दानां यजिसामानाधिकरण्याभावात्तत्प्रख्याभावाच्च ॥ तथाहि— द्वादशसु कपालेषु संस्कृतः पुरोडाशो द्वादशकपालः। 'संस्कृतं भक्षाः' इत्यण्प्रत्ययस्तद्धितः। तस्य 'द्विगोर्लुगनपत्ये' इति लुक्। स च समर्थपरिभाषया सामर्थ्ये सत्येव भवति। असापेक्षत्वलक्षणमेकार्थीभावलक्षणं च सामर्थ्यम्। ततश्च योऽयं द्वादशकपालेषु संस्कृतः पुरोडाशो नासावष्टाकपालशब्देन व्यपदेशमर्हति, तस्याष्टसु चतुर्षु च कपालेषु संस्कृतत्वेन तत्राष्टानां चतुःसापेक्षत्वेनासामर्थ्यात्तद्धितानुत्पत्तेः। किंच न्यूनाधिकसंख्याव्यवच्छेदकत्वं संख्याशब्दस्य स्वभावसिद्धमेव[1]। ततश्च 'द्वादशकपालं निर्वपेत्' इत्यत्र द्वादशत्वसंख्या न्यूनाधिकसंख्याव्यवच्छेदकत्वेन विधेया। तथा च कथमष्टत्वादीनां प्राप्तिः। अप्राप्तत्वाच्च तत्प्रख्याभावात्कथमष्टाकपालादिशब्दानां नामधेयत्वम्। तस्माद्गुणविधय एते विरोधाद्विकल्प्यन्ते। न च द्वादशत्वस्योत्पत्तिशिष्टत्वादष्टत्वादीनां चोत्पन्नशिष्टत्वाद्विषमशिष्टविकल्पापत्तिरिति वाच्यम्। सर्वेषामुत्पत्तिशिष्टत्वात्। अष्टाकपालादिशब्दा हि द्वितीयान्ततया विपरिणम्यन्ते। 'वैश्वानरं निर्वपेत्' इति तेषु संबध्यते 'वैश्वानरमष्टाकपालं नवकपालं दशकपालमेकादशकपालं द्वादशकपालं निर्वपेत्' इति। 'गायत्र्यैवैनम्' इत्यादिः सर्वोऽप्यर्थवादः। ततश्च 'वैश्वानरं निर्वपेत्' इत्यादि 'पशुमान्भवति' इत्यन्तमेकं वाक्यं संपद्यते। ततश्च सर्वेषामुत्पत्तिशिष्टत्वान्न विषमशिष्टविकल्पदोषः। अथवा सर्वेऽप्युत्पन्नशिष्टाः। 'वैश्वानरं निर्वपेत्' इति प्रथमं देवतामात्रविशिष्टयागविधानम्। उत्पन्ने च तस्मिन्यागे एकदेवताकत्वेनाग्नेयविध्यन्तप्राहिणि चोदकप्राप्तकपालानुवादेनाष्टत्वादिविधयः। एवं च द्वितीयान्ततया विपरिणामो नाश्रयणीयः। भवतीत्यस्याप्यन्वयः सूपपादः। न चैवं सति 'वैश्वानरं द्वादशकपालम्' इति वाक्ये द्वादशकपालस्यापि श्रूयमाणत्वात्कथं देवताविशिष्टयागमात्रविधानमिति वाच्यम्। तत्र द्वादशकपालशब्दस्याष्टाकपालाद्युपलक्षणार्थत्वेनाविवक्षितार्थत्वात्। अतः सर्वेषामुत्पन्नशिष्टत्वान्न विषमशिष्टविकल्पो दोषः। तस्मात्कर्मणि गुणविधय एवैते।

1. स्वाभाविकमेव—क.

तमिमं कर्मणि गुणविधिपक्षं दूषयन्नर्थवादत्वसिद्धान्तमवलम्बते—

गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्तास्ति ॥ १६ ॥

तुशब्दः [1]पूर्वपक्षव्यावृत्तौ। प्रयुज्यत इति प्रयोगः। कर्मणि घञ्। प्रयोगे अष्टाकपालादिसमाम्नाये अष्टत्वादिगुणस्य विधानार्थे सति, तद्गुणाः तस्मिन्नुत्पन्नवैश्वानरयागे चोदकप्राप्तकपालद्वारका गुणा अष्टत्वादयः अनर्थकाः निष्प्रयोजनकाः स्युः। कुतः। हि यस्मात्कारणात् तम् उत्पत्तिशिष्टद्वादशत्वगुणावरुद्धं यागं प्रति एषाम् अर्थवत्ता प्रयोजनवत्ता नास्ति, विषमशिष्टविकल्पासंभवात्। न ह्येते सर्वेऽप्युत्पत्तिशिष्टा इति शक्यते वक्तुम्, प्रथमान्तानां द्वितीयान्ततया विपरिणामापातात् भवतीत्यस्यानन्वयापाताच्च। नाप्युत्पन्नशिष्टाः, तथा सत्युत्पत्तिवाक्ये द्वादशकपालमित्यस्याविवक्षितार्थत्वापत्तेः। न चाष्टाकपालादिवाक्यान्यथानुपपत्त्या तस्याविवक्षितार्थत्वं कल्पयितुं युक्तम्, अष्टाकपालादिवाक्यानां विहितद्वादशकपालयागस्तुतिपरत्वेनाप्युपपत्तेः इति भावः॥

नन्वष्टत्वादीनामविहितत्वात्कथं तत्स्तुतिरित्याशङ्क्य निराकरोति-

[2]तच्छेषो नोपपद्यत इति चेदविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् ॥ १७ ॥

तेषामष्टत्वादीनामविहितानां स्तावको वाक्यशेषः न उपपद्यते विहितस्तुतिपरत्वादर्थवादानाम् इति चेत् मैवम्, यतः विधानार्थे। कर्मणि ल्युट्। विधिविषयीभूते द्वादशकपाले यागे विषये स्तुत्या प्रयोजनेन अष्टाकपालादिवादा उपपद्येरन्। कुतः। अविभागात्। द्वादशसु ह्यष्टत्वादयः सन्त्यविभक्ताः। अतस्तत्स्तुत्या द्वादशकपालः स्तुतो भवति 'ईदृशोऽयं महाभागो द्वादशकपालः पुरोडाशः, यस्मिन्क्रियमाणे ब्रह्मवर्चसहेतुकपूतत्वादिफलसाधनभूता अष्टाकपालादयोऽपि भवन्ति; अतः प्रशस्तोऽयम्' इति। दृश्यते ह्यवयवस्तुत्या अवयविस्तुतिः 'सुन्दरं वदनम्' इत्यादौ। तस्मादर्थवादा एते।

ननु तथापि 'गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति' इत्याद्यर्थवादादौदुम्बराधिकरणन्यायेनाष्टाकपालादिवाक्यानां विधित्वकल्पने उक्तरीत्या कर्मणि गुणविध्यसंभवेऽपि 'पूत एव तेजस्व्य-

1. पक्षव्यावृत्तौ—ख, ग, घ. 2. तच्छेषो नोपपद्यते—अविभागादित्यादि च सूत्रद्वयमन्यत्र.

न्नाद इन्द्रियावी पशुमान्भवति' इत्युपसंहारे संहत्य कीर्त्यमानानां 'गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति' 'विराजैवास्मिन्नन्नाद्यं दधाति' इत्यादिभिर्मध्येऽपि प्रत्येकमुपात्तानां कामपदाभावेऽपि रात्रिसत्रन्यायेन क्रमेणाष्टाकपालादिफलत्वकल्पनया फलेभ्यो गुणविधयोऽमी स्युरित्याशङ्क्य निराकरोति—

[1]कारणं स्यादिति चेदानर्थक्यादकारणं कर्तुर्हि
कारणानि गुणार्थो हि विधीयते ॥ १८ ॥

उत्पत्तिवाक्योत्पन्नवैश्वानरयागप्रयोगे कपालान्याश्रित्य अष्टत्वाद्यनुष्ठाने पूतत्वादिरूपं कारणं फलं स्यात्। पूतत्वादिफलेभ्योऽष्टत्वादिगुणा विधीयन्तामिति यावत्। एवं च गोदोहनेन चमसस्येव काम्यैरष्टत्वादिभिरुत्पत्तिसिद्धस्यापि द्वादशत्वस्य बाधो युज्यत इति चेत्, पूतत्वादिकमष्टत्वादीनां अकारणं अनिमित्तं फलं न भवति। फलाय गुणविधानं न संभवतीति यावत्। कुतः। आनर्थक्यात् एकार्थकत्वाभावप्रसङ्गात्। उपक्रमोपसंहारमध्यपरामर्शैः 'वैश्वानरं द्वादशकपालं निर्वपेत्' इत्यारभ्य "पशुमान्भवति' इत्यन्तमेकं वाक्यमवगतम्। 'पुत्रे जाते' इत्युपक्रान्ता हीष्टिः 'यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति' इत्युपसंहियते। तान्येव पूतत्वादीनि फलानि 'ब्रह्मवर्चसेन पुनाति, त्रिवृतैवास्मिन्तेजो दधाति, विराजैवास्मिन्नन्नाद्यं दधाति, त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, जगत्यैवास्मिन्पशून्दधाति' इति ब्रह्मवर्चसादिहेतूपपादनाय मध्येऽपि परामृश्यन्ते। ततश्चेष्टिकर्तुरेव कारणानि पुत्रगतपूतत्वादिफलानि उपक्रमोपसंहारमध्यपरामर्शैरवगतानीति भवति सर्वमेकं वाक्यम्। तत्र पूतत्वादिफलेभ्यः अष्टत्वादिगुणेषु विधीयमानेषु बहुधा वाक्यभेदप्रसङ्गादेकवाक्यत्वं भज्येत। तस्मान्न फलेषु गुणविधिः। एतेन इष्टिफलत्वेन श्रुतेषु पूतत्वादिषु इष्टयङ्गकपालाश्रिताष्टत्वादिविधिरत्यन्तानुपपन्न इत्यपि सूचितम्। उक्तमर्थमुपसंहरति—गुणार्थो हीति। हि यस्मात् अष्टाकपालादिशब्दा न नामधेयानि, नापि कर्मणि गुणविधयः, नापि फलेषु गुणविधयः, अतः गुणार्थः गुणेन स्तुत्या अर्थः प्रयोजनं यस्य सः वैश्वानर एव यागः 'यदष्टाकपालो भवति' इत्याद्यर्थवादप्ररोचितो विधीयत इति यावत्॥ इति वैश्वानराधिकरणम्॥

तदेवमष्टाकपालादिशब्दानां गुणविधित्वनिराकरणेनार्थवादत्वमवयवस्तुत्या व्यवस्थापितम्। इदानीमवयवस्तुत्यभावेऽपि प्रकारान्तरेण क्वचित्तद्व्यवस्थापनाय सूत्रमिदं प्रवृत्तम्—

[2]तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवाया
इति गुणाश्रयाः ॥ १९ ॥

---

1. अन्यत्रेदं सूत्रं द्विधा विभज्य पठ्यते—गुणार्थे विधीयन्ते इति च पाठान्तरम्. 2. अन्यत्रेदं विभज्य पठ्यते.

तत्र गुणाश्रयशब्दस्य तत्सिद्ध्यादिशब्देषु प्रत्येकं संबन्धे सति षड्वाक्यानि संपन्नानि क्रमेण व्याख्यास्यामः— 'यजमानः प्रस्तरः' इत्यत्र गुणविधिरर्थवादो वेति संशयः । नामधेय-

१३. यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थत्वाधिकरणम् ।

त्वकोटिस्तु नामधेयपादसंगत्यर्थं वार्तिककारैरुत्प्रेक्षितापि भिन्नार्थत्वेन प्रसिद्धतया असंभवदुन्मेषत्वादुपेक्षिता । नामधेयपादसंगतिस्तु नामधेयत्वप्रतिपक्षतया प्रसक्तगुणविध्यर्थवादविचाररूपतया कथंचिद्वोध्या । तत्राष्टाकपालादिशब्दैरवयवद्वारा द्वादशकपालस्तुतिर्युज्यते । न च प्रस्तरावयववचनो यजमानशब्दः, प्रस्तरशब्दो वा यजमानावयववचनः । तथा च यजमानशब्दस्य प्रथमश्रुतस्यासंजातविरोधित्वेन लक्षणासहिष्णुत्वाभावेन जघन्यश्रुतस्यैव प्रस्तरशब्दस्य तत्कार्यकारित्वे लक्षणां स्वीकृत्य 'प्रस्तरे स्रुच आसादयति' इत्यादिप्रस्तरकार्यं स्रुग्धारणादिकं यजमानः कुर्यादिति गुणविधानमभ्युपेयम् । एवं संभवति गुणविधौ निरर्थकप्रायमर्थवादत्वं नाभ्युपगन्तुं युक्तमिति प्राप्ते, सिद्धान्तयति— **तत्सिद्धिर्गुणाश्रयः** । यजमानस्यैव प्रस्तरकार्यकारित्वे प्रस्तरविधेरानर्थक्यम । किंच, 'प्रस्तरमाहवनीये प्रहरति' इत्याहवनीये प्रस्तरप्रहरणमाम्नातम् । एवं च कर्माङ्गभूताहवनीयादिनिर्वर्तिकासु पवमानेष्टिष्वेव यजमानस्याहवनीये प्रहरणे सति तदुत्तरभाविसर्वकर्मविलोपः स्यात् । अतोऽगत्या यजमानशब्दस्य प्रस्तरस्तावकतया अर्थवादत्वमाश्रयितुं युक्तम । ननु यजमानशब्दस्य यागकर्तृवाचकस्य कथं प्रस्तरे वृत्तिरित्यत आह—गुणाश्रय इति । गुणः आश्रयः निमित्तं कार्यकारित्वगुणयोगेन यजमानशब्दस्य प्रस्तरे प्रवृत्तिरिति यावत् । साङ्गप्रधानस्य यजमानकार्यत्वेन प्रस्तरकार्यस्यापि यजमानकार्यतया प्रस्तरे यजमानकार्यकारित्वस्य सत्त्वात् । तथा च 'सिंहो माणवकः' इत्यत्र सिंहशब्दस्येव माणवके यजमानशब्दस्य गौण्या प्रस्तरे वृत्तिरिति फलितम् । ननु तथापि मुख्यार्थयजमानसंबन्धिकार्यकारित्वगुणसंबन्धेन लक्षितलक्षणयैव प्रस्तरस्योपस्थितिरुपपद्यते । अतो गौण्यात्मकं वृत्त्यन्तरं किमित्यङ्गीकर्तव्यमिति चेत्सत्यम । 'यजमानः प्रस्तरः' इति सामानाधिकरण्यनिर्वाहाय यजमानशब्दस्य प्रस्तरे वृत्तिरवश्यं वक्तव्या । सामानाधिकरण्यं हि एकविशेष्यकबोधजनकत्वम् । न चैतत्प्रस्तरेऽपि यजमानशब्दस्य व्यापाराभावे घटते । सा च वृत्तिर्न लक्षितलक्षणा । लक्षणायां हि मुख्यार्थसंबन्धित्वरूपेण लक्ष्यार्थस्य प्रतीतिः । इह तु मुख्यार्थयजमानगतकार्यकरत्वगुणयोगित्वमात्रेण प्रस्तरस्य प्रतीतिः । एवं च मुख्यार्थेन परंपरासंबन्धे विद्यमानेऽपि तद्रूपानादरेण गुणयोगित्वमात्रेण प्रतीतिसिद्ध्यर्थं गौणी वृत्तिरभ्युपगन्तव्या । तथा च यजमानवत्कर्तृकार्यनिर्वर्तकत्वात्प्रशस्तः प्रस्तर इति स्तुतिरुन्मीलनीया । एतेन गुणमुख्याधिकरणेन गतार्थत्वं निरस्तम् , गौणवृत्तिसंभवमात्रस्य तत्र प्रतिपादितत्वेऽपि उक्तरीत्या लक्षणाव्यावृत्तगौणवृत्तिस्वरूपव्युत्पादनार्थत्वात् । अर्थवादाधिकरणे 'गुणवादस्तु' 'रूपात्प्रायात्' इत्यादिगुणसूत्रेषु एतदधिकरणसिद्धामेव गौणीं वृत्तिमाश्रित्य 'आपो वै शान्ताः' 'स्तेनं मनः' इत्यादीनां स्तावकत्वं प्रतिपादितमिति

न पौनरुक्त्यम्। अत्राभिधेयसदृशे वृत्तिर्गौणत्वमध्यारोपितार्थत्वं वेति विचारस्तु टुप्टीकावार्तिकादावनुसंधेयः। इति तत्सिद्ध्यधिकरणम्॥

१४. आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम्।

'अग्निर्वै ब्राह्मणः' इत्यत्रापि पूर्ववदेव ब्राह्मणकार्ये अग्निर्विधीयत इति पूर्वः पक्षः। तथा सति 'ब्राह्मणानृत्विजो वृणीते' इति ऋत्विग्वरणादिविधिवैयर्थ्यान्मन्त्रोच्चारणानुपपत्तेश्चाग्निवद्ब्रोमादिनिर्वर्तकत्वगुणयोगादग्निशब्देन ब्राह्मणः स्तूयते इति पूर्ववदेव सिद्धान्तः। तत्राग्निशब्दस्य ब्राह्मणे वृत्तौ गुणान्तरमपि निमित्तमाह— **जातिर्गुणाश्रयः**। जातिर्जननम्। 'प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवतान्वसृज्यत, गायत्री च्छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनाम्' इति वाक्यशेषावगतमुखजातत्वं गुणस्य गौण्या वृत्त्या आश्रयः निमित्तमित्यर्थः। इति जात्यधिकरणम्॥

१५. यूपादिशब्दानां यजमानस्तुत्यर्थताधिकरणम्।

'यजमानो यूपः' इत्यत्रापि यूपकार्ये पशुनियोजनादौ यजमानस्य विधिरिति तथैव पूर्वः पक्षः। तथा सति यूपविधिवैयर्थ्याद्यजमानवत्क्रतुनिर्वर्तकत्वगुणयोगाद्यजमानशब्देन यूपः स्तूयत इति तथैव सिद्धान्तः। तत्र यजमानशब्दस्य यूपे वृत्तौ गुणान्तरमपि निमित्तमाह— **सारूप्यं गुणाश्रयः**। समानं रूपं सरूपम्। तदेव सारूप्यम्। चतुर्वर्णादित्वात्स्वार्थे ष्यञ्प्रत्ययः। साधारणधर्मः। ऊर्ध्वत्वं यजमानशब्दस्य यूपे गौण्या वृत्त्या निमित्तमित्यर्थः। यद्यपि तत्सिद्ध्युदाहरणे सर्वत्र 'यजमानः प्रस्तरः' इत्यादौ साधारणधर्म एव प्रवृत्तिनिमित्तं तथापि तत्र सारूप्यमचाक्षुषम, इह तु चाक्षुषमूर्ध्वत्वमिति पृथगुक्तिः। इति सारूप्याधिकरणम्॥

१६. अपश्वादिशब्दानां गवादिप्रशंसार्थत्वाधिकरणम्।

'पशुशीर्षाण्युपदधाति' इत्युपक्रम्य 'पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चात्प्रतीचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवः' इति श्रूयते। तत्रापि गवाश्वव्यतिरिक्ता अजादयः पशवः अपशवः पशुकार्यकरा न भवन्तीति पशुकार्ये अजादिप्रतिषेधः क्रियत इति प्राप्ते, तथा सति लौकिके दोहनादौ प्रतिषेधस्य कर्तुमशक्यत्वाद्वैदिकालम्भनादिकार्ये विहितत्वादेव प्रतिषेधानुपपत्तेर्गौण्या वृत्त्या अपशव इत्यजादिपशुपरतया अर्थवादत्वमिति सिद्धान्तः। तत्र गुणयोगं दर्शयति—**प्रशंसा गुणाश्रयः**। प्राशस्त्यं गौण्या वृत्त्या निमित्तमित्यर्थः। तथाहि—अजादिपशुषु अपशुशब्दस्य घटादिवचनस्यानुपपत्तेः पशुशब्दस्य प्राशस्त्ये लक्षणा। तच्च प्राशस्त्यमर्थाद्गवाश्वगतमेव गम्यते। तच्च नञा पर्युदस्यते। अप्राशस्त्यं च मुख्यस्य अपशुशब्दार्थस्य घटादेरजादिपशूनां च साधारणमिति तद्योगादप-

शुशब्दोऽजादिपशुषु वर्तते। तत्राजादिषु प्राशस्त्याभावकथनेन गवाश्वे प्रशंसातिशयो गम्यते उदितहोमनिन्दया अनुदितहोमप्रशंसावत्। तस्मादजादयः पशवोऽप्रशस्ताः, गवाश्वं तु प्रशस्तमिति तच्छीर्षोपधानं स्तूयते। न च प्राशस्त्याभावस्यैवात्र प्रवृत्तिनिमित्तत्वे प्रशंसा गुणाश्रयः इति सूत्रविरोधः इति वाच्यम्। प्रशंसाभावस्य निमित्तत्वे प्रतियोगिभूतप्रशंसाया अपि निमित्तत्वेन तदविरोधात्। तस्मादपशव इत्यर्थवादः। इति प्रशंसाधिकरणम्॥

'सृष्टीरुपदधाति' इत्यत्र गुणविधिरर्थवादो वेति संशयः। तत्र सृष्टिप्रतिपादकः सृजिधातुः सृष्टिशब्देन विवक्षितः। स येषु विद्यते ते सृष्टिमन्तो मन्त्राः। ते यासामुपधानार्थास्ता

१७. भूमाधिकरणे बाहुल्येन सृष्टिव्यपदेशाधिकरणम्।

इष्टकाः सृष्टयः। 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः' इति सृष्टिमच्छब्दाद्यत्प्रत्यये मतुपो लुक्। यत्प्रत्ययस्य च्छान्दसो लोपः। सृजिमन्मन्त्रोपधेयेष्टका इत्यर्थः। तत्रेष्टकानां तदुपधानस्य चान्यतः प्राप्तेर्न विधिः। 'अग्निं चिन्वीत' इति हि चयनविधिः। चयनं संघातीकरणम्। तेन अग्न्याख्यं स्थण्डिलविशेषमुत्पादयेदित्यर्थः। 'इष्टकाभिरग्निं चिनुते' इति चयने इष्टकानां करणत्वेन विधिः। तत्र स्वरूपसतीनामिष्टकानां व्यापारविशेषं द्वारं विना करणत्वासंभवादुपधानमर्थादाक्षिप्यते। 'यदेता इष्टका उपदधाति' इत्यादौ द्वितीया तु 'अग्निहोत्रं जुहोति' इत्यादिवत् 'नासाधितं करणम्' इति न्यायेनार्थाक्षिप्तसाध्यत्वाभिप्राया। इष्टकाभिरुपधानद्वारा चयनं निष्पादयेदित्यर्थः। तथा च सृजिमन्तो मन्त्राः 'एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्' इत्यादयः सप्तदश मन्त्रा एव विशेषणीभूता अपि लोहितोष्णीषादिवद्विधीयन्त इति पूर्वः पक्षः। सिद्धान्तस्तु, मन्त्रा अपि नात्र विधेयाः। तथाहि— चयनप्रकरणाधीतानाम् 'एकयास्तुवत' इत्यादिमन्त्राणां सामान्यतश्चयनार्थत्वेऽवगतेऽपि पाकदेशतःसमानयनोपधातृसमीपस्थापनादि कार्यं व्यवहितचयनसाधनत्वादुपेक्ष्य संनिहितसाधनमुपधानमेव प्रकाश्यत्वेन परिगृहीतवताम् 'सर्वास्विष्टकासु तया देवतमन्ततो दधाति' इति विधिना 'तया देवतयाङ्गिरस्व ध्रुवासीद' इत्यनेन एकवाक्यभावमुपगमितानामुपधानप्रकाशनसामर्थ्यमश्नुवतां सर्वोपधानार्थत्वस्य सृष्टिवाक्येन पुनर्विधाने परिसंख्यापत्त्या तदितरेषाम् 'व्युष्टीरुपदधाति' इत्यादिवाचनिकविनियोगरहितानां [1]प्रकरणाम्नातानाम् 'पृथिव्युदपुरमन्नेन विष्टा' इत्यादीनामानर्थक्यं स्यात्। इष्टकानां तदुपधानस्य च विधानं तु प्रागेव निराकृतम्। अतः 'सृष्टीरुपदधाति' इति कृत्स्नं वाक्यमनुवादः। स च 'यथासृष्टमेवावरुन्धे' इत्यर्थवादावलम्बनार्थत्वादर्थवादः। तत्र हि यतः सृष्टिमन्त्रैरुपदधाति अतः 'एकयास्तुवत' इत्यनुवाके येन क्रमेण ब्रह्मक्षत्रादिसृष्टिरनुक्रान्ता तेनैव क्रमेण तानि

1. प्रकरणाधीतानाम्—क, घ.

सर्वाणि यजमानः प्राप्नोतीति स्तुतिरुन्मीलति । तत्र 'एकयास्तुवत' इति सप्तदश मन्त्राः । तेषु प्रथमचतुर्दशषोडशान्तिमेषु 'एकयास्तुवत' 'सप्तविंशत्यास्तुवत' 'एकत्रिंशतास्तुवत' 'त्रयस्त्रिंशतास्तुवत' इति मन्त्रेषु सृजिशब्दाभावात्तेषु सृष्टिशब्दो गौणः । तत्र प्रवृत्तिनिमित्तमाह— **भूमा गुणाश्रयः** । भूमा बहुत्वम् । 'बहोर्लोपो भू च बहोः' इति इमनिच इकारलोपो बहुशब्दस्य भूभावश्च । बाहुल्यं गौण्या वृत्त्या निमित्तमित्यर्थः । तत्र त्रयोदशसु सृष्टिशब्दवाच्यास्विष्टकासु बाहुल्यमस्ति । तच्च सृष्टिबाहुल्यं सृष्टिरूपावयवद्वारा सृष्ट्यसृष्टिसमुदायेऽस्ति । समुदायद्वारा चासृष्टिष्वपीत्यसृष्ट्योऽपि सृष्टिशब्देनोच्यन्ते । इयांस्तु विशेषः । यजमानशब्दो गौण्या वृत्त्या प्रस्तरपर एव, न तु यजमानपरोऽपि । सृष्टिशब्दस्तु भूमगुणयोगात्सृष्ट्यसृष्टिपर इति । न च सृष्टिमात्रपरत्वमेवास्त्विति वाच्यम् । 'यत्सप्तदशोपदधाति' इति वाक्यशेषबलेन सृष्ट्यसृष्टिपरतावगमात् । तादृशवाक्यशेषस्तु क्वचिच्छाखान्तर उन्नेयः । तस्मात् 'सृष्टीरुपदधाति' इति कृत्स्नं वाक्यमर्थवाद इति भाष्यानुयायी पन्थाः । केचित्तु, सृष्टीरुद्दिश्य उपधानं चयनविधितोऽर्थसिद्धमपि संस्कारतया विधीयते; तथा च प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात्पृथगुपधानमिष्टकानां सिध्यति, अन्यथा समुदितरूपेणापि तासामुपधानं स्यादिति वदन्ति । तन्न, एकैकविधाभ्यासेन एकशतविधप्रभेदभिन्ने अग्नौ किंचिदधिकषडङ्गुलोत्सेधानामतिविस्तृतायतानामनेकपुरुषोद्धार्याणामेकेन कर्त्रा युगपदुपधानस्य कर्तुमशक्यतया पृथगुपधानस्यैवार्थसिद्धेः । एतेन सहायान्तरव्युदासार्थमिहोपधानविधिरिति निरस्तम्, असहायेन पृथगप्युपधानस्य कर्तुमशक्यत्वात् । यच्च आध्वर्यवकाण्डे विधानमन्तरेणाध्वर्युकर्तृकत्वसिद्ध्यनुपपत्तेरर्थप्राप्तस्याप्युपधानस्य पुनर्विधिरिति, तदपि न । 'इष्टका उपधास्यञ्श्वेतमश्वमभिमृशेत्' इत्याध्वर्यवकाण्डविहिताश्वाभिमर्शनसमानकर्तृकत्वावगमादेव तत्सिद्धेः । 'तावाल-भ्येष्टका उपदध्यात्' इत्युपधानविधिः । न चाश्वालम्भनोपधानयोः पौर्वापर्यमेवात्र विधीयत इति वाच्यम् । 'इष्टका उपधास्यञ्श्वेतमश्वमभिमृशेत्पुरीषमुपधास्यन्कृष्णम्' इत्येव तत्सिद्धेः । तथा चात्र पुनर्विधानं व्यर्थमेव । यदपि च कृत्स्नवाक्यस्यार्थवादत्वे संनिहितविध्यन्तराभावेन अर्थवादत्वमेव न निर्वहतीति, तदप्यापाततः । 'अर्थवादो वा' इति मन्त्राधिकरणगुणसूत्ररीत्या 'उरु प्रथस्वेति पुरोडाशं प्रथयति यज्ञपतिमेव तत्प्रथयति' इति प्रकरणपरिकल्पितविधिविहितभिन्नदेशमन्त्रस्तुतिवत्प्राकरणिकविधिविहितसृष्टिमन्त्राणामपि भिन्नदेशकानामेव कृत्स्नवाक्यस्य स्तावकत्वोपपत्तेः । अन्यथा 'न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन् ता उपादधत ततो वा इदं व्यौच्छद्यस्यैता उपधीयन्ते व्ये वास्मा उच्छत्यथो तम एवापहते' इत्युत्तरवाक्ये व्युष्टिविधिरहिते केवलार्थवादे का गतिरित्यास्तां तावत् । इति भूमाधिकरणम् ॥

'प्राणभृत उपदधाति' इत्यत्र मन्त्रेषु प्राणभृच्छब्दाभावेन 'तद्वानासामुपधानः—' इति व्युत्पत्त्यभावेऽपि प्राणशब्दं मन्त्रद्वारा बिभ्रतीति व्युत्पत्त्या प्राणशब्दकमन्त्रोपधेयेष्टका उपदधाती-

१८. लिङ्गसमवायन्यायेप्राणभृदादिशब्दानांस्तुत्यर्थत्वाधिकरणम्।

त्यर्थः। तत्रेष्टकानां तदुपधानस्य चान्यतः प्राप्तत्वात् 'अयं पुरोभुवः' इत्यादयः प्राणभृतः पञ्चाशन्मन्त्रा विधीयन्त इति पूर्ववदेव पूर्वः पक्षः। लिङ्गप्रकरणाभ्यामेव प्राप्तत्वान्मन्त्रा अपि न विधेयाः। अतः प्राणवन्मन्त्रेष्टकोपधानेन 'रेतस्येव प्राणान्दधाति' इत्यर्थवादावलम्बनार्थः 'प्राणभृत उपदधाति' इत्यनुवादोऽर्थवाद एवेति पूर्ववदेव सिद्धान्तः। तत्र 'तस्य प्राणो भौवायनः' 'वसन्तः प्राणायनः' 'प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः' इति द्वितीयतृतीयदशममन्त्रेषु प्राणशब्दोऽस्तीति तदुपधेयास्तिस्र इष्टकाः प्राणभृतः, इतराः सप्तचत्वारिंशदिष्टका अप्राणभृतः। तत्र प्राणशब्दवतां मन्त्राणामल्पत्वान्न भूम्ना प्राणभृच्छब्दस्य प्राणभृदप्राणभृत्सु गौणी वृत्तिर्युज्यत इत्यतो निमित्तान्तरमाह—**लिङ्गसमवायो गुणाश्रयः**। लिङ्गं प्राणप्रतिपादनसामर्थ्यम्। तस्य समवायः संबन्धमात्रं गौण्या वृत्त्या निमित्तमित्यर्थः। तत्र प्राणभृन्मन्त्रसमुदाये प्राणप्रतिपादनसामर्थ्यं लिङ्गमस्ति। प्राणभृदप्राणभृत्समुदायेऽपि चैकदेशे पुष्पिते 'वनं पुष्पितम्' इतिवत्तदस्ति। तादृशसमुदायद्वारा प्राणभृत्स्वप्राणभृत्सु च मन्त्रेषु तद्द्वारा तदुपधेयेष्टकासु च तत्संबन्ध इति लिङ्गसमवायमात्रेण सर्वत्र प्राणभृच्छब्दप्रवृत्तिः। इति लिङ्गसमवायाधिकरणम्॥

तदेवम् 'तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः' इति सूत्रं व्याख्यातम्। इतिशब्दस्तु प्रकारवचनः। तेन 'रूपात्प्रायान्' इत्यर्थवादगुणसूत्रनिर्दिष्टम् 'स्तेनं मनः' इत्यादौ प्रच्छन्नरूपादिकमपि संगृहीतं भवति॥ इति तत्सिद्धिपेटिका॥

अर्थवादानां स्तावकत्वेन प्रामाण्यमुक्तम्। इदानीं कचित्प्रकारान्तरेण तत्प्रामाण्यं प्रतिपादयितुं नामधेयापवादत्वेन प्रसक्तार्थवादप्रसङ्गादिदमारभ्यते। 'अक्ताः शर्करा उपदधाति, तेजो वै घृतम्' इत्यत्र किं घृततैलवसादीनामन्यतमेनाञ्जनं घृतेनैव वेति संशयः।

१९. वाक्यशेषेण संदिग्धार्थनिरूपणाधिकरणम्।

तत्र विधिः प्रधानम्, प्रेरणात्मकशब्दभावनारूपत्वात्। अर्थवादस्त्वितिकर्तव्यतारूपस्तुतिसमर्पकत्वात्तदङ्गमित्यर्थवादाधिकरणे स्थितम्। न चाङ्गेन प्रधानस्य बाधः संभवति। अतः कथमर्थवादगतघृतशब्देन विध्यवगताञ्जनसामान्यस्य विशेषसंकोचरूपो बाधः। न च उपक्रमाधिकरणेऽर्थवादानुरोधेन ऋगादिशब्दस्य वेदपरत्वं वक्ष्यते तृतीयस्य तृतीये; तथेहापि किं न स्यादिति वाच्यम्। तत्र विधेरुपसंहारगतस्यान्यथानयनेऽप्यत्रोपक्रमस्थस्यासंजातविरोधित्वेन स्वतःप्रबलस्य विधेरन्यथानयनस्यायुक्तत्वात्। न चैवमपि 'अधिकश्च गुणः साधारणे विरोधात्कांस्यभोजिवदमुख्येऽपि' इति द्वादशिकाधिकरणे गुणानुरोधेन प्रधाननयनस्य कचिद्व्यवस्थापयिष्यमाणतया प्रधानस्यापि विधेरङ्गभूतस्तुत्यनुरोधित्वमिति वाच्यम्, वैषम्यात्। यत्र हि गुणानुरोधित्वेऽपि प्रधानस्य न बाधः तत्रैव कांस्यभोजिन्यायः। इह तु गुणानुरोधित्वे

तैलादिविषये बाधः स्यादिति कथमत्र तत्र्यायः । न च, विधावञ्जनसाधनद्रव्यसामान्यमाक्षेपाद्गम्यत इति वक्तव्यम् ; तच्च न संभवति, विधेः प्ररोचनार्थमर्थवादैकवाक्यत्वावश्यंभावेन प्ररोचनार्थमपेक्षितार्थवादादेवाञ्जनद्रव्यविशेषलाभे तदाक्षेपायोगादिति वाच्यम् । 'विधेरेव द्वे शक्ती कल्पयिष्यामः' इति न्यायेन विधित एव प्ररोचनासंभवेन विधेरवश्यमर्थवादानपेक्षत्वेन विधितः सामान्याक्षेपोपपत्तेः । यद्यङ्गं प्रधानेनावश्यं नापेक्ष्यते तादृशाङ्गानुसारेण प्रधानस्य न संकोचः । अत एव 'तास्वध्वर्यो इन्द्राय सोमं सोत' इत्यादिमन्त्रवर्णबलादैन्द्रप्रदानमात्रविषयतया सोमस्य न संकोचः । किंत्वैन्द्रानैन्द्रप्रदानसाधारण्यमेव । अनैन्द्रप्रदानेषु मन्त्रं विनाप्युपायान्तरतोऽनुष्ठेयस्मृतिसंभवेन मन्त्रस्यानैन्द्रप्रदानैर्नियमेनानपेक्षितत्वात् । अन्यथा तत्राप्यैन्द्रप्रदानविषयतया संकोचः स्यात् । न चैवमपि 'उपदधाति' इति वर्तमानापदेशतया स्फुटविध्यभावे औदुम्बराधिकरणन्यायेनार्थवादत एव विधिः कल्पनीय इति विधित्वसिद्ध्यर्थमर्थवादापेक्षेति वाच्यम् । 'वसन्ताय कपिञ्जलानालभते' 'ब्रह्मणे ब्राह्मणमालभते' इत्यादिनिरर्थवादवाक्येष्विवाप्राप्तार्थत्वादेव विधिकल्पनोपपत्तेः, शाखान्तरे 'शर्करा अक्ता उपदध्यात् तेजो घृतम्' इति प्रत्यक्षविधिश्रवणाच्च । तस्माद्घृततैलाद्यन्यतमेनाञ्जनम् । अर्थवादगतघृतशब्दस्तु विध्यनुसारेण च्छत्रिन्यायेन घृताघृतलक्षकः । इति प्राप्ते, सिद्धान्तयति—

संदिग्धे तु वाक्यशेषात् ॥ २० ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । अनिर्धारितार्थके विधौ वाक्यशेषान्निर्णय इत्यर्थः । तथाहि —यदि घृततैलादिसर्वविशेषाः प्रातिस्विकरूपेण विधिना बोधिताः स्युस्तदा एकविशेषघृतविषयेणार्थवादेन विधेः संकोचरूपो बाधः स्यात् । यदि च सामान्यं व्यासज्यवृत्ति सत्प्रत्येकपर्यवसन्न भवेत्तदापि तैलादिसामान्यविधेर्विशेषघृतविषयार्थवादेन बाधः स्यात् । नैतदुभयमप्यस्ति, विधेः सामान्यरूपेणाञ्जनयोग्यतैलादिद्रवद्रव्योपस्थापकत्वात्सामान्यस्य प्रत्येकं पर्यवसितत्वाच्च बाधाभावात् । न चैवमपि सामान्यरूपेण तैलादिविषयस्यापि विधेर्घृतमात्रे संकोचादवर्जनीयो बाध इति वाच्यम् । व्यवहाराय विध्यनुमतत्वेन तादृशसंकोचस्यादोषत्वात् । अवश्यं हि सामान्येनोपस्थितावपि यः कश्चिद्विशेष आदर्तव्यः, निर्विशेषसामान्येन व्यवहाराभावात् । न च घृतशब्दस्यापि नवपुराणगव्यमाहिषादिविशेषमनपेक्ष्य व्यवहारोपयोगित्ववत्सामान्यविधेरपि विशेषमनपेक्ष्य व्यवहारोपयोगित्वं किं न स्यादिति वाच्यम्, वैषम्यात् । घृतशब्दस्य हि नवपुराणादिविशेषनिर्धारकप्रमाणाभावाद्यं कंचिद्विशेषमाश्रित्य घृतत्वेन रूपेण व्यवहारोपयोगित्वं युज्यते । अञ्जनविधेस्तु विद्यते विशेषनिर्धारकं प्रमाणं घृतार्थवादः । तत्र घृतस्य स्तुतिबलादञ्जनसाधनत्वेनावश्यंभावे तत एव सामान्यविधेः पर्यवसानसंभवेन विधेरेव स्तुतिशक्तिं कल्पयित्वा

विधानकल्पनं गौरवपरास्तम् । एवं च प्रत्यक्षस्तुतिसद्भावे विधेः स्तुतिकल्पनानुपपत्तेः 'अक्ताः—' इत्यत्र स्तुत्यर्थमवश्यापेक्षितार्थवादत एवाञ्जनक्रियापेक्षितसाधनलाभे क्रियया अञ्जनद्रव्यसामान्याक्षेपस्यैवात्राप्रतीतेर्विरोधशङ्काया एवानवकाशः । तस्मादर्थवादगतघृतशब्दानुसारेण सामान्यविधेर्धृतमात्रविषयत्वम् । 'संदिग्धेषु' इति केचित्पठन्ति । 'अक्ताः शर्करा उपदधाति, तेजो वै घृतम्' 'वाससा दीक्षयति, सौम्यं वै क्षौमं देवतया' 'ओषधीर्वपति' सप्त ग्राम्या ओषधयः सप्तारण्याः' इत्यादिविधिष्वर्थवादनिर्धारितविशेषार्थकेष्वित्यर्थः । इत्यक्ताधिकरणम् ॥

तदेवं विध्यर्थवादमन्त्रनामधेयात्मके वेदे अर्थवादावयवस्य क्वचित्स्तावकत्वादन्येनापि प्रकारेण सामान्यविधिनिर्धारकत्वेन प्रामाण्ये प्रतिपादिते विधिरूपावयवस्यापि क्वचिद्विधायकत्वाद-

२०. सामर्थ्येनाव्यवस्थितानां व्यवस्थाधिकरणम् ।

न्येनापि प्रकारेण प्रामाण्यं प्रतिपादयितुमिदमारभ्यते । इदमामनन्ति 'स्रुवेणावद्यति' 'हस्तेनावद्यति' 'स्वधितिनावद्यति' इति । तत्र संशयः—किं द्रवद्रव्याणि दधिपयआदीनि कठिनद्रव्याणि पुरोडाशादीनि मांसादीनि च स्रुवाद्यन्यतमेनाव्यवस्थयावदातव्यानि, उत स्रुवेण द्रवद्रव्याणि हस्तेन पुरोडाशादीनि स्वधितिना मांसादीनीत्यर्थतो व्यवस्थेति । तत्र 'अक्ताः शर्कराः—' इत्यत्रेवात्र व्यवस्थापकवाक्यशेषप्रमाणाभावादव्यवस्था । न चाशक्यार्थस्य विधानासंभवात्सामर्थ्यानुसारेण व्यवस्था सिध्यतीति वाच्यम् । लिङ्गाच्छ्रुतेर्बलीयस्त्वस्य तृतीये वक्ष्यमाणतया सामर्थ्यरूपलिङ्गानुसारेणावद्यतिश्रुतिसंकोचस्यायुक्तत्वात् । न चाशक्यार्थविधानानुपपत्तेः सामर्थ्यानुसरणसंभवः । मुख्यसामर्थ्याभावेऽपि सामान्यविषयश्रुत्यनुसारादैवेन्द्रीन्यायेन [1]गौणीं वृत्तिमाश्रित्य शक्यार्थविधानस्य कथंचिदुपपाद्यत्वात् । अस्ति हि हस्तादेर्मांसाद्यवदानेऽप्यायसादिसहायेन गौणं सामर्थ्यम् । तस्मात्स्रुवादीनामव्यवस्था ।

इति प्राप्ते, सिद्धान्तयति—

अर्थाद्वा कल्पनैकदेशत्वात् ॥ २१ ॥

वाशब्दोऽप्यर्थे । अवदाने स्रुवादिविधिषु पूर्ववद्वाक्यशेषाभावेऽपि अर्थात् सामर्थ्यादपि व्यवस्थाकल्पना भवति । कुतः । एकदेशत्वात् शक्तेर्विधिसहकारित्वेन तदेकदेशत्वादित्यर्थः । न च शक्त्या लिङ्गेन अवद्यतिश्रुतिसंकोचो न युज्यत इति वाच्यम् । अशक्यार्थे विधेरसंभवेन शक्त्या लिङ्गेनाप्यवद्यतिश्रुतेः संकोचस्यावश्यानुसरणीयत्वात् । न चावद्यतिश्रुतिबाधापत्त्या आयसादिसहायेन गौणसामर्थ्याश्रयणं युज्यते । एवं सति निरपेक्षसाधनत्वबोधकतृतीयाश्रुतिबाधापत्तेः । 'समर्थः पदविधिः' इति परिभाषया 'कर्तृकरणयोस्तृतीया' इति तृतीयाविधेर्नैरपेक्ष्यविषयत्वा-

1. गौणसामर्थ्यम्—क, ग, घ.

वगमात्पदत्वापादकविधिविधेयो निरपेक्षत्वरूपसामर्थ्यप्रतिपादक इति हि तदर्थः। तत्र स्रुवादि-विधेः शक्त्यनुसरणे अवद्यतिश्रुतेः संकोचमात्रम्। अवद्यतिश्रुत्यनुसारेण गौणसामर्थ्याश्रयणे तु नैरपेक्ष्यप्रतिपादकतृतीयाश्रुतेरत्यन्तबाधः स्यात्। तस्मात्सामर्थ्यानुसारेण स्रुवादीनां व्यवस्था। वैयाकरणास्तु "समर्थसूत्रे एकार्थीभावलक्षणमेव सामर्थ्यं विवक्षितम्। लब्धपदसंज्ञकस्य कार्यं पदविधिरित्यनेन विवक्षितम्। विभक्तिविधौ तु न समर्थपरिभाषा प्रवर्तते। 'व्रीहिभिः' इत्यत्र हि व्रीहिरूपं करणमवगतम्। तत्र 'सर्वं विशेषणं सावधारणम्' इति न्यायेन विशेषणस्यान्ययोगव्यवच्छेदार्थकतया व्रीहिरूपविशेषणेन तदितरव्यावृत्त्या इतरनिरपेक्षत्वमार्थिकम्। औचित्याच्च सजातीयेतरनिवृत्तिः फलति। 'घृतेन भुङ्क्ते' इत्यादौ हि सजातीयतैलादेरेव व्यावृत्तिः प्रतीयते, न शाकादेरपि" इत्याहुः। सर्वथापि प्रकृते तृतीयया निरपेक्षसाधनं गम्यत इति निर्विवादम्। ननु वाजसनेयके 'वसोर्धारां जुहोत्याज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा सा यदेवैषा धाराग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्यते षष्टिश्च वै त्रीणि च शतानि एषा वसोर्धारा षडथ पञ्चत्रिंशत्' इत्यादिना औदुम्बर्या स्रुचि स्रुवेण पञ्चकृत्वोगृहीताज्यधारया एकाधिकचतुःशताहुतयः समाम्नाताः। तत्राङ्गुष्ठपर्ववृत्तबिलस्रुवतः पञ्चगृहीताज्यस्य एकाधिकचतुःशतहोमनिर्वर्तकत्वान्यथानुपपत्त्या स्रुवपरिमाणमधिकं कल्प्यते। तद्वदिहापि स्वधितेर्द्रव्यावदानसामर्थ्यसिद्ध्यर्थं बिलवत्त्वं स्रुवस्य बिलतो मांसावदानसामर्थ्यसिद्धयर्थं तीक्ष्णाग्रत्वं च कल्प्यतामिति चेन्न। अङ्गुष्ठपर्वबिलस्रुवेण पञ्चगृहीताज्यधारया वसोर्धाराहोमस्य श्रुतस्य निर्वाहाभावेन तत्र स्रुवस्य परिमाणाधिक्यकल्पनेऽपि क्लृप्तसामर्थ्यस्यैव स्वधितेर्मांसावदानमात्रविनियोगकल्पनेन श्रुत्युपपत्त्या स्रुवादेस्तीक्ष्णाग्रत्वादिकल्पनाया गौरवग्रस्ताया अनाश्रयणीयत्वात्। अत एव 'आग्नेय्याग्नीध्रमुपतिष्ठते' इत्यत्र अप्रकृताग्नेयीग्रहणे तस्याः क्रतुसंबन्धस्यापि कल्पनीयतया कल्पनागौरवपरिहारार्थं ज्योतिष्टोमप्रकरणगताग्नेयीपरत्वमेवाङ्गीक्रियते। तस्मात्सामर्थ्यानुसारेण स्रुवादीनां व्यवस्थेत्यास्तां तावत्। इत्यर्थाद्याधकरणम्॥

इति श्रीमत्संततसंतन्यमानश्येनकर्मषोडशाररथचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजितुक्कोजिभोसलचोलमहीमहेन्द्रामात्यधुरंधरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण तदध्वर्युणा बाल्य एव तद्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयसर्वपृष्ठातीर्यादिवरिष्ठसोममखसंतर्पितशतमखप्रमुखबर्हिर्मुखेन श्रीमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन वासुदेवदीक्षितविदुषा विरचितायां जैमिनिसूत्रव्याख्यायाम्

अध्वरमीमांसाकुतूहलवृत्तौ

प्रथमोऽध्यायः॥

SRI VANI VILAS SASTRA SERIES No. 1.



. . . ADHVARA MIMAMSA . . .

KUTUHALA VRITTI

OF

SRI VASUDEVA DIKSHITA

EDITED BY

S. KUPPUSWAMY SASTRIGAL M. A.,

Principal, Madras Sanskrit College.

WITH THE CO-OPERATION OF

Professors Brahmasri R. CHANDRASEKHARA SASTRIGAL

and Brahmasri P. V. PANCHAPAGESA SASTRIGAL.

CHAPTER II.

SRI VANI VILAS PRESS

SRIRANGAM


1908



श्रीवाणीविलासशास्त्रग्रन्थमाला—१.

अध्वरमीमांसा

कुतूहलवृत्तिः



श्रीवासुदेवदीक्षितविरचिता

मेलापुरस्थगीर्वाणमहापाठशालाध्यक्षेण

एस्. कुप्पुस्वामिशास्त्रिणा

सह

तत्पाठशालाध्यापकाभ्यां

आर्. चन्द्रशेखरशास्त्रिणा

पि. वि. पञ्चापगेशशास्त्रिणा च

संशोधिता।

(तृतीयोऽध्यायः।)

श्रीरङ्गस्थ.

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रिता

१९०८.



श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायामप्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्नगुरुपरंपराप्राप्तषड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदयसांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्र आदिराजधानीविद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋश्यशृङ्गपुरवराधीश्वरतुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीमन्नृसिंहभारतीस्वामिगुरुकरकमलसंजात श्रीजगद्गुरु शृंगेरि श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः

अस्मत्सच्छिष्य आज्ञाधारक श्रीरंगनाथपुरवराभिजनास्मदत्यन्तप्रियतमान्तेवासि बालसुब्रह्मण्याभिरूय श्रेयोभिवृद्धये,

नारायणस्मरणपूर्वकविरचिताशिषः समुल्लसन्तुतराम् ॥

सविनयं, सभक्तिश्रद्धं, सानुरागं च, भवदनुप्रेषितविज्ञप्तिपत्रिकातो विज्ञाय प्रवृत्तिं भवतः कुतूहलवृत्त्यादिप्राचीनमहाप्रबन्धमुद्रणाभिन्नां महानानन्दः समजनि ॥

इह खलु वैभवान्महापापीयसः कलेः अतिमन्दप्रचारेषु पुरातनापूर्वग्रन्थजातेषु, वेदार्थप्रबोधनपटिष्ठेषु वैय्यर्थ्यमापन्नेष्वलघुषु प्रयासेष्वास्माकीनानां महतां प्रबन्धकृतां भारतीयानाम्, शशशृङ्गायितेषु तत्तादृशप्रथितयशःसु विद्वत्सु, तत्र तत्र खद्योतसहचरवृत्त्या उपजीवितप्राचीनग्रन्थसंरक्षणमन्तरा नान्यः प्रयत्नः सुतरां प्रवेष्टुमर्हत्यभिज्ञानन्दपदमिति दृढं मन्यामहे ॥

तादृशे कर्मण्यभियुक्तस्य जनस्य सर्वोऽपि लोकः कुर्यादेव साह्यं यावच्छक्त्यमित्याशासानाः श्रीशारदाचन्द्रचूडादयो देवाः वितीर्यायुरारोग्यसंपदो भवतो भक्ताग्रगम्य पालयन्त्वजस्रं श्रीवाणीविलासाख्यमुद्रणशालां चेति सायंदिवमभ्यर्थयन्तो वर्तामहे ॥

कीलकसंवत्सर वैशाखशुक्ल-
प्रतिपदि भृगुवासरे
कोविलग्रामतः ।



॥ श्रीः ॥

अध्वरमीमांसा

॥ कुतूहलवृत्तिः ॥

द्वितीयोऽध्यायः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

'अथातो धर्मजिज्ञासा' इति प्रमाणस्वरूपसाधनफलैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः । तत्र प्रथमाध्याये धर्मप्रमाणं निरूपितम् । तत्प्रमेयो धर्म इति सामान्यतो धर्मस्वरूपं च तत एवावगतम् । इदानीं द्वितीयेऽध्याये धात्वर्थभेदप्रयुक्तभावनाभेदादपूर्वं भिद्यत इत्येवं धर्मभेदविचारः प्रक्रम्यते ।

तत्र धात्वर्थभेदस्य भावनाभेदकत्वं धात्वर्थस्य भावनां प्रति करणत्वं विना न निर्वहतीति भावार्थाधिकरणं धर्मभेदविचारोपोद्घातत्वेनारप्स्यते । तत्र भावार्थाधिकरणप्रवृत्तेरेकस्मादपूर्वमिति निर्णयाधीनत्वात्तदुपोद्घातत्वेन प्रतिपदाधिकरणमारभ्यते । 'उद्भिदा यजेत पशुकामः' 'श्येनेनाभिचरन्यजेत' 'चित्रया यजेत पशुकामः' 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'यः कामयेत पशुमान्त्स्यामिति, स पञ्चहोतारं प्रयुञ्जीत' इत्यादि श्रूयते । अभिपूर्वकश्चरतिः शत्रुवधे वर्तते । फले हेतौ शतृप्रत्ययः । शत्रुवधार्थमिति यावत् । पञ्चहोता 'अग्निर्होता' इत्यादिमन्त्रः । तं प्रयुञ्जीत ब्रूयात् । एवंजातीयकेषु वाक्येषु 'उद्भिदा यजेत पशुकामः' इत्येवं क्रियापदानि द्रव्यगुणवचनानि नामपदानि च किं प्रत्येकं फलपदेन संबध्यन्ते ततश्च सर्वाणि पदान्यपूर्वकल्पनसमर्थार्थाभिधायकानि, उत तेष्वेकमेव पदं फलपदेन संबध्यते तदेव चापूर्वकल्पनसमर्थार्थाभिधाय-

कमिति संशयः । न चोद्भिदाद्यधिकरणेषूद्भिदादिपदानां द्रव्यगुणवाचकत्वनिराकरणपूर्वकं धात्वर्थनामधेयत्वस्य साधितत्वेन धात्वर्थातिरिक्तस्य कस्यापि फलसंबन्धाप्रसक्तेः कथमयं संशय इति वाच्यम् । तेषां ह्यधिकरणानां सिद्धं धात्वर्थस्य करणत्वमवलम्ब्यैव प्रवृत्तिः । न हि करणतृतीयान्तोद्भिदादिपदानां धात्वर्थनामधेयत्वं धात्वर्थस्य करणत्वाभावे घटेत । धात्वर्थस्य करणत्वं त्विदानीमसिद्धम् । एतदधिकरणोपजीव्यकाम्रिमभावार्थाधिकरणे हि तत्साधयिष्यते । एवं चोद्भिदादिपदानामिदानीं धात्वर्थनामधेयत्वस्यासिद्धेर्द्रव्यगुणवचनताया अपि संभावितत्वाद्भवत्ययं संशयः । तत्र फलस्य सर्वाभ्यर्हितत्वेन प्रधानत्वात्प्रधानसंबन्धलाभेन सर्वेषां फलपदेनैवान्वयो युज्यते । किंच सर्वेषां फलसंबन्धाभावे उपपदार्थानां द्रव्यगुणानां धात्वर्थे धात्वर्थस्य च फलेऽन्वयः स्यात् । ततश्च फलं प्रति धात्वर्थस्योपादेयत्वं विधेयत्वं गुणत्वं च, उपपदार्थान्प्रति चोद्देश्यत्वमनुवाद्यत्वं प्राधान्यं चेति विरुद्धत्रिकद्वयं प्रसज्येत । मत्वर्थलक्षणाश्रयणेन वाक्यभेदपरिहारे तु स एव दोषः । तस्मात्सर्वेषां फलपदसंबन्ध इति प्राप्ते, ब्रूमः । सर्वेषां फलसंबन्धे फलसंबन्धनिर्वाहाय कल्प्यमानमपूर्वं प्रतिपदार्थं कल्प्येतेति गौरवम्; एकस्यैव फलसंबन्धे तु एकमेवापूर्वं कल्प्यमिति लाघवम्; इत्येकमेव पदं फलपदेन संबध्यते । इतरत्तु पदं तत्रैव कथंचिद्विशेषणतयान्वेति । न चैवं सति विरुद्धत्रिकद्वयापातः शङ्क्यः । एकस्मादपूर्वमिति सिद्धे सति वक्ष्यमाणभावार्थाधिकरणन्यायेन धात्वर्थस्य करणत्वसंभवेनोद्भिदादीनां तन्नामतया अभेदेनैवान्वयाभ्युपगमात् । 'सोमेन' इत्यत्र तु गत्यभावान्मत्वर्थलक्षणा । तस्मादेकस्यैव फलपदसंबन्ध इत्येकस्मादेवापूर्वम् । इत्युत्सूत्रं प्रतिपदाधिकरणम् ॥

तदेवं प्रतिपदाधिकरणे एकस्मादपूर्वमिति सिद्धे किम् 'यजेत' इत्यादिक्रियापदं फलपदेन संबध्यते ततश्च धात्वर्थत एवापूर्वं कल्प्यते, उत उपपदं द्रव्यगुणवाचकं फलपदेन संबध्यते ततश्चोपपदार्थत एवापूर्वमिति संशये, सिद्धान्तेनोपक्रमते—

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥

भावार्थाः प्रत्ययेन भावनाप्रतिपादकाः प्रकृत्या कर्मवचनाश्च 'यजेत' 'जुहुयात्' इत्यादयो ये, तेभ्य एव क्रिया कार्यमपूर्वं प्रतीयेत कल्प्येत । 'यजेत' इत्यादय एवापूर्वकल्पनासमर्थार्थ-

१. अपूर्वाख्यातप्रतिपाद्यत्वाधिकरणम् ।

प्रतिपादका इति यावत् । ननु द्रव्यगुणशब्दा एव तथाविधाः कुतो न स्युरित्यत आह—एष हीति । हि यस्मात्कारणात् एषः धात्वर्थ एव फलभावनाकरणत्वेन विधीयते नान्यः । अतः 'यजेत' इत्यादय एव शब्दास्तथाविधाः ॥

स्यादेतत् । 'उद्भिदा यजेत पशुकामः' इत्यादौ फलं साध्यरूपत्वात्सिद्धरूपं साधनमपेक्षते, न तु साध्यरूपम् । द्रव्यगुणावेव च सिद्धरूपत्वात्तदाकाङ्क्षां पूरयितुं शक्नुतः । यागादयो धात्वर्थास्तु स्वयं साध्यरूपत्वान्न साधनाकाङ्क्षां पूरयितुमीशते । तत्र स्वरूपसतोर्द्रव्यगुणयोर्व्यापारविशेषानुप्रवेशमन्तरेण फलसंबन्धानुपपत्तेरपेक्षितं व्यापारविशेषं यज्यादिधातवः समर्पयन्ति । ततश्च धात्वर्थविशेषितद्रव्यगुणत एवापूर्वमिति पूर्वपक्षमुद्भाव्य निराकरोति—

सर्वेषां भावोऽर्थ इति चेद्येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि, तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात्स्वे प्रयोगे, येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि, तस्मात्तेभ्यः[1] क्रिया प्रतीयेताश्रितत्वात्प्रयोगस्य ॥ २ ॥

एकार्थपर्यवसायित्वादेकमपि सूत्रं व्याख्यासौकर्याय त्रेधा विभज्योपात्तं भाष्ये । सर्वेषामुपपदार्थानां द्रव्यगुणानामेव भावः । कर्मणि घञ् । भाव्यः कल्प्यः अर्थः अपूर्वम् । 'सर्वेषाम्' इति हेतुत्वस्य शेषत्वविवक्षायां षष्ठी । सर्वैरुपपदार्थैर्द्रव्यगुणैरेवापूर्वं कल्प्यम् उक्तयुक्तेः इति चेत्, तन्न । यतः येषां शब्दानां स्वे स्वकीये प्रयोगे प्रयुज्यन्ते शब्दा अत्रेति व्युत्पत्त्या अर्थे उत्पत्तौ उच्चारणदशायां रूपोपलब्धिः अभिधेयस्वरूपं विद्यते तानि नामानि द्रव्यगुणशब्दाः । तस्माद्धेतोः तेभ्यः तदर्थं द्रव्यगुणनिष्पत्त्यर्थं परस्य साधनस्य आकाङ्क्षा नेत्यध्याहार्यमिति केचित् । वस्तुतस्तु अकाङ्क्षा इति च्छेदः । काङ्क्षाया अभाव इत्यर्थः । कुतः । स्वे प्रयोगे भूतत्वात् स्वकीयशब्दप्रयोगकाले विद्यमानत्वात् । तस्मादित्यस्यैव विवरणमेतत् । येषां तु शब्दानां स्वे स्वकीये अर्थे उत्पत्तौ उच्चारणदशायां प्रयोगः[2] अर्थः न विद्यते । प्रयोगकाले अर्थो न विद्यत इति यावत् । तानि आख्यातानि 'यजेत' इत्यादितिङन्तानि । धात्वर्थानां साध्यरूपत्वात्तन्निष्पत्तौ साधनाकाङ्क्षास्तीति भावः । तस्माद्धेतोः तेभ्य एवाख्यातशब्देभ्यः क्रिया अपूर्वं प्रतीयेत कल्प्येत, न तु द्रव्यगुणशब्देभ्यः । द्रव्यगुणानां सिद्धरूपाणां धात्वर्थनिष्पाद्यत्वाभावेन तदर्थत्वे धात्वर्थानामदृष्टार्थत्वापत्तौ धात्वर्थेभ्यो द्रव्यगुणेभ्यश्च प्रत्येकमपूर्वकल्पनागौरवापत्तेः । धातुभ्य एवापूर्वकल्पनायां तु द्रव्यगुणानां तन्निष्पादकत्वेन दृष्टार्थत्वादपूर्वान्तरं न कल्प्यमिति लाघवम् । ननु द्रव्यगुणानां सिद्धरूपत्वेऽपि 'दध्नेन्द्रियकामस्य' इत्यादावाश्रयस्येवात्रापि धात्वर्थानामपि फलोद्देशप्रवृत्तकर्तृव्यापारविषयत्वरूपकरणत्वसंपादकतया अदृष्टार्थत्वसंभवान्नादृष्टद्वयकल्पनाप्रसक्तिरित्यस्वरसाद्धातूनामेवापूर्वक-

1. तेभ्यः प्रतीयेत. 2. प्रयोज्यः अर्थः—क.

ल्पकत्वे युक्त्यन्तरमाह— आश्रितत्वात्प्रयोगस्येति । प्रयुज्यमानधात्वर्थस्य भावनया सह एकं पदमाश्रितत्वादेकपदश्रुत्या धात्वर्थस्यैव भावनाकरणत्वादिति यावत् । तस्मादेव क्रिया अपूर्वं प्रतीयेतेत्यन्वयः ॥ अयं भावः । तृतीयाश्रुत्या उद्भिच्छ्येनादि करणम् इत्येतावन्मात्रमवगतम्, न तु भावनाकरणमिति । तत्तु 'यजेत' इत्यादिपदान्तरसमभिव्याहारलभ्यम् । 'यजेत' इत्यादिषु तु प्रकृत्यंशेन धात्वर्थः प्रत्ययांशेन भावना तदुभयसमभिव्याहारलक्षणपदश्रुत्या च धात्वर्थो भावनाकरणमित्यवगम्यते । ततश्च धात्वर्थकरणत्वं पदान्तरसमभिव्याहारमनपेक्ष्य प्रकृतिप्रत्ययसमभिव्याहारमात्रगम्यमिति तृतीयाश्रुत्यपेक्षया पदश्रुतिरिह प्रबलेति । न च साध्यरूपस्य धात्वर्थस्य कथं साधनत्वमिति वाच्यम् । वाक्यार्थज्ञानदशायां सिद्धत्वाभावेऽपि पश्चात्स्वसाधनतो निष्पन्नस्य तस्य साधनत्वोपपत्तेः । तस्माद्धात्वर्थस्यैव भावनाकरणत्वात्तत एवापूर्वमिति सिद्धम् । प्रयोजनं पूर्वपक्षे उद्भिच्छ्येनादिपदानां गुणविधित्वादुद्भिच्छ्येनादिद्रव्येण यष्टव्यम्, सिद्धान्ते तु धात्वर्थस्य करणत्वेन करणतृतीयान्तानामुद्भिच्छ्येनादिपदानां तन्नामधेयत्वात् 'अव्यक्तासु तु सोमस्य' इति न्यायात्सोमेन यष्टव्यम् । 'सोमेन यजेत' इत्यत्र च सोमापचारे प्रतिनिधिर्नोपादातव्यः पूर्वपक्षे; सोमस्यापूर्वार्थत्वेनादृष्टार्थत्वात्, अदृष्टार्थानां प्रतिनिध्यभावस्य तृतीये प्रतिनिधिपेटिकायां वक्ष्यमाणत्वात् । सिद्धान्ते तु सोमद्रव्यस्य धात्वर्थयागनिर्वर्तकत्वेन दृष्टार्थत्वादस्ति प्रतिनिधिरित्यादि यथायथमूह्यम् । स्यादेतत् । प्रत्ययवाच्यां फलभावनां प्रति धात्वर्थः करणमित्यनुपपन्नम्, धात्वर्थातिरिक्तभावनास्वरूपस्य दुर्निरूपत्वात् । तथाहि—किं कर्तृव्यापारो भावना, उत यत्नः, आहोस्वित्स्पन्दः, प्रयत्नस्पन्दान्यतरो वा । नाद्यः, कर्तृव्यापारस्याधिश्रयणादिनिचयस्य पचिधात्वर्थत्वेन तदतिरिक्तभावनानुपपत्तेः । न च विक्लित्तिरेव पचेरर्थ इति शङ्क्यम् । तथा सति कृष्णलानाम् 'घृते श्रपयति' इति पाकविधानानुपपत्तेः । एवं यज्यादावप्यूह्यम् । नन्वधिश्रयणादिकर्तृव्यापारस्य पचिधात्वर्थत्वेऽपि तदतिरिक्तस्य प्रयत्नस्य प्रत्ययवाच्यभावनात्वमिति द्वितीयः पक्षोऽस्त्विति चेत्, न। 'रथो गच्छति' इत्याद्यनुपपत्तेः; अचेतनस्य रथस्य प्रयत्नाभावात् । न च लक्षणया तन्निर्वाहः शङ्क्यः, 'देवदत्तो गच्छति' इत्याद्यपेक्षया प्रतीतिवैलक्षण्याभावात् । न तृतीयः, 'यतते' 'जानाति' इत्यादिष्वात्मकर्तृकेषु व्यभिचारात् आत्मनः स्पन्दाभावात् । न चतुर्थः, 'शब्दोऽभिदधाति' इत्यादौ व्यभिचारात् । न हि प्रयत्नः स्पन्दो वा शब्दस्यास्ति । तस्माद्धात्वर्थातिरिक्तभावनास्वरूपं दुर्निरूपमिति चेत्, नैष दोषः । 'यजते' 'पचति' इत्यादौ 'यागं करोति' 'पाकं करोति' इत्यादिविवरणात्, तथैवानुभवात्, 'यागः' 'पाकः' इत्यादौ तदुभयाभावादाख्यातप्रत्ययस्य करोतिसमानार्थत्वं वक्तव्यम् । करोतिश्च उत्पादनार्थः सकर्मकः । तच्च कर्मोत्पद्यमानमेव भवति, 'नित्यं न भवनं यस्य नित्यं चापि न भूतता । न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव ॥' इति न्यायात् । ततश्चोत्पद्यमानस्य वस्तुन उत्पत्त्यनुकूल उत्पादककर्तृव्यापारः करोतेरर्थः । भावयतेश्चायमेवार्थः, भवतेरु-

त्यर्थकत्वात् प्रयोजकव्यापारे 'तत्प्रयोजको हेतुश्च' 'हेतुमति च' इति णिचोऽनुशासनात्। एवं च 'पचति' 'पाकं करोति' 'पाकं भावयति' इति च पर्यायाः। पचिधात्वर्थश्च विक्लित्तिरिति महाभाष्ये स्पष्टम्। तथा च तण्डुलरूपकर्मगतविक्लित्तिः पचिवाच्या। तत्प्रयोजको देवदत्तादिकर्तृव्यापारोऽधिश्रयणादिनिचयरूप आख्यातप्रत्ययवाच्यः। स एव च कर्तृव्यापारो भावभावनाशब्दाभ्यामुच्यते। एवम् 'यजते, यागं भावयति' 'जुहोति, होमं भावयति' 'ददाति, दानं भावयति' इत्याद्यूह्यम्। न च, करोतिर्नोत्पादनार्थको येन तत्समानार्थकतया आख्यातप्रत्ययस्य उत्पत्त्यनुकूलव्यापाररूपभावनावाचित्वं लभ्येत; नैवमस्ति, करोतेर्यत्नार्थकत्वात्; तथा च प्रयत्नरूपभावनावाचित्वमेवाख्यातप्रत्ययस्य वक्तुमुचितम्, इति वाच्यम्। 'स्तम्बकरिर्व्रीहिः' इत्यादावचेतनेऽपि प्रयुज्यमानस्य [1]कृञो यत्नार्थकत्वानुपपत्तेः, कृञो यत्नार्थकत्वे सति यतधातुवदकर्मकत्वापत्तेश्च। न चेष्टापत्तिः; 'करोति' इत्युक्ते 'किम्' इत्याकाङ्क्षायाः 'यतते' इत्युक्ते तदनाकाङ्क्षायाश्च सर्वानुभवसिद्धाया अपह्नवायोगात्, 'भोजनाय यतते' इतिवत् 'भोजनाय करोति' इत्यापत्तेश्च। एतेनोत्पद्यतिपर्यायत्वं करोतेर्निरस्तम्। तथा सत्यकर्मकत्वेन 'घटं करोति' इत्यनापत्तेः, घट उत्पद्यत इत्यर्थे 'घटः करोति' इत्यापत्तेश्च। तस्मादन्योत्पादानुकूलव्यापाररूपा भावनैव करोत्यर्थ इति तत्समानार्थकाख्यातप्रत्ययेनापि सैवोच्यत इत्याशयेयम। ननु अस्तु धात्वर्थातिरिक्ता भावना; तथापि तां प्रति धात्वर्थस्य 'पाकं करोति' इति कर्मत्वेन लोके विवरणात्कथमिह तस्य करणत्वं व्युत्पाद्यमिति चेत्, सत्यम्। धात्वर्थातिरिक्तकर्मपदासमभिव्याहारे 'पचति' इत्येवोक्ते 'पाकं करोति' 'ओदनं पचति' इत्युक्ते 'पाकेनौदनं करोति' इति च विवरणं लोके दृश्यते। तत्र यदा पाकस्य कर्मत्वेनान्वयस्तदा तदनुकूलाधिश्रयणादिव्यापारनिचयः अधिश्रयणत्वादिविशेषधर्मानादरेण पाकानुकूलो व्यापार इत्येवं सामान्यरूपेणाख्यातप्रत्ययवाच्यतां भजते। यदा तु 'ओदनं पचति' इत्यत्र पाकेनौदनं करोतीति करणत्वेन धात्वर्थस्यान्वयस्तदा पाकानुकूलव्यापारत्वेनाधिश्रयणादिनिचयो न प्रत्ययेनोच्यते, पाकस्य कर्मत्वाभावादोदनस्यैव कर्मत्वात्। किंत्वोदनोत्पत्त्यनुकूलव्यापारत्वेन सामान्यरूपेणैवाधिश्रयणत्वादिविशेषधर्मानादरेण स तद्वाच्यतां भजते। धात्वर्थस्तु पाकः प्रत्ययवाच्ये तस्मिन्व्यापारे करणं न त्वोदने, कारकाणां मिथः संबन्धायोगात्। यद्यप्यधिश्रयणादिनिचयेन पाको जायते न तु पाकेनाधिश्रयणादिनिचयः, तथापि पाकस्याधिश्रयणादिनिचयं प्रति साधकतमत्वरूपकरणत्वासंभवेऽपि फलोद्देशप्रवृत्तकर्तृव्यापारनिष्पाद्यत्वरूपं करणत्वं संभवतीति न दोषः। तत्र करणस्य कर्तृव्यापारेण निष्पत्तिर्द्वेधा, स्वरूपेणातिशयविशिष्टतया च। तत्र पाकस्याधिश्रयणादिनिचयेन स्वरूपेण निष्पत्तिः। 'कुठारेण वृक्षं छिनत्ति' इत्यत्र तु द्वैधीभावानुकूलोद्यमननिपातनादिव्यापारनिचयेन कुठारस्य द्वैधीभावसंपादकाभिघाताद्यतिशयविशिष्टतया निष्पत्तिः। एवं वेदेऽपि 'व्रीहिभि-

1. करोतेः—क, घ.

र्यजेत' इत्यत्र यागस्यैव कर्मत्वात्तदनुकूलव्यापारत्वसामान्यात्मना प्रयत्नसंकल्पादिस्तद्विशेषरूपानादरेण गम्यते । व्रीहयस्तु तत्र करणम् । 'यजेत स्वर्गकामः' इत्यत्र तु फलस्य कर्मत्वात्तदनुकूलव्यापारत्वसामान्यरूपेणाग्न्यन्वाधानादिसकलव्यापारनिचयस्तद्विशेषरूपानादरेण प्रत्ययेनाभिधीयते । तस्मिंश्च व्यापारे यागः करणम्, यागस्य दृष्टादृष्टार्थावघातप्रयाजादिकर्तृव्यापारेण स्वरूपेण स्वर्गसाधनतासंपादकातिशयविशेषविशिष्टतया चोत्पत्त्या फलोद्देशप्रवृत्तव्यापारनिष्पाद्यत्वात् । यदि तु 'साधकतमं करणम्' इति व्याकरणानुसाराज्जनकविशेषस्यैव करणत्वमित्याग्रहस्तदाप्येवमुपपाद्यम् । 'कुठारेण च्छिनत्ति' इत्यत्र द्वैधीभावानुकूलोद्यमननिपातनादिव्यापारो न कुठारं प्रति स्वरूपेण साध्यः, कुठारोऽपि न तत्र स्वरूपेण साधनम् । किंतु द्वैधीभावजननसामर्थ्यरूपाभिघाताद्यतिशयविशेषविशिष्टतया कुठार उद्यमननिपातनादिव्यापारनिचये द्वैधीभावानुकूलव्यापारत्वरूपापन्ने साधनम् । कुठारेऽभिघाताद्यतिशयविशिष्टे सत्येव ह्युद्यमनादिव्यापारो द्वैधीभावानुकूलव्यापारात्मना संपद्यते । ततश्च द्वैधीभावानुकूलव्यापारे उद्यमनादौ कुठारः करणमित्युक्ते 'सविशेषणे हि—' इति न्यायेन द्वैधीभावनिष्पत्तौ कुठारः करणमिति पर्यवस्यति । एवम् 'यजेत स्वर्गकामः' इत्यत्रापि दृष्टादृष्टोपकारविशिष्टयागस्यावघातप्रयाजादिकर्तृव्यापारे स्वर्गानुकूलव्यापारत्वरूपापन्ने साधनत्वम् 'सविशेषणे हि—' इति न्यायात्स्वर्गोत्पत्तौ पर्यवस्यति । तत्र प्रयत्नादिभिरार्थिकैर्लौकिकैः साधनैरवघातादिभिश्च वैदिकैः स्वरूपेण निष्पन्नोऽपि यागः अग्न्यन्वाधानप्रयाजादिभिर्व्यापारैस्तत्तद्रूपापन्नैः फलसाधनात्मना निष्पद्यत इति तेन रूपेण यागस्याग्न्यन्वाधानादिसाध्यता । अग्न्यन्वाधानादिव्यापारस्य च तत्तद्रूपेण तत्साधनता । ततश्च रूपभेदाद्यागस्य कर्तृव्यापारं प्रति साध्यत्वं साधनत्वं च न विरुध्यते । तथा कर्तृव्यापारस्यापि यागं प्रति। नन्वेवमप्यन्वाधानादिरूपव्यापारस्य 'अग्नीनन्वादधाति' 'व्रीहीनवहन्ति' 'व्रीहीन्प्रोक्षति' 'तण्डुलान्पिनष्टि' 'समिधो यजति' 'तनूनपातं यजति' 'विष्णुक्रमान्क्रमते' इत्यादितत्तद्धात्वभिहितत्वात्कथं यजेतेति प्रत्ययवाच्यत्वम् । किंच अन्वाधानादिव्यापारस्य 'किम्' 'केन' 'कथम्' इत्यंशत्रयविशिष्टभावनाग्रां तृतीयाकाङ्क्षापूरकस्य भावनात्वमपि विरुद्धमिति चेत्, सत्यम् । 'अन्वादधाति' इत्यादिभिस्तत्तद्रूपेणाग्न्यन्वाधानादिव्यापारनिचयस्याभिहितत्वेऽप्यन्योत्पादव्यापारत्वेन सामान्यात्मना प्रत्ययवाच्यत्वमविरुद्धम् । एवमग्न्यन्वाधानादिव्यापारनिचयस्य तृतीयाकाङ्क्षापूरकत्वेन भावनांशत्वं सामान्यात्मना अंशित्वं चाविरुद्धम् । तत्र प्रत्ययेन सामान्यात्मना प्रतीतो व्यापारः कोऽसाविति विशिष्याकाङ्क्षितोऽग्न्यन्वाधानादिः कथं व्यापरितव्यमित्याकाङ्क्षितोऽग्न्यन्वाधानादिजन्यदृष्टादृष्टोपकारसंपादनरूप इति विवेकः । तत्सिद्धं धात्वर्थातिरिक्तं भावनास्वरूपम् । तत्र धात्वर्थः करणम्, तत एवापूर्वमिति 'यजेत' इत्याद्याख्यातशब्द एवापूर्वमाक्षिपतीति पार्थसारथिमतानुसारी पन्थाः । अत्र यद्वक्तव्यं तत्तृतीयस्य तृतीये प्रकरणाधिकरणे वक्ष्यामः । इति भावार्थाधिकरणम् ॥

धात्वर्थादेवापूर्वमिति स्थितम्। तत्रापूर्वं साधयितुमिदमारभ्यते। 'यजेत स्वर्गकामः इत्यत्र यागस्वर्गातिरिक्तमपूर्वं नाम किंचिदस्ति न वेति संशयः। नास्त्यपूर्वम्, प्रमाणाभावात्।

२. अपूर्वस्यास्तित्वाधिकरणम्।

न ह्यत्र प्रत्यक्षं प्रमाणं क्रमते, रूपाद्यभावात्। अविनाभूतलिङ्गाभावाच्च नानुमानम्। आगमोऽपि नैवंविधोऽस्ति 'यागोऽपूर्वद्वारा स्वर्गं जनयति' इति। सादृश्याग्रहणाच्च नोपमानगन्धोऽपि। न च यागस्य क्षणिकस्य श्रुतकालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या वस्त्वन्तरमपूर्वं नाम किंचित्कल्प्यत इति शक्यते वक्तुम्; कल्प्यमानस्य तस्य श्रुतसाधनत्वविरोधितया तदुपपादकत्वासंभवात्, साधनत्वबोधकशास्त्रेणाव्यवहितस्य बोधितत्वेन मध्ये वस्त्वन्तरस्वीकारे तद्विरोधात्, व्यवहितस्य कुलालपित्रादिवदन्यथासिद्धत्वेन साधनत्वव्याघातात्। न च, यागस्य स्वर्गजननशक्तिर्या सैवापूर्वमुच्यते। ततश्च शक्तेरवस्त्वन्तरतया साधनान्तरत्वाभावेनाव्यवधायकतया यागस्य साधनता न तया व्याहन्यते। अस्तु वा वस्त्वन्तरमपूर्वम्। तथापि व्यापारवत्त्वेन यागस्य साधनत्वं न तद्व्याहन्तुमीष्टे, 'नहि स्वाङ्गं स्वव्यवधायकम्' इति न्यायादिति वाच्यम्। शक्तिमति व्यापारवति च यागे क्षणिकत्वेन विनष्टे शक्तेर्व्यापारस्य चावस्थानायोगात्। कथं तर्हि क्षणिकस्य यागस्य कालान्तरभाविस्वर्गजनकत्वमिति चेन्न। शास्त्रप्रामाण्याद्विनष्टस्यापि यागस्य स्वर्गसाधनत्वकल्पनोपपत्तेः। शास्त्रप्रामाण्यात्सूक्ष्मरूपेणावस्थानं वा यागस्य कल्प्यताम्। अतो नापूर्वं वस्त्वन्तरम्। इति प्राप्ते, सिद्धान्तयति—

चोदना पुनरारम्भः ॥ ३ ॥

पुनःशब्दो यत इत्यर्थे। चोद्यत आक्षिप्यत इति चोदना अपूर्वम्। कर्मणि ल्युट्। अस्तीति शेषः। कुतः। यतः कर्मणा फलस्य आरम्भः उत्पत्तिः श्रूयते। तथाहि—शास्त्रप्रामाण्यात्कल्प्यमानमपि प्रमाणान्तरेणाविरुद्धमेव कल्प्यते। विनष्टस्य कार्यारम्भकत्वं च सर्वप्रमाणविरुद्धम्। न च पूर्वानुभवकृष्यध्ययनादीनामिव विनष्टस्यापि कार्यारम्भकत्वं किं न स्यादिति वाच्यम्। तेषां संस्कारविशेषनिष्पादनमुखेन तदुपपत्तेः। इह च तदनभ्युपगमात्। अभ्युपगमे च गतं विवादेन। एवं क्षणिकस्य यागस्य यावत्कार्यारम्भमवस्थानमपि सर्वप्रमाणविरुद्धं न कल्पयितुं शक्यम्, 'न ह्यागमाः सहस्रं घटं पटयितुमीशते' इति न्यायात्। कृतयागस्यात्मन एव फलमिति कल्पना त्वेकादशे 'कर्मण्यारम्भभाव्यत्वात्' इत्यधिकरणे 'सकृत्तु स्यात्कृतार्थत्वादङ्गवत्' इति गुणसूत्र उद्भाव्य निराकरिष्यते। न चापूर्वकल्पनायां यागस्य साधनत्वव्याघातः, स्वशक्त्यात्मनः स्वव्यापारात्मनो वा अपूर्वस्य यागे साधनत्वपरिपन्थित्वाभावात्। यद्यपि शक्तिमति व्यापारवति च यागे नष्टे तदवस्थानासंभवस्तथापि कार्यबलात्कल्प्यमाना शक्तिर्यथा कार्यं निर्वहति तथा कल्प्या। इह च शक्तिरात्मनिष्ठतयैव कार्यनिर्वाहिकेत्यात्मनिष्ठैव यागस्य शक्तिः कल्प्यते। एवं व्यापारोऽपि। तत्र हि समी-

हितसाध्योद्देशप्रवृत्तसाधनेन तत्सिद्ध्यर्थमन्तरासाध्यमानत्वमेवावान्तरव्यापारत्वम् । व्यापारिणः सत्त्वमपि न तत्र प्रयोजकम् । अन्यथा 'काष्ठैः पचति' इत्यत्र ज्वालायाः पूर्वानुभवादौ च संस्कारस्य व्यापारत्वानुपपत्तेः । तस्मादस्त्यपूर्वं वस्त्वन्तरम् । तदिदं श्रुतफलसाधनत्वान्यथानुपपत्त्या कल्पितमपूर्वमव्यवहितफलसाधनत्वात्परमापूर्वमिति वदन्ति । तत्रैकहविष्कायामिष्टौ तदुत्पत्तिप्रकारः कथ्यते । सर्वाङ्गोपकृतेन यागेन परमापूर्वमुत्पद्यते । अङ्गानि च कानिचिद्यागानुष्ठानस्य पुरस्तात्कानिचित्परस्ताच्चानुष्ठीयन्ते । यथानुष्ठितानि चाङ्गानि मिलितानि युगपदेव यागे उपकारं जनयन्तीत्येकादशे वक्ष्यते । अङ्गानां च सर्वेषां क्रियात्मकानां क्षणिकानां मेलनं साक्षादसंभवात्स्वस्वजन्यापूर्वमुखेन वक्तव्यमित्यङ्गापूर्वसिद्धिः । मिलितैरपि तैरङ्गापूर्वैर्मध्येऽनुष्ठितस्य यागस्योत्पन्नविनष्टत्वेन साक्षात्तस्मिन्नुपकारजननासंभवात्स्वजन्यापूर्वमुखेनैव तस्मिन्नुपकारजनकत्वं तेषामङ्गापूर्वाणां वाच्यमित्युत्पन्नमात्रादनुपकृतादेव यागात्किंचिदपूर्वमुत्पद्यत इति वक्तव्यम् । तदिदमुत्पत्त्यपूर्वमित्युच्यते । तन्मुखेन सर्वाङ्गापूर्वैरुपकृताद्यागात्परमापूर्वमिति । न चोत्पत्त्यपूर्वमेवाङ्गोपकृतं फलं साधयतु; किं परमापूर्वेणेति वाच्यम् । यागफलयोः साध्यसाधनभावे निर्धारिते हि कथंभावाकाङ्क्षा भवति, न त्वनिर्धारिते । तन्निर्धारणं च यागस्य नश्वरत्वेन द्वारकल्पनां विना न संभवतीति प्रथमं परमापूर्वमेव कल्प्यम्, न तूत्पत्त्यपूर्वम् । तत्त्वङ्गसाचिव्यनिर्वाहाय पश्चादेव कल्प्यमित्यपूर्वद्वयकल्पना आवश्यकी । एवमनेकहविष्कायामपीष्टौ यावन्तो यागास्तावन्त्युत्पत्त्यपूर्वाणीति विशेषः । तत्र प्रधानानां फलसाधनतानिर्वाहार्थं प्रथमं परमापूर्वमेकं सर्वप्रधानसाध्यं कल्प्यते, फलवाक्ये एकशब्दोपात्तानां प्रधानानामेकफलसाधनत्वस्यैकादशाद्याधिकरणे व्यवस्थापयिष्यमाणत्वात् । पश्चाच्चाङ्गसाहित्यसिद्ध्यर्थं प्रातिस्विकान्युत्पत्त्यपूर्वाणि कल्प्यन्ते । न च प्रधानानां साहित्यसिद्ध्यर्थं प्रथममुत्पत्त्यपूर्वाण्येव कल्प्यन्ताम्; ततश्च तैरेव फलसिद्धेः किं परमापूर्वेणेति वाच्यम् । फलाकाङ्क्षाया उत्कटत्वेन फलसाधनतानिर्वाहकतया प्रथमं परमापूर्वकल्पनाया एवोचितत्वात् । यदि च प्रतिप्रधानमपूर्वाणि प्रथमं कल्प्येरन् तर्हि तानि फलापूर्वाण्येव स्युः, न तु उत्पत्त्यपूर्वाणि । ततश्च सप्तमाध्ये वक्ष्यमाणन्यायेन धर्माणामपूर्वार्थतया प्रथमकल्पितापूर्वार्थत्वमेव स्यात् । ततश्चाङ्गोपकृतेभ्यो यागेभ्योऽपूर्वसिद्ध्यर्थं पुनरपि प्रतिप्रधानमुत्पत्त्यपूर्वाणि कल्प्येरन्निति गौरवं स्यात् । तस्मात्फलवाक्ये एकशब्दसंगृहीतैर्बहुभिरपि यागैः स्वस्वोत्पत्त्यपूर्वमुखेन परमापूर्वमेकमेव जन्यते । उत्पत्त्यपूर्वाण्येव तु प्रतिप्रधानं भिद्यन्ते । तदेवमुत्पत्त्यपूर्वं परमापूर्वं च सर्वत्र साधारणम् । दर्शपूर्णमासयोस्तु समुदायापूर्वद्वयमधिकम् । तथाहि—आग्नेयोऽष्टाकपालः पुरोडाशः, आज्यहविरुपांशुयाजः, अग्नीषोमीय एकादशकपालः पुरोडाश इति पौर्णमास्यां त्रीणि प्रधानानि । आग्नेयः पुरोडाशः, ऐन्द्रं दधि, ऐन्द्रं पय इत्यमावास्यायां त्रीणि प्रधानानि । तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्ये सकृदुच्चरितेन यजिना तन्नामाभिधानशक्तिमहिम्ना समुदितानां षण्णां यागानामेक-

फलजनकतया एकप्रयोगोपनिपाते प्राप्ते प्रतित्रिकं प्रयोगभेदं विधातुमिदं वाक्यद्वयं प्रवृत्तम् 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति । तदेतदेकादश एव स्पष्टं भविष्यति । तत्र पृथक्करणविभक्तिनिर्देशात्परस्परनिरपेक्षस्यैकैकस्य त्रिकस्य करणत्वमवगम्यते । न च तत् फलापूर्वं प्रति वक्तुं शक्यम्, तत्र परस्परसाहित्यावश्यंभावात् । ततश्च निरपेक्षसाधनत्वेनावगताभ्यां त्रिकाभ्यां युगपत्फलापूर्वारम्भे नैरपेक्ष्यबाधप्रसङ्गेन तदादाय पृथक्करणश्रुतिनिर्वाहासंभवात् तदर्थं प्रतित्रिकमेकैकं समुदायापूर्वमङ्गीकर्तव्यमिति । एवं चातुर्मास्येषु 'वसन्ते वैश्वदेवेन यजेत' 'प्रावृषि वरुणप्रघासैः' 'शरदि साकमेधैः' 'ततो द्वयहे त्र्यहे चतुरहेऽर्धमासे मासि चतुर्षु वा मासेषु शुनासीरीयेण यजेत' इत्यत्र चत्वारि समुदायापूर्वाण्यधिकानीत्यादि यथायथमूह्यम् । नन्वेवमपि सर्वाङ्गोपकृतयागतः परमापूर्वमित्यनुपपन्नम्, संनिपत्योपकारकाणामवघातादीनामनुष्ठानसमये प्रधानापूर्वस्यैवासत्त्वेन तदुपकारस्यासंभवात्; न च प्रयाजादिवदपूर्वद्वारा तत्संभवः, अवघातादीनां दृष्टार्थतया अपूर्वाभावादिति चेत्, सत्यम् । संनिपत्योपकारकाण्यवघातादीनि नियमादृष्टरूपद्रव्यदेवतासंस्कारद्वारा शक्तिविशेषविशिष्टयागजननद्वारा तदुत्पत्त्यपूर्वनिष्पत्तौ तद्द्वारा फलापूर्वनिष्पत्तौ च व्याप्रियन्ते, तथाविधयागजन्योत्पत्त्यपूर्वस्यैव फलापूर्वजनकत्वात् । आरादुपकारकाणि तु साक्षादेवोत्पत्त्यपूर्वेभ्यः फलापूर्वनिष्पत्तौ व्याप्रियन्ते । न चैवं सति साक्षादुपकारजनने व्याप्रियमाणत्वादारादुपकारकाणां प्रयाजादीनामेवेत्थंभावाकाङ्क्षया स्वीकारः स्यात्; ततश्च तेषामेव विकृतावतिदेशः स्यान्नावघातादीनां संनिपत्योपकारकाणामिति वाच्यम् । 'कथं भावयेत्' इत्युपकारजननप्रकारमात्रं ह्यपेक्ष्यते, न तु साक्षादुपकारजननप्रकार एव । ततश्च सत्यप्यवान्तरभेदे सर्वेषामेवाङ्गानामित्थंभावाकाङ्क्षासंगृहीतत्वात्सर्वाङ्गोपसंहृतयागतः[1] परमापूर्वमिति युक्तम् । इत्यपूर्वाधिकरणम् ॥

धात्वर्थेभ्योऽपूर्वमिति भावार्थाधिकरणे स्थितम् । तदेतत्कचिदपवदितुमिदमारभ्यते । 'व्रीहीनवहन्ति' 'तण्डुलान्पिनष्टि' 'पिष्टानि संवपति' इत्यादिषु किमवघातादिभ्योऽपूर्वमस्ति न वेति संशयः । तदर्थं चेत्थं चिन्त्यते किमवघातार्था व्रीहयः, उत व्रीह्यर्थोऽवघात इति । यद्यवघातार्था व्रीहयस्तर्हि तत्साधनकावघातस्य दृष्टप्रयोजनाभावादस्त्यपूर्वम् । यदि तु व्रीह्यर्थोऽवघातस्तर्हि दृष्टद्वैतुष्यद्वारैव व्रीह्यर्थत्वादवघातस्य नास्त्यपूर्वमिति फलति । तत्रावघातार्था व्रीहय इत्येव युक्तम् । न च अग्निमाधिकरणे द्वितीयायाः साध्यत्वार्थकतया तत्सहितविधिबलाद्वितीयान्तार्थस्य शेषित्वमिति वक्ष्यते; तन्न्यायेनेहापि द्वितीयाश्रुत्या व्रीह्यर्थत्वमेवावघातस्य युक्तमिति वाच्यम् । अवघातस्य हि दृष्टद्वैतुष्यार्थत्वे तस्य लोकत एव प्राप्तत्वेन तत्साफल्यायावश्यं प्रकृतेऽपूर्वं कल्पनीयम् । तच्च यदि व्रीहिद्रव्यात्कल्प्येत तदा-

३. कर्मणां गुणप्रधानभावविभागाधिकरणम् ।

1. उपकृतयागतः—क, ग, घ.

वघातस्य व्रीह्यर्थत्वमदृष्टद्वारैव वाच्यम् । द्रव्यादपूर्वमिति वदता अवघातविशिष्टद्रव्यस्य [1]विधेयत्वे वाच्यतया दृष्टद्वारा अवघातस्य द्रव्यार्थत्वे द्रव्यविशेषणतया अवघातविधिवैयर्थ्यापत्तेः । एवं व्रीह्यर्थत्वे अवघातस्य द्रव्यादेकमदृष्टमवघातादेकमित्यदृष्टद्वयकल्पनाप्रसङ्गात् द्वितीयाश्रुत्यवगतमपि व्रीह्यर्थत्वं परित्यज्य 'सक्तूञ्जुहोति' इत्यत्रेव द्वितीयायास्तृतीयार्थलक्षकत्वाश्रयणेन अवघाताथं व्रीहय इति युक्तमाश्रयितुम् । एवं पेषणादिवाक्येष्वप्यूह्यम् । इति प्राप्ते, सिद्धान्तयति—

तानि द्वैधं गुणप्रधानभूतानि ॥ ४ ॥

'येषां तूत्पत्तावर्थे' इति पूर्वसूत्रोपात्तान्याख्यातानि तच्छब्दः परामृशति । तान्याख्यातानि गुणप्रधानभूतानि गुणं प्रधानं च कर्म प्रकृत्यंशाभिधेयत्वेन प्राप्तानि द्वैधं द्वेधा । भवते प्राप्त्यर्थाच्चौरादिकात् 'गत्यर्थाकर्मक' इत्यादिना क्तप्रत्यये 'आ धृषाद्वा' इति णिजभावे रूपम् । 'द्वित्र्योश्च धमुञ्' इति विधार्थे द्वैधमिति रूपम् । अल्पाच्तरत्वाद्गुणशब्दस्य पूर्वनिपातः ॥

प्रधानभूतानि तावद्दर्शयति—

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ ५ ॥

'प्रयाजान्यजति' इत्यादिषु यैः यदभिधेयैः प्रयाजादिभिः तदीयमाज्यादिद्रव्यं दृष्टधर्मवत्तया न चिकीर्ष्यते नोत्पादयितुमिष्यते तानि आख्यातानि प्रधानभूतानि द्रव्यापेक्षया तत्साध्यत्वेन प्रधानभूतकर्मप्रतिपादकानि । कुत एतत् । द्रव्यस्य गुणभूतत्वात् आज्यादिद्रव्यस्य प्रयाजादिदृष्टकार्यनिर्वर्तकतया तद्गुणभावं प्राप्तत्वात्; द्रव्यार्थत्वे प्रयाजादीनां तददृष्टस्य द्रव्यादृष्टस्य च कल्पनापत्तेः ॥

गुणभूतानि दर्शयति—

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ ६ ॥

तुशब्दः पूर्ववैषम्ये । 'व्रीहीनवहन्ति' इत्यादिषु यैः यदभिधेयैरवघातादिभिः व्रीह्यादिद्रव्यं वैतुष्यादिदृष्टधर्मवत्तया चिकीर्ष्यते उत्पादयितुमिष्यते, तत्र तेष्ववहन्त्यादिषु गुणः, जातावेकवचनम्, अवघातादि द्रव्यं प्रति गुणः तत्साधनतया प्रतीयेत । कुतः । तस्य अवघातादेः द्रव्यप्रधा-

1. विधेयतायाः— क, घ, ङ.

नत्वात् दृष्टवैतुष्यद्वारा व्रीह्यादिद्रव्यार्थत्वात्॥ न च अवघातादेर्दृष्टवैतुष्यार्थत्वे द्रव्यादवघातादित आपूर्वकल्पनागौरवमिति वाच्यम्। तदा ह्यदृष्टद्वयकल्पना यदि व्रीह्यादिद्रव्यमवघातादिविशिष्टमिह विधीयत इत्युच्यते। नैवमस्ति। क्रत्वर्थतया प्राप्तमेव व्रीह्यादिद्रव्यमुद्दिश्यावघातादिमात्रं विधीयते। अतो न द्रव्याददृष्टकल्पनाप्रसक्तिः। नाप्यवघातादेर्व्रीह्यादिद्रव्यार्थतानिर्वाहायापूर्वकल्पना, दृष्टवैतुष्यद्वारैव तत्संभवात्। एवं च सति नैकस्याप्यपूर्वस्य कल्पनाप्रसक्तिः। न चैवं सत्यवघातादेर्वैतुष्यादिदृष्टार्थत्वस्य लोकत एव सिद्धत्वाद्विधिवैयर्थ्यमिति वाच्यम्, नखविदलनव्यावृत्त्यादिफलकनियमविधानार्थत्वात्। न चैवमपि नियमादृष्टस्य कल्पनीयत्वात्को विशेष इति वाच्यम्, व्रीह्यादिसाधनकावघातादिविधावपि सर्वे द्रव्यविधयो नियमविधय इति चातुर्थिकन्यायेन विशेषणभूतव्रीह्यादिद्रव्यविधेर्नियमार्थतया नियमादृष्टस्यावर्जनीयत्वात्। एवं च व्रीह्यादिसाधनकावघातादेर्दृष्टप्रयोजनाभावादपूर्वार्थतायामवघातादितो[1] व्रीह्यादिद्रव्याच्चापूर्वद्वयकल्पना स्यात्। व्रीह्याद्यर्थावघातादिविधौ तु नियमादृष्टमात्रकल्पनेति लाघवम्। न चैवं नियमादृष्टरूपापूर्वसद्भावान्नास्त्यपूर्वमिति कथमुच्यत इति वाच्यम्, नियमादृष्टस्य क्रियाफलानुनिष्पाद्यत्वेन तस्य फलत्वव्यवहारायोग्यत्वात्। अवघातादितोऽपूर्वं नास्तीत्यनेन फलत्वेनापूर्वाभावस्य विवक्षितत्वादिति दिक्। इति तानिद्वैधाधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते 'स्रुचः संमार्ष्टि' इति। किमयं स्रुचां संमार्गः प्रयाजादिवत्प्रधानकर्म, उत गुणकर्मेति संशयः। पूर्वस्मिन्नधिकरणे दृष्टोपकारकं गुणकर्म अदृष्टोपकारकं प्रधानकर्मेत्युक्तम्। प्रक्षाल्य दर्भेष्वासादितानां स्रुचां वेदाख्यदर्भमुष्टिविशेषाग्रैः संमार्गतो न कंचिद्दृष्टोपकारं पश्यामः। अतः प्रधानकर्मत्वमेव संमार्गस्य प्राप्तम्। यदि च गुणकर्म स्यात्तर्हि दृष्टोपकारकत्वस्य गुणकर्मलक्षणस्य तत्राव्याप्तिः स्यात्, दृष्टोपकाराभावात्। अदृष्टोपकारकत्वस्य प्रधानकर्मलक्षणस्यातिव्याप्तिश्च, अदृष्टोपकारकत्वात्। न च 'कर्तुरीप्सिततमं कर्म' 'कर्मणि द्वितीया' इति व्याकरणस्मृत्या साध्यत्वे विहितया द्वितीयया स्रुचामेव प्राधान्यावगतेः कथं संमार्गस्य प्रधानकर्मतेति वाच्यम्। न हि साध्यत्वं द्वितीयार्थ इति व्याकरणतो गम्यते, ईप्सिततमत्वस्यैव ततोऽवगतेः। व्यभिचाराच्च न साध्यत्वं द्वितीयार्थः। लोके हि तावत् 'बल्बजाञ्छिखण्डकान्कुरु' इत्यस्ति प्रयोगः। बल्बजैस्तृणविशेषैः शिखण्डकान्कुर्विति गम्यते। तत्र बल्बजानां सिद्धतया साध्यत्वाभावेऽपि द्वितीया दृश्यते। अतो व्यभिचारान्न साध्यत्वं द्वितीयार्थः। प्रत्युत साधनत्वमेवाव्यभिचाराद्द्वितीयार्थः, बल्बजानां शिखण्डकसाधनत्वात् 'सक्तून्जुहोति' इत्यत्र सक्तूनां च होमसाधनत्वात्। न च 'कटं करोति' 'घटं करोति' इत्यादौ कटादेरसिद्धस्य साधनत्वासंभवाद्व्यभिचारात्साधन-

४. संमार्जनादीनामप्रधानताधिकरणम्।

1. अपूर्वार्थतयावघातादितो—क, घ.

त्वमपि न द्वितीयार्थ इति वाच्यम्। 'एवमाकारः कटादिः कर्तव्यः' इति बुद्धावुल्लेखानन्तरमेव तत्र कृतेरुत्पत्त्या बुद्धिस्थत्वेन तस्यापि साधनत्वसंभवात्। ततश्च स्रुगादिसाधनसंमार्गविधानाद्दृष्टोपकाराभावाच्च प्रधानकर्मत्वमेव संमार्गस्येति पूर्वपक्षयति—

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ७ ॥

तुशब्दोऽवधारणे। तथा मात्रशब्दोऽपि। 'मात्रं कात्स्न्र्येऽवधारणे' इत्यमरः। धर्मः अदृष्टार्थं कर्म। धर्म एव धर्ममात्रम्। मयूरव्यंसकादित्वात्समासः। अथवा 'संशयमात्रमेतत्' इत्यत्र महाभाष्ये मात्रशब्दः अतात्त्विकत्वे दृष्टः। अतात्त्विकत्वमप्रामाणिकत्वम्। इह तु प्रत्यक्षप्रमाणागोचरत्वरूपमदृष्टत्वं विवक्षितम्। अदृष्टो धर्मो धर्ममात्रम्। पूर्ववत्समासः। दृष्टोपकाररहितमदृष्टार्थं कर्म धर्ममात्रं केवलादृष्टार्थं कर्म, न तु स्विष्टकृद्वदुभयरूपमित्युक्तं भवति। तथाविधसंमार्गविधायकवाक्ये संमार्गः प्रयाजवत्प्रधानकर्म स्यात्, न तु गुणकर्म। कुतः। अनिर्वृत्तेः दृष्टस्योपकारस्य संमार्गादनुत्पत्तेः। एवम् 'व्रीहीन्प्रोक्षति' 'आज्यमुत्पुनाति' 'हविरभिमृशति' 'गार्हपत्यमुपतिष्ठते' इत्यादिष्वप्यूह्यम् ॥

सिद्धान्तयति—

तुल्यश्रुतित्वाद्धेतरैः सधर्म स्यात् ॥ ८ ॥

वाशब्द एवार्थे। संमार्गादितरैः अवघातादिभिः सधर्म स्यात्। समानः साधारणो धर्मः यस्य तत् सधर्म। 'धर्मादनिच्केवलात्' इत्यनिच् समासान्तः। गुणकर्मेत्युक्तं भवति। कुतः। तुल्यश्रुतित्वात्। तुल्या द्वितीया श्रुतिर्यस्य तत्तुल्यश्रुति, तस्य भावस्तत्त्वम्, तस्मात्तुल्यश्रुतित्वात् ॥ अयमाशयः। 'कर्तुरीप्सिततमं कर्म' इति सूत्रतो यद्यपि न साध्यत्वं द्वितीयार्थ इति लभ्यते, तथापि 'तथा युक्तं चानीप्सितम्' इति सूत्रात्तल्लाभः। यथा ईप्सिततमं साध्यरूपापन्नं सत् क्रियया युज्यते, तथा अनीप्सितमपि साध्यरूपेण क्रियायुक्तं कर्मसंज्ञं स्यात्। ईप्सितानीप्सितसाधारणं साध्यत्वमेव कर्मत्वम्, तत्र द्वितीयेत्युक्तं भवति। न चैवं सति साध्यं कर्मेत्येतावतैव सिद्धावीप्सितानीप्सितयोः पृथगुपादानमनर्थकमिति वाच्यम्। एवं सति 'अग्नेर्माणवकं वारयति' इत्यत्र माणवकस्य कर्मसंज्ञापवादेन 'वारणार्थानामीप्सितः' इत्यपादानत्वापत्तौ, 'पुष्पाणि स्पृहयति' इत्यत्र च पुष्पाणाम् 'स्पृहेरीप्सितः' इति संप्रदानत्वापत्तौ, तन्निवृत्तये प्रकृष्टेप्सितस्य कर्मसंज्ञाविधानाय 'कर्तुरीप्सिततमं कर्म' इत्यस्यावश्यकत्वे सति 'विषं भुङ्क्ते' 'ग्रामं गच्छंस्तृणं स्पृशति' इत्यादौ द्वेष्योपेक्ष्ययोरपि संग्रहार्थम् 'तथायुक्तं चानीप्सितम्' इत्यस्यापि आवश्यकत्वात्। न च

साध्यं कर्मेति पक्षेऽपि 'अक्षान्दीव्यति' इत्यत्र द्वितीयायाः साधनत्वे 'अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः' इत्यत्र चाधिकरणत्वे लक्षणाया आवश्यकत्वादनीप्सितेऽपि लक्षणा किं न स्यादिति वाच्यम्। तत्साधारणप्रवृत्तिनिमित्तस्य केनापि वक्तुमशक्यत्वेन तत्रागत्या लक्षणास्वीकारेऽपि संभवन्मात्रविषयानुगमस्य त्यक्तुमनुचितत्वात्। दृष्टश्च लोके साध्यत्वे द्वितीयायाः प्रयोगः 'कटं करोति' इत्यादौ। न ह्यत्र साधनत्वं द्वितीयार्थ इति शक्यते वक्तुम्, असिद्धत्वात्। न च बुद्धिस्थत्वेन साधनत्वसंभवः। बुद्धिस्थत्वं हि बुद्धौ विषयत्वमात्रम्, न तु वस्तुसद्भावः। अतः कथं तन्मात्रेण सिद्धत्वनियतं साधनत्वं संभवति। तथा वेदेऽपि 'व्रीहीनवहन्ति' इत्यादौ वैतुष्यादिविशिष्टत्वेन साध्ये व्रीह्यादौ द्वितीया प्रयुज्यते। ततश्च प्रयोगानुगृहीतव्याकरणानुसारेण साध्यत्वमेव द्वितीयार्थ इत्यध्यवस्यामः। यदि च द्वितीयायाः साधनत्वमर्थः स्यात्तर्हि 'परशुना च्छिनत्ति' इत्यत्र परशुशब्दाद्वितीया स्यात्; करणत्वे तृतीयाविधानं चानर्थकं स्यात्। न च साध्यत्वोपलक्षितसाधनत्वं द्वितीयार्थ इति नोक्तदोषः, परशोस्तत्र सिद्धरूपत्वादिति वाच्यम्। लाघवेन साध्यत्वस्यैव द्वितीयावाच्यत्वोपपत्तेः। ननु द्वितीयायाः साध्यत्वार्थकत्वेऽपि स्रुगादीनां शेषित्वप्रत्यायकाभावात्कथं संमार्गादीनां गुणकर्मत्वम्, गुणकर्मत्वस्य पारार्थ्यलक्षणशेषत्वनियतत्वात्। पारार्थ्यं परोद्देशप्रवृत्तकृतिव्याप्यत्वम्। तच्च समीहितपुरुषव्यापारगोचरीभूतेन येन समीहितं साध्यते तत्त्वम्। समीहितपुरुषव्यापारोद्देश्यसमीहितत्वं च शेषित्वम्। न चैतत्साध्यत्वाभिधायिन्या द्वितीययोच्यत इति वक्तुं शक्यते। सत्यं न शेषित्वं द्वितीयायाः साक्षात्प्रतिपाद्यम्, किंतु विधित एव तद्गम्यम्। तत्र द्वितीयायाः साहायकमात्रम्। तच्च साध्यत्वाभिधायित्वेऽपि संभवति। प्रवर्तनात्मिका शब्दभावना हि विधिः। प्रवृत्तिहेतुर्व्यापारः प्रवर्तना। तथा च न समीहितसाधनादन्यत्र चेतनः प्रवर्तयितुं शक्यत इति विधिः स्वस्य प्रवर्तनात्वसिद्ध्यर्थं स्वभाव्याया अर्थभावनायाः कर्तृव्यापारात्मिकायाः समीहितभाव्यकत्वं गमयन्भावनाकरणत्वञ्च समीहितोद्देशप्रवृत्तकर्तृव्यापारगोचरत्वं गमयति। तत्र भाव्यं सामान्यात्मना भावनयावगतं तद्विशेषरूपेण तु स्रुगादिपदैरवगम्यत इति न तद्वैयर्थ्यम्। ततश्च समीहितत्वं साध्यत्वं चेति द्वयं शेषित्वबोधेऽपेक्षितम्। तत्र द्वितीयया साध्यत्वं विधिबलाच्च समीहितत्वं गम्यत इति द्वितीयासद्रीचीनविधितः शेषित्वबोधः संभवति। ननु विधिना समीहितं बोध्यत इत्युक्तम्; स्रुगादीनां क्रतुसाधनत्वेन समीहितत्वस्य सिद्धत्वात्, स्वतश्च तेषामसमीहितत्वात्, स्रुगादिसमीहितमित्येवंरूपेण बोधने कर्मपदरहितसंमार्गविधेरसामर्थ्यापत्तिरिति चेत्, नैष दोषः। यद्धि वस्तुतः समीहितं स्रुगादि तस्य संमार्जनादिक्रियोद्देश्यत्वमेव विधिना बोध्यते। एवं च क्रतुसाधनत्वेनेच्छाविषयस्यापि स्रुगादेरुद्देश्यत्वं विना परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणपारार्थ्यं संमार्गादेर्न संभवतीति तत्सिद्ध्यर्थं विधिगम्यं समीहितत्वमुद्देश्यत्वपर्यन्तमाद्रियते, न त्विच्छाविषयत्वमात्रमिति न दोषः। यत्र तु साध्यत्ववाचिद्वितीया नास्ति

'यजेत स्वर्गकामः' इत्यादौ तत्र साध्यत्वमुद्देश्यत्वं च द्वयमपि विधित एवावगम्यत इति ध्येयम् । 'बल्बजाञ्छिखण्डकान्कुरु' इत्यादौ च बल्बजादीनां शिखण्डकाद्याकारेण साध्यत्वान्न व्यभिचारः ।

कथं तर्हि 'सक्तून्जुहोति' इत्यत्र द्वितीयानिर्वाह इत्याशङ्क्य निराकरोति—

द्रव्योपदेश इति चेन्न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ ९ ॥

सक्तुद्रव्यस्य होमं प्रति साधनत्वेन गुणभूतस्य द्वितीयया उपदेशः कथमिति चेत्, तन्न । कुतः । तदर्थत्वात् । सक्तुद्रव्यस्य होमार्थत्वात् होमं प्रति साधनत्वेन शेषतया भाव्यत्वाभावेन तस्य द्रव्यस्य तच्छेषित्वासंभवात् । यद्धि विधिव्यापारं विनैव पुरुषस्य समीहितं तस्य विधीयमानसाधनं प्रत्युद्देश्यत्वमात्रं विधिगम्यम् । न च सक्तुद्रव्यं प्रमाणान्तरेणाभिलषितं येन विधित उद्देश्यत्वसिद्धिमाश्रित्य भाव्यतयान्वीयेत । नैतदस्ति, सक्तुद्रव्यस्य भूतोपयोगित्वेन प्रतिपाद्यतया वा भाव्युपयोगित्वेन क्रतुसाधनतया वा अभिलषितत्वाभावात् । अतो भाव्यत्वेनान्वयासंभवेन साधनत्वेनैव सक्तुद्रव्यस्यान्वयो वाच्यः । द्वितीया च लक्षणया तत्र निर्वाह्या, आरोपितसाध्यत्वविवक्षया वा । अत एव 'विवक्षातः कारकाणि भवन्ति' इत्याश्रित्य 'स्थाली पचति' 'परशुश्छिनत्ति' इत्यादि साधितं महाभाष्यादौ । स्रुगादेस्तु क्रतुसाधनरूपेणाभिलषितस्य विधीयमानसंमार्गं प्रत्युद्देश्यत्वं विधिगम्यमवलम्ब्य संमार्गभावनायां समीहितभाव्याकाङ्क्षिण्यां भाव्यत्वेनान्वय उचितः । ननु स्रुगादेः साध्यत्वं न स्वरूपेण संभवति नाप्युपकारकत्वेन, अवहननादिजन्यवैतुष्यरूपोपकारवदिहोपकारानुपलब्धेः इत्यत आह—तस्य चेति । तस्य च स्रुगादेः शेषभूतत्वात् अदृष्टोपकारद्वारा साधकं संमार्गं प्राप्तत्वात् । अदृष्टोपकारविशिष्टत्वेन स्रुचां संमार्गसाध्यत्वादिति यावत् । अदृष्टोपकारास्तित्वे दृष्टान्तयति—लोकवदिति । यथा लोके नागरिकाणां राजतदमात्यादीनां ग्राममभ्यागतानां नीराजनरूपपर्यग्निकरणेनादृष्टोपकारः क्रियते तद्वत् । न च संमार्गस्य गुणकर्मत्वे प्रधानगुणकर्मलक्षणस्य तत्राव्याप्त्यतिव्याप्ती स्यातामिति वाच्यम् । न हि 'यैर्द्रव्यं न चिकीर्ष्यते' इत्यादिना सूत्रभागेन प्रधानगुणकर्मणोर्लक्षणे उच्येते, अनपेक्षितार्थत्वप्रसङ्गात् । अपूर्वसद्भावासद्भावविषयविवेचनमेव हि तत्र क्रियते, दृष्टोपकारिष्वपूर्वं नास्ति तदन्यत्र त्वस्तीति तावन्मात्रस्यैव भावार्थाधिकरणापवादत्वेन प्रतिपित्सितत्वात् । तथा च दृष्टोपकारि गुणकर्मापूर्वानाधायकम्, अदृष्टोपकारि तु प्रधानकर्मापूर्वाधायकमिति तदर्थः पर्यवस्यतीति न दोषः । फलभावनाकरणयागादिसाधनद्रव्यगतदृष्टादृष्टान्यतरसंस्कारजनकं कर्म गुणकर्म, यथा अवघातादि संमार्गादि च । फलभावनाकरणयागादौ द्रव्यनैरपेक्ष्येण साक्षादपूर्वाधायकं कर्म प्रधानकर्मेति तु तल्लक्षणे बोध्ये ।

तस्मात्संमार्गादि गुणकर्मेति सिद्धम्। प्रयोजनं पूर्वपक्षे स्रुग्भिः साधनैर्यस्य कस्यचित्संमार्गः, 'वेदाग्रेण स्रुचः संमार्ष्टि' इति तु संमार्गान्तरम्; सिद्धान्ते त्वेकमित्याधूल्यम्। इति संमार्गाधिकरणम्॥

सन्ति ज्योतिष्टोमे स्तोत्राणि 'बहिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'माध्यंदिनेन पवमानेन स्तुवते' 'पृष्ठैः स्तुवते' 'आर्भवपवमानेन स्तुवते' 'यज्ञायज्ञीयेन स्तुवते' इति। सन्ति च शस्त्राणि 'आज्यं शंसति' 'प्रउगं शंसति' 'मरुत्वतीयं शंसति' 'निष्केवल्यं शंसति' वैश्वदेवं शंसति' 'आग्निमारुतं शंसति' इति होतुः षट् शस्त्राणि। तथा मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानामेकैकस्य द्वे द्वे इति षट् शस्त्राणि। प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्। अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्। अभिधानं शाब्दबोधः। वस्तुतस्तु गुणिनि गुणसंबन्धाभिधायकप्रगीतमन्त्रोच्चारणं स्तोत्रम्, अप्रगीततथाविधशब्दोच्चारणं शस्त्रम्। तदेतानि स्तोत्रशस्त्राणि च किं स्तुत्यदेवताप्रकाशनरूपसंस्कारार्थानि गुणकर्माणि, उत अदृष्टार्थत्वात्प्रधानकर्माणीति संशयः। तत्र पूर्वपक्षयति—

५. स्तोत्रादिप्राधान्याधिकरणम्।

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्॥ १०॥

स्तुतेति भावे क्तः। कर्तरि षष्ठी। स्तोत्रत्वेन शस्त्रत्वेन चानुगमाद्विवचनम्। शाब्दबोधविशेषात्मकस्तोत्रशस्त्रकर्तृकः प्राकट्यापरनामधेयज्ञाततात्मकः प्रकाशनरूपः संस्कारः कर्मसमवेते इन्द्रादौ स्यात्। कुतः। देवताभिधानत्वात् 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्राणामिन्द्रादिदेवतागुणवर्णनपराणामपि मुख्यतात्पर्यविधया तद्देवताभिधायित्वात्[1]। गुणप्रकाशकानामप्येषां गुणिप्रकाशन एव तात्पर्यादिति यावत्। यथा 'अग्निर्मूर्धा दिवः' इत्यादियाज्यासु मूर्धत्वादिगुणप्रकाशने सत्यपि न तत्र तात्पर्यम्, किंतु गुणिप्रकाशन एव तात्पर्यम्; तद्वदिहापि गुणप्रकाशनमतन्त्रीकृत्य तन्मुखेन गुणिप्रकाशन एव तात्पर्यं दृष्टार्थत्वायाभ्युपेयम्। गुणसंबन्धकीर्तनमात्रेण स्तुतित्वं चोपपद्यते। तुशब्दोऽनन्तरोक्तसंमार्गादिवैषम्ये। संमार्गादि तावत्स्रुगादावपूर्वाधायकम्, स्तुतशस्त्रे तु देवतासु प्रकाशनरूपदृष्टसंस्काराधायके। तस्माद्गुणकर्मणी स्तोत्रशस्त्रे इति। अथवा स्तुतशस्त्रयोरिति विषयनिर्देशः। स्तुतं गुणगुणिसंबन्धाभिधायकप्रगीतशब्दोच्चारणम्। अप्रगीततथाविधशब्दोच्चारणं शस्त्रम्। स्तुतत्वेन शस्त्रत्वेन चानुगमाद्विवचनम्। 'बहिष्पवमानेन स्तुवते' इत्यादिवाक्ये 'आज्यं शंसति' इत्यादिवाक्ये चेति यावत्। संस्कारो[2] दृष्टः प्रकाशनरूपः इन्द्रादिषु गम्यत इति व्याख्येयम्। देवताभिधानत्वादिति तु पूर्ववद्व्याख्येयम्। युक्तं चैतत्। स्तौतिशंसत्योः शाब्दबोधप्रधानत्वे हि

1. अभिधायकत्वात्—क, घ. 2. दृष्टप्रयोजनरूपः—ख.

तत उत्पद्यमानस्य दृष्टसंस्कारस्येन्द्रादिदेवतास्वदर्शनेन पूर्वपक्षानुन्मेषः स्पष्ट एव। न च प्रकाशनमेव तत्र दृष्टसंस्कार इति वाच्यम्। तस्य शाब्दबोधादनन्यत्वेन तत उत्पत्त्यनुपपत्तेः। शाब्दबोधात्प्राकटथापरनामधेयज्ञाततारूप्यदृष्टसंस्कारो देवतासु स्यादिति व्याख्यानं तु क्लिष्टमेव, ज्ञानविषयतातिरिक्तज्ञाततायाः सर्वासंमतत्वात्। किंच स्तौतिशंसत्योः प्रगीताप्रगीतमन्त्रसाध्यबोधपरत्वं वदन्प्रष्टव्यः—शाब्दबोधः किं श्रोतृगतो विवक्षितः प्रयोक्तृगतो वेति। नाद्यः, 'जानाति' 'बुध्यते' इत्याद्याख्यातस्य धात्वर्थज्ञानाश्रय इव गुणवत्त्वबोधाश्रये श्रोतर्यपि 'स्तौति' 'शंसति' इति प्रयोगापत्तेः। न चेष्टापत्तिः, 'अयं राजानं स्तौति; राजा च तत्स्तुत्या हृष्यति' इति स्तोतृहृष्यद्वयक्तिभेदानुभवविरोधात्। न द्वितीयः; श्रोतृगतगुणविषयज्ञानस्य प्रयोक्तरि सत्त्वेऽपि श्रोतरि तदभावेन तस्य तत्कृतहर्षासिद्धेः, 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्राणां संबोधनविभक्त्या इन्द्रादिदेवतां प्रति गुणवत्त्वज्ञापनपराणां शाब्दमर्यादया प्रयोक्तरि शाब्दबोधजननाक्षमताया मन्त्राधिकरणे निरूपितत्वाच्च; 'वन्दिनो राजानं गद्यपद्यैः शुकवत्स्तुवन्ति' इति शाब्दबोधशून्यानामपि प्रयोक्तृणां स्तोतृत्वप्रसिद्धेश्च; 'स्वस्त्यस्तु सखि ते जिह्वे विद्यादातुरुमापतेः। स्तवमुच्चतरं ब्रूहि जयतामिव दुन्दुभिः' 'जिह्वा काकतिवीररुद्रनृपतेः स्तोत्राय संनह्यति' इत्यादीनां स्तुतेरुच्चारणप्रधानत्व एव सामञ्जस्याच्च। अत एवैतदधिकरणारम्भे 'गुणवचनं स्तवनं शंसनं च' इति भाष्यम्, 'गुणगुणिसंबन्धकीर्तनं च स्तुतिः' इति वार्तिकम्, 'शब्दोच्चारणमात्रस्य स्तुतित्वाव्यपदेशात्' इति तदनन्तरवार्तिकम्, 'अभिधानरहितशब्दोच्चारणायां स्तुतित्वं हीयते' इत्यर्थ इति न्यायसुधा च संगच्छते। अभिधानरहितशब्दोच्चारणस्य स्तुतित्वाभावोक्त्या अभिधानघटितशब्दोच्चारणं स्तुतिरिति लभ्यते। न चैवमुच्चारणस्य स्तुतित्वेऽपि 'कवतीषु स्तुवते' इति कथं कवतीनामृचां स्तुत्याधारता, उच्चारणस्य पुरुषनिष्ठत्वेनाक्षरनिष्ठत्वाभावादिति वाच्यम्। न हि केवलं शब्दोच्चारणमेव स्तुतिः। किंतु गुणगुणिसंबन्धाभिधायकशब्दोच्चारणमेव सा। तत्र विशेषणीभूतगुणगुणिसंबन्धाभिधानं च तत्प्रतीत्यनुकूलशब्दनिष्ठव्यापाररूपम्, 'शब्दोऽर्थमभिधत्ते' इति व्यवहारदर्शनात्। एवं च कवतीनामुच्चारणात्मकपुरुषव्यापाररूपविशेष्यांशाधारत्वाभावेऽपि विशेषणीभूतगुणगुणिसंबन्धाभिधानरूपशब्दनिष्ठव्यापाराधारत्वमादाय सप्तमी युज्यते प्रयोक्तुम्। उक्तं च वार्तिके 'गुणगुणिसंबन्धाभिधानक्रियाया अक्षरारूढत्वात्कवतीष्विति सप्तमी युज्यते' इति। विवृतं चेदं न्यायसुधायाम् 'गुणवत्त्वज्ञापनं स्तुतिः। ज्ञापनं च ज्ञानहेतुर्व्यापारः। स चाक्षराणामभिधानाख्यः, पुरुषस्याप्यभिधायकाक्षरोच्चारणाख्यः। तत्र पुंव्यापारेऽक्षराणामकर्तृत्वेनाधारत्वायोगेऽप्यभिधानाख्यव्यापारे विशेषणेऽक्षराणां कर्तृत्वेनाधारत्वात्तन्मुखेन पुंव्यापारोच्चारणाधारत्वं युक्तम्' इति। तस्मादुणगुणिसंबन्धबोधफलकप्रगीतशब्दोच्चारणं स्तुतिः। अप्रगीततदुच्चारणं शंसनम्। शाब्दबोधश्च श्रोतृनिष्ठ एव। इन्द्रादयश्चात्र श्रोतारः। तेषां च विग्रहादिपञ्चकं जैमिन्यभिमतमेवेति षष्ठे वक्ष्यते। एवं च शक्वीयाणा-

भृचामाद्यन्तवर्णसंधानं संगच्छते। शंसतेः प्रयोक्तृगतशाब्दबोधप्रधानत्वे हि पूर्वपूर्वस्या ऋचोऽर्थावबोधे व्याप्रतचित्तस्य प्रयोक्तुरुत्तरोत्तरस्या ऋचः सांतत्यानुपपत्तिरित्यादि मन्त्राधिकरणेऽवोचाम। तदेवमेतादृशे स्तुतशस्त्रे देवताप्रकाशनरूपदृष्टार्थे गुणकर्मणी ॥ इति प्राप्ते, सिद्धान्तयति—

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ ११ ॥

देवतानाम। इन्द्रादिपदम् तद्घटितमन्त्रकस्तुतशस्त्रयोर्विधानं देवतानामचोदना। सा अर्थेन इन्द्रादिप्रकाशनरूपप्रयोजनवशेन अपकृष्येत महेन्द्रग्रहयज्यादिसंनिधौ स्थिता स्वस्थानाच्च्यावयित्वा यत्रेन्द्रस्तत्रोत्कृष्येत पूषानुमन्त्रणवत्। कुतः। अर्थस्य गुणभूतत्वात्। निरूप्यनिरूपकभावे षष्ठी। इन्द्रादिदेवतारूपमर्थं प्रति तत्प्रकाशकमन्त्रस्तुतशस्त्रयोः शेषभूतत्वात् गुणानां च प्रधानानुसारित्वात्। प्रधानकर्मत्वे तु तयोः प्रयाजादिवददृष्टद्वारा क्रत्वर्थतया यागीयदेवतार्थत्वाभावान्नोत्कर्षः। अतो गुणकर्मत्वपक्षोऽनुपपन्न इति भावः ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

वशावद्वा गुणार्थं स्यात् ॥ १२ ॥

वाशब्द उत्कर्षं निराचष्टे। न स्यादुत्कर्षः। कुतः। यतः 'माहेन्द्रं ग्रहं गृह्णाति' इत्यादिष्विन्द्रादय एव ग्रहयजिदेवताः। तत्र महत्त्वादिगुणकीर्तनार्थमेव महदादिपदम्, यथा 'राजा' 'महाराजः' इति। न हि राज्ञो महाराजोऽतिरिच्यते। अतोऽत्रैकदेशप्रकाशकः 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्रो नासमवेतार्थकः वशावत्। 'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत' इत्यजावशाशब्दचोदिते कर्मणि 'छागाया वपाया मेदसोऽनुब्रूहि' इत्यादिनिगममन्त्रः समवेतो भवति, गुणस्याभेदकत्वात्। तद्वदिहापि। तथा चेन्द्रमहेन्द्रयोरभेदादिन्द्रप्रकाशनेऽपि महेन्द्रसंस्कारसंभवान्नोत्कर्ष इति भावः ॥

सिद्धान्ती परिहरति—

न श्रुतिसमवायित्वात्[1] ॥ १३ ॥

इन्द्रमहेन्द्रयोरभेदादनुत्कर्ष इति न, किंतु स्यादेवोत्कर्षः। कुतः। श्रुतिसमवायित्वात्। श्रुत्या विधिगतदेवतापदेनैव देवताया निगमानुवृत्त्या कर्मान्वयित्वात्। देवता हि न यत्किंचिच्छब्देन निगमेषु निर्देश्या, किंतु विधिवाक्यश्रुतशब्देनैवेति 'विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन

1. समवायत्वात्.

चोदना' इत्यत्र दशमे वक्ष्यते। तन्न्यायेन वस्तुत इन्द्रो महेन्द्रादभिन्नश्चेदपि महेन्द्रो निगमेषु महेन्द्रशब्देनैव निर्देश्य इतीन्द्रस्तुत्या महेन्द्रसंस्कारासंभवादुत्कर्षो भवेदित्यर्थः ॥

विधिगतशब्देनैव निगमेषु देवतोपलक्षणीयेत्यत्र युक्त्यन्तरमाह—

व्यपदेशभेदाच्च ॥ १४ ॥

'बहु दुग्धीन्द्राय देवेभ्यो हविः' इति 'बहु दुग्धि महेन्द्राय देवेभ्यो हविः' इति इन्द्रमहेन्द्रयोर्निर्देशभेदोऽस्ति। तत्र द्वेधा मन्त्रस्य तैत्तिरीयके पाठः। 'इन्द्राय देवेभ्यो हव्यम्' इत्यच्छिद्रमन्त्रसमाम्नाये। 'हविरिति वाचं विसृजते' इति ब्राह्मणे। विधिगतशब्देनैव निगमेषु देवतोपलक्षणमिति नियमाभावे ऐन्द्र्यागे माहेन्द्र्यागे चोभयोर्मन्त्रयोर्विकल्पः स्यात्। स चाष्टदोषदुष्टो नाश्रयितुमुचितः। उक्तनियमाश्रयणे तु मन्त्रयोस्तयोरैन्द्रमाहेन्द्र्यागभेदेन व्यवस्थितत्वान्नायं दोषः। तस्मादिह स्यादुत्कर्षः ॥

उक्तनियमानाश्रयणे बाधकान्तरमाह—

गुणश्चानर्थकः स्यात् ॥ १५ ॥

विधिगतशब्दाच्छब्दान्तरेणापि निगमेषु देवतोपलक्षणे सति विधिवाक्ये गृह्यमाणो गुणः अनर्थक एव स्यात्. उक्तेऽनुक्ते च गुणे इन्द्रादेः कर्मसमवायसिद्धेः। उक्तनियमाश्रयणे तु विधिवाक्ये गुणग्रहणमर्थवत्।

उक्तनियमानाश्रयणे बाधकान्तरमाह—

तथा याज्यापुरोरुचोः ॥ १६ ॥

याज्यायाः पुरस्ताद्रोचते प्रकाशत इति पुरोरुक्पुरोनुवाक्या। पुरोरुक्च याज्या च याज्यापुरोरुचौ। अल्पाच्तरत्वाद्याज्याशब्दस्य पूर्वनिपातः। दर्शपूर्णमासयोः 'एन्द्रसानसिं रयिम्' 'प्रससाहिषे पुरुहूतशत्रून्' इत्यैन्द्र्याज्यानुवाक्ययोः 'महाꣳ इन्द्रो य ओजसा' 'भुवस्त्वमिन्द्र ब्रह्मणा महान्' इति माहेन्द्र्याज्यानुवाक्ययोश्च भेदेनाम्नानादपि तथा विधिगतशब्देनैव निगमेषु देवतोपलक्षणम्। अन्यथा द्वयोरपि युगलयोरुभयत्र विकल्पः स्यात्। तस्माद्विधिगतशब्देनैव देवतोपलक्षणमिति नियम आस्थेयः।

अथ यदुक्तम् 'वशावद्वा गुणार्थं स्यात्' इति तत्राह—

वशायामर्थसमवायात् ॥ १७ ॥

वशायाम् अजावशाशब्दचोदिते कर्मणि विधिगतवशाशब्दं परित्यज्य च्छागाशब्देन तदुपलक्षणं युक्तम् । कुतः । अर्थसमवायात् । वशाशब्दार्थे विशेषरूपे च्छागाशब्दस्य चोदकप्राप्तस्य सामान्यरूपेण समवायात् संभवात् । वशाशब्देन निगमेषु हविरुपलक्षणे चोदकबाधप्रसङ्गात् । इह तु माहेन्द्रविधिगतमहत्त्वगुणपरित्यागे बाधकं न किंचित्पश्यामः । तस्मान्माहेन्द्रमिन्द्रशब्दघटितमन्त्रकं स्तोत्रं शस्त्रं च प्रकाशयितुं न शक्नोतीत्युत्कर्षः स्यादेव । अतो न गुणकर्मत्वं स्तुतशस्त्रयोः, किंतु प्रधानकर्मतैव ॥

स्यादेतत् । गुणकर्मतैव स्तुतशस्त्रयोरस्तु । न चैवं सति माहेन्द्रग्रहयजिसंनिधावाम्नातैन्द्रमन्त्रकस्तोत्रशस्त्रयोरुत्कर्षः स्यादिति वाच्यम् । इष्टापत्तेः । न च क्रमसंनिध्योर्बाधः शङ्क्यः, ऐन्द्रमन्त्रस्य महेन्द्रप्रतिपादनासमर्थत्वेन यत्रेन्द्रस्तवोत्कर्षस्य सामर्थ्यरूपलिङ्गवशेन क्रमसंनिधी बाधित्वा अश्रयितुं युक्तत्वात् । लिङ्गस्य क्रमसंनिध्यपेक्षया बलवत्तायास्तृतीये श्रुतिलिङ्गादिसूत्रे निरूपयिष्यमाणत्वादिति पूर्वपक्षी प्रत्यवतिष्ठते—

[1]यत्रेति वार्थवत्त्वात्स्यात् ॥ १८ ॥

वाशब्दः प्रत्यवस्थितौ । यत्रशब्देन तदादिवाक्यं लक्ष्यते । यत्रेन्द्रस्तत्रैन्द्रमन्त्रकस्तुतशस्त्रयोरुत्कर्षोऽस्त्विति ब्रूमः । कुतः । अर्थवत्त्वात् ऐन्द्रमन्त्रकस्तुतशस्त्रयोर्माहेन्द्रग्रहयजेरन्यत्रैव यागीयदेवताप्रकाशनसमर्थत्वेन प्रयोजनवत्त्वात् । अतः स्तुतशस्त्रयोर्गुणकर्मत्वमेव स्यात् ॥

नन्वैन्द्रादिमन्त्राणां येषामन्यत्र प्रयोजनं संभाव्यते तेषामुत्कर्षः संभाव्यताम् । येषां तु मन्त्राणां न प्रकृतकर्मसमवेतदेवताप्रकाशनमन्यत्र च नास्ति प्रयोजनं तेषां कथमुत्कर्षसंभवः । अतस्तेषामदृष्टार्थत्वमेवानिच्छताप्यभ्युपेयम् । यथा आग्निमारुतशस्त्रे 'याम्याः शंसति' 'पित्र्याः शंसति' इत्यादिविहिताः 'कुषुम्भकसूक्तं शंसति' 'अक्षसूक्तं शंसति' 'मूषकसूक्तं शंसति' इत्यादिविहिताश्च, तेषामदृष्टार्थत्वे च तन्न्यायेन इतरेषामपि सर्वेषां स्तुतशस्त्राणामदृष्टार्थत्वेन प्रधानकर्मतैवोचितेति सिद्धान्ती शङ्कते—

[2]न त्वाम्नातेषु ॥ १९ ॥

तुशब्दोऽवधारणे । आग्निमारुतादावाम्नातेषु केषुचिद्याम्यादिमन्त्रेषु प्रकृतकर्मणोऽन्यत्र नैवार्थवत्त्वमस्ति । अतः प्रकृतकर्मण्येवादृष्टार्थत्वं वक्तव्यम् । तन्न्यायेन सर्वेषामपीत्यर्थः ॥

1. यत्रेति. 2. नेदं दृश्यते क्वचिदन्यत्र.

पूर्वपक्षी परिहरति—

[1]दृश्यते ॥ २० ॥

याम्यादीनामुत्कृष्टानामन्यत्रार्थवत्त्वं दृश्यत इत्यर्थः । याम्यपित्र्यादिमन्त्राणां यमयज्ञमहापितृयज्ञादौ संभवत्यर्थवत्त्वम् । मण्डूकसूक्तस्य महाग्निचयनेऽर्थवत्त्वम्, तत्र 'मण्डूकेन विकर्षति' इति विधानात् । अक्षसूक्तस्य राजसूयेऽर्थवत्त्वम्, तत्र 'अक्षैर्दीव्यति' इति विधानात् । मूषकसूक्तस्य यूपैकादशिन्यामर्थवत्त्वम्, तत्र 'आखुस्ते पशुरिति ब्रूयात्' इति विधानात् । कुषुम्भकसूक्तादीनां तु वाचःस्तोमे आश्विनशस्त्रे चार्थवत्त्वम्, 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचःस्तोमे पारिप्लवं शंसति' इति विधानात् । पारिप्लवं यथेष्टम् । 'यस्याश्विने शस्यमाने सूर्यो नाविर्भवति, सर्वा अपि दाशतयीरनुब्रूयात्' इति विधानाच्च । ऋग्वेदशाकलसंहिता बाष्कलसंहिता च दशतयमित्युच्यते दशमण्डलात्मकत्वात् । तत्रत्या ऋचो दाशतय्यः । न चाश्विनशस्त्रे वाचःस्तोमे चोत्कृष्टानामप्यदृष्टार्थत्वमेव स्यादिति वाच्यम् । क्वचिददृष्टार्थत्वे सत्यपि सत्यां गतौ तथाश्रयितुमनुचितत्वात् । तस्मादैन्द्रादिमन्त्राणां प्रकृतमहेन्द्रादिग्रहदेवताप्रकाशनेऽसामर्थ्येऽप्यन्यत्रोत्कर्षेणार्थप्रकाशनार्थत्वसंभवाद्गुणकर्मणी स्तुतशस्त्रे इति प्राप्ते, सिद्धान्ती गुणकर्मत्वे मुख्यदोषं ब्रुवन्प्रधानकर्मत्वं समर्थयते—

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २१ ॥

अपि वेति पक्षव्यावृत्तौ । न गुणकर्मणी स्तुतशस्त्रे । कुतः । श्रुतिसंयोगात् । न हि स्तौतिशंसती गुणाभिधानमात्रे वर्तेते, किंतु प्राधान्येन गुणाभिधाने । अत एव 'देवदत्तो वक्रकेशान्तः' इति वक्तारं स्तोतारं व्यवहरन्ति लोके, न तु 'वक्रकेशान्तं देवदत्तमानय' इति वक्तारमपि । अतो गुणिप्रकाशनार्थत्वे 'स्तौति' 'शंसति' इति श्रुतिबाधप्रसङ्गादिह दृष्टप्रयोजनमपि गुणिदेवताप्रकाशनं परित्यज्यादृष्टार्थत्वमेवाश्रयितुं युक्तम् । एवं च सति प्रकरणे प्रकृत एव कर्मणि । कर्मणि ल्युट् । स्तौतिशंसती स्तुतिशंसने क्रियोत्पत्तिं स्वकार्यमदृष्टोत्पत्तिं विदध्यातां साधयेताम्, बाधकाभावात् । गुणिदेवताप्रकाशनार्थत्वे तु स्तौतिशंसती यत्र गुणिनी देवता तत्रैव स्वकार्यमर्थप्रकाशनं साधयेताम् । ततश्च लिङ्गमनुगृह्येत । श्रुतिस्तु बाध्येत । क्रमसंनिधी च बाध्येयाताम् । अदृष्टार्थत्वे तु माहेन्द्रग्रहयजावपि ऐन्द्रमन्त्रकस्तुतशस्त्रयोः समावेशसंभवान्न लिङ्गक्रमसंनिधीनामपि बाधः । नापि श्रुतेः । तस्मात्प्रधानकर्मणी एव स्तुतशस्त्रे ॥

1. नेदं दृश्यते क्वचिदन्यत्र.

तत्र युक्त्यन्तरमाह—

शब्दपृथक्त्वाच्च ॥ २२ ॥

'द्वादशस्तोत्रशस्त्रोऽग्निष्टोमः' इति संख्याशब्देन स्तोत्रशस्त्रकर्मणां पार्थक्यमवगम्यते । तच्चैतत्तदृष्टार्थत्वे घटेत । प्रकाशनार्थत्वे च प्रकाशनस्यैकत्वान्न संख्योपपद्येत । विशेषाश्रयणे च प्रत्यृचं प्रतिपदमिति प्रसज्येत । अदृष्टार्थत्वे त्वपूर्वभेदमादाय संख्योपपत्तिः । अथवा अर्थप्रकाशनार्थत्वे उत्कर्षापत्त्या द्वादशशब्देनावगम्यं पृथक्त्वं भेदो नोपपद्येत इति व्याख्येयम् ॥

इतोऽपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह—

अनर्थकं च तद्वचनम् ॥ २३ ॥

गुणकर्मत्वे अग्निष्टुति 'आग्नेया ग्रहा भवन्ति' इति ग्रहचोदनयैवाग्नेयीनामृचां प्रकाशनार्थत्वस्य सिद्धतया 'आग्नेयीषु स्तुवते' इति पुनर्वचनम् अनर्थकं स्यात् । अदृष्टार्थत्वे त्वनाग्नेयीनामपि प्रकृतितः प्राप्तौ तन्निवृत्त्यर्थं तदावश्यकम् ।

इतोऽपि ते प्रधानकर्मणी इत्याह—

अन्यश्चार्थः प्रतीयते ॥ २४ ॥

'स्तुतमनुशंसति' इति 'संबद्धे वै स्तोत्रशस्त्रे' इति च स्तुतशस्त्रयोः पौर्वापर्यसंबन्धवचनादपि दृष्टादन्योऽर्थः प्रतीयते । प्रकाशनरूपदृष्टार्थत्वे तस्यैकत्वेनैकार्थत्वाद्विकल्पापत्तौ पौर्वापर्यसंबन्धानुपपत्तेः ॥

इतोऽपि ते प्रधानकर्मणी इत्याह—

अभिधानं च कर्मवत् ॥ २५ ॥

'अग्निहोत्रं जुहोति' 'समिधो यजति' 'तनूनपातं यजति' इत्यादिप्रधानकर्मणीव द्वितीयया ईप्सिततमत्वाभिधानं दृश्यते 'पृष्ठान्युपयन्ति' 'प्रउगं शंसति' 'निष्केवल्यं शंसति' इत्यादि। तदेतददृष्टार्थत्व एवोपपद्यते । अदृष्टार्थत्वे हि सति क्रतुफलं प्रत्यदृष्टमात्रद्वारा प्रत्यासन्नसाधनत्वादीप्सिततमत्वम्, दृष्टार्थत्वे तु द्रव्यदेवतादिप्रणाडिकया कर्मफलं प्रति व्यवहितसाधनत्वान्नेप्सिततमत्वम् । अतोऽपि प्रधानकर्मतैव ॥

इतोऽपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह—

फलनिर्वृत्तिश्च[1] ॥ २६ ॥

'स्तुतस्य स्तुतमसि' 'शस्त्रस्य शस्त्रमसि' इति मन्त्रयोः 'इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्, सा मे सत्याशीर्देवेषु भूयाद्ब्रह्मवर्चसं मा गन्म्यात्' इति स्तुतशस्त्रे प्रति फलनिष्पत्तिः प्रार्थ्यते । तदिदं स्तुतशस्त्रयोः प्रधानकर्मत्वे घटते । देवताप्रकाशनार्थत्वे तु देवतां प्रत्येव फलं प्रार्थ्येत, 'न स्वामिनि स्थिते कश्चिद्दासान्प्रार्थयते फलम्' इति न्यायात् । तस्मात्प्रधानकर्मणी स्तुतशस्त्रे अदृष्टार्थे । प्रयोजनं पूर्वपक्षे उत्कर्षः, सिद्धान्ते त्वनुत्कर्ष इति स्पष्टमेव । प्रयोजनान्तरमपि दशमस्य चतुर्थे 'ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात्' इत्यत्र वक्ष्यते ॥ इति स्तुतशस्त्राधिकरणम् ॥

'तानि द्वैधं गुणप्रधानभूतानि' इत्याख्यातानां द्वैविध्यमुक्तम् । तत्प्रसङ्गात्तृतीयमपि प्रकारान्तरमनुवादकत्वरूपं केषांचिदाख्यातानां निरूपयितुमिदमारभ्यते । सन्ति कानिचिदाख्या-

६. मन्त्राविधायकत्वाधिकरणम् ।

तानि मन्त्रब्राह्मणगतानि यच्छब्दमध्यमोत्तमपुरुषयदिशब्दादियुक्तानि । 'देवांश्च याभिर्यजते ददाति च, ज्योगित्ताभिः सचते गोपतिः सह' इति काम्यपशुयाज्याकाण्डे गोदेवत्यपश्वर्थतया पठितो मन्त्रः । याभिर्गोभिर्देवान्यजति याश्च ददाति ताभिर्गोभिः गोपतिः यजमानः ज्योक् चिरं सचत इन् समवैत्येव इत्यर्थः । 'अग्नीदग्नीन्विहर' इति मन्त्रो ज्योतिष्टोमे प्रैषात्मकः । 'बर्हिर्देवसदनं दामि' इति दर्शपूर्णमासयोर्बर्हिर्लवनमन्त्रः । तत्रैव 'अग्नये जुष्टं निर्वपामि' इति निर्वापमन्त्रः । सन्ति च 'यस्योभयं हविरार्तिमार्च्छति ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' 'यद्याग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयाद्वैश्वानरं द्वादशकपालं निर्वपेत्' इत्यादिवाक्यगतानि । आख्यातान्तरैकवाक्यतामुपगतानि सर्वाणीमानि विधायकान्यनुवादकानि वेति संशये, पूर्वपक्षयति—

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात्[2] ॥ २७ ॥

मन्त्रग्रहणमुपलक्षणम् । 'यजेत स्वर्गकामः' इत्यादिविधौ 'देवांश्च याभिः' इत्यादिमन्त्रे 'यस्योभयम्' इत्यादिब्राह्मणवाक्ये च श्रुतानामाख्यातानाम् ऐकार्थ्यं विधानार्थत्वमेव, न तु केषांचिद्विधायकत्वं केषांचिदनुवादकत्वमिति । कुतः । ऐकशब्द्यात् 'सोमेन यजेत' इत्यादौ 'देवांश्च याभिः' इत्यादौ च एक एवाख्यातशब्दः प्रत्यभिज्ञायते । तत्र कचिद्विधायकः कचिदनुवादक इति वैरूप्याश्रयणे प्रमाणं न किंचित्पश्यामः । न च प्रकृतयागाभेदप्रत्यभिज्ञानात्कथं यागान्तरविधि-

1. निर्वृत्तेश्च. 2. एकशब्दात्.

*रिति वाच्यम् । सत्यपि प्रकृतकर्मणि शब्दान्तराभ्यासादिभिः कर्मान्तरत्वावगमसंभवात् । तस्माद्विधायकान्येवंजातीयकान्याख्यातानि ।

अथ सिद्धान्तयति-

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ २८ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । मन्त्रः मन्त्रादिगतः आख्यातशब्दः न विधायकः, किंत्वभिधानवाची । कर्मणि ल्युट् ।' विधायकाख्यातशब्दाभिहितस्य वाचकः अनुवादकः स्यात् । कुतः । प्रयोगसामर्थ्यात् । प्रयोगमध्ये प्रयोक्तृपुरुषस्यान्यस्य वा अनुष्ठेयार्थे बोधनीये 'देवांश्च याभिः' इत्यादिमन्त्राणाम् 'यस्योभयम्' इत्यादिब्राह्मणवाक्यानां च सामर्थ्यात् विधौ चासामर्थ्यात् । तथाहि— 'देवांश्च याभिर्यजते' इति मन्त्रे तावद्यच्छब्देन गोयागस्य गोदानस्य च सिद्धत्वावगमेन विधेयत्वानुपपत्त्या विधिशक्तिप्रतिबन्धः स्पष्ट एव । एवम् 'यस्योभयम्' इत्यादिब्राह्मणवाक्येष्वपि । अपर्यवसन्नत्वाच्च तत्र विधिशक्तिः प्रतिबध्यते । न हि 'देवांश्च याभिर्यजते' इति पर्यवसन्नं वाक्यम्, 'ज्योगित्ताभिः सचते' इत्यनेन साकाङ्क्षत्वात् । अत एवंजातीयका मन्त्राः प्रयोगमध्य एव प्रयोक्तृपुरुषस्यानुष्ठेयार्थस्मरणाय प्रभवेयुः, न तु विधानाय । 'अग्नीदग्नीन्विहर' 'बर्हिस्तृणाहि' इत्यादिमन्त्रास्तु प्रयोगमध्ये प्रयोक्तृपुरुषेण पुरुषान्तरे स्मारयितव्ये समर्था न तु विधाने, आमन्त्रणविभक्तेरभिमुखार्थप्रत्यायकत्वेन सर्वपुरुषसाधारणविधिप्रत्ययविरोधित्वात् । अनेनैव न्यायेन उत्तमपुरुषस्थलेऽपि विधिशक्तिप्रतिबन्धो द्रष्टव्यः । आत्मनि प्रेरणासंभवाच्च । 'यदि नवान्नं प्राश्नीयात्' इत्यादिब्राह्मणवाक्यानामपि यदिशब्देन विधिशक्तिप्रतिबन्धाद्वैश्वानरेष्ट्यादिप्रयोगे निमित्तोपदर्शने सामर्थ्यम्, न तु विधाने । यत्र च विधिशक्तिप्रतिबन्धकं यच्छब्दादिकं नास्ति, तत्रैव आख्यातस्य शब्दान्तराभ्यासादिभिर्भेदकता । यच्छब्दादीनां विधिशक्तिप्रतिबन्धकत्वं च मानान्तरप्राप्तार्थत्वं एव । अप्राप्तार्थत्वे तु न तेषां विधिशक्तिप्रतिबन्धकता । अन्यथा यदाग्नेयादिवाक्येषु का गतिः । उक्तं च न्यायसुधायाम् । 'सिद्धत्वद्योतनाद्वृत्त्याभिमुख्यासंभवाद्विधौ । आत्मनि प्रेरणाभावान्निमित्तत्वाभिधानतः । विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम् । प्राप्त्ययोगे तु तद्धाधात्कचित्स्यादविहन्तृता' इति । तद्धाधात् । तस्य यच्छब्दादिचतुष्टयस्य स्वार्थत्यागादित्यर्थः । इत्यास्तां तावत् । इति विधिमन्त्राधिकरणम् ॥

'विधिमन्त्रयोः' इति पूर्वाधिकरणे उपलक्षणतया गृहीतमन्त्रप्रसङ्गात्तल्लक्षणमभिधत्ते—

तच्चोदकेषु मन्त्राख्या ॥ २९ ॥

'अभिधानवाची स्यात्' इति पूर्वसूत्रोपात्तमभिधानं तच्छब्दः परामृशति। तस्य अभिधानस्य अनुष्ठेयार्थप्रकाशनस्य चोदकेषु प्रयोजकेषु वाक्येषु मन्त्रशब्दो वर्तते। तथा च अनुष्ठेया-

७. मन्त्रनिर्वचनाधिकरणम्।

र्थस्मारकवाक्यत्वं मन्त्रलक्षणमिति पर्यवस्यति। इदं च लक्षणमदृष्टार्थजपादिमन्त्रेष्वव्याप्तम्। 'वसन्ताय कपिञ्जलानालभते' इत्यादीनामप्राप्तार्थकतया विधायकत्वेनानुष्ठेयार्थस्मारकत्वाभावात्तेषु चाव्याप्तम्। अतः प्रायिकमिदं लक्षणमिति प्राञ्चः। वस्तुतस्तु विधिमन्त्रयोरित्यत्रोपात्तं विधिं तच्छब्दः परामृशति। सः 'यजेत स्वर्गकामः' इत्यादिप्रधानविधिः चोदकः प्रयोगविधिः[1] येषां तानि तच्चोदकानि वाक्यानि प्रयोगविधिगृहीतानि; तेषु मन्त्रशब्दो वर्तत इति व्याख्येयम्। प्रधानविधिरेव ह्यङ्गप्रयोगस्य विधायक इत्येकादशस्य द्वितीये 'अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन्' इत्यत्र वक्ष्यते। तथा च कर्माङ्गवाक्यत्वं मन्त्रलक्षणमिति पर्यवस्यति। न च कृत्स्नस्य वेदस्याध्ययनरूपकर्मार्थत्वान्मन्त्रत्वापत्तिरिति वाच्यम्। अध्ययनविधिर्हि द्वेधा अनारभ्यविधिर्ब्रह्मयज्ञविधिश्चेति। तत्राद्ये स्वाध्यायस्य प्राप्तत्वेन तदङ्गत्वाभावान्नातिव्याप्तिः। द्वितीये तु ब्रह्मयज्ञाध्ययनविधौ स्वाध्यायविधिसिद्धाध्ययनतो गृहीतस्य स्वाध्यायस्य पठनेन आर्थवादिकं पयःकुल्यादिकं फलं भावयेदित्यर्थः। तत्र स्वाध्यायस्य [2]पयःकुल्यादिफलार्थतया विधावपि न तदादाय कृत्स्नस्य वेदस्य मन्त्रत्वापत्तिः, प्रयोगकालीनोच्चारणद्वारा कर्माङ्गत्वस्य विवक्षितत्वात्। न चैवमपि 'ईशा वास्यमिदं सर्वम्' इत्याद्यौपनिषदमन्त्राणां कर्माङ्गत्वाभावादव्याप्तिरिति वाच्यम्। एवंजातीयकानामदृष्टविनियोगानामपि वाचःस्तोमादौ विनियोगसत्त्वेन कर्माङ्गत्वस्य सत्त्वात्। वाचःस्तोमाङ्गशब्दत्वं वा मन्त्रत्वम्, तत्र 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचःस्तोमे पारिप्लवं शंसति' इत्यादिविधानात्। एतेन कर्माङ्गशब्दत्वस्य मन्त्रलक्षणत्वे 'उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ' इति नाचिकेतादिब्राह्मणस्यापि मन्त्रत्वापत्तिः, 'नाचिकेतमुपाख्यानम्' इत्युपक्रम्य 'प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते' इति श्राद्धे तदभिश्रावणादिविधानादिति निरस्तम्। तस्य वाचःस्तोमकर्माङ्गत्वाभावात्, ऋग्यजुःसाम्नामेव सर्वेषां तत्र विनियुक्तत्वात्। न चैवमपि दर्शपूर्णमासादिप्रयोगदशायां वाचःस्तोमाङ्गत्वाभावान्मन्त्रत्वं न स्यादिति वाच्यम्। वाचःस्तोमाङ्गशब्दत्वावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात्। तदवच्छेदकधर्मश्च ऋक्त्वं यजुष्ट्वं सामत्वं च, ऋगादीनां वाचःस्तोमे ऋक्त्वादिधर्मपुरस्कारेणैव विधानात्। तेषां च वाचःस्तोमाङ्गतयानुगमः। एतेन ऋग्यजुःसामान्यतमत्वं मन्त्रत्वमिति निरस्तम्, अन्यतमत्वस्यान्यान्यत्वरूपत्वेन गुरुत्वात्। परमार्थतस्तु ऋग्यजुःसामान्यतमत्वमेव मन्त्रत्वम्°। 'तच्चोदकेषु—' इति सूत्रं तु वाचःस्तोमकर्माङ्गत्वरूपानुगमकधर्मप्रतिपादनमुखेन तत्परम्। ऋग्यजुःसामान्यतमत्वस्यैव मन्त्रलक्षणतया वेदतोऽवगमात्। अस्ति ह्यृगेषा 'अहे बुध्निय मन्त्रं

1. प्रयोगविधायकः—क, घ, ङ. 2. अक्षरग्रहणरूपाध्ययनकर्मार्थत्वेऽपि—क.

मे गोपाय, यमृषयस्त्रैविदा विदुः, ऋचः सामानि यजूंषि, सा हि श्रीरमृता सताम्' इति । एषा ऋगाधाने आवसथ्याग्नेरुपस्थाने विनियुक्ता । 'अहे अहिंसक, बुध्निय, बुध्नं हृदयम्, तत्र भव, सतां हृदय आवसथ्याग्ने, मे मम, मन्त्रं गोपाय रक्ष, यं मन्त्रम् ऋषयः मन्त्रदृशः, त्रैविदाः त्रीन्वेदान्विदन्तीति त्रिविदः, त एव त्रैविदाः, स्वार्थेऽण्, ऋक्सामयजुरात्मतया विदुः ज्ञातवन्तः, तं गोपायेत्यन्वयः । सा हि त्रयी सताम् अमृता फलतः अनश्वरा, श्रीः श्रयणीया' इति वेदभाष्यम् । तथा च ऋक्सामयजुरन्यतमत्वं मन्त्रत्वमिति स्थितम् । मन्त्रलक्षणप्रयोजनम् 'मन्त्रेषु कर्माणि कवयो वान्यपश्यन्' इत्यादौ लघूपायेन लक्ष्यावगम एव । इति मन्त्रलक्षणम् ॥

मन्त्रब्राह्मणात्मकवेदे मन्त्रभागस्य लक्षणमुक्त्वा तत्प्रसङ्गाद्ब्राह्मणभागस्य लक्षणमाह—

शेषे ब्राह्मणशब्दः ॥ ३० ॥

मन्त्रभागावशिष्टवेदभागे ब्राह्मणशब्दो वाचकतया वर्तत इत्यर्थः । विधिपरो वेदभागो ब्राह्मणम् । अर्थवादानामपि विध्येकवाक्यत्वेन तत्रैवान्तर्भावः । 'ब्राह्मणावशिष्टवेदभागो मन्त्रः' इति याज्ञिकाः, यदाहुरापस्तम्बाचार्याः 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' 'कर्मचोदना ब्राह्मणानि' 'ब्राह्मणशेषोऽर्थवादः' 'निन्दाप्रशंसापरकृतिः पुराकल्पश्च' 'अतोऽन्ये मन्त्राः' इति । लक्षणप्रयोजनं तु 'एतद्ब्राह्मणान्येव पञ्च हवींषि' 'एतदेव सावित्रे ब्राह्मणम्, अथो नाचिकेते' इत्यादौ लघूपायेन लक्ष्यावगमः । इति ब्राह्मणलक्षणम् ॥

८. ब्राह्मणनिर्वचनाधिकरणम् ।

कर्माङ्गशब्दत्वेनानुगतीकृतमृग्यजुःसामान्यतमत्वं मन्त्रलक्षणमुक्तम् । तत्राक्षिप्य समाधातुमिदमारभ्यते । अस्ति दर्शपूर्णमासयोर्होतुर्निगदः । 'अग्ने महाꣳ असि ब्राह्मण भारत, असावसौ' इति । तत्र 'असावसौ' इति स्थाने 'भार्गवच्यावनाप्रवानौर्वजामदग्न्य' इत्यादि प्रक्षिप्यते । सोऽयं प्रवर इत्युच्यते । अनेन हि यजमानगोत्रजत्वेन अग्निः देवतावाहने प्रक्रियते । तथा तत्रैव 'अग्नये जुष्टं निर्वपामि' इति मन्त्रे 'अग्नये' इत्येतत्सौर्येष्टौ 'सूर्याय' इत्यूह्यते । तथा तत्रैव 'असौ मानुषः' इति होतृवरणमन्त्रे 'असौ' इति स्थाने होतुर्नाम प्रक्षिप्यते । तदेतेषां प्रवरोहनामधेयानां वेदे प्रत्यक्षमनाम्नातानामपि मन्त्रमध्यपतितत्वेन मन्त्रेण सहैकार्थप्रतिपादकतया मन्त्रकार्यापूर्वीयदेवताप्रकाशकारितया च मन्त्रत्वमवश्यमास्थेयमित्याशङ्क्य निराकरोति—

९. ऊहाद्यमन्त्रताधिकरणम् ।

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्[1] ॥ ३१ ॥

वेदे प्रत्यक्षमनाम्नातेषु प्रवरादिष्वमन्त्रत्वं स्यात् । कुतः । हि यस्मात्कारणाद्वेदे प्रत्यक्षमा-

1. स्यादिति क्वचिन्नास्ति ।

म्रातेष्वेव वाक्येषु मन्त्रब्राह्मणविभागः क्रियते । प्रवरादयस्तु 'असौ' इति परोक्षेण निर्दिष्टाः, न तु प्रत्यक्षेणेति न मन्त्रत्वं तेषाम् । मन्त्रैकवाक्यत्वं तु न मन्त्रत्वप्रयोजकम्, 'इषे त्वा' इत्यादावध्याह्रियमाणे 'छिनद्मि' इत्यादौ व्यभिचारात् । नापि मन्त्रकार्यकरत्वं तत्प्रयोजकम्, पृष्ठ्यषडहे रथघोषादौ व्यभिचारात् । 'असर्ज्यसर्जि' इत्यादिमन्त्रकार्ये स्तोत्रोपाकरणे रथघोषादेस्तत्र विधानात् । यत्तु 'असौ मानुषः' 'आशास्तेऽयं यजमानोऽसौ' इत्यादावदःशब्दस्य तत्तन्नामाज्ञानपर्यवसिततया मन्त्रत्वमेवंजातीयकानामिति कृत्वा सुब्रह्मण्यानिगदादावदःशब्दरहिते 'यजमानस्य तत्पूर्वेषामपरेषां च नाम गृह्णाति' इति विध्यन्तरबलान्निक्षिप्यमाणं नामधेयमेवोदाहरणमिति प्राञ्चः । तदयुक्तम्, प्रत्यक्षाज्ञानस्यैव मन्त्रत्वप्रयोजकत्वेन 'असौ' इति परोक्षनिर्दिष्टानां नाम्नामपि मन्त्रत्वाभावस्यैव युक्तत्वात् । अन्यथा प्रवरस्य 'अमुवत्' इति अदःशब्दनिर्दिष्टत्वेन मन्त्रत्वापत्तेः । 'यजमानस्य तत्पूर्वेषामपरेषां च नाम गृह्णाति' इति विधौ नामपदेन यजमानादिनाम्नामपि निर्दिष्टतया मन्त्रत्वापत्तेश्चेति दिक् । प्रयोजनं प्रवरोहनामधेयेषु 'यज्ञकर्मण्यजपन्यूङ्खसामसु' इति मन्त्रेषु विहितमैकश्रुत्यं मन्त्रश्रेषप्रायश्चित्तं च न भवति । इति मन्त्रलक्षणशेषः ॥

'ऋचो यजूंषि सामानि मन्त्राः' इत्युक्तम् । तत्र ऋग्लक्षणमाह—

[1]तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३२ ॥

तेषां मन्त्राणां मध्ये यत्र यस्मिन् 'अग्निमीळे पुरोहितम्' इत्यादिमन्त्रे पादव्यवस्था । अक्षरेयत्ताविशेषः पादः 'अष्टाक्षरा गायत्री' 'दशाक्षरा विराट्' 'एकादशाक्षरा त्रिष्टुप्' 'द्वादशाक्षरा जगती' इत्यादिप्रमाणगम्यः । तत्प्रयुक्ता 'त्रिपदा गायत्री' 'चतुष्पदा त्रिष्टुप्' इत्यादिच्छन्दोव्यवस्था, तन्नियमनम्—सा ऋक्प्रत्येतव्या ।

१०. ऋग्लक्षणाधिकरणम् ।

ननु 'अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्, होतारं रत्नधातमम्' 'अग्निः पूर्वेभिर्ऋषिभिः' इत्यष्टाक्षरचतुष्पादत्वादनुष्टुप्छन्दस्का ऋक् कुतो न स्यादित्याशङ्क्याह—अर्थवशेनेति । अर्थैकत्वप्रयुक्ता पादव्यवस्था विवक्षिता । तथा च विशिष्टैकार्थप्रतिपादकत्वे सति पादबद्धमन्त्रत्वमृचो लक्षणमिति स्थितम् । इति ऋग्लक्षणम् ॥

सामानि लक्षयति—

११. सामलक्षणाधिकरणम् ।

गीतिषु सामाख्या[2] ॥ ३३ ॥

रथन्तरबृहद्वैरूपादिसंज्ञकगीतिषु सामशब्दो वाचकतया वर्तते । यद्यपि सामशब्दस्य गीतिवाचकत्वं सप्तमे सूत्रकारः प्रपञ्चयिष्यति तथापि ऋगादिभेदकथनप्रसङ्गादिहाप्युक्तम् । इति सामलक्षणम् ॥

1. तेषामिति क्वचिन्नास्ति. 2. गीतिषु सामेति क्वचित्पाठः.

यजूंषि लक्षयति—

शेषे यजुःशब्दः ॥ ३४ ॥

ऋक्सामावशिष्टमन्त्रभागे वाचकतया यजुःशब्दो वर्तते। न चैवं सति 'युञ्जते मन उत युञ्जते धियः' 'इमामगृभ्णन्' इत्यादावृचि 'यजुरेव वदेत्' 'यजुष्कृत्यै यज्ञस्य समृद्ध्यै' इत्यादिब्राह्मणेषु कथं यजुःशब्दव्यवहार इति वाच्यम्। यजुर्वेदपठितत्वेन लक्षणया तदुपपत्तेः। ऋगादिलक्षणप्रयोजनं तु 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते' इत्यादौ लघूपायेन लक्ष्यावगमः॥ इति यजुर्लक्षणम्॥

१२. यजुर्लक्षणाधिकरणम्।

अथ 'शेषे यजुःशब्दः' इत्यत्राक्षिप्य समाधातुमिदमारभ्यते। सन्ति निगदा नाम परसंबोधनार्था मन्त्राः 'अग्नीदग्नीन्विहर, बर्हिस्तृणाहि' 'प्रोक्षणीरासादय' इत्यादयः। ते किं यजुर्भ्यो भिद्यन्ते उत यजूंष्येवेति संशये पूर्वपक्षयति—

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३५ ॥

वाशब्दो नञर्थे। निगदो न यजुः। कुतः। धर्मविशेषात् 'उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा, उच्चैर्निगदेन' इति निगदस्य यजुर्विलक्षणोच्चैस्त्वधर्मविशेषश्रवणात्, निगदस्य यजुष्ट्वेऽपि हि कात्स्न्र्येन उपांशुत्वमवगतम्। तस्मान्निगदाख्यमन्त्रजातं चतुर्थं स्यात्॥

१३. निगदानां यजुष्ट्वाधिकरणम्।

इतोऽपि निगदो न यजुरित्याह—

व्यपदेशाच्च ॥ ३६ ॥

इमानि यजूंषि, एते निगदा इति संज्ञाभेदादपि निगदो न यजुरित्यर्थः॥

सिद्धान्तयति—

यजूंषि वा तद्रूपत्वात् ॥ ३७ ॥

वाशब्द एवार्थे। यजूंष्येव निगदाः। कुतः। तद्रूपत्वात् ऋक्सामभिन्नत्वरूपयजुर्लक्षण-

यदुक्तं निगदानां यजुष्ट्वे उपांशुत्वमेवोचितं न तूच्चैस्त्वमिति तत्राह—

वचनाद्धर्मविशेषः ॥ ३८ ॥

उच्यते अनेनेति वचनं सामर्थ्यम्। निगदानां संबोधनविभक्तिघटितानां परसंबोधनपराणां परप्रत्यायनरूपकार्यवशादुच्चैस्त्वरूपधर्मविशेष एव वक्तुमुचितः, न तूपांशुत्वम् ॥

ननु यत्र संबोधनविभक्तिर्नास्ति 'प्रोक्षणीरासादय' इत्यादौ तत्र कथं परसंबोधनार्थता । न च मध्यमपुरुषलोडुशात्संभव इति वाच्यम्। प्राप्तकालतायामपि लोटो विधानात्तदर्थकलोडादेशमध्यमपुरुषस्याविवक्षितार्थतायास्तृतीये 'प्रैषेषु च पराधिकारात्' इत्यत्र वक्ष्यमाणत्वाच्च । तत्राह—

अर्थाच्च ॥ ३९ ॥

आग्नीध्रादेः परस्य प्रोक्षण्यासादनादिस्मरणमपेक्षितमिति प्रैषार्थत्वे अपेक्षितदृष्टार्थत्वं लभ्यते । प्राप्तकालार्थत्वे तु अनपेक्षितमदृष्टार्थत्वं मध्यमपुरुषस्याविवक्षितार्थत्वं च स्यात्। एवं च दृष्टप्रयोजनवशात्संभवद्विवक्षितलोडर्थवशाच्च लोटो न प्राप्तकालार्थत्वम्, किंतु प्रैषार्थत्वमेवाश्र वक्तव्यमिति सर्वेषां निगदानां परसंबोधनार्थत्वं सिद्धम्। चकारस्त्वनुक्तसमुच्चयार्थः। तथाहि—ननु 'उपांशु यजुषा' इति वाचनिकमुपांशुत्वं संबोधनविभक्तिसामर्थ्यरूपलिङ्गलब्धेन परसंबोधनरूपकार्येण कथं बाध्यताम्, लिङ्गेन प्रत्यक्षवचनस्य बाधायोगादित्यत आह—चेति । मन्त्रस्य ह्युपांशुत्वमङ्गम्, अर्थप्रत्यायनं कार्यं तु प्रधानम्। तस्य लिङ्गरूपदुर्बलप्रमाणगम्यत्वेऽपि स्वरूपतो बलवत्त्वेन बलवत्प्रमाणकस्यापि स्वरूपतो दुर्बलस्य उपांशुत्वस्य तेन बाधो युक्तः, प्रमाणबलात्प्रमेयबलज्यायस्त्वस्य स्मृतिपादे निरूपितत्वात् । किंच लिङ्गगम्यं परसंबोधनकार्यं निगदमात्रविषयम्। उपांशुत्ववचनं तु यजुरन्तरे सावकाशम्। ततश्च 'आनर्थक्यप्रतिहतानाम्—' इति न्यायेन लिङ्गस्यैव प्रबलतया तेनोपांशुत्वबाधो युज्यते। वस्तुतस्तु नोपांशुत्वस्य बाधः, उपांशुत्वस्य निगदेष्वप्राप्तेः । 'उपांशु यजुषा' इति हि नापूर्वविधिः, मन्त्रविधिबलेनैव तस्य कदाचित्प्राप्तत्वात्। ततश्च यत्रानियमेनोपांशुत्वं प्राप्यते तत्र नियममात्रम् 'उपांशु यजुषा' इत्यनेन क्रियते। निगदेषु च परसंबोधनार्थेषु न कदाचिदुपांशुत्वसंभव इति न तत्रोपांशुविधेर्व्यापारः । अतो न तद्बाधप्रसक्तिः। एवं च सामर्थ्यान्निगदानामुच्चैस्त्वमेव वक्तुमुचितम्। न चैवं सति 'उच्चैर्निगदेन' इति वचनानर्थक्यम्। क्वचित्कार्यार्थमुच्चैस्त्वेऽपि यजुरन्तरे उपांशुत्वमेव युक्तमित्यौचित्येन 'उपांशु यजुषा' इति विहितस्तुत्यर्थं तदनुवादात् ॥

अथ यदुक्तम् 'व्यपदेशाच्च' इति तत्राह—

गुणार्थो व्यपदेशः ॥ ४० ॥

ब्राह्मणपरिव्राजकन्यायेन नितरां गद्यन्ते उच्चैरुच्चार्यन्त इति व्युत्पत्तिसिद्धगुणविशेषनिबन्धन एव यजुषामेव केषांचिन्निगदव्यपदेश इत्यर्थः ॥

अत्राशङ्क्य निराकरोति—

सर्वेषागिति चेन्नग्र्यपदेशात् ॥ ४१ ॥

यदि निगदानामुच्चैस्त्वनिबन्धनं निगदत्वं तर्हि ऋक्सामानामपि सर्वेषां तत्त्वादिति चेत्, न। कुतः। ऋग्व्यपदेशात् 'अयाज्या वै निगदाः' इति निगदान्निन्दित्वा 'ऋचो याज्या भवन्ति' इति पृथङ्निर्देशात्। न हि तदेव निन्द्यते विधीयते चेति युक्तम्। तस्माद्यजूंष्येव निगदाः। प्रयोजनं पूर्वपक्षे वाचःस्तोमे 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि' इति पारिप्लवशंसने निगदानामप्राप्तिः, सिद्धान्ते तु तत्प्राप्तिरिति। केचित्तु यजुर्भेषप्रायश्चित्तं वर्णयन्ति। तदयुक्तम्। 'यद्यृक्तो यज्ञ आर्तिर्भवति भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहुयादथ[1] यजुष्टो भुव इति दक्षिणाग्नावाग्नीध्रे सोमे' इति हि यजुर्भेषप्रायश्चित्तम्। तदिदं निगदानां यजुष्ट्वाभावेऽपि यजुर्वेदविहितकर्माङ्गत्वमात्रेण तद्भेषे संभवति, तत्र ऋगादिपदानां वेदपरत्वात्। 'त्रयो वेदा अजायन्त, भूरित्यृग्वेदात् भुव इति यजुर्वेदात् स्वरिति सामवेदात्' इत्युपक्रमे 'ऋग्वेदेन ऋग्वेदं भिषज्यति यजुर्वेदेन यजुर्वेदं सामवेदेन सामवेदम्' इति उपसंहारे च वाजसनेयके तथा ऐतरेयकताण्डकतलवकारीयब्राह्मणेषूपक्रमे वेदानामेव श्रवणात्। तस्मादस्मदुक्तमेव प्रयोजनं साधु। इति निगदाधिकरणम्॥

ऋक्सामयजुरात्मकमन्त्रस्वरूपे निरूपिते प्रसङ्गात्तदवान्तरभेदे कथनीये ऋचां साम्नां चाध्येतृपरंपरासिद्ध्यर्थिच्छिद्य पाठादेव तत्सिद्धेः प्रश्लिष्टपठितेषु यजुःषु कियदेकं यजुरिति जिज्ञासितं, तद्भेदं प्रस्तौति—

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ ४२ ॥

अर्थस्य ऋत्वपकारलक्षणप्रयोजनस्य एकत्वाद्धेतोः एकं वाक्यं प्रत्येतव्यम्। वाक्यशब्देन प्रयोगे उच्चारणीयं यजुर्लक्ष्यते। न हि यजुर्भेदविचारे लौकिकवाक्यसाधारणमेकवाक्यलक्षणं संगतं भवति। ततश्च यावान्पदसमूहः प्रयुक्तो यागसाधनतामश्नुते तावदेकं यजुरित्युक्तं भवति। इज्यते अनेनेति यजुरिति व्युत्पत्तेरिति भावः। नैतावदेव यजुरेकत्वप्रयोजकम्। तथा सति 'भगो वां विभजतु' 'अर्यमा वां विभजतु' 'पूषा

९४. एकवाक्यत्वाधिकरणम्।

1. जुहोथ—क, ख, ग, घ, ङ.

वां विभजतु' इति भिन्नेषु वाक्येषु पुरोडाशीयपिष्टविभागरूपैकार्थतया एकयजुष्ट्वापत्तेः । किंतु तथाविधं पदजातं यद्येकस्यापि पदस्य ततो विभागे सति साकाङ्क्षं स्यात् । तदेव भवेदेकं यजुः । एवं च यावत्पदजातं यजुर्लक्षणलक्षितं यागसाधनमथ च विभागे साकाङ्क्षं तावदेकं यजुरित्युक्तं भवति । न चैतावता प्रस्तुतयजुर्भेदे किमायातमिति वाच्यम् । यजुरेकत्वे कथिते ततोऽन्यद्यजुरन्तरमित्युक्तप्रायत्वात् । सूत्रे अर्थशब्दो नाभिधेयवाची, तथा सति विभागे साकाङ्क्षमित्यस्य वैयर्थ्यात्, 'भगो वां विभजतु' इत्यादीनां विशिष्टैकार्थप्रतिपादकत्वाभावेनातिव्याप्तिनिरासादिति वार्तिके प्रपञ्चितम् विभागे साकाङ्क्षमेकं यजुरित्युक्ते 'ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा' इत्यादिराष्ट्रभृद्धोममन्त्रेषु द्विस्वाहाकारमेकैकं यजुः स्यात्, विभागे साकाङ्क्षत्वात् । न चेष्टापत्तिः । वाजसनेयके 'राष्ट्रभृतो जुहोति' इति प्रस्तुत्य 'मिथुनानि जुहोति पुंसे पूर्वस्मै जुहोत्यथ स्त्रीभ्यो द्वादशैवाहुतयो भवन्ति' इति षड्भिर्मन्त्रयुगलैर्द्वादशाहुत्यवगमात् । अत एव संकर्षकाण्डे द्वितीयस्य चतुर्थे 'ऋताषाड्ऋतधामेति यथार्थविनिष्कर्षोऽर्थपृथक्त्वात् इत्यधिकरणे 'ऋताषाड्ऋतधामाग्निर्गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा' इत्येवं पुंवाचकाः स्त्रीवाचकाश्च शब्दाः प्रतिहोमं विनिष्कृष्य प्रयोक्तव्याः, उत यथापाठमिति विचारः संगच्छते । न च एकयजुष्ट्वाभावे 'षड्भिर्जुहोति' इति विरोधः शङ्क्यः, तस्य पर्यायाभिप्रायत्वात् । 'तस्मै स्वाहा, ताभ्यः स्वाहा' इत्यतः प्राक्पठिताः 'ऋताषाड्ऋतधामा' 'स २हितो विश्वसामा' 'सुषुम्नः सूर्यरश्मिः' इत्यादयः पर्यायाः । ते च 'भुवनस्य पते' इत्यतः प्राक्षडेव भवन्ति । तदेतत्तत्रैवाग्निमाधिकरणे 'षड्भिर्जुहोतीति पर्यायवादो यथा सावित्राणि जुहोति' इत्यत्र प्रपञ्चयिष्यते । एतेन 'षड्भिर्जुहोति' इति तैत्तिरीयकमपि व्याख्यातम् । एवं च राष्ट्रभृन्मन्त्रेषु प्रतिस्वाहाकारं यजुर्भेदात्तत्र विभागे [1]साकाङ्क्षतायामप्येकयजुष्ट्वं मा भूदित्यर्थैकत्वादित्युक्तम् । [2]शस्त्रीयाणामृचामेकादष्टार्थत्वाद्विभागे साकाङ्क्षत्वात्तत्रातिव्याप्तिवारणाय यजुर्लक्षणलक्षितमिति । उदाहरणं तु 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इत्यादियजुः । न च 'देवस्य' इत्यस्य विभागेऽपि 'त्वा सवितुः' इत्यादेर्निराकाङ्क्षतया कथं तेन सहैकयजुष्ट्वमिति वाच्यम् । न ह्यत्र विभज्यमानस्य विभागावधिभूतस्येत्युभयाकाङ्क्षैव विवक्षिता । अन्यतराकाङ्क्षाया विवक्षितत्वात् । ततश्च 'देवस्य' इत्यस्य 'त्वा सवितुः' इत्यादिसाकाङ्क्षत्वान्न दोषः । क्वचित् 'अग्ने हव्यं रक्षस्व' इत्यादावुभयाकाङ्क्षासत्त्वेऽप्यन्यतराकाङ्क्षाया अनपायात् 'देवस्य' इत्यस्य विभागे साकाङ्क्षतया आनर्थक्यात् 'त्वा सवितुः' इत्यादेरपि तेनाकाङ्क्षोत्थापनादुभयाकाङ्क्षयैव वा सर्वत्र निर्वाहः । न चैवमपि 'ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा' इति प्रथमहोममन्त्रे 'तस्यौ

1. साकाङ्क्षतया—क, घ, ङ. 2. 'याज्यया यजति' इत्येकादष्ट—ख, ग.

षधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु' इत्यंशस्य स्त्रीपरस्य तदितरांशस्य पुरुषपरस्य चान्यतराकाङ्क्षाया अप्यभावात्कथमेकयजुष्ट्वमिति वाच्यम्। इष्टापत्तेः। स्त्रीपरस्यांशस्य 'ताभ्यः स्वाहा' इत्युत्तरमन्त्रैकवाक्यतया तेनैवैकयजुष्ट्वात्। परं तु यथान्नानमेवानन्वितोऽपि स्त्रीपरोंऽशः पूर्वमन्त्रे प्रयुज्यते अविरोधात्। पूर्वमन्त्रे प्रयुज्यमान एव प्रयुक्तस्य स्त्रीपरस्यांशस्योत्तरयजुष्याकाङ्क्षावशेनान्वयसंभवात्। लोके काव्येषु 'कान्तं पृच्छामहे तन्वि पुलकोत्कम्पकारिणम्। द्रुतमाधत्स्व नेत्रान्तं गतस्त्वेति प्रियस्तव' इत्यादौ पुंलिङ्गपदानां स्त्रीलिङ्गपदव्यवहितानामप्यन्वयदर्शनात् इति संकर्षकाण्डे देवस्वामिभाष्ये स्पष्टम्। अत्र भाष्ये वार्तिके च 'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्त्सीदामृते प्रतितिष्ठ, व्रीहीणां मेध सुमनस्यमानः' इति कृत्स्नस्यैकयजुष्ट्वं स्यात्। यजुर्भेदो न स्यात्। तन्निवृत्त्यर्थमर्थैकत्वादित्युपात्तम्। पूर्वभागस्य सदनकरणप्रकाशनमुत्तरभागस्य पुरोडाशप्रतिष्ठितत्वप्रकाशनमिति प्रयोजनभेदान्नातिप्रसङ्ग इत्युक्तम्। पार्थसारथिप्रभृतिभिश्च तदेवानुमोदितम्। तत्सर्वमापाततः। "स्योनं ते सदनं करोमीति हि ऋगेषा त्रिष्टुप्। पूर्वार्धेन सदनकरणमुत्तरार्धेन प्रतिष्ठापनम्" इत्येव वेदभाष्ये भट्टभास्करमिश्राः। यजुरेकत्वकथनप्रयोजनं तु 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते' इत्यादौ यावदेकं यजुस्तावत्प्रयोक्तव्यम्, न तु तदेकदेश इति। तदेतत्सूत्रे यजुरित्येव वक्तव्ये वाक्यशब्दप्रयोगेण सूचितम्। वाक्यमित्यस्य हि प्रयोगसमये वचनार्हमित्यर्थः। इति यजुरेकत्वनिरूपणम्॥

१५. वाक्यभेदाधिकरणम्।

'इषेत्वोर्जे त्वा' इति किमेकं यजुः, उत 'इषे त्वा' इत्येकं यजुः 'ऊर्जे त्वा' इति यजुरन्तरमिति संशयः। पूर्वं तावदेकप्रयोजनसमर्थं विभज्यमाने साकाङ्क्षपदजातमेकं यजुरित्युक्तम्। भवति चेदं तथाविधं पदचतुष्टयम्। न ह्यत्र निर्वापप्रोक्षणादिमन्त्रवन्निर्वापादिक्रियासमवेतप्रकाशनरूपदृष्टप्रयोजनभेदोऽस्ति, येन यजुर्भेदः स्यात्। न ह्यत्र क्रियापदमस्ति। तस्माददृष्टमेवात्र प्रयोजनम्। तच्च कल्प्यमानं लाघवादेकमेव कल्प्यत इति भवति पदचतुष्टयमेकार्थम्। तच्चादृष्टं चतुर्भिः पदैः समुदितैरेव कल्प्यते विनिगमनाविरहात्। अतः संहत्यकारित्वाद्विभज्यमाने साकाङ्क्षं च भवति। न च 'इषे त्वेति शाखामाच्छिनत्ति' 'ऊर्जे त्वेत्यनुमार्ष्टि' इति विनियोगबलाद्भिन्नमेवादृष्टं कल्प्यत इति वाच्यम्। तदा हि विनियोगभेदाददृष्टं भिद्यते, यदि विनियोज्यमन्त्रभेदः सिद्धः स्यात्। इह तु विनियोज्यस्यैकमन्त्रत्वमेवादृष्टद्वयकल्पनाभीत्या निश्चितमिति पदचतुष्टयमेवादिप्रतीकग्रहणेन पूर्ववाक्यतः छेदने विधीयते, उत्तरवाक्येऽप्यन्तप्रतीकग्रहणेनानुमार्जने तदेवं पदचतुष्टयं विधीयते। 'आनः प्राण एतु परावत आन्तरिक्षादिवस्परि, आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा' इति मन्त्रस्य 'अमृतमसि प्राणाय त्वेति हिरण्यमाभिव्यनिति' इत्यन्तप्रतीकग्रहणेनापि विनियोगदर्शनात्। आवृत्त्या चोभयत्र, पदचतुष्टयस्य प्रयोगः।

एवं च पदचतुष्टयस्यैव च्छेदने विनियुक्तत्वादेकादृष्टार्थत्वम् । अतः पूर्वोक्तलक्षणलक्षितत्वात्पदचतुष्टयमेकं यजुः । इति प्राप्ते, सिद्धान्तयति—

समेषु वाक्यभेदः स्यात् ॥ ४३ ॥

'इषे त्वोर्जे त्वा' इत्येवंजातीयकेषु परस्परनिराकाङ्क्षत्वेन तुल्येषु वाक्यभेदः यजुर्भेदः स्यात्। तथाहि—एकादृष्टार्थत्वं पदचतुष्टयस्यासिद्धम्, विनियोज्यस्वरूपाज्ञाने विनियोगस्यैवासंभवेन प्रथमं विनियोज्यस्वरूपे पर्यालोच्यमाने त्वाशब्दद्वयबलेन परस्परनिरपेक्षतया भेदेनैव प्रतीयमानत्वेन विनियोगस्यापि भेदेनैव वाच्यतया तदनुसारेण परस्परनिरपेक्षतयैवादृष्टस्य कल्प्यमानस्य भेदेनैव कल्पयितुमुचितत्वात् । किंच 'आ नः प्राण एतु परावतः' इत्यस्य मन्त्रैक्यं लिङ्गवशेनावगतमिति मन्त्रान्तप्रतीकग्रहणेन विनियोगः कथंचिद्युज्यते । नेह मन्त्रैक्यसाधकं लिङ्गमस्ति, किमुत तद्भेदसाधकं त्वाशब्दद्वयमस्ति । तस्मादनेकादृष्टार्थमेव पदचतुष्टयम् । वस्तुतस्तु नैवंजातीयकानामदृष्टार्थता, अर्थप्रकाशनरूपदृष्टार्थत्वात् । 'इति शाखामाच्छिनत्ति' इति इतिकरणादिना मन्त्राणां छेदनक्रियाकरणत्वावगतेः । न हि च्छेदनादिक्रियाकरणत्वं मन्त्राणां तत्प्रकाशनमन्तरेण संभवति । तथा च च्छेदनादिप्रकाशनचोदनान्यथानुपपत्त्या 'छिनद्मि' इत्यादि यथोचितमध्याहार्यम् । न चैवमपि च्छेदनं पदचतुष्टयेन प्रकाश्यताम्, एवमनुमार्जनमपीति दृष्टार्थत्वेऽपि न मन्त्रभेदः स्यादिति वाच्यम् । प्रथमावधृतनैरपेक्ष्यानुसारेण पृथगेव च्छेदनादिप्रकाशकत्वकल्पनस्य पूर्वमेवोपपादितत्वात् । एवम् 'आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पताम्' इत्यादीनि दश वाक्यानि दश यजूंषि भवन्ति । 'क्लृप्तीर्यजमानं वाचयति' इत्यत्र हि क्लृप्तिशब्दो न मन्त्रपरः किंत्वर्थपरः । ततश्च बहुधा क्लृप्तिं वदन्तं यजमानं प्रेरयतीत्यध्वर्योर्व्यापारो विहितोऽर्थाद्यजमानकर्तृकबहुत्वविशिष्टक्लृप्तिवचनविधिं कल्पयति । कल्पितताद्दग्विधिनिर्वाहाय च 'आयुर्यज्ञेन कल्पताम्' इत्यादेरायुरादिविशिष्टक्लृप्तिप्रकाशनपरत्वमेव वक्तव्यम् । ततश्च प्रकाश्यमानायुरादिविशिष्टक्लृप्तिविशेषरूपार्थभेदाद्यजुर्भेदः । प्रयोजनं पूर्वपक्षे 'इषे त्वोर्जे त्वा' इति च्छेदने पदचतुष्टयं प्रयुज्यते, एवमनुमार्जनेऽपि । सिद्धान्ते तु 'इषे त्वा' इति च्छेदने 'ऊर्जे त्वा' इत्यनुमार्जने । क्लृप्तिवाक्येषु एकस्य भेदे कृत्स्नस्यावृत्तिः पूर्वपक्षे । सिद्धान्ते तु यस्य भेदस्तस्यैवेति। अत्र 'इषे त्वा' इत्यादिसाकाङ्क्षमन्त्रेषु योग्यपदाध्याहारेण 'इषे त्वा छिनद्मि' 'ऊर्जे त्वा अनुमार्ष्मि' इत्यादि प्रयोक्तव्यमिति केचित् । तदयुक्तम्, अध्याहृतस्य लौकिकशब्दस्य वैदिकमन्त्रानवयवत्वेन मन्त्रान्तकर्मादिसंनिपातविरोधात् । ऋष्यवरनामधेयानां तु 'असौ मानुष इति होतुर्नाम गृह्णाति' 'आर्षेयं वृणीते' 'श्रीन्वृणीते' 'तस्माद्दर्शं नोहेत्' इत्यादिवेदानुमतत्वाल्लौकिकानामपि प्रयोग उचितः । अत्र तथा प्रमाणमस्ति । तस्मादाकाङ्क्षितशब्दानां मनसैव स्मरणम्, न तु प्रयोगः। अर्थाध्याहारपक्षे तु शब्दस्यापि न स्मरणम्।

अर्थमात्रमेव स्मर्तव्यमिति प्राचीनमतानुसारी पन्थाः। चेतनप्रतिपादकेषु मन्त्रेषु देवतानाम् अचेतनप्रतिपादकेषु तदभिमानिदेवतानां शाब्दबोधः, न तु प्रयोक्तुः इति मन्त्राधिकरणेऽवोचाम। ततश्च तत्तन्मन्त्रस्तुत्यदेवता एव शब्दाध्याहारेणार्थाध्याहारेण वा वाक्यार्थमधिगच्छन्तीति याज्ञिकानुसारी युक्तः पन्थाः। इति यजुर्भेदनिरूपणम्॥

ज्योतिष्टोमे उपसद्धोममन्त्रा आम्नाताः 'या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा, या ते अग्ने रजाशया, हराशया' इति। तत्र द्वितीयतृतीय-

१६. अनुषङ्गाधिकरणम्।

मन्त्रयोः साकाङ्क्षयोराकाङ्क्षापूरणसमर्थो लौकिकः शेषोऽध्याहर्तव्यः 'या ते[1] रजाशया प्रजा सास्मान्पातु' इत्येवंप्रकारेण, उत पूर्वमन्त्रावयवस्य तनूर्वर्षिष्ठेत्यादेरनुषङ्गेण शेषः पूरणीयः इति संशयः। यदि प्रकारान्तरेणाकाङ्क्षापूरणं न स्यात्तदा गत्यभावादेकत्र निबद्धस्यापि वैदिकस्य वाक्यशेषस्यानुषङ्ग आश्रीयेत। संभवति च लौकिकेनापि तत्पूरणम्। अतः पूर्वमन्त्रे निबद्धस्य तनूर्वर्षिष्ठेत्यादेरन्यत्रनयनरूपानुषङ्गो न युक्तः। अन्यत्रनयने च समाम्नायबहिर्भावाल्लौकिक एव स्यात्। तस्माल्लौकिक एव शेषोऽध्याहर्तव्यः। इति प्राप्ते, सिद्धान्तयति—

अनुषङ्गो वाक्यसमाप्तिः[2] सर्वेषु तुल्ययोगित्वात्॥ ४४॥

अनुषज्यत इत्यनुषङ्गः 'तनूर्वर्षिष्ठा' इत्यादिवाक्यशेषः उत्तरयोरपि वाक्ययोः समापकः। समाप्तिरिति बाहुलकः करणे क्तिन्। कुतोऽनुषङ्गः। सर्वेषु तुल्ययोगित्वात्। प्रथमद्वितीयतृतीयमन्त्रेषु शेषस्य 'तनूर्वर्षिष्ठा' इत्यादेः संनिधानरूपसंबन्धस्य तुल्यत्वादित्यर्थः। यदि हि प्रथमस्यैवायं शेषः स्यात्तदान्यत्रनयनादवैदिकत्वं स्यात्। नैतदस्ति, त्रयाणामपि संनिधावाम्नातत्वात्। एतावदेव हि शब्दानामन्वये कारणम्, आकाङ्क्षा संनिधिर्योग्यत्वं च। संनिधिश्च बुद्धिविपरिवृत्तिमात्रम्। नोपरिष्टादभ्यन्तरं च समाम्नायः साधकः। नापि पुरस्ताद्व्यवहितं च समाम्नायो बाधकः। किंतु अनन्वितपदान्तरव्यवधानं बाधकम्। तदभावः साधकः। अत्र च 'तनूर्वर्षिष्ठा' इत्यादिशेषस्य प्रथमद्वितीयाभ्यां न कथंचिदपि व्यवधानम्। तृतीयस्यापि वाक्यशेषेण संबन्धे द्वितीयं न व्यवधायकम्, द्वितीयस्यानुषज्यमानशेषसाकाङ्क्षतया अन्वितत्वेन अनन्वितपदत्वाभावात्। अनन्वितपदान्तरमेव हि बुद्धिविपरिवृत्तेर्बाधकम्, न त्वाकाङ्क्षितान्वितपदमपि। प्रथमेन संबद्धो द्वितीयस्याकाङ्क्षावेलायां बुद्धौ विपरिवर्तमानस्तेनापि संबध्यते। तत्संबन्धाच्च विपरिवृत्त्यभङ्गात्तृतीयेनापि संबन्धुं शक्नोति। तथा च बुद्धिविपरिवृत्तिरूपसंनिधानं त्रयाणामविशिष्टमिति सकृदाम्नातस्यापि शेषस्य सर्वार्थत्वाद्वैदिकेनैव शेषेण पूरणसंभवे लौकिकशेषाध्याहारो न युक्तः। ननु यत्र साकाङ्क्षाणां संनिधौ शेषः पठ्यते तत्रोक्त-

1. ते अग्ने...क, घ, ङ. 2. वाक्यपरिसमाप्तिः.

रीत्या भवत्वनुषङ्गः । यत्र तु 'चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनातु' इति परिपूर्णानां संनिधौ शेषः पठ्यते 'अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति तत्र कथमनुषङ्गः स्यात्, आकाङ्क्षाविरहात् । न च 'अच्छिद्रेण पवित्रेण' इति शेषस्याकाङ्क्षावशात्पुनात्वित्यन्तानां त्रयाणामप्याकाङ्क्षोत्तिष्ठतीति वाच्यम् । संनिहितेन 'देवस्त्वा सविता पुनातु' इत्यन्तिमेनैवान्वयमासाद्य शान्ताकाङ्क्षस्य शेषस्य पूर्वयोरप्याकाङ्क्षोत्थापनाशक्तेरिति चेत्, सत्यं पुनात्वन्ताः शेषिणो निराकाङ्क्षाः । तथापि 'अच्छिद्रेण' इति शेषस्य तृतीयाश्रुतिभिर्युक्तस्य करणप्रकाशकस्य तत्करणकानुष्ठेयपवनक्रियाप्रकाशनद्वारा प्रकरणे निवेशो वक्तव्यः । सा च पवनक्रिया त्रिष्वपि मन्त्रेषु प्रकाश्यत इति प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वादनुषङ्गः पूर्वयोरपि सिद्धः । इत्यनुषङ्गाधिकरणम् ॥

अग्नीषोमीयपशोः समञ्जनमन्त्राः 'सं ते [1]वायुर्वातेन गच्छताम्, संयजत्रैरङ्गानि, संयज्ञपतिराशिषा' इति । हे पशो, ते तव वायुः प्राणः वायुना संगच्छतामिति प्रथमस्य मन्त्रस्य योजना । 'संयजत्रैरङ्गानि' इति द्वितीयो मन्त्रः । अङ्गानि हृदयादीनि यजत्रैः यागैः सम्, 'सृज्यन्ताम्' 'गच्छन्ताम्' 'पद्यन्ताम्' इत्यादिलौकिकं पदमध्याहर्तव्यम् । न त्वत्र 'गच्छताम्' इत्यनुषङ्गः संभवति, 'गच्छताम्' इत्येकवचनस्य 'अङ्गानि' इति बहुवचनान्तेन संबन्धायोग्यत्वात् । न च एकवचनस्यानुषङ्गायोग्यत्वेऽपि धातुमात्रस्यानुषङ्गोऽस्त्विति वाच्यम् । प्रकृतिप्रत्यययोरेकस्यासंबन्धे सत्यपरस्याप्यसंबन्धनियमेन धातुमात्रस्यानुषङ्गायोगात् । अतो द्वितीयमन्त्रे 'गच्छताम्' इत्यस्यानुषङ्गो न युज्यते । तृतीयमन्त्रे 'सं यज्ञपतिराशिषा' इत्यत्र तु 'गच्छताम्' इत्यनुषज्यते न वेति संशयः । साकाङ्क्षत्वाद्योग्यत्वाच्चानुषज्यते । इति प्राप्ते, सिद्धान्तयति—

१७. व्यवेताननुषङ्गाधिकरणम् ।

व्यवायान्नानुषज्यते ॥ ४५ ॥

बुद्धिपरिवृत्तिरूपसंनिधानं ह्यनुषङ्गे बीजमुक्तम् । अत्र तु 'अङ्गानि' इत्यनेन 'गच्छताम्' इत्यन्वयायोग्येन व्यवधानाद्बुद्धिपरिवृत्तिभङ्गादसंनिधानात् 'सं यज्ञपतिराशिषा' इत्यत्रापि नानुषज्यते । न च 'गच्छताम्' इत्येकवचनान्तं बहुवचनान्ततया विपरिणतम् 'अङ्गानि' इत्यनेनाप्यन्वीयतामिति वाच्यम् । प्रकृतावूहाभावस्य नवमस्य तृतीये 'अपूर्वे त्वविकारोऽप्रदेशात्प्रतीयेत' इत्यधिकरणे व्यवस्थापयिष्यमाणत्वात् । तस्मात्तृतीयमन्त्रेऽपि नानुषङ्गः । इति व्यवायाधिकरणम् ॥

इति द्वितीयाध्याये प्रथमः पादः ॥

1. प्राणो वायुना...क.

द्वितीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

वृत्तमुपोद्घातप्रसक्तानुप्रसक्तम् । इदानीमध्यायार्थो भावनाभेदः प्रस्तूयते ।

सन्ति 'सोमेन यजेत' 'दाक्षिणानि जुहोति' 'हिरण्यमात्रेयाय ददाति' 'प्र उंग शंसाति 'आज्यैः स्तुवते' इत्यादावाख्यातानि। तत्र किमेकैव भावना नानाधात्वर्थानुरक्ता विधीयते, उत तत्त

१. अङ्गापूर्वभेदाधिकरणम् ।

द्धात्वर्थानुरक्ता भिन्नेवेति संशयः। एकैवेति ब्रूमः। यदि हि प्रतिधात्वर्थं भावनाभेदः स्यात्तर्हि भावनाभेदादपूर्वमपि भेदेन कल्प्यं स्यात्। न हि भाव्यापूर्वभेदमन्तरेण भावना भिद्यते, क्रियाणां फलापवर्गत्वेन फलभेदमन्तरेण क्रियाभेदस्यासंभवात्। न च शब्दान्तरत्वेन भावनाभेदसिद्धावनेकापूर्वकल्पनागौरवमपि प्रामाणिकत्वान्न रिष्यतीति[1] वाच्यम्। न हि धातुभेदो भावनां भेत्तुमीष्टे, भावनाया धातुवाच्यत्वाभावात्। प्रत्ययेन हि भावनाभिधीयते। स च सर्वत्रैक एव। अतस्तदर्थस्य भावनाया न भेदः। किंच प्रत्ययार्थत्वाद्भावना प्रधानम्। धात्वर्थास्तु तत्र गुणभूताः। न च गुणभेदेन प्रधानभेदो युज्यते। न च भावनाया अपूर्वं प्रति गुणत्वेऽपि तद्भेदाद्यथा अपूर्वभेदः एवं गुणभूतधात्वर्थभेदादपि भावनाभेदः किं न स्यादिति वाच्यम्। वैषम्यात्। आख्याते न हि भावनायाः क्रियात्वेन प्रतिपादनात्तत्र कारकत्वमेव धात्वर्थस्य न त्वपूर्ववत्फलत्वम्। ततश्च फलापवर्गत्वात्क्रियाणां तद्भेदे फलभेद आवश्यकः न तु कारकभेदे क्रियाभेदः, अरुणमादिकारकभेदेऽपि क्रियभावनाया एकत्वात्। तस्मान्न धात्वर्थभेदो भावनाभेदप्रयोजकः। न च उत्पत्तिशिष्टैकधात्वर्थावरुद्धायां भावनायां धात्वन्तरान्वयासंभवान्नैक्यमिति वाच्यम्। फलवाक्ये हि धात्वर्थाविषया केवलभावना विधीयते। अन्यत्र तु तस्यां भावनायां धात्वर्था गुणा विधीयन्ते। तथा च फलवाक्यैकवाक्यतापन्नैः सर्वैर्वाक्यैर्मिलितैः सर्वधात्वर्थविशिष्टैका भावना विधीयते इत्यविरोधः। न चैवं सर्वेषामपि धात्वर्थानां भावनां प्रति करणत्वापत्तौ न किंचिदप्यङ्गं स्यात्। तथा च इतिकर्तव्यतांशस्यालाभाद्भावना निःस्वरूपा स्यादिति वाच्यम्। 'समिधो यजति' 'तनूनपातं यजति' आज्यभागौ यजति' इत्याद्यसकृच्छ्रुतपर्यायधात्वर्थानुरक्तभावनाभेदस्याप्रिमाभ्यासाधिकरणे साध-

1. दुष्यति...क, घ, ङ.

यिष्यमाणतया तद्विधिभिरितिकर्तव्यतालाभात्सोमलताहरणगवादिदक्षिणाद्रव्यसंपादनाक्षेपोपकल्पना-दिलौकिकेतिकर्तव्यताया अर्थादेव लाभाद्वा। तस्मादेकैव भावना विधीयते। इति प्राप्ते, सिद्धान्तयति—

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्[1] ॥ १ ॥

शब्दान्तरे धातुभेदे श्रूयमाणे कर्मभेदः भावनाभेदः प्रतीयते। कुतः। कृतानुबन्धत्वात्। कृतः अनुबन्धः धात्वर्थेनावच्छेदः यस्य भावनारूपस्य कर्मणः तत्कृतानुबन्धम्। तस्य भावस्तत्त्वम्। तस्मात्। अवच्छेदकीभूतधात्वर्थभेदादिति यावत्॥ अयमाशयः। यद्यपि प्रत्यय एकः तथापि यत्किंचिद्धात्वर्थानुरक्त एव स प्रयुज्यते, न केवलः। एवं च यथा ज्ञानं ज्ञेयविषयरूपानुरञ्जकभेदाद्भिद्यते एवं भावनाया अप्यनुरञ्जकधात्वर्थाधीननिरूपणतया धात्वर्थभेदाद्भेदो न्याय्यः। न च अनेकविषयानुरक्तसमूहालम्बनवदभेदः किं न स्यादिति वाच्यम्। सर्वेषां हि विषयाणां युगपदिन्द्रियसंनिकर्षात्संभवत्येकज्ञानानुरागः। न ह्यत्र युगपन्नानाधात्वर्थानामेकभावनानुरागः संभवति, समुदितेभ्यो धातुभ्यः प्रत्ययस्य कस्यचिदश्रवणात्केवलस्य च अश्रवणात्। यदि हि केवलः प्रत्ययः श्रूयते केवलाश्च धातवः श्रूयेरंस्तदा भवेद्युगपदेव धात्वर्थानामेकभावनानुरागः क्रीणातिवत्। क्रीणातिर्हि सकृत्पृथक्छ्रूयते, अरुणिमादयश्च। [2]अतोऽरुणिमादिभिर्युगपत्क्रयभावना विशेष्यते। नैवमत्र केवलस्य प्रत्ययस्य प्रयोगोऽस्ति। न च फलवाक्ये धात्वर्थाविवक्षया केवलप्रत्ययश्रवणम्। अन्यत्र तु भावनामनूद्य धात्वर्थमात्रविधिरिति युज्यते वक्तुम्, विनिगमनाविरहात् सर्वेषां पदानामेकप्रसरत्वेन फलवाक्योत्पन्नां भावनां प्रत्ययेनानूद्य प्रकृत्यंशैर्धात्वर्थाः करणत्वेन विधीयन्त इति कल्पनाया अयुक्तत्वाच्च। यदि च समुदितेभ्यो धातुभ्य एक एव प्रत्ययः श्रूयेत तदापि भवेद्युगपदेव धात्वर्थानामेकभावनानुरागः, द्वंद्वोत्पन्नसुबर्थवत्। 'अग्नीषोमौ' इत्यादौ हि द्वंद्वाद्विभक्तिः श्रूयते, न तु प्रत्येकम्, एकैकस्य [3]द्वंद्वत्वाभावात्। अतस्तत्र द्वित्वादिकं समुदितैरेव प्रातिपदिकार्थैर्विशेष्यते। प्रकृते तु न समुदितेभ्यो धातुभ्यः प्रत्ययस्य श्रवणमस्ति, प्रत्येकमेव तस्य श्रवणात्। तथा च प्रत्ययो यजिपरः श्रूयमाणः केवलयागकरणिकां भावनां श्रुत्या एकपदोपात्तत्वरूपया विधत्ते। होमदानादयस्त्वन्यधात्वर्थास्तस्यामेव भावनायां निविशमानाः पदान्तरं गतत्वाद्वाक्येन संनिधिरूपप्रकरणेन वा निवेक्ष्येरन्। तथा च दुर्बलाभ्यां वाक्यप्रकरणाभ्यां प्रबलायाः श्रुतेर्बाधः स्यात्। न च सत्यपि श्रुतिप्राबल्ये एकस्य करणत्वेन इतरस्याङ्गत्वेन निवेशे विरोधाभावान्न बाध इति वाच्यम्। सर्वेषामेव भावनान्वये सति विनिगमनाविरहेण सर्वेषामपि करणत्वापत्तावेकस्य[4] करणत्वमितरस्य तदङ्गत्वमित्येकांशेपनिपातेन विरोधसत्त्वात्। न च समुच्चयसंभवान्न विरोध इति वाच्यम्

---

1. कृतानुबन्धित्वात्. 2. अतोऽरुणादिभिः...घ, ङ. 3. द्वित्वाभावात्...ख. 4. करणत्वादेकस्य.

समुच्चये सति नैरपेक्ष्यविरोधात्, 'यजेत' इत्यादिप्रकृतिप्रत्ययाभ्यां धात्वर्थभावनयोर्निरपेक्षाभ्यसाधनभावावगमात्, 'समर्थः पदविधिः' इत्यस्य प्रत्ययविधावपि प्रवृत्तेरभ्युपगमात् । यथा चैतत्तथोक्तम् 'अर्थाद्वा कल्पनैकदेशत्वात्' इत्यत्र पूर्वाध्यायान्ते । न च यथा 'अग्नये दात्रे पुरोडाशमष्टाकपालम्' इत्यादौ पृथग्विभक्तिश्रवणेऽपि दातृत्वविशिष्टाग्निलक्षणदेवताकारकमेकम्, तद्वदिहापि किं न स्यादिति वाच्यम् । दातृशब्दात्परस्या विभक्तेर्विशेषणविभक्तित्वेन साधुत्वार्थतया तत्र सत्यपि पृथक्प्रत्ययश्रवणे विशिष्टैककारकविधिसंभवेऽपि प्रकृते विशेषणविशेष्यभावाभावेन पृथक्प्रत्ययश्रवणस्य विशिष्टैकभावनाविधिबाधकत्वात् । एवं च विशिष्टविध्यसंभवे सत्यनुरञ्जकधात्वर्थभेदाद्भावनाभेदः सिद्धः । प्रयोजनं पूर्वपक्षे यागदानहोमादीनां समप्राधान्यम् । सिद्धान्ते तु भावनाभेदात्सोमयागस्यैव प्राधान्यम्, दाक्षिणहोमादीनां तु 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायेन तदङ्गत्वमिति । इति शब्दान्तराधिकरणम् ॥

'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिर्यजति' 'स्वाहाकारं यजति' इति पञ्चकृत्वो यजतिपदं श्रुतम् । तत्किमेकां भावनां प्रतिपादयति, उत प्रतिपदं भेदेनेति

२. समिदाद्यपूर्वभेदाधिकरणम् ।

संशयः । एकामिति ब्रूमः । प्रत्ययांशैक्येऽपि प्रकृतिभूतधात्वर्थानुरञ्जकभेदात्प्रत्ययार्थोऽपि भावना भिद्यत इत्युक्तम् । इह तु प्रकृत्यर्थस्यापि यागस्यैकत्वात्कथं भावनाभेदः । न हि पुनःश्रवणमात्रेण शब्दस्यार्थो भिद्यते । तदेव हि पदं पुनः श्रूयते, अभेदेन प्रत्यभिज्ञानात् । न च शब्दस्य भेदं विना तदर्थभेदः प्रामाणिकः । तस्मान्नात्र भावनाभेदः । ननु, मास्त्वभ्यासात्कर्मभेदलाभः । समिदादिसंज्ञाभेदात्तु कर्मभेदः स्यात् । 'अथैष ज्योतिरथैष विश्वज्योतिः' इत्यादौ संज्ञाभेदात्कर्मभेदस्य 'संज्ञा चोत्पत्तिसंयोगात्' इत्यत्रानुपदमेव वक्ष्यमाणत्वादिति चेत्, नैष दोषः । समित्तनूनपादादिशब्दानां हि संज्ञात्वं वदन्प्रष्टव्यः, संज्ञात्वावगमात्पूर्वं कर्मभेदोऽवगतो न वेति । न द्वितीयः, तर्हि यागैकत्वे सति प्राथमिकसंज्ञावरुद्धे तस्मिन्यागे तनूनपादादिसंज्ञान्तरनिवेशायोगेन तनूनपादादिशब्दानां संज्ञात्वस्यैवासिद्धेः । नाद्यः, संज्ञात्वावगमात्पूर्वं कर्मभेदग्राहकप्रमाणाभावात्पुनःश्रवणस्य च दृढतराभेदप्रत्यभिज्ञासिद्धयजिधात्वर्थैकत्व[1]विरुद्धतद्भेदप्रयोजकत्वाभावात् । एवं च तनूनपादादिशब्दानां संज्ञात्वावगमे कर्मभेदः, कर्मभेदावगमे च सति तेषां संज्ञात्वमित्यन्योन्याश्रयः । 'अथैष ज्योतिरथैष विश्वज्योतिः' इत्यत्र तु यागशब्दाभावात्तत्र यागभेदावगमं विना संज्ञात्वावगमः स्पष्ट इति वक्ष्यते । 'उद्भिदा यजेत' इत्यादौ तु धातुपाराय्यविप्रकृष्टविधानादिदोषप्रसङ्गेन गुणविध्यसंभवादेव संज्ञात्वनिश्चय इति प्रागेव निरूपितम् । अतस्तत्रापि यागभेदावगमं विनैव संज्ञात्वावगम इति वैषम्यम् । न चैवमपि यजतिपदस्य पुनःश्रवणानर्थक्यं शङ्क्यम्, समिद्यागे तनूनपादादिदेवताविधानार्थत्वात् । न चैवमपि गुणाद्भेदः स्यात्,

1. धात्वेकत्वलब्धयागैकत्वविरुद्ध.

'गुणश्चापूर्वसंयोगे–' इत्यधिकरणे गुणस्यापि कर्मभेदकताया अनुपदमेव वक्ष्यमाणत्वादिति वाच्यम्। वैषम्यात्। गुणाधिकरणे ह्युत्पन्नशिष्टो गुण उत्पत्तिशिष्टगुणावरुद्धे कर्मणि निवेशमलभमानः कर्म भिनत्तीति वक्ष्यते। प्रकृते च समित्संज्ञके कर्मणि तनूनपादादिगुणा उत्पन्नशिष्टाः संभवन्निवेशाः कथं कर्म भिन्युर्दध्यादिवत्। 'अग्निहोत्रं जुहोति' इति द्रव्यासंयुक्तोत्पन्नकर्मानुवादेन विधीयमाना हि दध्यादय उत्पन्नशिष्टाः सन्तो न कर्म भिन्दन्ति। न च 'तनूनपादग्न आज्यस्य वेतु' इत्यादिमन्त्रवर्णादेव तनूनपादादिप्राप्तेस्तद्विधिरनर्थक इति वाच्यम्। एकस्यैव यागस्य मान्त्रवर्णिकदेवतावलम्बनेन तनूनपादाद्यनेकदेवताकत्वेन प्रशस्तो याग इत्येवं स्तुत्यर्थत्वेन सार्थक्यात्। यद्यपि स्तुत्यर्थं वाक्यमनर्थप्रायम्, तथापि दृढतराभेदप्रत्यभिज्ञाबलेन कर्मैकत्वस्य न्याय्यत्वेन तन्न दोषावहम्। न हि प्रमाणस्वरसात्प्रतीयमानं प्रयोजनानुसारेण परित्यक्तुमुचितम्। न च समिद्वाक्यमेव विधिरितरे स्तुत्यर्था इत्यत्र विनिगमनाविरह इति वाच्यम्। प्रथमश्रुतत्वेन समिद्वाक्यस्यैव विधायकतया चरमश्रुतत्वेनेतरेषां स्तुत्यर्थताया उचितत्वात्। तस्मादेको यागः। तदेकत्वाद्भावनैक्यम्। इति प्राप्ते, सिद्धान्तयति—

एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यात् ॥ २ ॥

'समिधो यजति' इत्यादौ एकस्य यजतेः पुनःश्रुतिरपि एवं शब्दान्तरवद्भेदिका। हि यस्मात्कारणात् भेदाभावे विधेः पुनःश्रवणम् अनर्थकं स्यात्। न च स्तुत्यर्थत्वेन सार्थक्यं शङ्क्यम्। अप्रवृत्तप्रवर्तनं हि विधिश्रुतेः स्वभावसिद्धम्। 'य एवं विद्वान्पौर्णमासीं यजते' इति विद्वद्वाक्यं तु रूपालाभाद्गुणवद्बाधकादनुवादकमिति वक्ष्यते। न चात्र किंचिद्बाधकमुपलभामहे। अतः संभवन्त्यामप्रवृत्तप्रवर्तनात्मतायामनर्थकप्रायं स्तुत्यर्थत्वं न युक्तमाश्रयितुम्। अतः कर्मभेद एव युक्तः। न चेहापि दृढतरप्रत्यभिज्ञैव बाधिकेति वाच्यम्। प्रत्यभिज्ञा हि 'स एवायं यजतिः' इत्याकारा। तत्र 'यजतिः' इत्यंश एव यजतिश्रुत्या गम्यते, न 'सोऽयम्' इति तत्तांशः, 'सोऽयम्' इत्यभेदबुद्धेः पदान्तरसंनिधिकृतत्वात्। न हि संनिधिकृतप्रत्यभिज्ञया विधिश्रुतिकृतकर्मभेदस्य बाधः संभवति। तस्माद्विधिश्रुत्या कर्मभेदः। एतेन संनिधिकृतप्रत्यभिज्ञाया अबाधाय पुनःश्रवणं गुणविधानार्थमिति निरस्तम्। यागकरणिका हि भावना [1]प्रत्ययश्रुत्या विधीयत इति कर्मविधौ श्रुत्यनुग्रहः संनिधिकृताभेदप्रत्यभिज्ञाबाधात्संनिधिबाधश्च; गुणविधौ तु तनूनपादादिगुणस्योपपदार्थस्य वाक्येन विधानं संनिधिकृताभेदप्रत्यभिज्ञाया अबाधश्चेति संनिधिवाक्यप्रमाणयोरनुग्रहः श्रुतिबाधश्च। न चैतद्युज्यते, दुर्बलाभ्यां संनिधिवाक्याभ्यां श्रुतिबाधस्यायुक्तत्वात्। ननु 'दध्ना जुहोति' इत्यादौ संनिहितप्रत्यभिज्ञाबलादेव धात्वर्थभावनयोर्विधिबोधितत्वात्पदान्तरार्थस्य दध्यादेर्विधानमङ्गीकृतम्। तद्व-

1. प्रत्ययेन--ख.

दिहापि किं न स्यादित्यत आह—अविशेषादिति। दध्यादिवद्विधेयविशेषस्याभावादित्यर्थः। दध्यादेरविधाने दध्यादिपदानर्थक्यापत्त्या तद्विधानावश्यकत्वेऽनेकार्थविधानाशक्त्या कर्मानुवादकाङ्क्षायां संनिधिकृताभेदज्ञानं दध्यादिरनुमन्यते। नैवम् 'तनूनपातम्' इत्यादिपदं तद्विध्यभावेऽनर्थकम्, मन्त्रवर्णप्राप्तदेवतोपजीविनो[1] नामधेयतयार्थवत्त्वसंभवात्। एवं च श्रुत्यवगतं कर्मविधानं न बाधितव्यं भवति। अतो यागभेदाद्भावनाभेदस्तद्भेदाच्चापूर्वभेद इति सिद्धम्। अत्र ब्रूमः। 'समिधो यजति' इत्येव विधिः 'तनूनपातं यजति' इत्यादयोऽर्थवादा इति पूर्वपक्षस्य कथमुन्मेषः, 'पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात्' इति वक्ष्यमाणन्यायेन संख्यया कर्मभेदस्य निश्चितत्वात्। वाजसनेयके हि 'देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त' इत्युपक्रम्य 'ते देवा अर्चन्तः श्राम्यन्त एतान्प्रयाजान्ददृशुः। तैरयजन्त तैर्ऋतून्प्राजनयन्नृतुभ्यः संवत्सरं संवत्सरात्सपत्नानन्तरायन्। तस्मात्प्रयाजा नाम। प्रजया ह वै नामैतद्यत्प्रयाजा इत्याहुस्तस्मात्प्रयाजैर्यजते' 'ऋतवो वै प्रयाजास्तस्मात्पञ्च भवन्ति' इत्युपक्रम्य 'त आज्यहविषो भवन्ति यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रमेत् आश्राव्याह समिधो यजेति यज यजेत्येवोत्तरानाह; समिधो यजति, अथ तनूनपातं यजति, अथेडो यजति, अथ बर्हिर्यजति, अथ स्वाहेति यजति, वेतु व्यन्त्विति यजति उत्तमे प्रयाजे यावन्ति हवींषि भवन्ति स्वाहा स्वाहेत्येव तानि यजति, उत्तमं प्रयाजमिष्ट्वा हवींष्यभिधारयति, प्रथमे प्रयाज इष्टे ब्रूयादेको ममैका तस्येति, द्वितीये द्वौ मम द्वे तस्येति, तृतीये त्रयो मम तिस्रस्तस्येति, चतुर्थे चत्वारो मम चतस्रस्तस्येति, पञ्चमे पञ्च मम न तस्य किंचनेति', 'उत्तमान्प्रयाजानावाहयन्ति प्रथमान्यजन्ति' इत्यादि श्रूयते। तत्रोत्पत्तौ 'प्रयाजैः' इति बहुवचनेन संख्यया कर्मभेदस्यैवावगतत्वात्कर्मैक्यपक्षस्यानुन्मेष एव। कर्मैक्ये च यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रामेत्' 'यज यजेत्युत्तरान्' 'प्रथमे प्रयाज इष्टे उत्तमं प्रयाजमिष्ट्वा' इत्याद्यनुपपन्नं स्यात्, 'अथ तनूनपातं यजति' 'अथेडः' इति प्रतिपदमथशब्दाश्रासमञ्जसाः स्युः। तथा सिद्धान्ते समिदादिशब्दानां नामधेयत्वकथनमप्ययुक्तम्, आनर्थक्यात्। नाम्नां हि चत्वारि प्रयोजनानि भाष्यादौ दर्शितानि। तत्र संकल्पर्त्विग्वरणादौ 'अनेनाहं यक्ष्ये' इति लघूपायेनाख्यानमेकम्। न च समिदादियागानामङ्गभूतानां संकल्पो वा ऋत्विग्वरणं वास्ति। दर्शपूर्णमासावारप्स्यमाणोऽन्वारम्भणीयामिष्टिं निर्वपति' इति क्वचिद्गुणोपबन्धः फलम्। न चात्र समिदादिशब्दोपबन्धेन किंचिद्विधीयमानमस्ति। न च 'समिधः पुरस्ताद्यजति' 'तनूनपातं दक्षिणतः' इत्यादिगुणोपबन्धः फलमिति वाच्यम्। 'संप्रदानस्य च कर्मसंज्ञा वक्तव्या' इति व्याकरणबलेन 'अग्निं यजति' इत्यादिवद्वितीयायाः संप्रदानत्वार्थकतया समिदादिदेवतायै आहुतिमाहवनीयस्य पुरस्ताद्भागे जुहुयादित्येवमर्थपर्यवसानेनादोषात्। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति

1. उपजीवनेन...क, ग, घ, ङ.

फलोपबन्धः । न चाङ्गभूतानामेतेषां फलोपबन्धसंभवः। 'अथैष ज्योतिः' इत्यादौ कर्मभेदः फलम्। संख्यया चात्र कर्मभेदः सिद्धः । तथा च नामधेयत्वे प्रयोजनाभावादेवतालक्षणगुणविधानार्थत्वमेव । समिदादिशब्दानां च देवतानामत्वं संकर्षकाण्डादवगतम् । तत्र हि द्वितीयाध्यायस्य द्वितीयपादे 'तत्र देवतानामादेशो न विद्यतेऽनाम्नानात्' इति पूर्वपक्षसूत्रे 'यज' इति याज्याप्रैषे देवतानामधेयं नादेष्टव्यमिति पूर्वपक्षयित्वा; 'विद्यते वान्यार्थदर्शनेभ्यः' इति सूत्रेण 'यत्तनूनपातं यजेडो यजेति ब्रूयाज्जामि स्यात्' इति प्रयाजेषु देवतादेशस्य निन्दया तदितरत्र देवतादेशविधिरनुमीयत इति सिद्धान्तयित्वा; 'आम्नातः प्रयाजेषु देवतादेशस्तस्य प्रतिषेधोवचनमितरेषु' इति गुणसूत्रेण शाखान्तरे 'तनूनपातं यज' इत्यादिप्रत्यक्षविहितस्य देवतादेशस्य 'यत्तनूनपातं यजेडो यजेति ब्रूयात्' इति निन्दा, अतः प्रयाजेभ्योऽन्यत्र न देवतादेशः 'आश्राव्य ब्रूयादिन्द्रं यजेति' 'आश्राव्य ब्रूयान्मरुतो यजेति' इत्यादिवचनाभावे सति इत्याक्षिप्य; 'आम्नातो वैकेषां तदर्शयत्यमुष्मा अनुब्रूह्यमुं यजेति' इति सूत्रेण सर्वत्र याज्याप्रैषादौ देवतादेशः कर्तव्य इति शाखान्तरे प्रत्यक्षविहितम्, क्वचित् 'इन्द्रं यज' इत्यादिवचनं त्वनुवाद इति समाहितम् । न च 'समिधो अग्न आज्यस्य वियन्तु' इत्यादिमन्त्रवर्णत एव तत्प्राग्नेरानर्थक्यमिति वाच्यम् । हे अग्ने, समिधः आज्यं प्राप्नुवन्तु इत्येवमग्नेः शाब्दप्राधान्यान्मन्त्रस्तुत्यत्वलक्षणदेवतात्वम्, समिदादीनां तु हविर्भागित्वलक्षणं देवतात्वमित्युभयेषामपि देवतात्वेन 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्' इति संकर्षकाण्डे वक्ष्यमाणदेवताशब्दध्यानादिकार्यमग्निशब्दस्य निवर्तयितुं समिदादिदेवताविधानस्यावश्यकत्वात् । न चैवं सति कौषीतकिब्राह्मणे 'देवासुरा एषु लोकेषु संयत्ता [1]आसंस्तेभ्योऽग्निरपाक्रामत्' इति प्रस्तुत्य 'स एतं वरं वव्रे प्रयाजान्मेऽनूयाजांश्च केवलानूर्जस्वन्तं हविषो दत्तभागं घृतं चापां पुरुषं चौषधीनामिति तस्मादाहुराग्नेयाः प्रयाजानूयाजाः' इत्यग्निदेवत्यत्वश्रवणविरोध इति वाच्यम् । अत एव विकल्पोपपत्तेः । वस्तुतस्तु 'समिधो यजति' इत्यादयो होतुर्याज्याविधय एवेत्युचितम्, 'आश्राव्याह समिधो यजेति यज यजेत्युत्तरान्' इत्यनन्तरम् 'समिधो यजति' इत्याम्नानात् । 'समिधो यज' इत्याध्वर्यवसंप्रैषानन्तरं होतुर्याज्यानुक्रमणस्यैव प्राप्तावसरत्वात् । 'समिधो यज' इति संप्रैषस्य हि 'होतः समिधो याज्यया प्रकाशय' इत्यर्थः, देवतोद्देश्यकद्रव्यत्यागे होतुर्नियोजनासंभवात् । 'समिधो यजति' इत्यादेरप्ययमेवार्थः । 'समिधः समिधो अग्न आज्यस्य वियन्तु' इत्यादियाज्या वदतीति पर्यवस्यति । न च 'आग्नेयाः प्रयाजाः' इति कौषीतकिब्राह्मणरीत्याग्निदेवत्यत्वे 'समिधो यज' इति संप्रैषानुपपत्तिरिति वाच्यम् । तत्राग्निशब्दस्य समिदादिनामकाग्निविशेषपरत्वेनाविरोधात्, संकर्षकाण्डे द्वितीयस्य द्वितीयपादाद्याधिकरणे 'स यत्रैतदध्वर्युराह समिधो यजेत्याग्नेयमेतद्रूपं [2]परोक्षमग्निं यजेत्येव तदाह' इत्यादिभाष्योदाहृतश्रुतेश्च । 'समिदादयोऽग्निविशेषाः प्रयाजदेवताः

1. आसुः...क, ख, ग, घ. 2. आग्नेयमेव तद्रूपं...क, घ,

इत्युपक्रम्य भट्टभास्करीयवेदभाष्ये समिदादिशब्दानां तथैव व्याख्यातत्वाच्च । तथथा समिध्यन्ते येन भावाः । समिद्वासन्तिकोऽग्निः । तदा हि भावाः समुज्ज्वला भवन्ति । बहुत्वमविवक्षितम् । 'समिधो बर्हीरिव यजति' इति बहुत्वस्येवशब्देनापारमार्थिकत्वद्योतनात् । हे अग्ने आहवनीय समिन्नामा वासन्तिकोऽग्निः आज्यं प्राप्नोत्वित्यर्थः । [1]तनूं न पातयिता संशोषयिता ग्रैष्मोऽग्निः । तदा हि भावानां शोषो भवति । इषमन्नं करोति इट् वार्षिकोऽग्निः । 'तत्करोति' इति णिचि किपि रूपम् । तदा हि सस्यान्युद्भवन्ति । बहुत्वमविवक्षितम् । 'इडो बर्हीरिव यजति' इति ब्राह्मणम् । बृंहणाद्बर्हिः शारदोऽग्निः । तदा हि भावा बृंहन्ति । स्वाहाशब्देन दाहो लक्ष्यते । तं करोतीति स्वाहाकारः हैमन्तिकोऽग्निः । तदा खलु हिमाग्निना भावा दग्धाः अवसन्ना भवन्तीति । यद्वा समिदादिशब्दा उक्तव्युत्पत्त्या वसन्तादिपराः, 'वसन्तो वै समित्' 'ग्रीष्मो वै तनूनपात्' इत्यादिवाक्यशेषात् । तथा च हे अग्ने समिदादिशब्दवाच्यो वसन्तादिः आज्यं प्राप्नोतु, स वसन्तादिस्तुभ्यमपि दास्यतीत्यर्थः; अन्यथा 'अग्ने' इति संबोधनस्य वैयर्थ्यात् । अत एव वाजसनेयके 'ऋतवो ह वै यज्ञे देवेषु भागमीषिरे' इत्युपक्रम्य श्रूयते 'तान्होचुः । कं भागमभ्ययामेति । स होवाच । प्रथमानेव वो यज्ञेन यजामहा इति । तथेति होचुः । वयं त्वान्वाभजामेति । यो नो अग्ने देवेषु भागमविद इति । स एषोऽग्निर्ऋतुष्वन्वाभक्तः समिधो अग्ने तनूनपादग्ने इडो अग्ने इति । तदग्निमन्तः सर्वे प्रयाजाः । अन्वाभक्तो ह वै तस्यां साधुकृत्यायाम्' इत्यादि । अतोऽग्निदेवत्यत्वप्रतिपादनपरकौषीतकिब्राह्मणस्यापि न विरोधः । तस्मात्समिदादिवाक्यानि याज्याविधिपराण्येव । अत एव 'देवा ह वै यज्ञं तन्वानाः' इत्युपक्रम्य 'तमेतस्मिन्नेवोत्तमे प्रयाजे स्वाहाकारेण सर्वं यज्ञं समस्थापयन् । स्वाहाग्निमिति तदाग्नेयमाज्यभागम् । स्वाहा सोममिति तत्सौम्यमाज्यभागम् । स्वाहाग्निमिति तदाग्नेयमष्टाकपालं पुरोडाशं योऽयमुभयत्राच्युतो भवति । अथ यथादेवतं स्वाहा देवा आज्यपा इति । तत्प्रयाजानूयाजानाह । जुषाणा अग्न आज्यस्य वियन्त्विति तत्स्विष्टकृतम् । तस्मादुत्तमे प्रयाजे यावन्ति हवींषि स्वाहा स्वाहेत्येव तानि यजन्ति' इति याज्याव्याख्यानपुरःसरमुत्तमप्रयाजमनूद्य इतिशब्देन तद्विधिः संगच्छते । कर्मविधिपरत्वे तु तदसंगतिः स्पष्टैव । तैत्तिरीयकेऽपि 'सत्यं प्रपद्ये' इति मन्त्रसमाम्नायस्य कृत्स्नप्रभस्य विनियोजकं ब्राह्मणम् 'देवा वै नर्चि' 'अयज्ञो वा एषः' 'अग्ने महाꣳ असीत्याह' 'त्रींस्तृचाननुब्रूयात्' 'निवीतं मनुष्याणाम्' 'समिधो यजति' 'चक्षुषी वा एते यज्ञस्य' 'मनुः पृथिव्या यज्ञियम्' 'पशवो वा इडा स्वयम्' 'अग्नीध आदधाति' 'देवा वै यज्ञस्य' इत्याम्नातम् । तत्रादितः पञ्चभिरनुवाकैः 'अग्निर्होता वेत्वग्निः' इति स्रुगादापननिगदान्ते मन्त्रसमाम्नाये विनियुक्ते तदनन्तरपठिताः 'समिधो अग्न आज्यस्य वियन्तु' इत्यादिमन्त्राः 'समिधो यजति' इत्यनुवाके

1. तनूनां न पातयिता संकोचयिता—क, ग, घ, ङ.

विनियोज्यन्त इत्युचितम् । 'चक्षुषी वा एते यज्ञस्य' इत्यनुवाके तदनन्तरमन्त्राणाम् 'अग्निर्वृत्राणि' इत्यादीनाम् 'ऋचमनूच्याज्यभागस्य जुषाणेन यजति' 'मूर्धन्वती पुरोनुवाक्या भवति' 'नियुत्वत्या यजति' 'पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति उपरिष्टाल्लक्ष्मा याज्या' इति विनियोगवचनाच्च । मध्ये 'आधारमाधारयति' 'अभिक्रामं जुहोति' इत्याद्याध्वर्यवाम्नानं तु प्रासङ्गिकम् । तथा बाह्वृच्ये कौषीतकब्राह्मणे हौत्रैकविधिपरे 'अथ पुरस्तात्सामिधेनीनां जपति' इति प्रस्तुत्य सामिधेन्यनुवाचनादिस्तुगादापनान्तमनुक्रम्य 'प्रयाजान्यजति । ते वै पञ्च भवन्ति । समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकृतिमन्ततो यजति, उत्तमे प्रयाजे देवताः समावपति, पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवतोऽमावास्यायां वृधन्वन्तौ, अग्निं प्रथमं देवतानां यजति, अथ पौर्णमास्यामग्नीषोमौ यजति' इत्यादि । तस्मात्समिदादिवाक्यानि याज्याविधिपराण्येवेति वेदार्थज्ञानकुशला मीमांसकशिरोमणयो विदांकुर्वन्तु । अधिकरणस्योदाहरणं तु 'वाजप्रसवीयं जुहोति' 'राष्ट्रभृतो जुहोति' 'वातनामानि जुहोति' इत्याद्युदाहार्यम् । इत्यभ्यासाधिकरणम् ॥

३. आधाराद्याग्नेयादीनामङ्गाङ्गिभावाधिकरणम् ।

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' 'ताभ्यामेतदग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' 'उपांशुयाजमन्तरा यजति' 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' 'ऐन्द्रं दध्यमावास्यायाम्' 'ऐन्द्रं पयोऽमावास्यायाम्' इति कालसंयुक्तानि वाक्यानि श्रूयन्ते। तथा 'प्रयाजान्यजति' 'आज्यभागौ यजति' 'स्विष्टकृतं यजति' इत्यादीन्यकालसंयुक्तानि । तत्संनिधाविदमाम्नायते 'य एवं विद्वान्पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति । तत्र संशयः, किमत्र यजती अपूर्वयोः कर्मणोः पौर्णमास्यमावास्यासंज्ञकयोर्विधातारौ, उताग्नेयादियागानां कालसंयुक्ततया श्रुतानां तादृशकालरूपप्रवृत्तिनिमित्ताभ्यां पौर्णमास्यमावास्यापदाभ्यां विशेष्यमाणावनुवदितारौ इति। विधिपुनःश्रुत्या विधायकाविति ब्रूमः। न च द्रव्यदेवतयोरलाभात्कथं यागान्तरतेति वाच्यम्। 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति द्रव्यलाभात् 'वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम्' इति वाक्यविनियुक्तमन्त्रवर्णतो देवतालाभाच्च । 'अग्निर्वृत्राणि' 'त्वं सोमासि' इत्यृचौ वृत्रहननप्रकाशिके वार्त्रघ्न्यौ । 'अग्निः प्रत्नेन मन्मना' 'सोम गीर्भिष्ट्वा वयम्' इत्यृचौ वृद्धिप्रकाशकत्वाद्वृधन्वत्यौ । छान्दसं रूपम् । अनूच्येते पुरोनुवाक्ये क्रियेते । न च 'सर्वस्मै वा एतद्यज्ञाय गृह्यते' इति वाक्यस्य वैशब्दोपबन्धेन विधायकत्वासंभवात्, 'वार्त्रघ्नी पूर्णमासे' इति वाक्ययोश्च, मन्त्रसमाम्नाये अविशेषपठितस्य पुरोनुवाक्यायुगलद्वयस्याज्यभागयोः कालद्वयगतयोरव्यवस्थया प्राप्तौ, तयोर्व्यवस्थार्थत्वस्य तृतीयाद्ये 'मिथश्चानर्थ—' इत्यत्र वक्ष्यमाणत्वाच्च न ततो द्रव्यदेवतालाभ इति वाच्यम् । 'सर्वस्मै' इति स्पष्टतादर्थ्यचतुर्थीबलेन विधायकत्वे सिद्धे वैशब्दस्य

यदाग्नेयादिवाक्ये यच्छब्दस्येव विधिशक्तिप्रतिबन्धकत्वाभावात् 'मिथश्चानर्थ—' इत्यधिकरणसिद्धान्तस्य एतदधिकरणपूर्वपक्षावसरेऽनुन्मेषाच्च। तत्र हि वार्त्रघ्नीवृधन्वतीवाक्ययोः आग्नेयादिषु मन्त्रविधायकत्वं न भवति, तेषाम् 'अग्निर्मूर्धा' इत्यादिपुरोनुवाक्यावरुद्धत्वात् केवलस्य सोमस्य देवतात्वाभावेन सोमदेवत्ययाज्यानुवाक्यायुगलस्य तेषु विध्यसंभवाच्च; नाप्याज्यभागयोर्मन्त्रविधायकत्वम्, तयोः क्रमादेव तत्प्राप्तेः; अत आज्यभागयोः पुरोनुवाक्याव्यवस्थापकत्वं तद्वाक्ययोरिति सिद्धान्तो भविष्यति। विद्वद्वाक्ययोर्विधायकत्वे च तद्विहितकर्मणोरेव मन्त्रविधानमिमे वाक्ये कर्तुं शक्नुतः, मन्त्रान्तरावरोधरूपबाधकाभावात्। न च संनिधानादाज्यभागयोरेव मन्त्रप्राप्तिरस्त्विति वाच्यम्। वाक्यतो विद्वद्वाक्यविहितकर्मणोर्मन्त्रविधिसंभवे दुर्बलसंनिधिवशेनाज्यभागार्थतायां असंभवात्। एवं चेदानीमाज्यभागयोः पुरोनुवाक्यायुगलद्वयस्य प्राप्तेरेवाभावेन तद्वयवस्थार्थत्वसिद्धान्तस्य कथमुन्मेषः। न च विद्वद्वाक्यविहिते एकैकस्मिन्कर्मणि पुरोनुवाक्यायुगलस्य कथं संनिवेश इति वाच्यम्। एकस्या ऋचः पुरोनुवाक्यात्वेन अन्यस्या याज्यात्वेन च समावेशोपपत्तेः। न च 'अनूच्येते' इति विरोधः शङ्क्यः, याज्याया अपि प्रैषानन्तरमुच्चारणीयत्वेन तदविरोधात्। न चैवं सति कथमाज्यभागयोर्मन्त्रदेवताप्राप्तिरिति वाच्यम्। 'जुषाणो अग्निराज्यस्य वेतु' 'जुषाणः सोम आज्यस्य हविषो वेतु' इत्यनयोराज्यभागाभ्यामन्यत्र विधानाभावेन तयोः संनिधिप्राप्ताज्यभागाङ्गत्वानपायात् तत एवाज्यदेवतयोर्लाभात्। [1]अनुवाक्याद्वयं च तयोरग्निदेवत्यं सोमदेवत्यं चागमयितव्यम्। अतो द्रव्यदेवतालाभसंभवाद्विद्वद्वाक्ये अपूर्वकर्मविधायके। अन्यथा तयोरानर्थक्याच्च। न च षण्णामपि यागानां समुदायद्वयसिद्ध्यर्थं, त्रिकभेदेन पौर्णमास्यमावास्यासंज्ञाद्वयसिद्ध्यर्थं वानुवादः, ततश्च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्येन कालसंयुक्तसमुदायद्वयस्य फलसंबन्धः सिध्यतीति वाच्यम्। पौर्णमास्यमावास्याशब्दयोः संज्ञात्वेऽपि फलवाक्यगतदर्शपूर्णमासशब्दयोः संज्ञात्वासिद्ध्या कालसंयुक्तानामेव फलसंबन्धस्यासिद्धेः। फलवाक्ये दर्शपूर्णमासशब्दयोर्न समुदायपरत्वम्, यजिसामानाधिकरण्यविरोधात्। न हि समुदायो यागात्मा भवति। किंतु समुदायिपरत्वमिति समुदायद्वयसिद्ध्यापि कालसंयुक्तानामेव फलसंबन्धस्यासिद्धेश्च। विद्वद्वाक्ययोरविधायकत्वे 'पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया' इत्यानर्थक्याच्च। न हीमे वाक्ये आग्नेयादीनां कालविधायके भवतः, यदाग्नेयादिवाक्यैरेव तत्प्राप्तेः। न च यदाग्नेयादिवाक्यैः कालसंयोगावगमेऽपि षण्णामेकैकस्मिन्नेकस्मिन्वा पर्वणि प्रयोगः स्यात्तन्मा भूत्, किंत्वेकस्य त्रिकस्य पौर्णमास्यां सहप्रयोगः अन्यस्यामावास्यायामिति सहप्रयोगसिद्ध्यर्थे ते वाक्ये इति वाच्यम्। 'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत'

---

1. अनुवाक्याद्वयं च तयोरग्नीषोमदेवताकम् 'अग्नीषोमाविमं सुमे अग्नीषोमा हविषः प्रस्थितस्य' इत्यादिकमागमयितव्यम्। —क.

इति कालविधौ सत्यपि सर्वासामिष्टीनां सर्वेषां पशुबन्धानां सोमानां च यथा न सहप्रयोगः एवमिहापि सत्यपि कालविधौ सहप्रयोगासिद्धेः। विद्वद्वाक्ययोः कर्मान्तरविधायकत्वे तु तयोः कर्मणोः कालविधानेन 'पौर्णमास्यां पौर्णमास्या' इत्यादिवाक्ये सार्थके भवतः। न चैवं सति पौर्णमास्यमावास्याशब्दयोः संज्ञात्वे सति [1]ताभ्यां विद्वद्वाक्यविहितकर्मानुवादेन कालविधिः, कालविधौ च तयोस्तत्प्रत्यन्यायेन नामत्वमिति परस्पराश्रय इति वाच्यम्। प्रवृत्तिनिमित्तानिश्चयेऽपि सामानाधिकरण्यमात्रेण 'अथैष ज्योतिः' इत्यादिवत्संज्ञात्वनिश्चयसंभवेनान्योन्याश्रयानवकाशात्। अतो विद्वद्वाक्ये विधायके। एवं चाग्नेयादियागानां षण्णां विद्वद्वाक्यविहितयागयोः प्रयाजादीनां च सर्वेषां यागानां प्राधान्यं फलति, फलवाक्ये यजिना सर्वेषामपि विशेषेण परामर्शात्। न च तत्र 'दर्शपूर्णमासाभ्याम्' इति विशेषणाद्दर्शपूर्णमासकालयुक्तश्रुतयागविशेषपरत्वं यजेः शङ्क्यम्, कालसंयुक्तानां यागानां बहुत्वेन द्विवचनानुपपत्तेः। न च समुदायद्वयाभिप्रायं द्विवचनमिति वाच्यम्। [2]समुदायद्वयं हि किं फलवाक्यादन्यत्र सिद्धम्, उत फलवाक्य एव। नाद्यः, एकावगत्यनुप्रवेशेन हि कर्मणामेकसमुदायापत्तिः। एकावगतिश्चैकाभिधानप्रयुक्ता। न चात्रैकाभिधानमस्ति, विद्वद्वाक्यव्यतिरिक्तस्य कस्यचिद्वाक्यस्य समुदायद्वयलम्भकस्यादर्शनात्। विद्वद्वाक्ययोश्चैककर्मविधायकत्वाङ्गीकारात्। न द्वितीयः, फलवाक्यगतयजिना तन्त्राभिधानेन समुदायनिष्पत्त्यङ्गीकारे सर्वेषां समुदायस्यैकत्वेन द्विवचनानुपपत्तेः। न च दर्शपूर्णमासशब्देनैकैकस्य त्रिकस्य तन्त्राभिधानात्समुदायद्वयसिद्धिरिति वाच्यम्। 'दर्शपूर्णमासाभ्याम्' इति हि यजिविशेषणत्वात्तत्परतन्त्रम्। यजिश्च सकृच्छ्रुतत्वाद्युगपदेव सर्वान्यागान्परामृशति। न तु त्रीन्यागान्प्रथममभिधाय पश्चादन्यांस्त्रीन्यागानभिधातुमुत्सहते। न च युगपत्समुदायद्वयमेव तन्त्रेण कुतो नाभिधत्त इति वाच्यम्। समुदायद्वयस्य प्रागसिद्धेः। सिद्धावपि फलवाक्ये दर्शपूर्णमासपदं तदभिप्रायं न भवति, यजिसामानाधिकरण्यविरोधात्। न चैवं सर्वेषां प्राधान्येऽपि तन्त्राभिधानशक्त्या एकसमुदायनिष्पत्तौ तदभिप्रायमेकवचनमेव स्याद्राजसूयवत्, ततश्च द्विवचनानुपपत्तिस्तुल्येति वाच्यम्। न [3]हि तद्विवचनान्तम्, द्विवचनविभक्तिप्रतिरूपकाव्युत्पन्नप्रातिपदिकरूपत्वात्। एवं च दर्शपूर्णमासशब्दयोः कालनिमित्तत्वाभावेन तदसंयुक्तानामपि फलसंबन्धः। तस्माद्विद्वद्वाक्ये अपूर्वकर्मविधायके। इति प्राप्ते, सिद्धान्तयति—

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ ३ ॥

तुरवधारणे। पौर्णमासीग्रहणमुपलक्षणम्। पौर्णमासीशब्दघटिते अमावास्याशब्दघटिते च विद्वद्वाक्ये प्रकरणं प्रकृतमेवाग्नेयादिकर्मजातमनूद्यते, न तु कर्मान्तरं विधीयते। कुतः। रूपावच-

1. ताभ्यां शब्दाभ्यां —क, ग, घ, ङ. 2. समुदायद्वयं हीदं फल—ग; समुदायद्वयं हि फल —क, घ, ङ. 3. हीदं द्विवचनान्तम्—क, घ, ङ.

भात्। द्रव्यदेवते यागस्य रूपम्, तस्य देवतोद्देश्यकद्रव्यत्यागात्मकत्वात्। तद्वचनस्य द्रव्यदेवता-प्रापकस्याभावात्॥ तथाहि— 'सर्वस्मै वा एतत्—' इति वाक्यं वैशब्दोपबन्धान्न ध्रौवाज्यस्य सर्वयज्ञार्थतापापकम्, 'प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्, स आत्मन्नाज्यमधत्त, तं देवा अनुवन्नेव वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति, सोऽब्रवीद्यजान व आज्यभागावुपस्तृणानभिघारयानिति, तस्माद्यजन्त्याज्यभागावुपस्तृणन्त्यभिघारयन्ति' इति प्राजापत्योपांशुयाजाज्यभागोपस्तरणाभिघार-णार्थत्वावगमाच्च। कथंचित्तस्य सर्वयज्ञार्थतासंभवेऽपि देवता न लभ्यते। न च वार्त्रघ्नीवृधन्वतीवा-क्यविनियुक्तमन्त्रवर्णतो देवतालाभः शङ्क्यः, तद्वाक्ययोर्लिङ्गक्रमाभ्यामाज्यभागयोरव्यवस्थाप्राप्तम-न्त्राणां लिङ्गक्रमाबाधेन व्यवस्थामात्रविधायकत्वे लाघवेन संभवति, विद्वद्वाक्यविहितकर्मणोरप्राप्तम-न्त्रविधायकत्वस्य गौरवपराहतस्य लिङ्गक्रमबाधस्य चायुक्तत्वात्। वार्त्रघ्न्योर्हि ऋचोः एका अग्नि-देवत्या अन्या सोमदेवत्या। तयोश्च विद्वद्वाक्यविहिते एकस्मिन्कर्मणि पुरोनुवाक्यात्वेन याज्यात्वेन च विनियोगो नावकल्पते। तद्धि कर्म अग्निदेवत्यं सोमदेवत्यमुभयदेवत्यं वा स्यात्। तत्राग्निदेव-त्यत्वे सोममन्त्रस्यानन्वयः। सोमदेवत्यत्वे अग्निमन्त्रस्यानन्वयः। उभयदेवत्यत्वे चोभयम-न्त्रानन्वय इति सर्वथा लिङ्गबाधः स्यात्। एवं वृधन्वत्योरपि। अतो न मन्त्रवर्णतो देव-तालाभसंभवः। ननु, अत्र किं पौर्णमास्याममावास्यायां काले यावाज्यभागौ तत्र वार्त्रघ्नयौ वृधन्वत्यौ इति विवक्षितम्, उत पौर्णमास्याममावास्यायां कर्मणि यावाज्यभागाविति। नाद्यः, आज्यभागयोराग्नेयादिवदुत्पत्तौ कालसंयोगाभावेन तयोस्तत्कालीनत्वेनानुवादासंभवात्। न द्वितीयः, समप्राधान्यमिति वदन्तं पूर्वपक्षिणं प्रति पौर्णमासीकर्माङ्गाज्यभागानुवादेन मन्त्रव्यवस्थाया वक्तुमशक्यत्वादिति चेन्न। आज्यभागयोः प्राधान्येऽपि य इष्ट्यादिवाक्येन पौर्णमास्यमावास्याकाल-प्राप्तिसंभवेन कालमुखेन व्यवस्थाया वक्तुं शक्यत्वात्। न चैवं सति पौर्णमास्यां दर्शविकारानुष्ठाने वार्त्रघ्नयौ स्यातां वृधन्वत्यौ च न स्याताम्, एवममावास्यायां पूर्णमासविकारानुष्ठाने वृधन्वत्यौ स्यातां वार्त्रघ्नयौ च न स्यातामिति चेन्न। इष्टापत्तेः। बोधायनादिसूत्रे कालमुखेनापि व्यवस्थाया दर्शितत्वात्। वस्तुतस्तु कर्ममुखेनैव व्यवस्था। परं त्वाज्यभागयोरपि प्रधानत्वात्पौर्णमास्यङ्गभूतावाज्यभागौ प्रति वार्त्रघ्नयोर्व्यवस्थाविधिर्न संभवतीति वदन्तं पूर्वपक्षिणं प्रति कालमुखेन व्यवस्थाविधिसंभवान्न त्वदभिमतसिद्धिरित्युच्यत इत्यदोषः। न च यागस्य देवतां विनानुपपत्तेर्देवता कल्प्यतां विश्वजिति 'स्वर्ग इवेति वाच्यम्। यागानुपपत्त्या अस्ति काचिद्देवतेति सामान्यतोऽवगमेऽपि विधिं विना इयम-स्य देवतेति अनुष्ठानौपयिकदेवताविशेषानवगमात्। तथा च रूपालाभेन विधायकत्वासंभवादगत्या विद्वद्वाक्ये आग्नेयादिप्रकृतयागानुवादके। तत्र पौर्णमासीवाक्येन पौर्णमासीकालसंयुक्तानां त्रयाणा-मनुवादः। अमावास्यावाक्येन च अमावास्याकालसंयुक्तानां त्रयाणामनुवादः। एकैकेन चानुवादे-नैकावगत्यनुप्रवेशादेकैकसमुदायापत्तिः। तदेकत्वात्पौर्णमासीममावास्यामित्येकवचनम्। ततश्च काल-

द्वयसमुदायद्वयसिद्धिः । तेन प्रसिद्धार्थकं दर्शपूर्णमासपदं फलवाक्ये यजिं शक्नोति विशेष्टुम् । ननु, विद्वद्वाक्ययोर्यजिभ्यां त्रयाणां कालसंयुक्तानामनुवाद इत्यनुपपन्नमविशेषात् । न च पौर्णमासी-ममावास्यामित्युपपदवशात्तत्तत्कालसंयुक्तमात्रपरत्वं यजत्योरिति वाच्यम् । एकवचनान्तपौर्णमास्य-मावास्याशब्दयोरनेकयागपरयजिसामानाधिकरण्यासंभवेन तद्वशेन व्यवस्थाया असंभवात् । ततश्च विद्वद्वाक्यस्थनाम्नोरेव यजिपरतन्त्रत्वावश्यंभावेन यजिद्वयस्य संनिहितसर्वयागानुवादस्वरसतया तद्व-शेन नाम्नोरपि सर्वप्रकृतयागनामत्वमेव स्यादिति चेन्न । 'य एवं विद्वान्पौर्णमासीं यजते यावदु-क्थ्येनोपाप्नोति तावदुपाप्नोति' 'य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति' इति विद्वद्वाक्यगतपौर्णमास्यमावास्याशब्दितयोर्व्यवस्थितफलार्थवादः श्रूयते । स च पौर्णमास्यमा-वास्याशब्दद्वयस्य व्यवस्थितार्थत्व एव घटते नान्यथेति तदुपपत्त्यर्थं तयोर्न सर्वप्रकृतनामत्वम्, किंतु कतिपयनामत्वमेव । तत्रापि तत्तत्कालयुक्तकर्मनामत्वमेव न्याय्यमिति तदनुसारेण तत्कालयो-गिष्वेव विद्वद्वाक्यस्थयजिप्रवृत्तेरवश्यवाच्यत्वात् । एवं च समुदायद्वयसिद्धौ तत्रोपपदस्य प्रसि-द्धत्वात्तदनुसारेण कांस्यभोजिन्यायेन कालसंयुक्तेष्वेव यजिप्रवृत्तेस्तेषामेव प्राधान्यम् । न च समुदायद्वयसिद्धावपि फलवाक्ये दर्शपूर्णमासपदं कथं तत्परम्, यजिसामानाधिकरण्यविरो-धादिति वाच्यम् । समुदायस्य यागत्वाभावेऽपि समुदायद्वारा लक्षणया समुदायिषु वृत्ति-संभवेन यजिसामानाधिकरण्योपपत्तेः । विद्वद्वाक्याभ्यां यजिकृततन्त्राभिधानलब्धसमुदायद्वयस्य पौर्णमास्यमावास्यापदाभ्यामनुवादबलतः पौर्णमास्यमावास्यारूपसंज्ञाकरणबलात् कालसंयुक्तानामेव प्रत्यभिज्ञाबलेनापि तेषामेव फलसंबन्धः । न च विद्वद्वाक्यतः पौर्णमास्यमावास्याशब्दयोः संज्ञात्वसिद्धावपि दर्शपूर्णमासशब्दयोस्तदसिद्ध्या कथं फलवाक्ये कालसंयुक्तानामेव परामर्श इति वाच्यम्, पौर्णमास्यमावास्याशब्दयोर्दर्शपूर्णमासशब्दयोश्च पर्यायत्वात् । यथा चैतत्तथा चतुर्थे वक्ष्यामः । न च विद्वद्वाक्ययोरपूर्वकर्मविधायकत्वाभावे 'पौर्णमास्यां पौर्णमास्या यजेत' इति व्यर्थं स्यादिति वाच्यम् । षण्णामपि यागानामेकैकस्मिन्नेकस्मिन्नेव वा पर्वणि प्रयोगप्राप्तावेकस्य त्रिकस्य पौर्णमास्यां प्रयोगः अन्यस्यामावास्यायामिति सहप्रयोगार्थत्वात् । न चैवं सति य इष्ट्यादिवाक्येन सर्वेषामिष्टिपशुसोमानां[1] सहप्रयोगः स्यादिति वाच्यम्, वैषम्यात् । फलवाक्ये फलं प्रति विवक्षित-साहित्यानामाग्नेयादीनां विनियोगात्फलार्थिनां युगपत्कर्तव्यतावगमेनान्योन्यानपेक्षैरेव तैः कालः संबध्यते । यथा चैतत्तथा एकादशस्य द्वितीयाद्याधिकरणे वक्ष्यामः ।

विद्वद्वाक्ययोरपूर्वकर्मविधायकत्वे बाधकान्तरमाह—

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥ ४ ॥

1. पशुबन्धानाम्—क, ख, ग, घ, ङ.

चशब्द उक्तसमुच्चये। विद्वद्वाक्ये कर्मान्तरविधायके न भवतः। तथात्वे हि प्रयाजादीनामपि प्राधान्यं स्यात्। न चैतद्युज्यते। कुतः। हि यस्मात्कारणात् प्रधानतया समेषु प्रयाजाग्नेयादिषु सत्सु पूर्वेषां प्राकृतानां प्रयाजादीनां विकृतिषु प्रवृत्तिर्न स्यात्, अङ्गानामेवातिदेशस्य वक्ष्यमाणत्वात्। तच्चानिष्टम्। कुतः। विशेषदर्शनात् क्वचिद्विकृतौ प्रयाजाद्यनुवादेन विधेयविशेषस्य दर्शनात्। यथा 'यो ब्रह्मवर्चसकामः स्यात्तस्मा एतं सौर्यं चरुं निर्वपेत्' 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादि। अतोऽपि विद्वद्वाक्ये न विधायके॥

ननु वार्त्रघ्न्यादिवाक्यतो रूपलाभाभावेऽपि [1]यदाग्नेयादिवाक्यैस्तल्लाभाद्विद्वद्वाक्ययोर्विधायकत्वमस्त्विति पूर्वपक्षी प्रत्यवतिष्ठते—

गुणस्तु श्रुतिसंयोगात्॥ ५॥

तुः प्रत्यवस्थाने। रूपालाभाद्विद्वद्वाक्ये न विधायके इति न युज्यते। यतः यदाग्नेयादिवाक्यैर्विद्वद्वाक्यविहितयागयोरग्न्यादिदेवतालक्षणः पुरोडाशादिद्रव्यलक्षणश्च गुणो विधीयते न तु यागः। कुतः। श्रुतिसंयोगात् विद्वद्वाक्यविहितौ हि यागौ प्रत्यक्षश्रुतिसंयुक्तौ। अतस्तदनुवादेन गुणविधाने सति यदाग्नेयादिवाक्येषु न कश्चिदश्रुतार्थः कल्प्यः। यागविधायकेषु तु तेषु द्रव्यदेवतासंबन्धाद्यागोऽनुमातव्यः स्यात्। अतो रूपलाभाद्विद्वद्वाक्ये विधायके स्याताम्। न च प्राप्तकर्मानुवादेनानेकगुणविधाने विध्यावृत्त्या वाक्यभेदप्रसङ्गः, विद्वद्वाक्यविहितयागानुवादेन गुणमात्रविधायकानामाग्नेयादिवाक्यानां विशिष्टविधित्वस्याप्यसंभवादिति वाच्यम्। गुणविधिस्थले हि गुणस्य सिद्धरूपतया स्वतो विधेयत्वाभावेन गुणविशिष्टभावनाया एव विधिसंबन्धः, न केवलं गुणस्य। ततश्च नात्र प्राप्तकर्मानुवादेन साक्षादनेकगुणविधिः। किंत्वनेकगुणविशिष्टभावनाविधिः। एवं च विशिष्टकर्मविधाविव विधेः सकृदेव व्यापार इति न विध्यावृत्तिरिति भावः।

सिद्धान्ती प्रत्याचष्टे—

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते[2] हि तदर्थत्वात्तस्य तस्योपदिश्येत॥ ६॥

वाशब्द एवार्थे। यदाग्नेयादिवाक्यानि गुणविशिष्टयागचोदना एव, न तु विद्वद्वाक्यविहितयागानुवादेन गुणमात्रविधयः। कुतः। युगपच्छास्त्रात्। शास्त्रं शासनं विधानम्। युगपदनेकगुणानां विधानप्रसङ्गात्। तस्य च वाक्यभेदप्रसङ्गेनायुक्तत्वात्। ननु विशि-

---

1. यदाग्नेयादिवाक्यैस्तल्लाभसंभवात्—क, घ, ङ. 2. शासनाच्चोदिते.

ष्टभावनाविधानान्न वाक्यभेद इत्यत आह— चोदिते हीति। चोदिते प्राप्ते कर्मणि प्रत्ययस्य तत्तद्गुणविधानार्थत्वात् तस्य तस्य गुणस्य विधानार्थः प्रत्ययः पुनः पुनरुच्चार्येत। अयमाशयः। प्रवर्तनारूपशब्दभावनात्मकविधेः प्रवृत्तिरूपार्थभावनागर्भतया तावद्गुणविशिष्टभावनागर्भतया प्रथमं प्रतीयमानोऽपि विधिर्भावनांशस्य विद्वद्वाक्यत एव प्राप्ततया तत्परत्वाभावेन विशेषणीभूतगुणपरः सन् गुणांशे पर्यवस्यति, यत्र विधेः पर्यवसानं तस्यैव विधेयत्वात्। भावनांशस्य विध्यन्विततया प्रतीयमानत्वमात्रेण विधेयत्वे फलस्यापि विधेयत्वापातात्। ततश्चानेकगुणविधिस्वीकारे सर्वत्र विधेस्तात्पर्यात्सर्वत्र पर्यवसानं वाच्यम्। न च सकृच्छ्रुतस्य विधेरनेकत्र पर्यवसानं संभवतीति विध्यावृत्तिरवर्जनीया। न चैवं सति 'सोमेन यजेत' इति गुणविशिष्टविधिर्न स्यात्। तत्रापि विशेषणविधिपर्यवसानार्थमावृत्तिप्रसङ्गादिति वाच्यम्। वैषम्यात्। विशिष्टविधिस्थले विशेषणेन विना विशिष्टस्यासिद्धया अर्थापत्त्यैव विशेषणविधिसिद्धौ न श्रुतस्य विधेर्विशेषणे पृथक् पर्यवसानमपेक्षितम्, किंतु विशिष्ट एवेति न तत्रावृत्तिप्रसङ्गः। प्राप्तकर्मानुवादेन गुणविधिस्थले तु नैवमाक्षेपाद्विशेषणलाभः, भावनारूपस्य कर्मरूपस्य वा विशेष्यस्यान्यतः प्राप्ततया विधेर्विशिष्टपरत्वाभावात् केवलगुणपरत्वमेव वाच्यम्। तस्यैकस्येतरविशिष्टस्य विधिर्न संभवति, 'गुणानां च परार्थत्वात्—' इति न्यायेन तेषां परस्परविशिष्टत्वाभावात्। तस्मादेक[illegible]स्तात्पर्यतः पर्यवसानं वाच्यमिति तत्र विध्यावृत्तिरनिवार्या। न चैवं सति 'पशुना यजेत' इत्यादावपि प्राप्तकर्मानुवादेन जातिलिङ्गसंख्याकारकाणां विधानं न स्यादिति वाच्यम्। वैषम्यात् 'पशुना' इत्यनेन हि क्रियान्वयात्प्रागेव प्रकृतिप्रत्ययाभ्यां जातिलिङ्गसंख्याविशेषितं [1]कारकमुपस्थितम्। तदुपस्थितौ च न विधेर्व्यापारः। कारकप्राधान्यं हि पश्वेकत्वाधिकरणे वक्ष्यते। एवमभ्युदितेष्टौ 'ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्' इत्यादिभिन्नपदोपस्थानस्थले 'विष्णवे शिपिविष्टाय' इति सामानाधिकरण्येन शिपिभिः रश्मिभिः विष्ट इति योगानुगृहीतेन शिपिविष्टत्वविशिष्टो विष्णुः क्रियासंबन्धात्प्रागेवोपस्थितः 'प्र तत्ते अद्य शिपिविष्टनामार्यः शꣳसामि वयुनानि विद्वान्' इत्यादिमन्त्रतः 'यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टः' 'यज्ञो वै विष्णुः पशवः शिपिः' इत्याद्यर्थवादतश्च प्रसिद्धमेव विष्णोः शिपिविष्टत्वम्। न तत्र विधेर्व्यापारः। अतस्तत्र तद्विशिष्टस्य विष्णोर्विधानं युज्यते। प्रकृते तु 'आग्नेयोऽष्टाकपालः' इत्यादिसामानाधिकरण्यबलेन शब्दतो विशिष्टार्थप्रतिपादनसंभवेऽपि विनैव विधिना वस्तुतः प्रसिद्धसंबन्धत्वाभावान्न विधिसंभवः। न ह्याग्नेयत्वाष्टाकपालत्वादीनां वैशिष्ट्यं प्रमाणान्तरेण सिद्धम्। अत्रैव तु विधाने भवेद्वाक्यभेदः। अत आग्नेयादिवाक्यानि न प्राप्तकर्मानुवादेन गुणविधय इत्यनेकगुणविशिष्टयागान्तरविधायकत्वमेषामभ्युपेयम्। ततश्च यदाग्नेयादिवाक्यतोऽपि [2]रूपालाभाद्विद्वद्वाक्ये न विधायके।

---

1. कारकमेकम्—क, घ, ङ. 2. रूपलाभाभावात्—क, घ, ङ.

इतोऽप्याग्नेयादिवाक्यानां न गुणविधित्वमित्याह—

व्यपदेशश्च तद्वत् ॥ ७ ॥

'उग्राणि ह वा एतानि हवींषि संभ्रियन्ते, आग्नेयः प्रथमः, ऐन्द्राग्न उत्तरः' इति पौर्वापर्यव्यपदेशोऽप्याग्नेयादिवाक्यानां विशिष्टयागविधायकत्वं प्रागुक्तवाक्यभेदवत्साधयति। विद्वद्वाक्यविहितकर्मानुवादेन गुणविधित्वे तु पौर्णमासीयागे आग्नेयपुरोडाशाग्नीषोमीयोपांशुयाजाग्नीषोमीयपुरोडाशानां विकल्पः स्यात्। अमावास्यायागेऽपि आग्नेयः पुरोडाशः, सोमयाजिन ऐन्द्रं दधि, ऐन्द्रं पयः, असोमयाजिन ऐन्द्राग्नः पुरोडाशः इत्येषां विकल्पः स्यात्। तथा सत्युदाहृतपौर्वापर्यानुवादो नोपपद्येत ॥

पूर्वपक्षद्वयेऽपि बाधकं लिङ्गमाह—

लिङ्गदर्शनाच्च ॥ ८ ॥

'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इत्यस्ति वाक्यशेषः। पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृत्त्रयोऽनूयाजाश्चेत्येकादशाहुतयः, आग्नेयोपांशुयाजाग्नीषोमीयाहुतस्तिस्र इति चतुर्दश पौर्णमास्याम्। अमावास्यायां तु ता एकादशाहुतयः, आग्नेयसांनाय्याहुती द्वे दधिपयसोरेकदेवताकत्वेन तदाहुतेरेकत्वात्, इति त्रयोदशेति तदर्थः। तदेतल्लिङ्गदर्शनमाग्नेयादिभ्यो विद्वद्वाक्ययोः कर्मान्तरपरत्वेऽधिकसंख्याकत्वापातात्तेषां गुणविधित्वे न्यूनसंख्याकत्वापातादसमञ्जसं स्यात्। तस्माद्विद्वद्वाक्ये प्रकृतयागसमुदायानुवादके। इति पौर्णमास्यधिकरणम् ॥

दर्शपूर्णमासयोः श्रूयते 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति। अन्वञ्चौ अव्यवहितौ पुरोडाशसाध्यौ आग्नेयाग्नीषोमीययागौ यत्क्रियेते तदेतत् जामि आलस्यजनकम्, एकरूपत्वात्। अतस्तौ यागौ अन्तरा तदन्तरालकाले उपांशुयाजं यजतीत्यर्थः। तत्र 'उपांशुयाजमन्तरा यजति' इति विष्ण्वादिसंयुक्तानां यागानां समुदायानुवादः, उतापूर्वकर्मणो विधिरिति संशयः। तत्र पूर्वपक्षयति—

४. उपांशुयाजापूर्वताधिकरणम्।

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

पौर्णमासीशब्दयुक्तविद्वद्वाक्यवदुपांशुयाजशब्दयुक्तम् 'उपांशुयाजमन्तरा यजति' इति

वाक्यमपि प्रकृतयागानुवादकं स्यात् न त्वपूर्षकर्मविधायकम्, रूपालाभात् ॥ यद्यपि प्रौवाज्यं लभ्यते द्रव्यं देवता तु न लभ्यते । न च 'इदं विष्णुः' 'त्रीणि पदा' 'प्रजापते न त्वत्' 'स वेद पुत्रः' 'अग्नीषोमा यो अद्य वाम्' 'आन्यं दिवो मातरिश्वा' इति वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां पुरोडाशयागीययाज्यानुवाक्यायुगलयोरन्तरा[1] पाठात्तत एवास्ति देवतालाभ इति वाच्यम् । एतेषां त्रयाणामपि युगलानां लिङ्गक्रमाभ्यां विष्ण्वादिवाक्यविहितयागत्रय एव समावेशसंभवे सति अन्तरालवाक्यविहितकर्मणि अलब्धदेवते सामर्थ्यापरिज्ञानेन समावेशासंभवात् । न च विष्ण्वादिवाक्यजातमर्थवाद इति शङ्क्यम् । विध्यर्थकतव्यप्रत्ययश्रवणेन विष्ण्वादिदेवताकयागविधायकत्वस्यैव युक्तत्वात् । 'संप्रदानस्य च कर्मसंज्ञा वक्तव्या' इति संप्रदानस्यापि कर्मत्वेन 'विष्णुं यजति' इत्यादौ देवताया द्वितीयावत्कर्मणिविहितस्याप्युपपत्तेः । किंच उपक्रमोपन्यस्तजामित्वदोषाभावप्रतिपादनपरस्य 'अजामित्वाय' इत्यस्य विष्ण्वादिवाक्येष्वेव श्रवणात्तत्रैव विधिशक्तिरुत्तभ्यत इति प्रत्येकमेव विधिर्वाच्यः । अन्यथा त्रिष्वप्यजामित्वोक्तेरानर्थक्यात् । न च 'जामि वा एतत्' इति दोषस्य सकृच्छ्रवणादेकवाक्यत्वमेव न्याय्यमिति वाच्यम् । सकृच्छ्रुतस्यापि तस्य त्रिष्वपि तेष्वनुषङ्गेण तच्छेषत्वोपपत्तेः । अतो रूपालाभाद्वर्तमानापदेशाच्चान्तरालवाक्यं न विधायकम् । न चान्तरालकालविधायकं तदिति शङ्क्यम्, अजामित्वानुकीर्तनबलादेवान्तरालकाल एव विष्ण्वादियागविधेः पर्यवसानात् । तथा च कृत्स्नमेवान्तरालवाक्यं प्रकृतविष्ण्वादियागानुवादकम् । ततश्च 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इति कालवाक्यस्थेन यजिना सर्वेषां ग्रहणं सिध्यति । अन्यथा 'नौ' इत्यग्नीषोमप्रतिपादकोपपदमहिम्ना अग्नीषोमीययागमात्रस्य स्यात् । सति तु समुदायानुवादे तद्बलात्समुदायीकृतानां त्रयाणामपि यागानामनुवादः, अग्नीषोमप्रतिपादकनौशब्दग्रहणं च त्रयाणामपि यागानामुपलक्षणार्थं स्यात् । ततश्च सर्वेषां कालविधौ ग्रहणे सति फलवाक्येन ग्रहणात्फलसंबन्धः सिध्यतीति पूर्वः पक्षः ।

सिद्धान्तयति—

चोदना वाप्रकृतत्वात् ॥ १० ॥

वाशब्द एवार्थे । 'उपांशुयाजमन्तरा यजति' इति अन्तरालकालसंयुक्तोपांशुगुणकयागविधिरेव, न तु प्रकृतविष्ण्वादियागानुवादः, अप्रकृतत्वात् विष्ण्वादिवाक्यानामर्थवादत्वेनाविधायकतया ततो विष्ण्वादियागानामनुपस्थितत्वात् ॥ तथाहि—उपक्रमे पुरोडाशयागयोरव्यवहितत्वनिमित्तकजामित्वदोषकीर्तनादन्तरालयुक्ततया किंचित्कर्म विधेयमिति निश्चिततया तदनुसारेणान्तरालवाक्य-

1. युगलान्तरा—क, घ, ङ.

स्यैवान्तरालयुक्तकर्मविधायकत्वं स्वीकार्यम्; न तु स्वरसतो विधिसमर्थानामपि विष्ण्वादिवाक्यानाम्, अन्तरालयोगाभावात्। न ह्यन्तरालेऽविहितानामजामित्वेन प्रशंसा युज्यते। न च तेषु प्रत्येकमजामित्वप्रशंसावगमात्प्रत्येकमेव विधिर्युक्त इति वाच्यम्। उपक्रमे अव्यवधानप्रयुक्तजामितादोषकीर्तनेनाजामित्वप्रशंसाया अप्युपक्रमदशायामेवान्तरालयुक्तविधिविषयकताया निश्चितत्वेन विष्ण्वादिषु प्रशंसावगमस्यैवाभावात्। न चाजामित्वकीर्तनबलादेव विष्ण्वादिवाक्येष्वन्तरालकाललाभात्तेष्वपि विधिः संगच्छत इति वाच्यम्। विष्ण्वादिवाक्यैरन्तराललाभ आर्थिकः। अन्तरालवाक्येन तु तल्लाभः शाब्दः। न ह्युपक्रमस्थजामितादोषादवगतमन्तरालयुक्तं कर्म किमित्याकाङ्क्षाम् अन्तराशब्दघटितवाक्ये पूरयति, आर्थिकान्तरालप्राप्त्यनुगृहीतविष्ण्वादिवाक्यानां तत्पूरकता युज्यते। तस्मात् 'उपांशुयाजमन्तरा यजति' इत्युपांशुगुणको यागोऽन्तरालकाले विधीयते। विष्ण्वादिवाक्यं च मन्त्रवर्णप्राप्तविष्ण्वादिदेवतानुवादेनार्थवादः। एवं च जामित्वोपक्रमादजामित्वोपसंहाराद्यावगतमेकवाक्यत्वमप्यनुगृहीतं भवति। 'जामि वा एतद्यज्ञस्य' इत्यस्यानुषङ्गोऽपि नाश्रितो भवति। पुनः पुनरजामित्वसंकीर्तनं तु प्रशंसातिशयार्थमिति सिद्धमन्तरालवाक्यस्य विधायकत्वम्।

ननु अन्तरालवाक्ये उपांशुयाजशब्दस्य न गुणविधित्वम्, वाक्यभेदप्रसङ्गात्; नापि नामत्वम्, तत्प्रख्याद्यभावात्, इत्यत आह—

गुणोपबन्धात् ॥ ११ ॥

उपांशुयाजशब्देनोपांशुत्वगुणस्यैव उपबन्धात् विधानात् विशिष्टविधानाच्च न वाक्यभेद इति पार्थसारथिमतानुसारिणी व्याख्या, 'उपांशुत्वगुणको यागोऽन्तरालोपलक्षितकाले विधीयते' इति शास्त्रदीपिकायामभिधानात्। भाष्ये तु 'उपांशु पौर्णमास्यां यजन्' इति कालसंबन्धपरे वाक्ये उपांशुत्वगुणस्योपबन्धात्तन्निमित्तमुपांशुयाजनामधेयमिति व्याख्यातम्॥

ननु अन्तरावाक्यस्य विष्ण्वादियागसमुदायानुवादकत्वाभावे 'तावब्रूताम्—' इति कालपरे वाक्ये 'नौ' इत्यग्नीषोमप्रतिपादकोपपदमहिम्ना अग्नीषोमीयमात्रस्य ग्रहणं स्यात्, न तु वैष्णवप्राजापत्ययोः। ततश्च फलवाक्ये तयोरश्रवणात्प्राधान्यं न स्यात्, इत्यत आह—

[1]प्राये वचनाच्च ॥ १२ ॥

प्रधानभूताग्नेयाग्नीषोमीययागीययाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानामाम्नानाच्चिविधस्याप्युपांशुयाजस्य प्राधान्यमवगम्यते। तद्बलादेव 'तावब्रूताम्—' इति कालपरे वाक्ये 'नौ' इत्यस्योपलक्षणार्थत्वं सिद्धमिति भावः। प्रयोजनं पूर्वपक्षे

1. प्रायवचनाच्च.

वैष्णवादियागास्त्रयोऽपि समुच्चयेनानुष्ठेयाः, सिद्धान्ते त्वेक एव विकल्पितविष्ण्वादिदेवताको याग इति दिक् । इत्युपांशुयाजाधिकरणम् ॥

'अग्निहोत्रं जुहोति' 'दध्ना जुहोति' 'पयसा जुहोति' 'यवाग्वा जुहोति' इत्यादि श्रुतम्, 'आघारमाघारयति' 'ऊर्ध्वमाघारयति' 'ऋजुमाघारयति' 'संततमाघारयति' इत्यादि च । तत्र किम् 'अग्निहोत्रं जुहोति' इति दध्यादिवाक्यप्राप्तसमुदायानुवादः, 'आघारमाघारयति' इति च 'ऊर्ध्वमाघारयति' इत्यादिवाक्यप्राप्तानुवादः; उत 'अग्निहोत्रं जुहोति' इत्यपूर्वकर्मविधिः दध्यादिवाक्यानि तत्र गुणविधयः, 'आघारमाघारयति' इति चाघारविधिः ऊर्ध्वादिवाक्यानि तत्रैव गुणविधयः इति संशये, पूर्वपक्षयति—

५. आघाराद्यपूर्वता-धिकरणम् ।

आघाराग्निहोत्रमरूपत्वात् ॥ १३ ॥

आघारवाक्यमग्निहोत्रवाक्यं च न विधायकम् । कुतः । अरूपत्वात् विधेयरूपराहित्यात् । न ह्यत्र [1]सामान्यरूपं विधेयम्, तस्यानुष्ठानायोग्यत्वात् । नापि विशेषः, तस्य 'अयमसौ' इत्यनिश्चितत्वेन विधातुमशक्यत्वात् ॥

नन्वग्निहोत्रसंज्ञकमिदं कर्मेत्येवं संज्ञयैव विशेषावगमः संभवतीत्यत आह—

संज्ञोपबन्धात् ॥ १४ ॥

'अपि न विशेषावगमः' इति शेषः । विशेषरूपेण ज्ञातस्यैव संज्ञोपबन्धात्कर्मविशेषापरिज्ञाने कस्येयं संज्ञेत्यपरिज्ञानात्संज्ञयापि न विशेषावगमसंभवः । उद्भिदादिस्थले तु चोदकत्वे रूपलाभात्संभवति विशेषावगमः ॥

ननु दध्यादिवाक्ये गुणविधानाद्विशेषावगमः संभवतीत्यत आह—

अप्रकृतत्वाच्च ॥ १५ ॥

प्रकृते हि कर्मणि दध्यादिगुणविधिरिति वक्तव्यम् । तच्च न संभवति, कस्यचित्कर्मणः अप्रकृतत्वात् । न च अग्निहोत्रवाक्यतः कर्म प्रकृतमिति शङ्कयम् । तथा सति दध्यादिवाक्यैर्गुणविधौ सति ततो विशेषावगमादग्निहोत्रवाक्यस्य कर्मविधायकत्वम्, तस्मिंश्च सति दध्यादिवाक्यैर्गुणविधानमित्यन्योन्याश्रयात् । चशब्दोऽनुक्तयुक्त्यन्तरसमुच्चयार्थः । तद्यथा— अग्निहोत्रवा-

1. धात्वर्थसामान्यं—क, घ, ङ.

क्यस्य विधायकत्वेऽपि तत्र दध्यादिवाक्यैर्गुणविधानं न संभवति, प्रवर्तनात्मकविधिना पुरुषव्यापारादन्यस्य विधातुमशक्यत्वात्। तथा च दध्यनुरक्तो व्यापारो विधेयः। स च होमात्मकोऽग्निहोत्रवाक्येनैव प्राप्त इति तस्य पुनर्विधानमनर्थकम्। न चोत्पन्नस्यापि कर्मणो यथा फलादौ पुनर्विधानं तद्वदिहाप्यग्निहोत्रवाक्योत्पन्नस्य कर्मणो गुणविशिष्टतया पुनर्विधिरस्त्विति वाच्यम्। विधिर्हि चतुर्धा— फलनिमित्तयोः कर्मविधिरधिकारविधिः, देशकालयोः कर्मविधिः प्रयोगविधिः, संस्कार्ये शेषतया कर्मविधिर्विनियोगविधिः, एतन्मितयभिन्नो विधिरुत्पत्तिविधिः इति। तत्र दध्यादिवाक्येषु गुणविशिष्टतया विधिस्वीकारेऽधिकारादिविधिक्रियानन्तर्भावेण परिशेषादुत्पत्तिविधिरेव वाच्यः। उत्पत्तिविधिभेदे च कर्मभेद आवश्यकः। एवं चेहापि कर्मभेदावश्यंभावान्नाग्निहोत्रवाक्यविहितकर्मणो गुणविशिष्टतया पुनर्विधिः संभवति। अतो दध्यादेरन्यतोऽप्राप्तत्वेन मन्त्रवर्णप्राप्तविष्ण्वाद्यनुवादेन तद्वाक्यमिव स्तावकत्वासंभवेन दध्यादिवाक्यानां दध्यादिविशेषकर्मविधित्वे सति तद्विहितकर्मसमुदायानुवादकमग्निहोत्रवाक्यम्। तत्र यद्यपि दध्यादिवाक्येषु देवता न श्रूयते, 'यदग्नये च' इत्यादिवाक्येषु द्रव्यं न श्रूयते, मन्त्रविधिस्थले मान्त्रवर्णिकदेवतालाभसंभवेऽपि द्रव्यं न लभ्यते, एतेषां च सर्वेषां वाक्यानां तत्तद्गुणविशिष्टकर्मान्तरविधायकतया न क्वापि कर्मणि द्रव्यदेवतोभयलाभसंभवः; तथापि दध्यादिवाक्यैर्देवतोद्देशरहितं त्यागप्रक्षेपमात्रं विधीयते, 'यदग्नये च' इत्यादिवाक्येषु अग्न्यादेर्द्रव्यसंबन्धेऽसति मुख्यदेवतात्वासंभवादग्न्यादीनामुद्देशमात्रम्, चतुर्थ्यन्तशब्देन निर्देशलक्षणं विधीयते। मन्त्रविधिस्थलेऽपि मन्त्रस्योच्चारणमेव विधीयते। एतेषु च वाक्येषु जुहोतिस्तत्तद्विधेयत्यागप्रक्षेपादिषु लाक्षणिकः। तेषां च प्रक्षेपादीनां सर्वेषाम् 'अग्निहोत्रं जुहोति' इत्ययमनुवादः। तत्प्रयोजनम् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति फलवाक्ये सर्वेषां ग्रहणम्, 'अग्निहोत्रम्' इत्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः। किंच समुदायानुवादाभावे 'यदग्नये च' इत्यादिवाक्यविहिताग्निसंबन्धिकर्मण एवोपपदवशात्फलवाक्ये ग्रहणं स्यात्। सति तदनुवादे तत्सामर्थ्यात्प्रकृतानां सर्वेषामग्निहोत्रशब्दो नामधेयमित्यवगमात्सर्वेषां फलसंबन्धसिद्धिः। एवमाधारवाक्येऽप्यूर्ध्वादिवाक्यविहितानामूर्ध्वत्वार्जवसांतत्यतन्त्रविशिष्टकर्मणां[1] समुदायानुवादः। ततश्च 'चतुर्गृहीतं वा एतदभूत्तस्याधारमाधार्यं' इति प्रयाजार्थाज्यरूपे संस्कार्ये आधारविनियोजकवाक्ये सर्वेषां ग्रहणं सिध्यति, 'आधारम्' इत्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः। तस्मादग्निहोत्रवाक्यमाधारवाक्यं च न विधायकमिति पूर्वः पक्षः। सिद्धान्तयति—

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधे-
र्गुणार्थेन पुनःश्रुतिः ॥ १६ ॥

[1] मन्त्र...—ब. ब्रा. गा. घ. ङ: मन्त्रादि...—च.

वाशब्द एवार्थे। अग्निहोत्रवाक्यमाधारवाक्यं च चोदना अपूर्वकर्मविधायकमेव, न तु प्रकृतकर्मणामनुवादः। कुतः। आधारयतिशब्दार्थस्य जुहोतिशब्दार्थस्य च प्रयोगमनुष्ठानं प्राप्तत्वात्। आधारहोमयोरनन्यप्राप्तत्वेनावश्यविधेयत्वादित्यर्थः। ननूर्ध्वादिवाक्यैर्दध्यादिवाक्यैश्च विशिष्टकर्मविधायकैः प्राप्तत्वादनन्यप्राप्तत्वं तयोरसिद्धमित्यत आह— गुणार्थेन पुनःश्रुतिरिति। 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति तृतीया चतुर्थ्यर्थे। ऊर्ध्वत्वादिदध्यादिगुणविधानप्रयोजनाय 'आधारयति' 'जुहोति' इति पुनःश्रुतिः अनुवाद इत्यर्थः। ननु संनिहितं धात्वर्थं परित्यज्य प्रत्ययः कथं गुणं विदध्यादित्यत आह—तत्संनिधेरिति। तस्य गुणस्य विशेष्यधात्वर्थानुप्रवेशेन प्रत्ययसंनिधानादित्यर्थः॥ अयं भावः। 'सोमेन यजेत' इत्यादिषु वाक्यान्तरेण कर्मणोऽप्राप्तेरगत्या गौरवमप्यङ्गीकृत्य विशिष्टविधानमभ्युपगम्यते। इह त्वाधाराग्निहोत्रवाक्यतः प्राप्तकर्मानुवादेन गुणमात्रविधाने संभवति न विशिष्टविधित्वमूर्ध्वादिवाक्यानां न्याय्यमाश्रयितुम्। ततश्चाधाराग्निहोत्रवाक्ययोरप्राप्तार्थत्वाद्विधिपरत्वे निश्चिते तद्बलादेव सामान्यस्यायोग्यत्वात्तल्लक्षितो विशेष एव विधीयते। स च विशेषः 'अयमसौ' इति विशिष्यानवगतोऽप्यन्यत्राविहितोऽयं कश्चिद्धोमविशेष इत्येतावन्मात्रेणावगत इति कृत्वा विध्यर्हः। एवं च विशिष्य ज्ञानस्यानपेक्षितत्वान्न पूर्वपक्षोक्तान्योन्याश्रयावकाशः। तावन्मात्रावगमेनापि संज्ञोपबन्धोपपत्तेर्न संज्ञादुर्घटत्वं च। न च तस्यापि विशेषस्य रूपालाभादपर्यवसानमिति वाच्यम्। दध्यादिवाक्यतस्तल्लाभात्। न चाव्यापारत्वात्केवलस्य दध्यादिगुणस्य विधानं न संभवतीति वाच्यम्। होमादिव्यापारविशिष्टस्य तस्य विधातुं शक्यत्वात्। न चैवं सति गुणस्य साक्षाद्विधिविषयत्वाभावेन गुणविशिष्टकर्मविषयतया विधेः प्रतीयमानतया कर्मोत्पत्तिपरत्वापत्तौ कर्मभेदः स्यादिति वाच्यम्। कर्मणः प्राप्तत्वेन तत्स्वरूपज्ञाने विधेरतात्पर्यात् अप्राप्तगुणांश एव विधेस्तात्पर्यात्। विधितात्पर्यविषय एव हि विधेयः, न तु विधिसंबन्धितया प्रतीयमानमात्रम्। ततश्च दध्यादिवाक्यस्य कर्मोत्पत्तिविधित्वाभावेनाग्निहोत्रवाक्योत्पन्नकर्मणो दध्यादिवाक्ये दध्यादिगुणविशिष्टतया प्रतीयमानत्वेन न भेदप्रसक्तिः। एवमाधारवाक्येऽपि। तथा चाधारवाक्यमग्निहोत्रवाक्यं च प्रकृतकर्मलाभाभावादपालाभसद्भावाच्च विधिरेव, न तु समुदायानुवादः। प्रयोजनं पूर्वपक्षे दध्यादिवाक्यविधेयानां कर्मणां समुच्चयेनानुष्ठानम्; सिद्धान्ते त्वेकस्मिन्नेव कर्मणि दध्यादीनां विकल्पितत्वान्न समुच्चय इत्यादि। आधारादिवाक्ये तूर्ध्वत्वादिगुणेषु यस्य भ्रंशस्तद्गुणकस्य कर्मणः पुनरनुष्ठानं पूर्वपक्षे; सिद्धान्ते तु कर्मभेदाभावाद्गुणानुरोधेन प्रधानावृत्त्ययोगाद्गुणलोपप्रायश्चित्तमित्यादि। इत्याधाराग्निहोत्राधिकरणम्॥

'अग्नीषोमीयं पशुमालभेत' इत्यत्रालभतिः किम् 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यादिविहितानां कर्मणां समुदायस्यानुवादः, उतापूर्वकर्मविधायक इति संशयः। तथा

६. पशुसोमापूर्वताधिकरणम्। 'सोमेन यजेत' इति यजतिः 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाति' इत्यादिविहितकर्मणां समुदायस्यानुवादः, उतापूर्वकर्मविधायक इति संशयः। तत्र दध्यादिवाक्येषु कर्मविध्यभावेनाग्निहोत्राधारवाक्ययोरनुवादकत्वासंभवेऽपि हृदयाद्यैन्द्रवायवादिवाक्येषु कर्मविध्यवश्यंभावेन आलभतियजत्योस्तदनुवादकत्वमेव युक्तम्। 'ऐन्द्रवायवम्' इति द्वितीयया गम्यमानं हि साध्यत्वमुत्पाद्यतया वा संस्कार्यतया वा। नाद्यः, देवतातद्धितान्तेन देवतासबन्धिद्रव्यवाचिना ऐन्द्रवायवादिशब्देन प्रतीयमानस्य द्रव्यदेवतासंबन्धस्य यागैकघटनीयस्य ग्रहणेन घटयितुमशक्यतया 'ऐन्द्रवायव्रादिद्रव्यं ग्रहणेनोत्पादयेत्' इत्यर्थस्यायुक्तत्वात्। न द्वितीयः। अवहननादिसंस्कार्याणां व्रीह्यादीनाम् 'व्रीहिभिर्यजेत' इत्यादिशास्त्रान्तरेण सिद्धिवदैन्द्रवायवत्वादिविशिष्टद्रव्यस्यासिद्धत्वेन तदुद्दिश्य ग्रहणसंस्कारविधानायोगात्, सोमवाक्यस्य यागविधायकत्वे उत्पत्तिशिष्टसोमरूपलताद्रव्यस्य ग्रहणेन संस्कारानुपपत्तेश्च, धारादिवाक्यतो ग्रहणस्य रसविषयत्वावगमात्। एतेन 'ऐन्द्रवायवं ग्रहणेन भावयेत्' इत्यदृष्टार्थविधित्वमपि प्रत्युक्तम्, देवतासंबन्धानुपपत्त्या आरादुपकारकस्यापि ग्रहणस्य विध्यनुपपत्तेः। तस्मादैन्द्रवायवादिवाक्येषु द्रव्यदेवताभ्यां ग्रहणेन च विशिष्टयागा विधीयन्ते। न चैन्द्रवायवादिशब्दस्य 'तस्येदम्' इति संबन्धसामान्यविहिततद्धितान्तत्वमेवास्तु, तथा चेन्द्रवाय्वादिप्रकाशकमन्त्रेण क्रियमाणे ग्रहणे करणमन्त्रद्वारा इन्द्रवायुवैशिष्ट्यस्य ग्रहणद्वारा द्रव्ये च तद्वैशिष्ट्यस्योपपत्तेर्ग्रहणमात्रविधिसंभव इति वाच्यम्। सामान्यस्यानुष्ठानानौपयिकत्वेनानुष्ठानौपयिकसंबन्धविशेषाभिधायिदेवतातद्धितान्तत्वे संभवति 'तस्येदम्' इति संबन्धसामान्याभिधायितद्धितान्तत्वाश्रयणस्यायुक्तत्वात्[1], 'सास्य देवता' इत्यधिकारे 'द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च' इति विशिष्यविहितदेवतातद्धितच्छप्रत्ययान्तेन 'मरुत्वतीयं गृह्णाति' इति वाक्यगतमरुत्वतीयशब्देन सहचरितानामैन्द्रवायवादिशब्दानां तदवैरूप्याय देवतातद्धितान्तत्वस्यैवाश्रयितुं युक्तत्वाच्च। एवं च प्रकृतानामैन्द्रवायवादियागानां सोमवाक्ये यजिः समुदायानुवादः; सोमशब्दोऽपि न विधिः। स हि गृह्णातिना अनियमेन प्राप्तस्य ग्राह्यद्रव्यस्य नियमविधिपरो वा प्रकृतिद्रव्यविधिपरो वा स्यात्। नाद्यः, तर्ह्यैन्द्रवायवादिवाक्यविहितयागेषु सोमलताद्रव्यस्य हविष्ट्वप्रसङ्गात्। न चेष्टापत्तिः शङ्क्या, 'अण्व्या धारया गृह्णाति' इति गुणवाक्यपर्यालोचनया धारासमर्थजलादिरूपद्रव्यविशेषस्य निश्चितत्वेन सोमलतालक्षणद्रव्यविधेरसंभवात्। न च सोमस्य रसीभावेनापि धारावाक्यस्योपपत्तेर्न स्वतःसिद्धजलादिद्रवद्रव्यस्य प्राप्तिरिति वाच्यम्। रसीभावे सत्युत्पत्तिशिष्टलतारूपस्य भङ्गापत्त्या तस्य हविष्ट्वालाभात्। अस्तु तर्हि रसभूतहविः प्रकृतित्वेन सोमद्रव्यस्य विधिः 'व्रीहिभिर्यजेत' इति पुरोडाशप्रकृतिभूतव्रीहिद्रव्यवदिति द्वितीयः पक्षः। न चेह विकृतिद्रव्यस्यानुपात्तत्वात्कथं प्रकृतिद्रव्यविधिरिति शङ्क्यम्। व्रीहिवाक्यवदेवोपपत्तेः। न हि पुरोडाशा-

1. सामान्यतद्धितान्तत्वा...क.

नुवादेन व्रीहिविधिः, 'व्रीहिभिः' इति कारकविभक्तेर्द्रव्यसंबन्धायोगात्पुरोडाशस्यानुपात्तत्वाच्च । किंतु यागं प्रति करणत्वेन विहिता व्रीहयः पुरोडाशावरुद्धे यागे साक्षात्करणत्वासंभवात्प्रकृतित्वेन करणीभवन्तीति प्रकृतिविधिः संपद्यते । एवमत्रापि यागं प्रति करणत्वेन विहितः सोमो धारासमर्थद्रवद्रव्यावरुद्धे यागे तत्प्रकृतिर्भवतीत्यर्थात्प्रकृतिविधिः संपद्यते । न च प्रकृतिनिरपेक्षजलसाधारणत्वाद्धारासमर्थद्रव्यस्य पुरोडाशवैलक्षण्यादिह कथमर्थादपि प्रकृतिविधिसंभव इति वाच्यम् । धारासमर्थद्रव्यं हि किंचिदपि यदि सर्वथा प्रकृतिसंबन्धानर्हमेव स्यात् तदा परं प्रकृतिविधिर्न संभवेत् । अर्हति च धारासमर्थद्रव्यं किंचिदिह प्रकृतिद्रव्येण संबन्धुम् । अतः सोमशब्देन प्रकृतिद्रव्यविधिः संगच्छत इति चेन्न । 'सोममभिषुणोति' 'अभिषुतस्य सोमस्य धारां स्रावयति' इत्यादिवाक्यैरेव धारासमर्थद्रव्यस्य सोमलताप्रकृतिकतया निर्ज्ञातत्वेन प्रकृतिविधेरानर्थक्यात् । अतः सोमशब्दोऽपि 'सोमं क्रीणाति' 'सोममभिषुणोति' इत्यादिवाक्यप्राप्तार्थानुवादीभवन् तत्प्रख्यन्यायेन नामधेयं भवति । न च ज्योतिष्टोमनाम्नः [1]सत्त्वान्नामान्तरानर्थक्यम्, न्यायप्राप्तत्वेन नामान्तरस्यापरिहार्यत्वात् 'स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः' 'स्वर्गकामः सोमेन यक्ष्य इति संकल्पयते' इत्यादिव्यवहारस्य ज्योतिष्टोमनाम्नान्यथासिद्धयभावेनानर्थक्याभावाच्च । तथा च कृत्स्नं सोमवाक्यमनुवादः । तत्र सोमशब्दस्य प्रयोजनमुक्तमेव । ऐन्द्रवायवादिवाक्यविहितानां यागानां समुदायानुवादकयजेस्तु प्रयोजनम् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति फलवाक्ये सर्वेषां युगपद्ग्रहणात्समुच्चित्यानुष्ठानम् । सोमवाक्यस्य यागविधायकत्वे तु यागस्यैकत्वात्तदर्थानां देवतानां खादिरपालाशादियूपवद्विकल्पापत्तिः । एवं ग्रहणानामपि । तथा सति 'दशैतानध्वर्युः प्रातःसवने गृह्णाति' 'आश्विनो दशमो गृह्यते' 'तं तृतीयं जुहोति' इत्यादिवाक्ये दशशब्देन च प्रतीयमानः समुच्चयो मट्तीयप्रत्ययाभ्यां प्रतीयमानः क्रमश्च विरुध्येयाताम् । उपांश्वन्तर्यामावैन्द्रवायवमैत्रावरुणाश्विनाः शुक्रामन्थिनावाग्रयण उक्थ्यो ध्रुवश्चेति दश ग्रहाः । अंशुदाभ्ययोरतिग्राह्याणां चानित्यत्वादिहाग्रहणम् । तेषां तैत्तिरीयशाखारीत्या ज्योतिष्टोमे समावेशेऽपि वाजसनेयिभिर्विकृतिसोमेष्वेवान्नातत्वेन प्रकृतिसोमे तत्समावेशाभावात् । यद्यपि, उपांशुः प्रथमं हूयते ततोऽन्तर्यामः ततो वायव्यो ग्रह ऐन्द्रवायवश्चैकेनैव पात्रेण क्रमेण हूयेते ततो मैत्रावरुणस्तत आश्विन इति क्रमः; तत्रैन्द्रवायवमैत्रावरुणाश्विनेषूध्वर्युणा हूयमानेषु प्रतिनिग्राह्यास्त्रयो ग्रहा हूयन्ते; तत्रोपांश्वन्तर्यामावषट्कारहौमौ, इतरे सवषट्कारहोमाः; एवं चाश्विनो नवमो हूयत इति कथं तृतीयत्वमिति; तथापि अध्वर्युकर्तृकसवषट्कारहोमाभिप्रायं पात्राभिप्रायं च तृतीयत्वं बोध्यम् । तस्मादैन्द्रवायवादिवाक्यविहितानां यागानां समुदायानुवादकं सोमवाक्यमिति स्थितम् । एवमग्नीषोमीयवाक्यमपि न यागविधायकम् । हृदयादिवाक्ये हि तावद्यज्यश्रवणादेवताभावाच्च कर्ममात्राण्यवगतानि । तेषु च कर्मसु पशुवाक्येन पशुप्रकृतिकहृदयादिद्रव्यं

1. सद्भावात्—क, ग, घ; संभवात्—ङ.

लक्षणया पशुशब्देनानूद्य 'अग्नीषोमीयम्' इति देवता विधीयते । एवं च यथा आधारवाक्येन आधारसंज्ञककर्मण्यवगते चतुर्गृहीतवाक्यादाज्यद्रव्यलाभे 'इतइन्द्रऊर्ध्वोऽध्वरइत्याधारमाधारयति' इति मन्त्रविनियोगतो मान्त्रवर्णिकदेवतालाभे च सति तस्य यागरूपत्वाध्यवसानम्, तद्वद्धृदयादिवाक्यतो हृदयादिद्रव्यककर्ममात्रेष्ववगतेषु पशुवाक्येन देवतालाभात्तेषां यागरूपत्वमवधार्यते । अवद्यतिस्तु चोदकप्राप्तानुवादः । द्रव्यदेवतासंबन्धाच्च गम्यमानो यागो द्रव्यभेदाद्भेदेनैव गम्यते, एकेन पशुशब्देनानुवादतो लब्धस्यापि साहित्यस्य हृदयाद्युद्देश्यगतत्वेनाविवक्षितत्वात् । आलभतिस्तु स्पर्शनमुखेन तत्साध्यावदानसंस्कृतहृदयादियागोपलक्षकोऽनुवादः । यदि च पशुवाक्यं यागविधायकं स्यात्तर्हि हृदयादिवाक्यानां न संस्कारविधित्वं शक्यते वक्तुम्, उत्पत्तिशिष्टपशुजातीयद्रव्यविरोधात् । न च दर्शपूर्णमासजाघनीवत्सूनास्थहृदयादिग्रहणे सति नोत्पत्तिशिष्टद्रव्यविरोध इति वाच्यम् । एवं हि सति हृदयाद्यवदानेभ्यस्तावन्त्यदृष्टानि अग्नीषोमीययागाच्चैकमदृष्टमिति गौरवापत्तेः । पशुवाक्यस्य हृदयादिवाक्यप्राप्तकर्मानुवादेन देवताविधौ तु न पशुवाक्याददृष्टकल्पनम्, किंतु हृदयादिवाक्यत एवेति लाघवम् । तदेवं हृदयादिसाधनकर्मसु पशुवाक्यतोऽग्नीषोमदेवताविधाने सति पश्चाद्देवतासंबन्धाद्यागरूपाणि तानि कर्माणीति निर्धार्यत इति । अथवा हृदयादीनां पशुप्रभवत्वेन सांनाय्यसाम्यात्तदवदानं यागसाधनमिति निश्चये सति तत एव प्राप्तावदानसंबन्ध आलभतिना आर्थिकस्पर्शनमुखेनानूद्यते, यथा 'तस्मै भक्षं प्रयच्छेत्' इति यागीयद्रव्यप्रतिपत्त्यर्थभक्षसंयोगेन फलचमसस्य यागसाधनत्वेऽवगते तत एव प्राप्तो भक्षोऽनूद्यते तद्वत् । एवं च प्रथममेव हृदयादिवाक्यैर्यागा विधीयन्ते । तत्रैव च 'अग्नीषोमीयम्—' इति देवताविधिः । आलभतिः पूर्ववदेव यागानुवादकः । पशुशब्दोऽपि पूर्ववदेव हृदयाद्युपलक्षकः । तदेवमुभयथापि पशुवाक्येऽप्यालभतिरनुवादकः । अत एव 'एकादश वै पशोरवदानानि' 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यादिक्रमसमुच्चयोपपद्यते । पशुवाक्यस्य यागविधायकत्वे यागस्यैकत्वाद्धृदयादीनां विकल्पापत्त्या तदसंगतिः स्पष्टैव । इति प्राप्ते, सिद्धान्तयति—

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ १७ ॥

पशुसोमयोः पशुसोमवाक्ययोः चोदना पश्वग्नीषोमलक्षणद्रव्यदेवताविशिष्टस्य सोमविशिष्टस्य च यागस्य विधिः । कुतः । द्रव्यसंयोगात् एवं सत्येव पशुसोमद्रव्यश्रवणस्य प्रयोजनेन संयोगात् । हि यस्मात्कारणात् प्रकरणे प्रकृतहृदयाद्यैन्द्रवायवादिवाक्यविहिते कर्मजाते सति पशुसोमद्रव्यसंयोगोऽनर्थकः स्यात् । विद्वद्वाक्ययोर्हि पौर्णमास्यमावास्याशब्दौ तादृशकालसंयुक्ताग्नेयादियागानां

ताभ्यां प्रत्यभिज्ञानादनुवादकौ। इह तु हृदयादिरूपरसरूपद्रव्यककर्मजातस्य पशुसोमशब्दाभ्यामाकृतिविशेषवाचकाभ्यां संयुक्ते पशुसोमवाक्ये कथमनुवादकतया सार्थके स्याताम्। ननु पशुसोमशब्दयोर्गौण्या वृत्त्या तत्प्रकृतिकद्रव्यपरतया तदनुवादकत्वं संभवतीत्युक्तमत आह—न हीति। गुणः उपचारः। अर्थः वृत्तिः। गुणादागतोऽर्थो गुणार्थः गौणी वृत्तिः। तस्य हि पशुशब्दस्य सोमशब्दस्य च मुख्यार्थत्वे संभवति गौण्या वृत्त्या तद्विकृतिद्रव्यपरत्वं न युक्तमाश्रयितुमित्यर्थः। न च पशुवाक्यस्य पशुविशिष्टयागविधिपरत्वे उत्पत्तिशिष्टपशुनैव यागस्य कर्तव्यत्वाद्धृदयादिवाक्यानामानर्थक्यं स्यात्, उत्पत्तिशिष्टद्रव्यभङ्गापत्त्या तेषां गुणविधित्वस्यासंभवात्; अतः पशुवाक्ये पशुशब्दस्य लक्षणा दुर्वारेति वाच्यम्। यदि ह्युत्पत्तिशिष्टं पशोः करणत्वं हृदयादिवाक्यैर्गुणविधौ बाध्येत तदा परं हृदयादिवाक्यानामानर्थक्यं स्यात्। नैवमस्ति; हृदयादीनां यागसाधनत्वेऽपि पशुकरणत्वस्याबाधात्, हृदयादिप्रणाड्या पशोः करणत्वानपायात्, 'गोमयेन पचति' 'तुषपक्वा भवन्ति' 'यागात्स्वर्गः' इत्यादौ लोकवेदयोर्व्यवधानेऽपि करणत्वदर्शनात्। तदेवं पशुवाक्यं पशुद्रव्यदेवताविशिष्टयागविधिः। हृदयादिवाक्यानि तु तत्रैव गुणविधयः। तत्रापि न प्राकृतावदानोद्देशेन हृदयादिविधयः, किंतु हृदयादिविशिष्टावदानान्तरविधय इति दशमे स्पष्टीभविष्यति। एवं च पशुद्रव्यस्यैकत्वात्तावदवदानसंस्कृतद्रव्यक एको याग इति लाघवम्। अन्यथा हृदयादिसाधनका बहवो यागा इति गौरवम्। एवं सोमवाक्यं सोमलताविशिष्टयागविधिः। 'ऐन्द्रवायवम्' इत्यादयो गुणविधयः। रसप्रणाड्या च सोमद्रव्यस्य यागसाधनत्वमभिषववाक्यादवधार्यते। ननु ऐन्द्रवायवादिवाक्यविहितयागेष्वेव सोमस्य हविष्ट्वेन विधानं किं न स्यात्; न च धारावाक्यान्यथानुपपत्त्या न सोमस्य हविष्ट्वविधिसंभव इति वाच्यम्, रसप्रणाड्या तदुपपत्तेरुक्तत्वादिति चेत्, न। 'ऐन्द्रवायवम्' इत्यादितद्धितस्य द्रव्यसामान्यवाचकस्य धारावाक्यसंनिहितधारासमर्थद्रवद्रव्यविशेषविषयतयैवोपपत्त्या ऐन्द्रवायवादिवाक्यत एव द्रव्यविशेषलाभे सति गृह्णातिना अनियमेन द्रव्याक्षेपासंभवेन द्रव्यनियमविध्यसंभवेन हविर्विधानासंभवात्। एतेनैन्द्रवायवादियागीयधाराद्रव्यप्रकृतित्वेन सोमस्य विधिः किं न स्यादित्यपि निरस्तम्, ऐन्द्रवायवादितद्धितस्य धारावाक्यप्राप्तप्रकृतिद्रव्यनिरपेक्षजलादिद्रवद्रव्येणैव शान्ताकाङ्क्षतया अवश्यं प्रकृतिद्रव्यापेक्षाभावेन प्रकृतिविध्यसंभवात्। एतेनैवाभिषवादिवाक्यतः सोमप्राप्तिमुपजीव्य सोमवाक्ये सोमशब्दस्य तत्प्रख्यन्यायेनैन्द्रवायवादियागनामधेयत्वं निरस्तम्, 'सोमेन यजेत' इत्याहत्य सोमविधेः प्राक्सोमस्याप्राप्तत्वात्। न च धारावाक्यस्य सोमरसविषयत्वेन तद्वाक्यविहितसोमरसविषयत्वमैन्द्रवायवादितद्धितस्य भविष्यतीति ततः सोमद्रव्यस्य प्राप्तिरिति वाच्यम्। न हि धारावाक्यस्य सोमरसविषयत्वे किंचित्प्रमाणमस्ति, तद्वाक्ये सोमरसस्येत्यश्रवणात्। न च तत्र सोमरसस्येत्यश्रवणेऽप्यभिषवादिवाक्यसंनिधानात्तस्य सोमरसविषयत्वमस्त्विति वाच्यम्। न हि तद्धितस्य सामान्यवाचिनो विशेषं विना पर्यवसानाभाववद्धाराशब्दस्यापर्यवसानमस्ति,

श्रुतमात्रेण पर्यवसानोपपत्तेः । न च 'व्रीहीन्प्रोक्षति' इत्यादिषु यथा प्रकृतग्रहणं तद्द्वारावाक्येऽपि प्रकृतग्रहणं किं न स्यादिति वाच्यम्, वैषम्यात् । प्रोक्षणादिवाक्येषु लौकिकस्य संस्कारानुपपत्तेरपूर्वसाधनविशेषलक्षणया प्रकृतग्रहणं युक्तम् । धारावाक्ये तु ग्रहणोद्देशेन धारामात्रविधानं न प्रकृतापेक्षम्[1] । किंच सोमवाक्ये सोमद्रव्यस्याहृत्यविधानानङ्गीकारे सोमस्याप्राप्तत्वेन क्रयाभिषवादिवाक्यानां तत्संस्कारविधायकत्वासंभवेन 'सोमक्रयेण क्रतुमुपकुर्यात्' इत्यारादुपकारकक्रयाभिषवादिविधायकत्वापत्त्या क्रयाभिषवादीनां लौकिकसोमविषयतयाप्युपपन्नतया एकसोमविषयत्वानापत्त्या धारावाक्यस्य कथं क्रयाभिषवादिवाक्यसंनिहितसोमरसविषयता । न हि 'सोमं क्रीणाति' 'तं क्रीतं सोममभिषुणोति' 'तस्याभिषुतस्य सोमस्य धारां करोति' इत्येवं वचनान्युपलभामहे । न च क्रयादिवाक्यानामेकयागप्रकरण आम्नातत्वेन प्रकरणानुसारात्तद्वाक्येषु 'प्रकृतं सोमं क्रीणाति' 'प्रकृतं सोममभिषुणोति' इत्येवं प्रकरणविशेषितसोमस्य ग्रहणात्सर्वेषामेकविषयत्वमिति वाच्यम् । इतिकर्तव्यताकाङ्क्षालक्षणप्रकरणस्य विनियोगमात्रे व्याप्रियमाणस्य परविशेषणत्वासंभवात् । यथा चैतत्तथा सप्तमाद्ये स्पष्टं भविष्यति । न च प्रकरणस्याविशेषकत्वेऽपि 'सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति' इत्यादौ संनिहितैकहायनीसंबन्धिपदादिवत्संनिधिवशाद्विशेषोऽस्त्विति वाच्यम् । नवमाद्यपादे 'द्रव्यसंख्याहेतुसमुदायं[2] वा श्रुतियोगात्' इत्यधिकरणे 'तुल्येषु नाधिकारः स्यात्' इति गुणसूत्रे तुल्येष्वेकत्र संनिधिरपरत्र विशेषको न स्याद्विनिगमनाविरहादिति वक्ष्यमाणत्वेन संनिधेरप्यत्राविशेषकत्वात् । पदवाक्ये तु पदस्यावयवत्वेन नित्यमवयविसापेक्षत्वेन तत्र संनिधेर्विशेषकत्वेऽपि धारादिवाक्येषु तथा नित्यापेक्षाभावेन वैषम्यम् । न चैन्द्रवायवादितद्धितस्य 'सास्य देवता' इति विहितस्य सर्वनामतुल्ययोगक्षेमतया 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इत्यत्र तच्छब्दवत्प्रकृतसोमपरामर्शकत्वं किं न स्यादिति वाच्यम् । 'सा वैश्वदेवी' इत्यत्र तच्छब्दस्य साकाङ्क्षस्य 'तप्ते पयसि—' इति प्रकृतपरामर्शित्वसंभवेऽप्यैन्द्रवायवादितद्धितस्य द्रव्यवाचकस्य प्रकृतिद्रव्यनिरपेक्षजलादिद्रव्यसमर्पकप्रकृतधारावाक्यत एव जलादिद्रव्यलाभेन शान्ताकाङ्क्षतया व्यवहिताभिषवादिवाक्योपस्थितसोमविषयत्वानुपपत्तेः, धारावाक्यस्य च सोमरसविषयतायाः प्रागेव निरस्तत्वात् । अतः सोमवाक्ये सोमशब्दस्तत्प्रख्यन्यायेन नामधेयमित्ययुक्तमिति तत्र सोमद्रव्यविशिष्टयागविधिरेवास्थेयः ।

इतोऽपि न समुदायानुवाद इत्याह—

अचोदकाश्च संस्काराः ॥ १८ ॥

चशब्दो[3] युक्त्यन्तरसमुच्चये । हृदयाद्यैन्द्रवायवादिशब्दसंदर्भाः अचोदकाः यागानां

1. विधानान्न प्रकृतापेक्षा—क, घ, ङ. 2. समवायं—क, ख, ग.

विधायका न भवन्ति, येन पशुसोमवाक्ये तदनुवादके स्याताम् । किंतु संस्काराः अवदानग्रहणविधायिन एवैते । अविहितेषु च यागेषु केषां समुदायोऽनूद्येत, अवदानग्रहणमात्रविधानेनैवोभयेषां वाक्यानामुपपत्तेः । संभवति हि 'हृदयादीन्यवदानेन यागयोग्यानि कुर्यात्' 'ऐन्द्रवायवादिग्रहणेन सोमरसं संस्कुर्यात्' इति। तत्र यागाव्यभिचरितावदानस्य देवताविशिष्टग्रहणस्य च यागमन्तरेणानुपपत्तेः यागापेक्षायाम् 'अग्नीषोमीयं पशुमालभेत' इति 'सोमेन यजेत' इति च वाक्यं सर्वत्र द्रव्यदेवतासंबन्धानुपपादयद्यागान्तरकल्पनं निरुणद्धि । न चैवं यागावश्यंभावेऽप्याग्नेयादिवाक्ये श्रुतस्य द्रव्यदेवतासंबन्धस्य निर्वाहकत्वेन तत्रैव यथा यागः कल्प्यते एवं हृदयाद्यैन्द्रवायवादिवाक्येष्वेव यागकल्पनास्तु; पशुसोमवाक्ये तु तदनुवादके एव; अन्यथा विद्वद्वाक्यमप्यनुवादकं न स्यात्; पशुसोमवाक्ययोर्हृदयाद्यैन्द्रवायवादिवाक्यापेक्षितयागविधायकत्ववत्तस्याप्याग्नेयवाक्यापेक्षितयागविधायकत्वसंभवादिति वाच्यम् । विशिष्टाभिधानेन पर्यवसितस्य हि वाक्यस्याकाङ्क्षाबलाद्वाक्यान्तरेण संबन्धः । आग्नेयादिवाक्ये च पुरुषव्यापाराश्रवणाद्विशिष्टभावनाभिधानमेव न पर्यवस्यति । अपर्यवसितस्य च न विद्वद्वाक्येनान्वय इति विशिष्टभावनाविधिपर्यवसानाय पुरुषव्यापाररूपो यागस्तत्रैव कल्प्यते । अतो विद्वद्वाक्यमनुवाद इति युक्तम् । इह त्ववदानग्रहणरूपपुंव्यापारश्रवणात्पर्यवसन्नमेवाभिधानम् । किंत्वभिधानानन्तरमवदानदेवतासंबन्धनिर्वाहकापेक्षामात्रमिति पशुसोमवाक्ये अपेक्षितविधानार्थे संपद्येते । एवं च श्रुतेनैव निर्वाहोपपत्तौ हृदयाद्यैन्द्रवायवादिवाक्येष्वश्रुतयागकल्पनं न भवतीति लाघवम् । तस्मात्पशुसोमवाक्ये यागविधायके ।

यदुक्तं सोमवाक्यस्य यागविधायकत्वे देवतानां ग्रहाणां च विकल्पापत्तौ क्रमसमुच्चयदर्शनं नोपपद्यत इति, तत्राह—

तद्भेदात्कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि
स्याद्भेदो [1]द्रव्यगुणभावात् ॥ १९ ॥

ऐन्द्रवायवादिवाक्येषु 'इन्द्रवायुभ्यामिदं दातव्यम्' 'मित्रावरुणाभ्यामिदं दातव्यम्' इत्येवं तत्तद्देवतोद्देशविशिष्टग्रहणानि श्रुतानि । तत्र प्रतिग्रहणं तत्तद्देवतोद्देशेनान्यदन्यददृष्टमुत्पद्यते । तथाविधग्रहणैश्च द्रव्यमुखेन प्रधानस्योपकार इति स्थितिः । तत्र कर्मणो ग्रहणस्य अभ्यासः पुनः पुनरनुष्ठानम् । ग्रहणानां समुच्चयः स्यादिति यावत् । कुतः । तद्भेदात् देवतासंयोगभेदात् । न हि तत्तद्देवतोद्देशजनितादृष्टसधीचीनग्रहणैर्जायमान उपकार एकदेवतासंयोगसधीचीनेनैकेन ग्रहणेन संभवति । अतो ग्रहणानां समुच्चयः । ननु तावद्देवतासंयुक्तादेकस्मादेव ग्रहणात्तथाविधोपकारः संभवतीत्यत आह—द्रव्यपृथक्त्वादिति। दशमुष्टिपरिमितसोमलतासंभूतस्यैकधनवसतीवर्युदकैः प्रभूतमभि-

1. द्रव्यगुणीभावात्.

वर्धितस्य रसद्रव्यस्य प्रादेशमात्रेषूर्ध्वपात्रेष्वल्पगर्तेषु स्थालीचमसेषु तत्तद्देवतासंयुक्तग्रहणसंस्कारस्य पृथक्त्वावश्यंभावात्। सकृद्ग्रहणे ह्यल्पस्यैव रसस्य किंचिद्देवतासंयुक्तग्रहणसंस्कारापत्तौ देवतान्तरश्रवणं परिशिष्टं च रसद्रव्यमनर्थकं स्यात्। ननु देवतासंकल्पस्य ग्रहणं प्रति गुणभूतत्वात्तदनुसारेण ग्रहणानामपि भेदाश्रयणमयुक्तमित्यत आह— भेद इति। प्रतिदेवतं ग्रहणभेद एव युक्तः। कुतः। द्रव्यगुणभावात्। देवतासंकल्पस्तावन्न केवलं ग्रहणार्थः, किंतु गृह्यमाणद्रव्यार्थः। ग्रहणमपि द्रव्यार्थमेव। एवं चोभयोरपि द्रव्यानुसारेण निवेशो युक्तः। कृत्स्नेन दशमुष्टिना सोमेन हि यागः श्रुतः ऐन्द्रवायवादिग्रहणं च श्रुतम्। यदि कृत्स्नस्य ग्रहणं कथंचित्सकृदेव स्यात् तर्हि यदैवेन्द्रवायुभ्यां संकल्पितं तदेव 'मित्रावरुणाभ्याम्' इति संकल्प्येत। न चैतद्युज्यते, 'ऐन्द्रवायवम्' इत्यादिनिरपेक्षताद्धितविरोधात्। यदि चैकदेशस्य ग्रहणं सकृदेव स्यात्तर्हि दशमुष्टिपरिमाणकात्स्न्र्यविरोधः। ग्रहणाभ्यासे तु द्रव्यस्य पृथक्कृतत्वात् 'ऐन्द्रवायवम्' इत्यादि युज्यते। परिमाणकात्स्न्र्यस्याप्यविरोधः। ततश्च यावद्देवतं ग्रहणाभ्यासः सिद्धः। तस्मिंश्चाभ्यस्यमाने देवतासबन्धानां यागं विनानुपपत्तेर्यागस्याप्यभ्यासः सिद्धः। तथा च 'आश्विनो दशमो गृह्यते तं तृतीयं जुहोति' इति क्रमसमुच्चयदर्शनमुपपन्नं भवति। हृदयादिविषये समुच्चयदर्शनं तु दशमे तत्समुच्चयस्य वक्ष्यमाणत्वात्तत एव व्यक्तमिति तदत्र सूत्रकृतोपेक्षितम्।

यच्चोक्तं सोमवाक्यस्य यागविधायकत्वे खादिरादिवद्देवतानां विकल्पः स्यादिति, तत्राह—

संस्कारस्तु न भिद्यते[1] परार्थत्वाद्द्रव्यस्य गुणभूतत्वात्॥ २०॥

खादिरादियूपेषु संस्कारः पशुनियोजनं प्रतियूपं न भिद्यते। नियोजने तेषां समुच्चयो न भवतीति यावत्। कुतः। परार्थत्वात् तेषां पशुनियोजनार्थत्वात्। पशुनियोजनस्य चैकेनैव निष्पन्नत्वेनेतरेषां तदनपेक्षितत्वात्। देवतासंयोगानां तु भिन्नभिन्नादृष्टकार्यकत्वात्समुच्चय इति वैषम्यम्। प्रयोजनं पूर्वपक्षे ऐन्द्रवायवादिवाक्यानां यागविधायकत्वे तेषां यागानां स्वार्थतया विनियुक्तदेवताकत्वाभावलक्षणाव्यक्तत्वाभावेन 'अव्यक्तासु तु सोमस्य' इति न्यायाप्रवृत्तिः; सिद्धान्ते तु तत्प्रवृत्तिः। पशूदाहरणे तु पूर्वपक्षे यागभेदाद्विकृतिष्वेकस्यैव यागस्येतिकर्तव्यताप्राप्तेर्हृदयादिष्वेकेन यागः; सिद्धान्ते सर्वैरित्यादि। इति पशुसोमाधिकरणम्॥

वृत्तोऽभ्यासप्रसङ्गः सापवादः। इदानीं संख्यया कर्मभेदः प्रस्तूयते। सांग्रहण्यां श्रूयते 'तिस्र आहुतीर्जुहोति' इति। तत्र किमेको होमो विधीयते, उत बहव इति संशयः। तत्राभ्यासस्थले आख्यातस्य पुनःश्रुत्या कर्मभेदे सत्यपि संख्यास्थले तदभावान्न

७. संख्याकृतकर्मभेदाधिकरणम्।

कर्मभेदः, सकृच्छ्रुतस्याख्यातस्यानेकत्र व्यापारायोगात्। ततश्च यथा

1. भिद्येत.

प्रयाजानां प्रकृतौ पञ्चसंख्याकत्वेन प्रज्ञातत्वात् तदविरोधाय पशौ श्रुतं प्रयाजैकादशत्वमभ्यासेन संपाद्यम्, तथेहापि स्वपदगताख्याततः प्रथमावगतकर्मैक्याविरोधाय पदान्तरावगता त्रित्वसंख्या अभ्यासेनैव संपाद्या। इति प्राप्ते, सिद्धान्तयति—

[1]पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात् ॥ २१ ॥

'तिस्र आहुतीः' इति पदान्तरगतयाप्युत्पत्तिशिष्टया कर्मसमानाधिकरणया संख्यया कर्मभेदः स्यात्। कुतः। पृथक्त्वनिवेशित्वात्। पृथक्त्वेन सहैव निवेष्टुं शीलमस्य पृथक्त्वनिवेशि तस्य भावः तस्मात्। 'शरदः कृतार्थता' 'पत्न्याः कर्तृत्वम्' इत्यादिवत्सामान्ये नपुंसकम्। द्वित्र्यादिसंख्यायाः पृथक्त्वैकार्थसमवायादित्यर्थः॥ यत्र ह्युत्पत्तिवाक्ये कर्मैक्यविरोधि पदान्तरं नास्ति तत्रैवाख्यातसकृच्छ्रुतेः कर्मैक्यप्रयोजकता; यथा 'सोमेन यजेत' इत्याम्नातस्याख्यातस्य न कर्मैकत्वमर्थः, किंतु भेदनियामकाभावे आख्यातस्य सकृच्छ्रुत्या अर्थात्तदैक्यसिद्धिः[2]। प्रकृते च 'तिस्रः' इति भेदनियामके सति सकृच्छ्रुतमेवाख्यातं भिन्नान्यपि कर्माणि युगपदेव विधत्त इति नाख्यातसकृच्छ्रवणादेकत्वसिद्धिः। न ह्याख्यातमात्रमेकं वाक्यं येन तन्मात्रजन्यप्रमायां विरोधिसंख्यान्तराभावादाख्यातं कर्मैक्यमवगमयितुं प्रभवेत्। ततश्चाख्यातमात्रस्य प्रामाण्याभावान्न ततः कर्मैकत्वसिद्धिः। प्रयाजेषु तु प्रकृतौ प्रज्ञातपञ्चसंख्याकेषु विकृतौ चोदकतः प्राप्तेषु तदबाधायैकादशत्वसंख्या तदभ्यासेनैव पूरयितुमुचिता। न चेह कर्मैकत्वं वाक्यान्तरावगतं येन तदविरोधायाभ्यासेन त्रित्वसंख्या पूर्येत। त्रित्वसंख्याविशिष्टतयैव हि होमविधानमत्र क्रियते। तस्मादत्र कर्मभेद इति वैषम्यम्। 'दर्भपुञ्जीलैः पावयति' इत्यादौ तु संख्यायाः कर्मसामानाधिकरण्याभावान्न भेदकत्वम्। प्रयोजनं पूर्वपक्षे अभ्यासे सत्यपि कर्मणो भेदाभावादेकमन्त्रत्वाच्च सकृदेव मन्त्रः प्रयोज्यः, सिद्धान्ते तु कर्मभेदात्प्रतिकर्म मन्त्र आवर्तनीय इति प्राञ्चः। तच्चिन्त्यम्। तैत्तिरीयके हि 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इति श्रुतम्। त्रयश्च मन्त्राः पठिताः। न च तत्र द्विःस्वाहाकारपाठाद्दौ मन्त्राविति शङ्क्यम्, प्रथमस्वाहान्तभागे द्वयोः प्रश्लिष्टपाठात्। 'आमनमस्यामनस्य देवा ये जाताः समनसः' इत्यादिः प्रथमः। 'आमनमस्यामनस्य देवा ये कुमाराः समनसः' इत्यादिर्द्वितीयः। तृतीयस्तु 'आमनमस्यामनस्य देवा याः स्त्रियः' इत्यादिः पृथगेव पठितः इति भट्टभास्करभाष्ये स्पष्टम्[3]। अतः कर्मैकत्वपक्षेऽपि प्रतिहोमं प्रयोगमेकैकमन्त्रप्राप्तेर्मन्त्रस्यावृत्तेरप्रसक्तत्वात्पूर्वोत्तरपक्षयोर्न फलभेद इति। वस्तुतस्तु 'भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोति' इत्यत्र कर्मैकत्वे अभ्यासान्तरये[4] सति तत्संपत्त्यै न पुनः प्रयोगः। कर्मभेदे तु पञ्चानां मध्ये यस्यान्तरयस्तस्य प्रयोग इत्यादि बोध्यम्। 'भुवनस्य पत इत्यादि

1. पृथक्त्वनिवेशात्. 2. 'विधिः—क, घ, ङ. 3. व्यक्तम्—क, ग, घ, ङ. 4. अभ्यासान्तराये—ग.

पञ्चकृत्वो यजुर्वेदेत्' इति बोधायनकात्यायनीयाः। अत्र 'द्वादश द्वादशानि जुहोति' इत्यप्युदाहृतं वार्तिके। द्वादशसंख्याकावयवकान्संघातान्द्वादशसंख्यायुक्ताञ्जुहोतीत्यर्थः। ततश्च चतुश्चत्वारिंशदधिकशतं होमाः संपन्नाः। तत्र 'अग्नाविष्णू सजोषसा' इत्यारभ्य 'अग्नं च मे' इत्यतः प्राक्पञ्चत्रिंशदधिकं शतं मन्त्राः सन्ति। तत्र संख्यासंपत्तये 'कूयवाश्च मे' इति मन्त्रस्य दशकृत्वोऽभ्यास इति तद्व्याख्यातारः। वस्तुतस्तु नेदमुदाहरणम्। उत्पत्तिवाक्यगता हि संख्या कर्मभेदिका। 'वसोर्धारां जुहोति' इत्युत्पत्तिवाक्यम्। तदुत्पन्नकर्मानुवादेन 'द्वादश द्वादशानि' इति श्रुता संख्या कथं कर्म भिन्द्यात्; अन्यथा प्रयाजैकादशत्वादीनामपि कर्मभेदकत्वापत्तेः। अतः 'द्वादश द्वादशानि' इति संख्यासंपत्तिरभ्यासादेव शक्यते साधयितुम। किंच 'द्वादश द्वादशानि जुहोति' 'अर्धेन्द्राणि जुहोति' 'यज्ञायुधानि जुहोति' इत्यादयः 'वसोर्धारां जुहोति' इत्युत्पन्नहोममप्यवयवान् 'द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नमवरुन्द्धे' इत्यादयर्थवादैः प्रशंसितुमनुवादा इति भवस्वामिभाष्ये भट्टभास्करभाष्ये च स्पष्टम। अतः 'द्वादश द्वादशानि—' इति नोदाहरणमित्यास्तां तावत्॥ क्वचिद्द्रव्यगतापि संख्या कर्मभेदिका। तथाहि—वाजपेये श्रूयते 'सप्तदश प्राजापत्यान्पशूनालभते' इति। तत्र किं सप्तदशपशुद्रव्यक एको यागः, किं वा एकैकपशुद्रव्यकाः सप्तदश यागा इति संशयः। प्राजापत्यशब्दस्तावत् 'तद्धिताः' इत्यधिकारे 'सास्य देवता' इत्यर्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति विहिततद्धितसंज्ञकण्यप्रत्ययान्तः। तत्र यदि 'अस्य' 'अस्य' इति सप्तदशकृत्व उच्चार्य कृतैकशेषेण 'एषाम्' इति सर्वनाम्ना 'प्रजापतिर्देवतैषाम्' इति विगृह्य प्रजापतिशब्दात्सप्तदशसु तद्धितेषु कृतेषु तेषां केवलानामेकशेषे सति 'यः शिष्यते स लुप्तार्थाभिधायी' इति न्यायेन शिष्टस्यैकस्य तद्धितस्य सप्तदशसु वृत्त्या प्रथमं बहुत्वेनान्वितस्य पश्चात्प्रकृतिभूतप्रजापतिशब्देनान्वयः, तदा केवलद्रव्यभेदस्य हृदयादिद्रव्यभेदवद्यागभेदाप्रयोजकतया सप्तदशभिर्व्यासज्यैकेन प्रजापतिना संबद्धैर्द्रव्यैः कल्प्यमानो याग एक एव स्यात्। यदि तु 'प्रजापतिर्देवताऽस्य प्राजापत्यः', 'प्राजापत्यश्च प्राजापत्यश्च—' इति सप्तदशकृत्व उच्चार्य तद्धितान्तानामेकशेषः क्रियते, तदा शिष्टस्य प्राजापत्यशब्दस्य सप्तदशसु प्रजापतिविशिष्टद्रव्येषु वृत्त्या प्रथमं प्रकृत्यन्विततद्धितार्थेषु तेषु विशिष्टरूपेषु पश्चाद्बहुत्वान्वयः। ततश्च सप्तदशभिर्द्रव्यदेवतासंबन्धैः कल्प्या यागाः सप्तदशैव स्युरिति भवति संशयः। तत्र कृतैकशेषस्य तद्धितस्यैव पूर्वं बहुत्वेनान्वय इति युक्तम्। अस्ति हि केवलतद्धितानामेकशेषः 'गर्गाः' इत्यादौ। गर्गशब्दादेकस्माद्बहूनां यञामुत्पत्तेस्तद्धितमात्रैकशेषस्य 'सरूपाणाम्—' इति सूत्रे 'तद्राजस्य—' इति सूत्रे च भाष्यकैयटयोर्दर्शनात्। न च तद्धितार्थस्य प्रथमं बहुत्वान्वयेऽपि तद्धितस्य देवताविशिष्टद्रव्यवाचित्वेन द्रव्यदेवतासंबन्धभेदप्रसङ्गान्न यागैक्यसिद्धिरिति वाच्यम्। [1]तद्धितेन हि द्रव्यमात्रमभिधीयते। देवता तु

1. तद्धितो हि द्रव्यमात्रमभिधत्ते—क, घ, ङ.

तद्धितोपसंदानात्प्रकृत्यैव प्रतीयते। तथा च तद्धितार्थद्रव्यस्यैव बहुत्वान्वयान्न यागभेदः प्रसज्यते। न च तद्धितमात्रस्यैकशेषेऽपि तद्धितान्तादेव बहुवचनोत्पत्त्या तद्धितस्यैव प्रकृत्या प्रथममन्वयेन भाव्यमिति वाच्यम्। प्रथमं तद्धितार्थस्य प्रजापतिना देवतया अन्वयेऽपि विशेष्यमात्रस्यैव बहुत्वान्वयितया विशिष्टस्य तदन्वयाभावेन यागभेदासिद्धेः। प्राजापत्यशब्देन हि देवतासंबन्धोपसर्जनं द्रव्यमेव प्राधान्येनाभिधीयते। प्रधानत्वात्तस्यैव बहुत्वेनान्वयो युक्तः, न तु देवतासंबन्धस्योपसर्जनस्यापि। यदि च विशिष्टरूपस्य प्रतीतत्वमात्रेणोपसर्जनस्याप्यन्वयः स्यात्तर्हि 'द्वौ' 'त्रयः' इत्यत्रातिप्रसङ्गः। न हि तत्र द्वित्वविशिष्टस्य त्रित्वविशिष्टस्य च द्विवचनबहुवचनाभ्यामन्वयः; तथा सति 'द्वौ' इति चत्वारः प्रतीयेरन् 'त्रयः' इति नव। अतोऽत्र प्राजापत्यशब्दे विशेष्यभूतद्रव्यमात्रस्य प्रथमं बहुत्वेनान्वयो युज्यत इति न यागभेदः। न च अत्र यागैक्ये एकस्यैव पशोर्यागसाधनत्वं स्यान्नेतरेषाम्, प्रकृतौ 'अग्नीषोमीयं पशुम्' इत्येकत्वस्योपादेयगतत्वेन विवक्षिततया एकपशुनिष्पन्नानां हृदयाद्यवयवानां यागसाधनत्वेन इहाप्येकपशुनिष्पन्नानामेव तेषामवयवानां चोदकतः प्राप्तेः यागैक्ये चोदकस्यैकत्वेन पश्वन्तरेषु तत्प्राप्त्यभावादिति वाच्यम्। इह सप्तदशानां पशूनामुपदेशबलेन तदनुसारेण चोदकतः प्रतिपश्वेकादशावयवप्राप्तेर्वर्णनीयतया सर्वेषां यागसाधनत्वोपपत्तेः। न च सप्तदशपशूपदेशस्य कर्मभेदेऽप्युपपत्त्या न तद्बलेन चोदकस्यान्यथाभावो युक्त इति वाच्यम्। प्रकृतौ ह्येकादशावयवप्रकृतिभूतस्य पशोरेव यागसाधनतया एकादशावदानगणस्य पशुधर्मत्वेन साक्षाद्यागधर्मत्वाभावेनोपाकरणनियोजनादिपशुधर्मवदेकादशावदानगणस्य कर्मैक्येऽपि प्रतिपशुप्राप्तिसंभवेन सर्वेषां पशूनां यागसाधनत्वोपपत्तेः। किंच तद्धितान्तैकशेषेण कर्मभेदे सप्तदश कर्माणि तावन्ति चापूर्वाणि कल्प्यानि। तद्धितमात्रैकशेषे त्वेकमेव कर्म तदपूर्वं चेति लाघवम्। इति प्राप्ते, सिद्धान्तयति— **पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात्**। 'प्राजापत्यान' इति कृततद्धितान्तैकशेषशब्दनिर्दिष्टसंख्यया प्रजापतिविशिष्टद्रव्यगतया यागभेदः स्यात्। कुतः। पृथक्त्वनिवेशित्वात्तस्याः पृथक्त्वैकार्थसमवायात्। प्रकृतौ तावत् 'एकादशावदानप्रकृतिभूतः पशुर्यागसाधनम्' इति नार्थः, पशोर्हविष्ट्वाभावात्; हृदयादीनामेव हविष्ट्वात् 'हृदयादिभिः पशुप्रकृतिकैर्यागः साधनीयः' इत्येवार्थः। तथा च हृदयादीनामुपाकरणादिवन्न पशुधर्मत्वम्, किंतु यागधर्मत्वमेव। ततश्च चोदकतो विकृतियागोऽप्येकपशुप्रकृतिकहृदयादिभिः साध्य इत्येतावन्मात्रमवगतमिति प्रकृते पशुभेदेऽपि कर्मैक्यादेक एव हृदयादिगणः प्राप्नोति। एवं च एकेन हृदयादिगणेन सर्वेषां पशूनां कथं यागसाधनत्वं शक्येत संपादयितुम्। न च प्रकृतौ पशावेकत्वस्य श्रौतत्वेऽप्यवदानगणे एकपशुनिष्पन्नत्वस्यार्थिकतया तस्यात्रातिदेशाभावेन एकस्य पशोर्हृदयावदानमन्यस्य जिह्वावदानमित्येवमवदानगणप्राप्त्या सर्वेषां यागसाधनत्वमुपपद्यत इति वाच्यम्। एवमप्येकादशानां पशूनां यागसाधनत्वनिर्वाहसंभवेऽपि तदितरेषां तन्निर्वाहासंभवात्। अतः सर्वेषां पशूना यागसाधनतया प्राजापत्यत्वनिर्वाहाय तद्धिता-

न्तानामेकशेषेण विशिष्टरूपेषु बहुत्वाश्रयणमेव युक्तम् । 'द्वौ' 'त्रयः' इत्यादौ तु शब्दशक्तिस्वाभाव्यात्प्रत्ययथयोः प्रकृत्यर्थानुवादकत्वम् । अत एव "प्रातिपदिकार्थसूत्रे संख्यापर्यायवचनग्रहणमुक्तार्थत्वेऽपि 'द्वौ' 'त्रयः' इत्यादौ विभक्तिविधानार्थम्" इति वैयाकरणाः । अनेकादृष्टकल्पना तु प्रामाणिकत्वान्निर्दोषा । प्रयोजनं—पूर्वपक्षे सर्वेषां पशूनां यागसाधनत्वस्य व्यासक्तताया 'प्रजापतय एव ते पशवो न मम' इति त्यागानुष्ठानम्; सिद्धान्ते तु 'प्रजापतय इदम्' इति सप्तदशकृत्वः त्यागानुष्ठानमिति । याज्ञिकास्तु यागभेदेऽपि 'प्रजापतय इदम्' इति सकृदेव त्यजन्ति । सकृदुच्चारितस्यैव 'प्रजापतय इदम्' इत्यस्य तन्त्राभिधानशक्त्या युगपदेव प्रतिद्रव्यं देवतासबन्धकरणस्य संभवादिति तदाशयः । अत एव चरुपुरोडाशीयविभागमन्त्रे 'इदमिन्द्राग्न्योर्द्यावापृथिव्योः' इत्यादौ 'इदंशब्दस्तन्त्रं स्यात्' इत्यापस्तम्बसत्याषाढभारद्वाजाः । संकर्षकाण्डेऽप्येवम् । 'एकामिव संस्तुयात्समानां देवतां समानार्थामव्यवहितां सकृन्निगमेषु' इत्याश्वलायनः । प्रयोजनान्तरमपि वार्तिकादौ व्यक्तम् । इति संख्याधिकरणम् ॥

८. संज्ञाकृतकर्मभेदाधिकरणम् ।

ज्योतिष्टोमं प्रकृत्य श्रूयते 'अथैष ज्योतिः' 'अथैष विश्वज्योतिः' 'अथैष सर्वज्योतिः' 'एतेन सहस्रदक्षिणेन यजेत' इति । तत्र किं प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते, उत कर्मान्तराण्येव ज्योतिरादिनामकानि सहस्रदक्षिणाविशिष्टानि विधीयन्त इति संशयः । तत्र द्वित्र्यादिसंख्याया आश्रयभेदनियमाद्युक्तं कर्मभेदकत्वम्, न तु नाम्नामपि । 'दर्शपूर्णमासौ' 'साकंप्रस्थायीयः' 'दाक्षायणयज्ञः' इत्यादिनामभेदे सत्यपि कर्मभेदाभावात्, 'सूर्यः' 'दिवाकरः' 'भास्करः' इत्येवं सूर्यादेरेकस्याप्यनेकनामदर्शनात्, ज्योतिरादिशब्दानां प्रथमश्रुतैतच्छब्दानुसारित्वेन प्रकृते तेषामर्थान्तरप्रत्यायकत्वानुपपत्तेश्च । अतो ज्योतिरादिशब्दैः प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणागुणविधिः । संभवति हि ज्योतिरादिशब्दैर्ज्योतिष्टोमस्यानुवादः, तेषां तन्नामत्वात् । न च यजिसामानाधिकरण्याभावात्कथं तेषां यागनामत्वमिति वाच्यम् । 'अथैष ज्योतिः' इत्यत्र ज्योतिरादिशब्दनिर्दिष्टानाम् 'एतेन' इत्येतच्छब्देनापि ज्योतिरादिरूपेणैव प्रत्यायितत्वेन एतच्छब्दे यजिसामानाधिकरण्यस्य ज्योतिरादिशब्दानां यजिसामानाधिकरण्ये पर्यवसिततया तन्नामताया युक्तत्वात् । भवति हि 'त्रिवृत्पञ्चदशः सप्तदश एकविंशः, एतानि वा व तानि ज्योतींषि, य एतस्य स्तोमाः' इति त्रिवृदादिस्तोमपरत्वेनावगतो ज्योतिःशब्दस्तद्वतः क्रतोर्ज्योतिष्टोमस्य नाम । एवं विश्वानि ज्योतींषि सर्वाणि ज्योतींषि त्रिवृदादीनि यस्येति विश्वज्योतिःसर्वज्योतिःशब्दावपि । न चाथशब्दबलेन प्रकृतप्रत्यभिज्ञाविच्छेदात्तदनुवादत्वमयुक्तमिति वाच्यम्। न ह्यत्राथशब्दोऽधिकारे वर्तते येन प्रकृतबुद्धिविच्छेदः स्यात्। गुणविधेः प्रकृतकर्मापेक्षित्वपरोऽत्राथशब्दः, द्वादशशतदक्षिणापेक्षया पञ्चान्तरपरिग्रहार्थो वा । एवं च ज्योतिरादि-

शब्दानां न प्रकृतहानिरप्रकृतप्रक्रियाकल्पनापि। तस्मात्प्रकृतज्योतिष्टोमानुवादेन गुणो विधीयते। तदेवं संभवति गुणविधिपरत्वे कर्मान्तराणि तदपूर्वाणि च न युज्यते कल्पयितुम्। इति प्राप्ते, सिद्धान्तयति—

संज्ञा चोत्पत्तिसंयोगात् ॥ २५ ॥

चशब्द उक्तसमुच्चये। संख्यावत्संज्ञापि स्वयं भिन्ना सती पृथक्त्वैकार्थसमवायात्कर्मभेदिका स्यात्। व्याकरणाधिकरणे हि 'अन्यायश्चानेकशब्दत्वम्' इति गुणसूत्रे एकस्यार्थस्यानेकशब्दत्वं निराकृतम्। ज्योतिष्टोमनामतः परस्परतश्च भिन्नानि नामान्यत्र श्रूयन्त इत्यर्थभेदो वाच्यः। न चैवं सति विद्वद्वाक्येऽपि पौर्णमास्यादिश्रवणात्कर्मान्तरं स्यादिति वाच्यम्। रूपलाभाभावेन बाधकेन तदसंभवात्। न चात्रार्थान्तरत्वे किंचिद्बाधकमुपलभामहे। ततश्च संज्ञाश्रुत्या अर्थान्तरावगमात्प्रकरणविच्छेदे सत्यर्थान्तरकलुषायां च बुद्धावुपनिपतत्[1] 'सहस्रदक्षिणेन यजेत' इति वाक्यं ज्योतिष्टोमं न गन्तुमुत्सहते। तथा च प्रकृते कर्मणि गुणविध्यसंभवान्न प्रकृतहान्यादिदोषः। न च ज्योतिरादिशब्दानां ज्योतिष्टोमनामैकदेशप्रत्यभिज्ञानान्नामत्वम्, 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यादौ केवलज्योतिःशब्दस्य ज्योतिष्टोमे प्रयोगदर्शनादिति वाच्यम्। न ह्यवयवसाम्यादेकार्थता युक्ता, अन्यथा 'शाला' 'माला', 'देवदत्तः' 'यज्ञदत्तः', इत्यादीनामप्येकार्थत्वापत्तेः। अतो ज्योतिरादिपदानि समुदायान्तराण्येव। 'वसन्ते वसन्ते ज्योतिषा—' इत्यत्र तु प्रकरणवशात् 'वसन्ते ज्योतिष्टोमेन' इति शाखान्तराच्च ज्योतिःशब्दो गौणः। किंच स्तिवृदादिषु ज्योतिःशब्दो वाक्यशेषादवगम्यमानो यस्य स वाक्यशेषः तत्रैव ज्योतिष्टोमवाक्ये ज्योतिःशब्दस्योपचाराद्वृत्तिमवगमयति, नान्यत्र। अन्यथा 'सिंहो माणवकः' इति क्वचित्सिंहशब्दः प्रमाणवशादुपचारेण माणवके वर्तमानः 'सिंहमालभेत' इत्यादौ माणवकमपि प्रत्याययेत्। अतो ज्योतिरादिशब्दानां निर्वचनान्तरमवलम्ब्य नामान्तरत्वमेवाश्रयितुं युक्तम्। न च कर्मान्तरत्वे 'अथैषः' इत्येतच्छब्दासामञ्जस्यम्, तस्य प्रकृतपरामर्शित्वादिति वाच्यम्। प्रागप्रस्तुतेऽपि 'एष देवदत्तः' इत्यादावेतच्छब्दतच्छब्दप्रयोगदर्शनात्तस्य[2] प्रस्तुतपरत्वनियमाभावात्। किंच ज्योतिष्टोमे सहस्रदक्षिणाविधानमप्यत्रानुपपन्नम्; तस्य द्वादशशतदक्षिणावरुद्धत्वात्, विकल्पस्य चाष्टदोषदुष्टत्वात्। न च दधिगोदोहनादिवन्नित्यगुणबाधेन फलाय गुणविधिरिति शङ्क्यम्, एवमपि 'अथैष ज्योतिः' इत्याद्यानर्थक्यात्। न चानुवादतया सार्थक्यम्, 'एतेन' इत्यनेन धातुना च तत्सिद्धेः। ननु संज्ञायाः कर्मभेदकत्वे दाक्षायणादिसंज्ञाया अपि तथात्वं स्यादित्यत आह—उत्पत्तिसंयोगादिति। उत्पत्तिशिष्टैव संज्ञा कर्मभेदिका। दाक्षायणादिसंज्ञा तु उत्पन्नशिष्टगुणयोगनिबन्धनेत्यग्रिमपादे स्पष्टीभविष्यति।

1. उपनिपातात्. 2. दर्शनेन तस्य— क, घ, ङ.

'सूर्यादित्यभास्करादिबहुनामत्वं तु सूर्यादेरेकत्वेन प्रमाणान्तरसिद्धत्वान्न भेदकम्। तदेवं संज्ञावशाद्न्न कर्मभेदः। अपूर्वान्तरकल्पनापि प्रामाणिकत्वान्निर्दोषा। न च संज्ञायाः शब्दान्तरत्वाच्छब्दान्तराधिकरणेन गतार्थता शङ्क्या। धात्वन्तररूपमेव हि शब्दान्तरं भावनानुरञ्जकव्यापाररूपेण स्वार्थमभिदधानं स्वार्थानुरक्ताया भावनाया धात्वन्तरानुरक्तभावनातो भेदं बोधयति। संज्ञा तु न भावनानुरञ्जकव्यापाररूपेण स्वार्थं वदति, तस्याः सिद्धरूपाभिधानस्वभावत्वात्। अतः संज्ञा धात्वर्थभेदमात्रे व्याप्रियते। तद्भेदाच्च भावनाभेद इति संज्ञाशब्दान्तरयोरस्ति भेद इत्यास्तां तावत्। प्रयोजनं तु पूर्वोत्तरपक्षयोः स्पष्टमेव। इति संज्ञाधिकरणम्॥

चातुर्मास्येषु वैश्वदेवपर्वणि 'वैश्वदेव्यामिक्षा' इति विश्वदेवदेवताकामिक्षाद्रव्यकयागं विधायाम्नायते 'वाजिभ्यो वाजिनम्' इति। तत्र दध्यानयनेन घनीभूतं तप्तं पयः 'आमिक्षा' इत्यु-

९. देवताभेदकृतकर्म- च्यते। तदनुनिष्पन्नं तक्रवद्द्रवीभूतं द्रव्यम् 'वाजिनम्' इत्युच्यते। तत्र भेदाधिकरणम्। 'वाजिभ्यो वाजिनम्' इति किं पूर्वस्मिन्नेवामिक्षायागे 'वाजिनम्' इति वाजिनद्रव्यलक्षणगुणविधिः, उत वाजिदेवताकवाजिनद्रव्यकयागान्तरविधिरिति संशयः। 'वाजिनम्' 'वाजिनः'[1] इति उभयं द्रव्यदेवतं पूर्वकर्मणि विधीयत इति कोटिस्तु पौर्णमास्याधिकरणे 'गुणस्तु श्रुतिसंयोगात्' 'चोदना वा गुणानां युगपच्छास्त्रात्' इति सूत्राभ्यां प्रमाणान्तरप्राप्तकर्मण्यनेकगुणविधानस्य प्रसङ्गान्निराकृतत्वान्नोन्मेषमर्हति। तत्र 'वाजमन्नमामिक्षारूपमेषाम्' इत्यामिक्षासंबन्धिनो विश्वान्देवान् 'वाजिभ्यः' इत्यनूद्य तत्र वाजिनलक्षणगुणविधिः। इनिप्रत्ययस्य च मत्वर्थीयस्य सर्वनामार्थे विहितत्वात्सर्वनाम्नश्च सिद्धविषयकत्वात् अनुवादस्य सति संभवे संनिहितगामित्वाच्च 'वाजिभ्यः' इति संनिहितविश्वदेवमात्रस्यानुवादः, न तु पुरोडाशाद्यन्नवतामग्न्यादीनामपीति नातिप्रसङ्गः। न च वाजिशब्दस्य विश्वदेवपरत्वेऽपि न विश्वदेवत्वेन तेषां देवतात्वं किंतु वाजित्वेन, ततश्च स्तुतशस्त्राधिकरणगतेन्द्रमहेन्द्रन्यायेन देवताभेदान्नास्ति पूर्वकर्मसमवाय इति वाच्यम्। विश्वेदेवा हि पूर्वकर्मणि देवतात्वावच्छिन्नविश्वदेवत्वरूपेणोपस्थिताः 'वाजिभ्यः' इत्यनेनापि देवतात्वप्रयोजकविश्वदेवत्वरूपेणैव प्रत्यभिज्ञायन्त इति विश्वदेवत्वरूपेणैव वाजिनद्रव्यसंबन्धो न वाजित्वेन। तेषां च विश्वेषां देवानां वाजिनस्य च प्रतीयमानसंबन्धस्य यागं विनानुपपत्त्या यागापेक्षायां प्रकृतयागीयद्रव्यरूपामिक्षापरवाजिशब्दमहिम्नोपस्थितप्रकृतामिक्षायाग एव तन्निर्वाहकतया कल्प्यते, वाजिभ्यो विश्वदेवेभ्यो यजेतेति यत्तत्र वाजिनं द्रव्यमिति। तदेवं वाजिशब्दोपस्थितविश्वदेवदेवतामुखेन वाजिनद्रव्यं विहितं भवतीति नात्रेन्द्रमहेन्द्रन्यायावतारः। न चैवं सति वाजिशब्दस्य अश्वे रूढस्य विश्वदेवपरत्वे रूढिपरित्यागः स्यादिति वाच्यम्।

1. 'वाजिभ्यः'—ख, ग, घ, ङ.

प्रकृतकर्मणि गुणमात्रविधानलाघवलाभेन प्रकृतहान्यप्रकृतप्रक्रियाकल्पनापूर्वान्तरकल्पनाविशिष्टविधि-गौरवभयेन च रूढिपरित्यागस्य युक्तत्वात् । न चोत्पत्तावामिक्षायुक्ततयैव पूर्वकर्मणोऽवगतत्वेन तस्य द्रव्यान्तराकाङ्क्षाविरहान्न तत्र वाजिनद्रव्यस्य निवेशसंभव इति वाच्यम् । न हि वाजिनवाक्येन पूर्वकर्मण आमिक्षायुक्तस्यानुवादः, येनोत्पत्तिशिष्टद्रव्यान्तरावरुद्धत्वाद्वाजिनगुणो न तत्र निवेशं लभेत । किंत्वामिक्षावाक्ये द्रव्यदेवतासंबन्धबलात् 'आमिक्षया यजेत' इत्येवं यजतिपदमेकं कल्पितम् । तेन च केवलयजतिपदेन कर्ममात्रमामिक्षारूपगुणसंबन्धान्निष्कृष्यानूद्यत इति तत्र वाजिनगुणो निवेष्टुमर्हति । न च 'यजेत' इत्यनेन स्वरूपमात्रानुवादसंभवेऽपि वस्तुतस्तस्य कर्मणो गुणान्तरावरुद्धत्वान्न वाजिनान्वयसंभव इति वाच्यम् । आकाङ्क्षा हि न वस्तुकृता, किंत्वभिधानकृता । अन्यथा पुरोडाशकपालादेः पुरोडाशसंबन्धान्निष्कृष्य स्वरूपमात्रेणाभिहितस्य तुषोपवापाद्यन्वयो न स्यात् । यागस्वरूपमात्रं चात्र यजिनाभिधीयत इति भवति तस्य द्रव्यान्तरसंबन्धाकाङ्क्षा । अतो यागस्वरूपमात्रे वाजिनद्रव्यस्यान्वयसंभवः । न चैवम् 'यजति' 'ददाति' इत्यत्र यागान्विताया अपि भावनाया निष्कृष्य स्वरूपेणाभिधाने सति तत्र दानान्वयसंभवादेकधात्वर्थान्वितभावनायां न धात्वर्थान्तरान्वयसंभव इति शब्दान्तराधिकरणोक्तविरोधः स्यादिति वाच्यम् । भावनायाः केवलेन प्रत्ययेनानुवादस्य कर्तुमशक्यतया प्रकृतियुक्तेनैव प्रत्ययेन तदनुवादस्य कर्तव्यत्वेन तत्र प्रकृत्यर्थानुरक्तायाः एव भावनाया अनुवाद्यतया स्वरूपमात्रेण तदनुवादासंभवेऽप्यत्र कल्पितयजतिना पदान्तरेण गुणविनिष्कृष्टमेव पूर्वकर्मावगम्यत इत्यविरोधात् । ततश्चामिक्षासंबन्धाद्विनिष्कृष्य यागस्वरूपानुवादेन वाजिनगुणविधानसंभवान्नास्त्युत्पत्त्युत्पन्नशिष्टयोर्विशेषः । न चामिक्षादेवतासंबन्धस्य तद्धितश्रुत्या गम्यमानस्य वाक्यगम्याद्वाजिनदेवतासंबन्धाद्बलीयस्त्वमिति वाच्यम् । तद्धितेन सामान्यरूपेणैव द्रव्यमभिधीयते । आमिक्षात्वेन त्वभिधानं पदान्तरेणैवेत्यामिक्षासंबन्धस्यापि वाक्यगम्यत्वात् । तथा चामिक्षावाजिनयोस्तुल्यबलत्वादेकस्मिन्नेव यागे विकल्पः । इति प्राप्ते, सिद्धान्तयति—

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥ २३ ॥

चशब्द उक्तसमुच्चये । संज्ञावान् गुणोऽपि अपूर्वसंयोगे पूर्वस्मिन्कर्मणि निवेशासंभवे सति स्वनिवेशक्षमकर्मान्तरोत्पत्तिपरतामवगमयन् कर्मभेदको भवति । कथं पूर्वकर्मणि निवेशासंभवः । वाक्ययोः समत्वात् मिथोऽनपेक्षत्वात् ॥ अनुवादकतया एकस्य वाक्यस्य इतरापेक्षायां हि पूर्वकर्मणि निवेशः स्यात् । न त्विह तथास्ति । पूर्वकर्मणः प्रबलगुणावरुद्धत्वेन तस्य गुणान्तरविधाने अनुवादासंभवात्, आमिक्षाया उत्पत्तिशिष्टत्वेन बलवत्त्वात्, वाजिनस्य चोत्पन्नशिष्टत्वेन दुर्बलत्वात् । न चामिक्षासंबन्धाद्विनिष्कृष्य यागमात्रानुवादेन वाजिनविधिरविरुद्ध इति वाच्यम् ।

अनुवादस्य पुरोवादसापेक्षत्वेन पुरोवादपर्यालोचनस्यावश्यकतया तस्मिन्पर्यालोच्यमाने गुणयुक्तस्यैव कर्मणो बुद्धौ विपरिवृत्त्या तद्दशायां निष्कृष्याभिहितस्यापि कर्मणो गुणान्तराकाङ्क्षाविरहात्, एकगुणयुक्ततया बुद्धौ विपरिवृत्तेर्गुणान्तराकाङ्क्षाप्रतिबन्धात्। पुरोडाशकपाले त्वगत्या कथंचिन्निष्कृष्याभिधानेनाकाङ्क्षोत्थाप्यते। न त्विहागतिकत्वम्, विशिष्टकर्मान्तरविधिसंभवात्। किंच तद्धितान्तैकपदश्रुत्या चोदितत्वादामिक्षा प्रबला। वाजिनं तु पदान्तरगम्यत्वेन वाक्यप्रमाणगम्यत्वादुर्बलम्। न चामिक्षात्वेन तदभिधानं पदान्तरकृतमिति वाच्यम्। सर्वनामार्थे विहिततद्धितस्य देवतासंबन्धोपसर्जनद्रव्यवाचिनः पदान्तरसंनिधाने सति तदुपस्थाप्यविशेष एव पर्यवसानेन तद्धितेनैवामिक्षाद्रव्यस्योपस्थिततया श्रौतत्वानपायात्। तदुक्तं वार्तिके 'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः। आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम्' इत्यादिना। मास्तु वा तद्धितस्य द्रव्यविशेषवाचित्वम्। तथापि चतुर्थ्यास्तद्धितो बलीयान्। तद्धितेन हि द्रव्यं प्रतीयते सामान्यरूपेण। अतो युज्यते द्रव्यस्य देवतायाः संबन्धस्य च तद्धितान्तपदात्प्रतीतिः। चतुर्थ्या तु न सामान्यरूपेणापि द्रव्यं प्रतीयते। अतस्तत्र दूरेतरां द्रव्यदेवतासंबन्धप्रतीतिः। सा तु पदान्तरादेवेति चतुर्थ्यास्तद्धितो बलीयान्। तदुक्तं वार्तिके 'यथेहान्यपदार्थोऽपि तद्धितेऽन्तर्गतः स्मृतः। न संप्रदानमस्येति चतुर्थ्यैवं प्रतीयते' इत्यादिना। तथा च आमिक्षावाजिनयोरतुल्यबलत्वेन एकस्मिन्नेव यागे विकल्पेनापि समावेशासंभवाद्वाजिनगुणः कर्मभेदकः। प्रयोजनं—पूर्वपक्षे वाजिनामिक्षयोरेकस्मिन्विश्वदेवदेवताके यागे विकल्पे[1] वाजिदेवताकं वाजिनद्रव्यकं यागान्तरं नास्ति; सिद्धान्ते तु विश्वदेवदेवताकामिक्षाद्रव्यकात्पूर्वयागाद्वाजिदेवताकवाजिनद्रव्यकं यागान्तरमिति स्पष्टमेव। वस्तुतस्तु 'अग्निर्वायुः सूर्यः, ते वै वाजिनः' इत्यादिवाक्यशेषतो वाजिशब्दस्य त्रिवृच्चर्वाश्वालादिशब्दवत्पदार्थान्तरपरतया निश्चितत्वेन तस्य विश्वदेवपरत्वमुखेन तद्यागानुवादकतामवलम्ब्य कथं पूर्वपक्षप्रवृत्तिः। अत उदाहरणान्तरमन्वेषणीयम्। इति गुणाधिकरणम्॥

'अग्निहोत्रं जुहोति' इत्येतत्संनिधौ 'दध्ना जुहोति' 'पयसा जुहोति' इत्यादि श्रुतम्। तत्र दध्यादिवाक्यानि किं कर्मान्तरपराणि उत गुणविधय इति संशयः। तत्र एकैकस्माद्वाक्यादेकैकस्य गुणस्योपस्थित्या सर्वेषां युगपदन्वयासंभवाद्यस्य प्रथममन्वयस्तदवरुद्धे पूर्वाधिकरणन्यायेनान्वयासंभवाद्दध्यादिगुणकानि कर्मान्तराणि। इति प्राप्ते, सिद्धान्तयति—

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत॥ २४॥

अगुणे गुणशब्दरहिते कर्मशब्दे अग्निहोत्रवाक्ये सति तत्र तदुत्पन्ने कर्मणि दध्यादिवाक्यैः

1. विकल्पो—क, ग घ, ङ.

गुणः प्रतीयेत विधीयेत। तुशब्दः पूर्वस्माद्वैषम्यद्योतनार्थः। अग्निहोत्रवाक्योत्पन्ननिर्गुणकर्मानु-

१०. द्रव्यविशेषानुक्ति-कृतकर्मैक्याधिकरणम्।

वादेन युगपद्दध्यादिगुणविधाने सति एकगुणविशिष्टतया कर्मणो बुद्धावपरिवृत्तेर्न पूर्वाधिकरणप्रवृत्तिः। एकान्वयानन्तरमपरान्वयनियमोऽप्यसिद्धः, सर्वेषां युगपदुपस्थितत्वेन युगपदेवान्वयात्। प्रयोजनं—पूर्वपक्षे एकैकदध्यादिविशिष्टाग्निहोत्रकर्मणामनुष्ठानम्, सिद्धान्ते तु एकस्यैव विकल्पितदध्यादिद्रव्यकस्येति। वस्तुतस्तु आधाराग्निहोत्राधिकरणे 'चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधेर्गुणार्थेन पुनः श्रुतिः' इति सूत्रादेवागुणकर्मसंनिधौ गुणश्रुतिर्गुणविधानार्थेत्यवगमादिदमधिकरणमनर्थकम्। एवं च गुणरहिते कर्मण्युत्पन्ने दध्यादिगुणविधिः संभवति, न त्वामिक्षागुणविशिष्टयागविधौ सति तत्र वाजिनगुणविधिः इति प्रत्युदाहरणपरमेवेदं सूत्रमिति केचित्। इति गुणाधिकरणापवादः॥

'अग्निहोत्रं जुहोति' इति प्रकृत्य आमनन्ति, 'दध्नेन्द्रियकामस्य जुहुयात्' इति। किमिह दधिसाधनकमिन्द्रियफलकं कर्मान्तरं विधीयते, उताग्निहोत्रमाश्रित्य दधिगुणमात्रं फलाय विधीयत इति संशयः। तत्र पूर्वपक्षयति—

फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात्॥ २५॥

तुशब्दः पूर्वाधिकरणवैषम्ये। अग्निहोत्रादन्यदेव दधिविशिष्टमिन्द्रियफलकं होमकर्म स्यात्। कुतः। फलश्रुतेः इन्द्रियस्य फलस्य श्रवणात्। नन्वत्र दधिगुण एव फलाय विधीयताम्;

११. दध्यादिद्रव्यसफलत्वाधिकरणम्।

तत्राह— फलस्य कर्मयोगित्वादिति। फलस्य धात्वर्थभाव्यत्वादित्यर्थः॥ फलभावनायां धात्वर्थस्यैव हि समानपदोपात्तस्य करणत्वम्, न तूपपदार्थस्येति प्रपञ्चितं भावार्थाधिकरणे। अतो नात्र दधिगुणः फलाय विधीयत इति शक्यते वक्तुम्। न च 'अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत' इति पूर्वसूत्रे निर्गुणकर्मसंनिधौ सगुणश्रुतेर्गुणविधानार्थत्वोक्तेर्नेह कर्मान्तरविधिरिति वाच्यम्। फलाय गुणविधिरिति हि वदन्प्रष्टव्यः— किं दधिगुणः फल एव विधीयते, उत होमेऽपि। नान्त्यः 'दध्ना फलं भावयेत्' 'दध्ना होमं भावयेत्' इति वाक्यभेदापत्तेः। नाद्यः, जुहोतेरानर्थक्यात्। न च 'दध्ना जुहोति' इति वाक्यप्राप्तदधिसंबन्धानुवादेन प्रकृतहोमस्यैव फलविधिरस्विति वाच्यम्। कर्मानुवादो ह्युत्पत्तिवाक्यमात्रमपेक्षते, न तु गुणवाक्यमपि। ततश्च दधिप्राप्त्यनन्तरं फलविधिरित्यत्र प्रमाणाभावेन कथं दधिवाक्यप्राप्तदधिसंबन्धानुवादेन होमस्य फले विधिः। अनेनैव वाक्येन दध्नः फले होमे च विधौ वाक्यभेदः। फलायैव तद्विधौ जुहोतेरानर्थक्यम्। न च होममाश्रित्य फलाय दधिविधानाय प्रकरणप्राप्तहोमानुवादकत्वान्न जुहोतेर्वैयर्थ्यं नापि वाक्यभेद इति वाच्यम्। प्रकरणेन हि होम एव प्राप्तो न तु होमसाधनत्वरूपंतदा-

श्रितत्वमपि, 'दध्ना जुहोति' इति वाक्यप्रवृत्त्यनन्तरमेव इन्द्रियकामवाक्यप्रवृत्तौ प्रमाणाभावात् । तत्श्च दधिहोमयोः प्रतीयमानक्रियाकारकसंबन्धस्याप्रानुवादसंभवात्तस्य सर्वथा परित्याग एव कृतः स्यात् । तथा च फलार्थतया होमसाधनत्वरूपहोमाश्रिततया च दधि विधेयमिति वाक्यभेदो दुर्वारः । अतः प्रकृतकर्मणि दधिगुणविधानासंभवात्ततोऽन्यो दधिविशिष्टो होमः फलाय विधीयते । इति प्राप्ते, सिद्धान्तयति—

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥ २६ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । न कर्मान्तरमिन्द्रियकामवाक्ये विधीयते, किंतु तस्य वाक्यस्य गुणविधौ सामर्थ्यं प्रतीयेत । कुतः । वाक्ययोः अतुल्यत्वात् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति वाक्यस्य फले धात्वर्थविधायकतया इन्द्रियकामवाक्यस्य च फले गुणविधायकतया वैलक्षण्यस्यावश्यकत्वात् ॥ सर्वत्र हि भावनैव विधेया । तस्यां च फलवत्यां[1] धात्वर्थः करणीभवति, यत्रासौ न प्राप्तो विधेयान्तरं च नास्ति, यथा स्वर्गकामवाक्ये । इन्द्रियकामवाक्ये तु धात्वर्थस्य प्राप्तत्वाद्विधेयान्तरस्य दधिगुणस्य सद्भावाच्च धात्वर्थादुत्सारिता विधिशक्तिरुपपदार्थेऽपि गुणे विश्राम्यति । न चैकपदोपात्तत्वरूपश्रुतेर्बलीयस्त्वात्कर्मान्तरविधिरेव युक्त इति वाच्यम् । प्रकृतहानाप्रकृतकल्पनविशिष्टविधिगौरवमत्वर्थलक्षणादिबहुदोषप्रसङ्गेन श्रुतिमप्युल्लङ्घ्य उपपदार्थगुणविधानस्यैवाश्रयितुं युक्तत्वात् । न च 'दध्ना जुहोति' इति दध्नः प्राप्तत्वात्तद्विधानमनर्थकमिति वाच्यम् । ऋत्वर्थतया हि तेन वाक्येन दधिविधानम् । इन्द्रियकामवाक्येन तु फलार्थतया तद्विधानम् । तथा च वक्ष्यति चतुर्थस्य तृतीये 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति । संनिधिरूपप्रकरणप्राप्तहोमानुवादेन होमाश्रितस्य दध्नो विधानाज्जुहोतेराश्रयतयान्वयः संभवति । न च होमाश्रितत्वं होमसाधनत्वमेव ; दध्नो होमस्य च न साध्यसाधनभावः प्रकरणादवगतः येनाश्रयतया होमोऽनूद्येत ; होमसाधनत्वरूपहोमाश्रितत्वस्याप्यनेनैव विधाने वाक्यभेद इति वाच्यम् ।'दध्ना' इति तृतीयाश्रुत्या हि कारकभूतं दधि फलोद्देशेन जुहोतिपरप्रत्ययेन विधीयते । तत्र च कारकस्य क्रियापेक्षत्वादपेक्षितक्रियासमर्पणार्थं, केवलस्य प्रत्ययस्य प्रयोगानर्हत्वात्तत्प्रयोगार्थं च यस्मिन्कस्मिंश्चित् धातौ प्रयोक्तव्ये जुहोतिः प्रयुज्यते, तदर्थस्य संनिहितत्वेनानुवादसंभवात् । न तु धात्वन्तरार्थस्य, तस्याप्राप्तत्वात् ; तस्यापि विधाने वाक्यभेदापत्तेः । एवं च 'दध्ना' इति तृतीयया प्रतीयमानं कारकत्वं क्रियानिरूपितमिति क्रियाविशेषापेक्षायां संनिधानाद्धोमक्रियानिरूपितमित्यवगमात्क्रियाकारकभावेन दध्यन्वितो होमो जुहोतिनानूद्यते न तु विधीयत इति वाक्यभेदं विनैव संभवति जुहोत्यन्वयः । एकत्वादिविशिष्टपशोरिव दधिविशिष्टकारकविधानाच्च न वाक्यभेदः । यथा चैतत्तथा प्रहैकत्वाधिकरणे स्फुटीभविष्यति । न च धात्वर्थस्य क्रियात्मकत्वाभावान्न जुहोतेः

1. फलवाक्यात्—क.

कारकान्वयः; एवं च 'दध्ना' इति तृतीयावगतं कारकत्वं न होमापेक्षं किंतु फलभावनापेक्षमेव; तथा च केवलदध्न एव फले विधानं न तु करणभूतस्येति नोक्तप्रकारेण जुहोत्यन्वय इति वाच्यम्। करणत्वस्य फलभावनापेक्षत्वेऽपि दध्नः सिद्धस्वभावस्य कर्तृव्यापारविषयत्वाभावेन फलभावनाकरणत्वस्य धात्वर्थमुखेनैव वक्तव्यताया आवश्यकत्वात्तदपेक्षस्यैव करणत्वस्य विभक्त्यभिधेयत्वात्। यद्यपि धात्वर्थो न कारकान्वययोग्यः, तथापि तत्कर्मकभावना योग्या। सा च प्रकरणादुपस्थिता। तन्निरूपितं करणत्वं विभक्त्यभिधेयं भावनामुखेन धात्वर्थं प्रति करणत्वे विश्राम्यति। न च तृतीयावगतकरणत्वस्य होमापेक्षत्वे फलभावनाकरणत्वं गुणस्य न स्यात्, तत्प्रत्यायकाभावादिति वाच्यम्। यागादिवद्गुणस्यापि समभिव्याहारत एव फलभावनाकरणत्वलाभसंभवात्। एवं च विधिव्यापारं विनैव संनिधिलक्षणप्रकरणेन तृतीयान्तपदश्रुत्या च 'होमे कारकभूतं दधि' इत्येतावतोऽर्थस्य सिद्धौ 'तदिन्द्रियकामस्य' इत्येतावन्मात्र एव विधेर्व्यापार इति न वाक्यभेदः। तस्मात्प्रकृतहोममाश्रित्य फलाय गुणविधिरिति स्थितम्। केचित्तु 'दधिहोमयोः क्रियाकारकभावेन संबन्धो लोकसिद्धः; ततश्च दधिहोमसंबन्धे विधिव्यापाराभावाद्धोमाश्रितदधिविधौ न वाक्यभेदः' इत्याहुः। तदयुक्तम्। लोकतो हि दधिहोमयोः क्रियाकारकभावस्तावत्स्वरूपेणैव सिद्धः, न तु कर्तव्यतयापि। तथा च सति फलार्थिनो नियमेन दधिहोमसंबन्धोपादानं न स्यात्। ततश्च तस्य कर्तव्यता फलसंबन्धश्च विधीयत इति वाक्यभेदः। न च होमाश्रितस्य दध्नः फले विधाने सति होमसंबन्धाभावे होमसंबन्धावस्थापन्नहोमाश्रितत्वासंपत्तेरर्थादेव तत्कर्तव्यतासिद्धौ तद्विधानाभावान्न वाक्यभेद इति वाच्यम्। एवं सति 'सोमेन यजेत' इत्यादावपि सोमयागयोः क्रियाकारकभावसंबन्धमादाय केवलयागविधेर्वक्तुं शक्यतया विशिष्टविधिमात्रोच्छेदापत्तेः इत्यास्तां तावत्। प्रयोजनं— पूर्वपक्षे नैयमिकाग्निहोत्रव्यतिरिक्तमनियतकालं दधिसाधनकं होमान्तरं सकृदेव दर्वीहोमत्वादपूर्वं क्रियते, सिद्धान्ते तु सायंप्रातरग्निहोत्रहोमे दधिप्रयोग इति दिक्। इतीन्द्रियकामाधिकरणम्॥

'त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत' इत्यग्निष्टुतं प्रकृत्य 'वारवन्तीयमग्निष्टोमसाम कार्यम्' इति च गुणं विधायेदमाम्नायते 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इति। त्रिवृत् स्तोत्रीयानवकस्तोमकः अग्निष्टोमाख्यस्तोत्रेण संस्थाप्यः अग्निष्टुन्नामकः कश्चित्क्रतुः। तस्य क्रतोरग्निष्टोमसाम प्रकृतिवदेव 'यज्ञायज्ञा वो अग्नये' इत्याग्नेयीष्वृक्षु प्राप्तम् '[1]वायव्यासु' इत्यनेनापोद्यते। प्रकृतितो यद्यप्येकविंशस्तोमकमेव तत्प्राप्तं तथापि 'त्रिवृदग्निष्टोमः' इत्यनेन त्रिवृत्त्वेन तदपोदितमिति 'एकविंशम्' इत्यनेन प्रतिप्रसूयते।

१२. वारवन्तीयादीनां कर्मान्तरताधिकरणम्।

1. 'आग्नेयीभ्यो वायव्यासु'—ख, ग.

प्रकृतितो यज्ञायज्ञीयाख्यमग्निष्टोमसाम प्राप्तम् 'वारवन्तीयम्' इत्यनेनापोद्यते। वारवन्तीयं सामविशेषः। रेवतीषु रेशब्दघटितासु 'रेवतीर्न' इत्यादिषु ऋक्षु। अनेन वायव्या अपोद्यन्ते। तत्र 'एतस्यैव रेवतीषु—' इति वाक्ये पूर्वस्मिन्नेवाग्निष्टुत्क्रतौ रेवत्याधारवारवन्तीयगुणः पशुफलाय विधीयते, उत गुणविशिष्टं कर्मान्तरमिति संशयः। तत्र धात्वर्थस्य यागस्य 'ब्रह्मवर्चसकामो यजेत' इति पूर्ववाक्यगतयजिनैव प्राप्तत्वात्प्रकृतहानाप्रकृतकल्पनविशिष्टविधिगौरवदोषापाताच्च पूर्वाधिकरणन्यायेन पूर्वकर्मणि गुणविधानमेव युक्तमाश्रयितुम्। न च गुणसाध्यस्यैवाश्रयत्वात् यागस्य च द्रव्यदेवतासाधनकस्य सामसाध्यत्वाभावान्नाश्रयत्वसंभव इति वाच्यम्। तृतीयाग्रपादे 'आनर्थक्यात्तदङ्गेषु' इत्यधिकरणे 'सप्तदशारत्निर्वाजपेयस्य यूपः' इति सप्तदशारत्नित्वस्य वाजपेये साक्षादन्वयासंभवाद्वाजपेयाङ्गभूतपशुयागाङ्गयूपद्वारा अन्वय इति वक्ष्यमाणन्यायेन क्रत्वङ्गस्तोत्रनिष्पादनद्वारा यागसाधनत्वोपपत्तेः। न च रेवतीवारवन्तीयसंबन्धः तस्य च फलसंबन्ध इत्यनेकगुणविधाने वाक्यभेद इति वाच्यम्। न ह्यनेकार्थविधानमात्रेण वाक्यभेदः, तर्हि विशिष्टविधिमात्रोच्छेदापत्तेः। किंतु यत्रानेकार्थविधिव्यापारं विना विशेषणवैशिष्ट्यस्यासिद्धिस्तत्र विशेषणविशेष्यसंबन्धसिद्ध्यर्थं विशिष्टविधानार्थं च विधायकप्रत्ययस्य व्यापारभेदाद्विध्यावृत्त्या वाक्यभेदः, यथा पौर्णमास्यधिकरणे विद्वद्वाक्यविहितकर्मण्याग्नेयादिवाक्यैर्गुणविधिपक्षे। प्रकृते तु विधिव्यापारं विना कृत्वाशब्देनैव वारवन्तीयस्य रेवतीसंबन्धसिद्धया तत्र विधिव्यापाराभावेन कृत्वाशब्दान्तरपदसंदर्भेणोपस्थितस्य रेवत्याधारवारवन्तीयस्य फलसंबन्धमात्र एव विधेर्व्याप्रियमाणतया विध्यावृत्त्यभावान्न वाक्यभेदः। अन्यथा 'त्रिवृदग्निष्टुत्' इत्यादिवाक्येऽपि वायव्यास्वेकविंशमितिगुणद्वयसंबन्धः तद्विशिष्टस्य च क्रतोः फले विधानमिति वाक्यभेदः स्यात, तत्र कृत्वान्तसंदर्भेणोपस्थितस्य तावद्गुणविशिष्टस्य यागस्य फले विधानात्। वाक्यभेदपरिहारस्तु प्रकृतेऽपि तुल्यः। न च 'रेवत्याधारवारवन्तीयं पशुसाधनम्' इत्यस्य 'एतस्य यागस्य वारवन्तीयम' इति [1]षष्ठ्यर्थस्यापि विधेयत्वाद्वाक्यभेदः शङ्क्यः, षष्ठ्यन्तैतच्छब्दस्य फलवता गुणेन यागस्य संनिधिलब्धाश्रयाश्रयिभावसंबन्धानुवादकत्वात्। तृतीयान्तैतच्छब्दस्तु विधेयगुणप्रतिपादकतया विधिशेषत्वान्नानुवादकः। न च विधेयगुणस्य वारवन्तीयशब्देनैव लाभात्तद्वैयर्थ्यमिति वाच्यम्। 'वारवन्तीयम' इति द्वितीयान्तेन प्रधानतयोपस्थितस्य वारवन्तीयस्य फलभावनाकरणत्वान्वयायोग्यत्वेन तद्योग्यतासिद्ध्यर्थं तस्य तृतीयान्तैतच्छब्देन करणतया निर्देशावश्यंभावात्। अग्निष्टोमसामशब्दोऽप्यानर्थक्यन्यायप्राप्तस्तोत्रसंबन्धानुवादः। अतोऽग्निष्टोमाख्यस्तोत्रसाधनत्वविधानतोऽपि न वाक्यभेदप्रसक्तिः। न चाग्निष्टुति क्रतौ स्तोत्रान्तराणामपि सद्भावात्तेषामपि चोदकाद्विपरिवृत्त्यविशेषाद्विशिष्याग्निष्टोमस्तोत्रसंबन्धानुवादायोगात्स्तोत्रान्तरपरिसंख्यानाय सोऽवश्यं विधेयः। तथा च 'वारवन्तीयेन पशून्कुर्यादग्निष्टोमस्तोत्रसंबन्धिना' इति वाक्यभेद इति वाच्यम्। चोदकतः स्तोत्रान्तरोपस्थितेः प्रागेव 'वारवन्तीयमग्निष्टोमसाम, कार्यम्' इति क्रत्वर्थपू-

1. विशिष्टस्यापि. 2. 'वायव्यास्वग्निष्टोमसाम कार्यं वारवन्तीयं' — ख, ग.

वैवाक्ये शब्देनोपस्थितस्याग्निष्टोमस्तोत्रस्यैव बुद्धौ विपरिवृत्त्या तस्यैवानुवादौचित्यात्। तस्मादग्निष्टोमस्तोत्रद्वारा प्रकृतयागमाश्रित्य रेवत्याधारवारवन्तीयगुणः पशुफलाय विधीयते। इति प्राप्ते, सिद्धान्तयति—

समेषु कर्मयुक्तं स्यात् ॥ २७ ॥

गीत्यादिक्रियात्मकेष्वाश्रयानपेक्षतया यागादिधात्वर्थतुल्येषु वारवन्तीयादिगुणेषु श्रुतेषु कर्मयुक्तं जन्यतया धात्वर्थयुक्तमेव फलं स्यात्, न तु गुणयुक्तम्। 'एतस्यैव रेवतीषु वारवन्तीयम्' इत्येवंजातीयकेषु वाक्येषु कर्मान्तरविधिरेव, न गुणविधिरिति यावत्। गीतिविशेषो हि वारवन्तीयसाम। उच्चारणक्रियाविशेष एव च गीतिर्नाम। एवंविधस्य च साम्नो यागादिवदाश्रयापेक्षाविरहात्कथं यागमाश्रित्य तद्विधानम्। समेष्वित्यस्य यागं प्रति कारकभावात्मकगुणभावमनापन्नेष्वित्यर्थः। यत्र हि प्रकृते कर्मणि फलार्थस्य गुणस्य कारकभावः संभवति तत्रैव गुणस्य फलाय विधिः, यथा 'दध्नेन्द्रियकामस्य' इति। इह तु वारवन्तीयसाम्नो गीतिविशेषात्मकस्य द्रव्यदेवतासाधनकयागं प्रति साधनत्वस्यासंभवात्कथं यागमाश्रित्य विधिः स्यात्॥ न चानर्थक्यतदङ्गन्यायेन क्रत्वङ्गभूतस्तोत्रनिर्वृत्तिद्वारा यागाश्रयत्वसंभव इति वाच्यम्। वैषम्यात्। सप्तदशारत्नित्वं हि वाजपेये साक्षादसंभवात्तदङ्गभूतयूपद्वारा वाजपेयाङ्गतामश्नुते। 'वाजपेयस्य' इति षष्ठ्या अङ्गद्वाराप्युपकारकत्वेऽपि संभवात्। वारवन्तीयं साम त्वङ्गभूतस्तोत्रद्वारा कथं यागकारकतामश्नुवीत, क्रियाकारकभावस्य साक्षात्संबन्धरूपत्वात्। न च पशुसोमाधिकरणे पशुसोमयोः प्रणाड्या यागकरणत्वं कथमुक्तमिति वाच्यम्। तत्र प्रकृतिविकृत्योरत्यन्तानतिरिक्ततया हृदयादिगणसोमरसात्मना साक्षादेव पशुसोमयोर्यागकारकत्वसंभवेऽप्यारादुपकारकस्य स्तोत्रस्य यागे कारकत्वासंभवात्। किंच वाजपेयाङ्गत्वेन चोदितं सप्तदशारत्नित्वं वाजपेयेऽसंभवात्तदङ्गयूपमुपसर्पतीति युक्तम्। वारवन्तीयं तु फले विधीयते न तु यागाङ्गतयेति कथमङ्गानि स्तोत्राण्युपसर्पेत्। नापि वारवन्तीयगुणस्य यागे आनर्थक्यम्, कर्मान्तरविधानेनार्थवत्त्वात्। उक्तं च वार्तिके 'तन्नामाङ्गेषु कल्प्येत यदङ्गत्वेन चोदितम्। प्राधान्यावस्थितं यत्तु तदङ्गं नोपसर्पति' इत्यादिना। ननु कारकतया वारवन्तीयगुणस्य यागाश्रितत्वासंभवेऽपि संबन्धान्तरेण तदस्तु, 'पशुकाम उक्थ्यं गृह्णीयात्' 'दाक्षायणयज्ञेन सुवर्गकामो यजेत' इत्यादौ संस्थावृत्त्यादिरूपगुणस्य प्रकृतयागे कारकत्वाभावेऽपि तत्संबन्धिप्रयोगपरिच्छेदकत्वमात्रेण तदाश्रितत्वदर्शनात्; साम्नश्च गीतिक्रियात्मकस्य कर्तृव्यापारविषयत्वार्थं दध्यादिवत्क्रियापेक्षाविरहेऽपि 'कृत्वा' इति क्त्वाप्रत्ययगम्यक्रियान्तरसमानकर्तृकत्वनिर्वाहाय क्रियान्तरापेक्षायां संनिधानलब्धयागो यजतिनानूद्यमानो विधीयमानवारवन्तीयसामगुणे आश्रयतयान्वेतुमर्हतीति चेत्, 'सत्यम्। यागस्याश्रयत्वसंभवेऽप्यग्निष्टोमपदवैयर्थ्यान्न गुणविधिः संभवति। अग्निष्टोमसामपदं हि नानुवादः।

आज्यपृष्ठादिबहुस्तोत्रेषु चोदकप्राप्तेषु सत्सु विशिष्याग्निष्टोमस्तोत्रसंबन्धानुवादे कारणाभावात्। न च क्रत्वर्थवारवन्तीयवाक्यतः शब्देनोपस्थितत्वादग्निष्टोमस्तोत्रस्यैवानुवाद उचित इति वाच्यम्। क्रत्वर्थवाक्येऽग्निष्टोमोपस्थितेर्गुणविधानार्थतया स्वस्य प्राधान्याभावेन तदुपस्थितेरनुवादत्वप्रयोजकत्वाभावात्। किंच रेवतीषु 'वारवन्तीयं कृत्वा पशून्भावयेत्' इति पशुभावनापेक्षयैव समानकर्तृकत्वसंभवान्न क्रियान्तरमपेक्ष्यत इति कथं यागस्य तत्राश्रयतयान्वयः। तस्माद्गुणविधौ यजत्यग्निष्टोमसामशब्दयोरनुवादत्वासंभवाद्विधानार्थत्वमेव वक्तव्यम्। तथा च 'वारवन्तीयेन पशून्कुर्यादग्निष्टोमसंबन्धिना' इति 'वारवन्तीयेन पशून्कुर्याद्यागसंबन्धिना' इति च वाक्यभेदः स्यादिति तयोरानर्थक्यं स्यात्। न च 'धातुसंबन्धे प्रत्ययाः' इत्यधिकृत्य 'समानकर्तृकयोः पूर्वकाले' इति विहितक्त्वाप्रत्ययस्य धात्वन्तरसमानकर्तृकत्वमेवार्थ इति प्रत्ययवाच्यपशुभावनायाः क्त्वाप्रत्ययापेक्षितत्वाभावेन प्रकृतिभूतयज्यर्थस्यैव तदपेक्षिततया आश्रयत्वेनान्वयसंभव इति वाच्यम्। 'धातुसंबन्धे' इत्यस्य 'क्रियासमभिहारे लोट्' इत्यादिसमनन्तरसूत्रेष्वनुवर्तमानत्वेन क्त्वाविधावनुवृत्तेस्तद्भाष्यवार्तिकादावदृष्टत्वेन चाप्रामाणिकतया क्त्वागम्यसमानकर्तृकत्वस्य प्रत्ययवाच्यभावनापेक्षितायाः वक्तुं शक्यत्वात्। अत एवातीतकर्तृकप्राचीनग्रन्थविवरणपरग्रन्थे 'इति मनसि निधायाह' 'इत्यभिप्रेत्याह' 'इत्याशङ्क्याह' इत्यादौ क्त्वाप्रत्ययोपपत्तिः। तत्र हि 'आह' इत्यव्ययम् 'उवाच' इत्यर्थे विभक्तिप्रतिरूपकमिति वैयाकरणसमयः। तस्मात्कृत्वाशब्दोक्तभावनानिर्वाहितरेवतीवारवन्तीयनिरूपितक्रियाकारकभावसंबन्धविशेषितोऽपूर्वयागः पशुफलाय विधीयते। 'एतस्य' इति षष्ठ्यन्तस्य च प्रस्तूयमानकर्मानुवादपरत्वे आनर्थक्यात् 'एतद्धर्मकस्य' इत्येवं प्रकृताग्निष्टुद्धर्मातिदेशकतया, प्रकृतिभूताग्निष्टुति च वारवन्तीयसाम्नोऽग्निष्टोमस्तोत्रसाधनतया प्रकृतिवदिहापि तत्स्थानप्राप्तेरग्निष्टोमसामशब्दोऽनुवाद इति न तस्य विधेयकर्मविशेषकत्वम्। न चाग्निष्टुति वायव्याधारस्यैव वारवन्तीयस्याग्निष्टोमस्थानकत्वादिह कथं रेवत्याधारस्य तत्स्थानप्राप्तिरिति वाच्यम्। वारवन्तीयस्य ह्यग्निष्टोमे प्राप्तौ तदाधारभूतानामप्यग्निष्टोमस्तोत्रसंबन्धप्राप्त्या रेवत्याधारस्यापि वारवन्तीयस्याग्निष्टोमस्थानमुपपद्यते। एवं च वायव्यानां रेवतीभिः प्रत्याम्नानाद्वाधमात्रं, न तु तावता वारवन्तीयस्याग्निष्टोमस्तोत्रस्थानत्वस्याप्यभावः स्यात्। तृतीयान्तैतच्छब्दोऽपि प्रस्तूयमानपूर्वयागवचनः। एवं च 'रेवतीषु वारवन्तीयं कृत्वा पशुकामो यजेत' इत्येतावन्मात्रं विधेयमिति लाघवमेकवाक्यत्वं च लभ्यते। विधौ तु यज्याद्यानर्थक्यं वाक्यभेदश्च। तस्माद्रेवतीवाक्येऽपूर्वकर्मविधिरित्यास्तां तावत्। प्रयोजनं— पूर्वपक्षे रेवत्याधारवारवन्तीयवति कर्मणि क्रतुफलं ब्रह्मवर्चसं गुणफलं पशुश्च लभ्यते, सिद्धान्ते तु पशुफलमेवेति स्पष्टमेव। इति रेवत्यधिकरणम्॥

अथ कर्मापूर्वभेदप्रसङ्गात्फलापूर्वभेदविचारः प्रस्तूयते। अस्ति ज्योतिष्टोमे ब्रह्मसामाख्यः

स्तोत्रविशेषः । तमाश्रित्य सौभरं नाम साम फलार्थतया विहितम् 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति । तदेतत्फलत्रयसाधनतया विहितं सौभरं प्रकृत्यान्नायते 'हीषिति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति । निधनमिति साम्नश्चरमभाग उच्यते । तत्र किं हीषादयो निधनविशेषाः सौभरफलतः फलान्तरार्थतया विधीयन्ते, एवं च यदा वृष्टिकामेन सौभरं प्रक्रान्तं तदेतरयोरपि निधनयोस्तत्फलकामनया प्रयोगः फलान्तरभूतवृष्टिकामनाविरहात्प्रथमनिधननिवृत्तिश्च 'वृष्टिकामः सौभरसाम्ना स्तोष्ये' 'वृष्टिकामो हीषिति निधनं सौभरसाम्नि करिष्ये' इति च पृथक्फलकामनं च; उत सौभरस्यैव तत्तत्फलं साधयतस्तत्तन्निधनं नियम्यते, एवं च वृष्टिफलके सौभरे हीषित्येव प्रयोक्तव्यम् एकैव वृष्टिः प्रार्थयितव्या । एवमन्नाद्यकामस्वर्गकामयोरपि द्रष्टव्यम् । इति संशये, पूर्वपक्षयति—

१३. सौभरनिधनयोः कामैक्याधिकरणम् ।

सौभरे पुरुषश्रुतेर्निधने कामसंयोगः ॥ २८ ॥

वृष्ट्यादिफलार्थतया श्रुते सौभरे साम्नि हीषादिनिधने अन्यः कामसंयोगः । काम्यन्त इति कामाः फलानि । सौभरसामफलेभ्यो वृष्ट्यादिभ्योऽन्यानि वृष्ट्यादिफलान्युद्दिश्य निधनविधिः, न तु वृष्ट्यादिफलके सौभरे साम्नि हीषादिव्यवस्थाविधिः । कुतः । पुरुषश्रुतेः वृष्टिकामादिशब्दैर्वृष्ट्याद्यभिलषितृपुरुषवाचिभिश्चतुर्थ्यन्तैर्वृष्ट्याद्यभिलषितृपुरुषशेषत्वं निधनानामवगम्यते । तच्छेषत्वं च तदभिलषितफलसाधनत्वमेव । अतः फलान्तरार्थतयैव निधनविधिः । व्यवस्थाविधौ तु वृष्टिकामाय यत्सौभरं तत्र हीषिति निधनं कुर्यात्, न निधनान्तरमित्येवं वृष्टिकामादिशब्दानां वृष्ट्यादिसाधनसौभरे लक्षणा स्यात् । एवं च ज्यायानपि नियमविधिर्लक्षणाप्रसङ्गान्न युज्यते । तस्मात्फलान्तरार्थतया निधनविधिः ॥

सिद्धान्तयति—

सर्वस्य वोक्तकामत्वात्तस्मिन्कामश्रुतिः स्यान्निधनार्था पुनःश्रुतिः ॥ २९ ॥

वाशब्दः पक्षव्यावृत्तौ । चतुर्थ्यन्तवृष्टिकामादिपदेषु वृष्ट्यादिशब्दो न फलान्तरपरः, किंतु सर्वस्य समस्तावयवकस्य सौभरस्य 'यो वृष्टिकामः' इत्यादिवाक्यान्तरैरुक्तकामत्वात् उक्तवृष्ट्यादिफलकतया तस्मिन्सौभरफल एव वृष्ट्यादिलक्षणे कामश्रुतिः । चतुर्थ्यन्तवृष्टिकामादिपदगतवृष्ट्यादिफलशब्दः प्रत्यभिज्ञापकः स्यात् । ततश्च वृष्ट्यादीनां सौभररूपसाधने निराकाङ्क्षतया न हीषादिनि-

धनान्वयसंभवः। न च प्रकृतफलानां साधनान्तरावरुद्धत्वात्प्रत्यभिज्ञाबाधेन फलान्तरपरत्वमेवास्त्विति वाच्यम्। हीषादिशब्दा हि किंचिदाश्रित्य फलेषु विधेयाः। न तावत्सौभरमाश्रयः, बह्ववयवव्याप्तस्यान्तिमावयवहीषादिना निर्वर्तयितुमशक्यत्वात्। नापि निधनमेवाश्रयो भवितुमर्हति, तन्मात्रस्याप्रकृतत्वात् भक्त्यन्तराणामपि, सत्त्वात्तत्परिसंख्यानाय निधनविधौ 'हीषा वृष्टिं कुर्यान्निधनभूतेन' इति वाक्यभेदापत्तेः। ननु 'वृष्टिकामाय' इत्यादीनां सौभरफलपरत्वे वैयर्थ्यमत आह— निधनार्था पुनःश्रुतिरिति। पुनर्वृष्ट्यादिशब्दश्रवणं 'वृष्टिकामाय यत्सौभरम्' इत्येवं वृष्ट्यादिसाधनसौभरानुवादेन निधनव्यवस्थाविधानार्थमित्यर्थः। अतो वृष्टिकामादिशब्दलक्षिते सौभरे हीषादिनिधननियम इत्येव युक्तम्। वाक्यभेदापेक्षया ज्यायस्त्वाल्लक्षणा न दुष्यति॥ न च वृष्टिसाधनसौभरार्थतया 'हीष्' इति शब्दस्य नियमो निधनत्वेन विधेय इति वाक्यभेदस्तुल्य इति वाच्यम्। शाखाभेदेन हीषादिनिधनयुक्ततया पठिते सौभरे तन्नियममात्रस्यैव विधेयत्वेन वाक्यभेदानवकाशात्। न च वृष्ट्यादिसाधनसौभरस्योद्देश्यत्वे विशिष्टोद्देशदोषप्रसङ्गः शङ्क्यः। वृष्ट्यादिसाधनमेव ह्यत्रोद्देश्यम्। संनिधानाच्च तत्सौभरमिति लभ्यते। वस्तुतस्तु "वृष्टिकामाय यत्सौभरं तत्र निधनम् 'हीष्' इति कुर्यात्" इत्येवं नार्थः, येन वृष्टिकामादिशब्दाः सौभरे लाक्षणिकाः स्युः। किंतु 'यो वृष्टिकामः स सौभरेण स्तुवीत' इत्येवं वृष्टिकामाय यन्निधनं विहितं तत्र 'हीष्' इत्यादि कुर्यादित्यर्थः। न च 'यो वृष्टिकामः' इत्येवं सौभरस्यैव वृष्टिकामादिपुरुषशेषत्वरूपवृष्ट्यादिसाधनतावगमेन निधनस्य तदवयवस्य 'वृष्टिकामाय' इत्यादौ वृष्ट्यादिशब्दैरनुवादासंभव इति सौभरलक्षणा दुर्वारेति वाच्यम्। समस्तावयवकस्य सौभरस्य फलसाधनत्वेऽवगते सति तदवयवस्य निधनस्यापि वृष्ट्यादिसाधनतावगमेन लक्षणां विनैव तदनुवादसंभवात्। तदेतत्सूत्रे 'सर्वस्य' इत्यनेन ध्वनितम्। तस्य हि समस्तावयवकस्य सौभरस्येत्यर्थः। इति सौभराधिकरणम्॥

इति द्वितीयाध्याये द्वितीयः पादः॥



1. तथानुवाद...क, ग. घ, ङ.

तृतीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

पूर्वस्मिन्पादे कर्मभेदः प्रतिपादितः । अस्मिन्पादे तदपवादः प्रतिपाद्यते ।

ज्योतिष्टोमे श्रूयते 'यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्गृह्णीयात्'[1] 'यदि बृहत्सामा शुक्राग्रान्' इति । तत्र किं ज्योतिष्टोमात्कर्मान्तरं रथंतरसामेति बृहत्सामेति विधीयते, उत प्रकृत एव ज्योतिष्टोमे नैमित्तिक ऐन्द्रवायवाग्रतादिगुणविधिरिति संशये पूर्वपक्षयति—

गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्संयोगस्याशेषभूतत्वात् ॥ १ ॥

तुः प्रत्यवस्थाने । रथंतरसामादिगुणः कर्मान्तरमाक्षिपेत् । कुतः[2] । क्रतुसंयोगात् रथंतरसामादिगुणस्य ज्योतिष्टोमात्क्रत्वन्तरेणैव संयोगात् प्रकृतकर्मणा च संयोगासंभवात् । कुतः ।

१. प्रहाग्रतायाज्योतिष्टोमाङ्गताधिकरणम् ।

संयोगस्याशेषभूतत्वात् रथंतरादिसंयोगस्य क्रतुविशेषणत्वाभावात्[3] । 'रथंतरसामा' इति हि बहुव्रीहिसमासः 'समर्थः पदविधिः' इति सामर्थ्यापेक्षः । सामर्थ्यं च यदि कृत्स्ने क्रतौ रथंतरमेकमेव स्यात्तदा भवति । प्रकृते च ज्योतिष्टोमे रथंतरं साम न केवलमस्ति; किंतु गायत्रवामदेवादिसामान्तरसहितमेवेति सामान्तरसापेक्षत्वेनासामर्थ्यात्समासानुपपत्तेस्तद्गम्यं विशेषणत्वं रथंतरस्यानुपपन्नम । न च पृष्ठस्तोत्रे सामान्तरानपेक्षत्वात्सामर्थ्यस्यानपाय इति वाच्यम् । तस्यात्रान्यपदार्थतयानुपात्तत्वात् । एवम 'बृहत्सामा' इत्यत्रापि । तथा च प्रकृते कर्मण्यनुवाद्यतया निवेशमलभमानोऽयं गुणनिवेशयोग्यं कर्मान्तरपरत्वमस्य वाक्यस्य कल्पयतीत्यर्थः । न च कर्मान्तरपरत्वे तस्य संप्रति विधीयमानतया सिद्धधर्मनिमित्तत्वप्रतिपादकयदिशब्दानुपपत्तिरिति वाच्यम् । 'अथवैतर्ह्यल्पा पृथिव्यासीत्' इत्यादिवद्यदिशब्दस्यापि निपातत्वेनानर्थकत्वात् । यद्वा 'रोचते' इत्यध्याहारेण 'यदि रोचते तदा रथंतरसामानं

1. ऐन्द्रवायवाग्रान्ग्रहान्गृह्णीयात्—ख. 2. नास्ति ख, ग पुस्तकयोः. 3. संयोगस्य अशेषं कृत्स्नं क्रतुं प्राप्तत्वाभावात्—क, च.

क्रतुं कुर्यात्' इति योज्यम्। अथवा 'गृह्णीयात्' इति लिङः कामप्रवेदनार्थतया 'यश्चैन्द्रवायवाग्रान्ग्रहीतुमिच्छेत्तदा रथंतरसामानं क्रतुं कुर्यात्' इति व्याख्येयम्। अथवा 'स्यात्' इति हेतौ लिङ्। 'रथंतरसाम्ना क्रतुना हेतुना ऐन्द्रवायवाग्रान्गृह्णीयात्' इत्यर्थः। अपि वा 'गृह्णीयात्' इति लिङो हेतुमदर्थकत्वेन 'यदि ग्रहाग्रता हेतुमत्त्वेन विवक्षिता तदा तद्धेतू रथंतरसामा सोमः कार्यः' इति व्याख्येयम्। एवं बृहत्सामवाक्येऽपि योज्यम्। [1]तस्माद्रथंतरबृहदन्यतरस्तोत्रकमैन्द्रवायवाग्रतादियुक्तं कर्मान्तरं विधेयम्। इति पूर्वः पक्षः॥

सिद्धान्तयति—

एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात्॥ २॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। नात्र कर्मान्तरविधिः; किंतु एकस्यैव ज्योतिष्टोमस्य प्रकृतस्य लिङ्गभेदात् रथंतरादिनिमित्तभेदेन प्रयोजनार्थं ग्रहाग्रताविशेषविधानप्रयोजनार्थतया यदि रथन्तरेत्यादिवाक्यम् उच्येत प्रतीयेत। ननूक्तरीत्या कर्मान्तरत्वादेकत्वमेवासिद्धमित्यत आह—एकत्वमिति। यदिशब्दस्वारस्येन [2]ग्रहाग्रताविशेषणविधिपरत्वस्य वक्तव्यतया कर्मान्तरबुद्धौ निवृत्तायां तदेकत्वं विज्ञायत इत्यर्थः॥ यदिशब्दस्य हि प्रथमपक्षे आनर्थक्यमेव दोषः, द्वितीये अध्याहारः, तृतीये 'यदि गृह्णीयात्' इति व्यवहितान्वयः, चतुर्थे [3]पञ्चमे चासिद्धस्य हेतुत्वकल्पनाक्लेशः इति पञ्चानां[4] पक्षाणां दुष्टत्वात्स्वरसतः प्रकृतकर्मणो निमित्तत्वप्रतिपादकयदिशब्दबलात्प्रकरणाच्च प्रकृतस्यैव कर्मणः सोमशब्दः प्रतिपादको न तु कर्मान्तरस्य। न च सामान्तराणामपि सत्त्वात् 'रथंतरसामा' इति कथं ज्योतिष्टोमस्यानुवादसंभवः, सापेक्षत्वेनासामर्थ्यात्समासानुपपत्तेरिति वाच्यम्। अन्ययोगव्यावृत्त्यसंभवेऽप्ययोगव्यावृत्त्या विशेषणत्वोपपत्तौ सामर्थ्यसंभवेन समासोपपत्तेः। बृहद्रथंतरे हि सामनी ज्योतिष्टोमे वैकल्पिके। अतः पक्षे अयोगः प्राप्तः। तद्व्यावृत्त्या यदि रथंतरसामैव सोमः, नाविद्यमानंरथंतर इति भवत्ययोगव्यवच्छेदः। स च सामान्तरसत्त्वेऽप्यविरुद्ध इति सामान्तरसापेक्षत्वाभावान्नासामर्थ्यम्। अस्तु वा सामान्तरमेव व्यवच्छेद्यम्। तथापि विरोधिनोर्बृहद्रथंतरयोः परस्परव्यवच्छेदेनैव विशेषणत्वम्, न तु सामान्तरव्यवच्छेदेनापि; विरोधनिबन्धनत्वाद्व्यवच्छेदस्य सामान्तरसत्त्वेऽपि तदपेक्षाविरहादस्ति सामर्थ्यम्। किंच 'उक्थ्यो वै राजसामा' इत्यादिवदाशमिकन्यायेन 'रथंतरसामा' इति निर्देशस्य पृष्ठस्तोत्रमात्रपरता अवसीयते। तत्र च पृष्ठस्तोत्रे सामान्तराभावेन तदपेक्षाविरहात्सामर्थ्यमविरुद्धम्। न च बहुव्रीहिणा अन्यपदार्थप्रधानेन सोमस्यैव प्राधान्ये-

1. तस्मात्केवलरथन्तर...ख. घ, ङ. 2. विशेषगुणविधि...क. घ. च. 3. पञ्चमे च... नास्ति क, घ, ङ, च पुस्तकेषु. 4. चतुर्णा—क, घ, ङ, च.

नावगमात्कथं रथंतरस्य निमित्तत्वमिति वाच्यम्। बहुव्रीहिणा पदार्थप्रतीतिवेलायां विशेष्यतयावगतस्यापि क्रतोर्नित्यतया निमित्तत्वानर्हत्वात्तत्परित्यागेन विशेषणस्यैव निमित्तत्वपर्यवसानात् वाक्यस्य निमित्ततात्पर्यकत्वेन तदनुसारेणायोग्यविशेष्यपरित्यागेन योग्यविशेषण एव तत्कल्पनस्य न्याय्यत्वात्। अत एव 'दध्ना जुहोति' इत्यत्र विशेष्यस्य होमस्य [1]प्राप्तत्वात्तत्परित्यागेन योग्यस्य दध्नो विशेषणतयापि प्रतीतस्य विधानमुपपन्नं भवति। न चैवं सति कर्मबर्हिरध्ययनादावपि रथंतरस्य सद्भावादतिप्रसङ्गः, प्रकृतक्रतुविशिष्टस्य तस्य निमित्तत्वे तु विशिष्टोद्देशदोष इति वाच्यम्। न ह्यत्र शब्देन प्रकृतक्रतुविशिष्टस्य रथंतरस्य निमित्तत्वं बोध्यते येन विशिष्टोद्देशदोषः स्यात्। संनिधानादेव हि क्रतुविशिष्टत्वेन रथंतरस्य बोधः, अनुवादस्य सति संभवे संनिहितगामित्वात्। तस्मात्प्रकृतज्योतिष्टोमे रथंतरादिनिमित्ते ग्रहाग्रताविशेषगुणविधिः। इति रथंतरसामाधिकरणम्॥

२. अवेष्टेः क्रत्वन्तरताधिकारताधिकरणम्।

अस्ति राजसूयः 'स्वाराज्यकामो राजा राजसूयेन यजेत' इति। तत्र सन्ति दिशामवेष्ट्यो नाम यागाः 'दिशामवेष्ट्यो भवन्ति' इति प्रकृत्य विहिताः 'आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा' इति। तत्रेदमाम्नायते 'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत्, यदि राजन्य ऐन्द्रम्, यदि वैश्यो वैश्वदेवम्' इति। आग्नेयादीनि चत्वारि हवींषि प्रतिदिशमासाद्य तेषां मध्ये बार्हस्पत्याद्यन्यतममासाद्य आग्नेयाद्येकैकं हविर्हुत्वा तस्य तस्य संस्रावेण मध्ये निहितं हविरभिघारयेदित्यर्थः। तत्र संशयः—किं प्रकृतराजसूयिकावेष्ट्रियागेषु[2] ब्राह्मणादिवर्णविशेषं निमित्तीकृत्य 'मध्ये निधाय' इत्यादिगुणविधिः, उत ब्राह्मणादिविशिष्टप्रयोगान्तरविधिरिति। तत्र पूर्वाधिकरणन्यायेन 'यदि रथंतरसामा' इत्यादिवद्गुणविधिरिति ब्रूमः। न च [3]राजशब्दवाच्यक्षत्रियजात्यधिकृतराजसूयान्तर्गतावेष्ट्रियागेषु कथं ब्राह्मणादिवर्णनिमित्ते गुणविधिसंभव इति वाच्यम्। राजशब्दो हि जनपदपरिपालनरूपराज्ययोगनिमित्तको ब्राह्मणादिष्वपि वर्तितुमर्हति, राजशब्दस्य ब्राह्मणादिष्वपि राज्ययोगनिमित्तमात्रेणार्यम्लेच्छसाधारणसर्वलोकप्रसिद्धेः; न तु क्षत्रियत्वजातिनिमित्तो राजशब्दः, तत्प्रसिद्धेरनार्यमात्रेषु सत्त्वात् द्रविडदेशमात्रगतत्वात् आर्याणां क्षत्रियजातिमात्रे प्रयोगाभावेन विप्रतिपन्नत्वाच्च। न च बर्हिराज्याधिकरणन्यायेनानार्यव्यवहारादपि क्षत्रियजातिपरत्वं स्यादिति वाच्यम्। वैषम्यात्। बर्हिराज्यस्थले ह्यनार्यव्यवहारादपि जात्यर्थत्वम्, आर्यव्यवहारस्य जात्यव्यभिचारित्वात्। इह तु

1. प्राप्तत्वाद्वाक्यतात्पर्यविषयादध्यन्वयायोग्यतया तत्परित्यागेन—क, घ, ङ, च. 2. राजसूयिकावेष्टिकयागेषु—क; राजसूयिकाग्नेयादियागेषु—ङ. 3. राजन् शब्दवाच्य—ङ.

ब्राह्मणादिष्वपि राजशब्दस्यार्यप्रयोगात्क्षत्रियत्वजातिव्यभिचारान्न क्षत्रियजातिपरत्वम्। यद्यपि धर्मशास्त्रवशात्क्षत्रियस्यैव राज्ययोगो न तु ब्राह्मणादीनामपि, तथापि [1]प्रवृत्तिनिमित्ततायां शास्त्रमूलत्वस्यातन्त्रतया शास्त्रोल्लङ्घनेनापि यथाकथंचिद्राज्ययोगसद्भावमात्रेण ब्राह्मणादीनामपि राजशब्दवाच्यत्वमविरुद्धम्। न चैवमपि राज्ययोगाद्राजा राजयोगाद्राज्यमिति परस्पराश्रय इति वाच्यम्। राज्यशब्दस्य जनपदपरिपालनकर्मणि रूढत्वेन राजयोगानपेक्षत्वेनादोषात्। न च 'पत्यन्तपुरोहितादिभ्यो यक्' इति सूत्रेण राज्ञः कर्मेत्यर्थे यक्प्रत्यये राज्यशब्दव्युत्पत्तेर्व्याकरणस्मृतिसिद्धत्वात्प्रयोगरूपाचारात्स्मृतेर्बलीयस्त्वान्न रूढ्याश्रयणं युक्तमिति वाच्यम्। मन्वादिस्मृतेराचाराद्बलवत्त्वेऽपि प्रयोगमूलत्वाद्व्याकरणस्य तदपेक्षया प्रयोगरूपाचारस्य बलवत्त्वात्। ततश्च नकुलनखनक्षत्रादिशब्देष्विव व्याकरणं राज्यशब्देऽपि साधुत्वान्वाख्यानपरं व्याख्येयम्। यदिशब्दबलादपि राजशब्दो राज्ययोगनिमित्त इति अध्यवस्यामः। यदिशब्दौ हि ब्राह्मणवैश्यौ कर्तृत्वेन सिद्धावनुवदतः। न चैतद्राजशब्दस्य क्षत्रियजातिपरत्वे घटते, प्राप्त्यभावात्। तस्माद्ब्राह्मणादिनिमित्ते राजसूयान्तर्गतावेष्टियागेषु प्रकृतेषु मध्यनिधानादिगुणविधिः। इति प्राप्ते, सिद्धान्तयति—

अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ ३ ॥

शाखान्तरे अवेष्टिशब्द एकवचनान्तोऽपि श्रुतः। तदभिप्रायमेकवचनम्। अवेष्टिविषयम 'यदि ब्राह्मणः' इत्यादिवाक्यं क्रतुप्रधानं ब्राह्मणादिविशिष्टप्रयोगान्तरपरतया प्रतीयेत। कुतः। यज्ञसंयोगात् क्षत्रियस्यैव राजसूयेन संयोगात्॥ 'राजानमभिषेचयेत्' इति राज्ञः सतो जनपदपरिपालनरूपराज्ययोगफलकाभिषेचनविधानात्क्षत्रियमात्रपरत्वं राजशब्दस्य वेदादवसीयते। यदिशब्दस्तु निपातत्वात्पूर्वाधिकरणपूर्वपक्षोक्तप्रकारेण कथंचिन्नेयः। ब्राह्मणादिष्वप्यार्याणां राजशब्दप्रयोगस्तु प्रयोगरूपाचारत्वाद्राजशब्दात्कर्मणि यग्विधायकव्याकरणस्मरणेनाभिषेकविध्यनुगृहीतप्रामाण्यकेन क्षत्रियस्य प्रजापरिपालनमित्यादिधर्मशास्त्रेण च बाधाद्राजकर्मपरिपालनकारित्वनिबन्धनो गौणः। न च 'सोमोऽस्माकं ब्राह्मणानां राजा' 'इन्द्रो राजा जगतश्चर्षणीनाम्' इत्यादिवैदिकनिर्देशः पालनेऽपि दृश्यते। तथा 'क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्प्रत्ययो भवति; पञ्चालानां राजा पाञ्चालः' इत्यादिव्याकरणवार्तिकमहाभाष्ययोरपि पालने राजशब्दप्रयोगो दृष्ट इति कथं जात्यर्थैकत्वमिति वाच्यम्। श्रुतिव्याकरणयोरुभयत्र समानत्वेऽप्यनेकार्थत्वस्यान्याय्यत्वेन क्षत्रियत्वजातौ मुख्यत्वेन पालके गौणतया च तत्र राजशब्दस्य नेयत्वात्। न च विनिगमनाविरहः, सप्रतियोगिकपाल्यापेक्षया निष्प्रतियोगिकक्षत्रियत्वजातेर्लघुत्वस्यैव विनिगमकत्वात्। किंच जनपदपालनमात्रं

[1] 1. प्रवृत्तिनिमित्तताया: शास्त्रमूलकत्वस्य—क. ग, घ. ङ, च.

राजपदप्रवृत्तिनिमित्तं स्वतन्त्रजनपदपालनं वा। नाद्यः, राज्ञा नियुक्ते जनपदाद्यधिकारिणि राजपदप्रयोगापत्तेः। न द्वितीयः, सार्वभौमेण [1]सम्राजा देशविशेषस्य राजभावेन नियुक्ते तदभावप्रसङ्गात्। तस्मात्क्षत्त्रियजातिरेव राजशब्दार्थः। ब्राह्मणादिषु तु 'पक्षिराजः' 'वृक्षराजः' इत्यादिवद्गौणः। तस्माद्ब्राह्मणादिविशिष्टप्रयोगान्तरविधिः। न च राजसूयान्तर्गतावेष्टिप्रयोगे ब्राह्मणाद्यप्राप्तावपि 'एतयान्नाद्यकामं याजयेत्' इति वाक्यान्तरविहितावेष्टिप्रयोगान्तरेऽन्नाद्यकामतया प्राप्तब्राह्मणादिनिमित्ते मध्यनिधानादिगुणविधिरेव किं न स्यादिति वाच्यम्। 'एतयान्नाद्यकामम्—' इत्यत्र हि ब्राह्मणादीनां कर्तृत्वं न श्रुतम्; किंत्वन्नाद्यकामस्य फलित्वेन श्रवणादाक्षेप्यम्। तदाक्षेपात्प्रागेव च स्वाराज्यकामवाक्ये अवेष्टिकर्तृत्वेनावगतक्षत्त्रियेणैव निराकाङ्क्षत्वान्न कर्तृतां प्रयोजयितुमन्नाद्यवाक्यं प्रभवति। यथालब्धाग्निविद्यत्रैवर्णिकलाभेन निराकाङ्क्षाः कर्मविधयो न शूद्रस्याग्निविद्ये प्रयोजयितुमीशते तद्वत्। ततश्च प्रकृतावेष्टेरेव प्रत्यभिज्ञातायाः 'यदि ब्राह्मणः' इत्यादिना ब्राह्मणादिविशिष्टप्रयोगान्तरविधिः। तस्यैव प्रयोगस्य फलापेक्षायामन्नाद्यकामवाक्येन फलसंबन्धः। भाष्यं तु [2]कर्मान्तरपरतया प्रतीयमानमपि प्रयोगान्तरपरतया नेयम्। न ह्यत्र 'यदि ब्राह्मणः' इत्यादिवाक्ये कर्मान्तरविधिः संभवति, प्रकृतावेष्टिप्रत्यभिज्ञाविरोधात्। एवं च यथा दर्शपूर्णमासयोरेको यावज्जीविकप्रयोगोऽन्यश्च काम्यप्रयोगः एवमवेष्टेरेकस्या एव क्रत्वर्थ एकः प्रयोगोऽन्यश्चान्नाद्यकामप्रयोगः। तत्रान्नाद्यकामप्रयोगे ब्राह्मणादिश्रवणस्य निमित्तार्थकत्वे प्रापकत्वे च नास्ति फलभेदः। राजसूयिकावेष्टिप्रयोगे तु स्वाराज्यवाक्ये राजशब्दस्य ब्राह्मणादिसाधारणत्वात्त्रयाणामपि वर्णानां कर्तृत्वं पूर्वपक्षे, सिद्धान्ते तु क्षत्त्रियस्यैवेति फलभेदः। यद्यपि स्वाराज्यवाक्य एव राजशब्दार्थनिरूपणं कर्तुं शक्यम्, तथाप्यध्यायसंगतये प्रयोगभेदव्युत्पादनायावेष्टिवाक्योदाहरणमिति दिक्। इत्यवेष्ट्यधिकरणम्॥

३. आधानस्य विधेयत्वाधिकरणम्।

'वसन्ते ब्राह्मणोऽग्निमादधीत' 'ग्रीष्मे राजन्यः' 'शरदि वैश्यः' 'वर्षासु रथकारः' इत्यत्र किमाधाने कर्मणि ब्राह्मणादिनिमित्ते वसन्तादिविधिः, उत ब्राह्मणादिवसन्तादिविशिष्टमाधानं विधीयत इति संशयः। तत्र 'यदि ब्राह्मणो यजेत' इत्यादौ ब्राह्मणादीनामप्राप्ततया राजसूयिकावेष्टिप्रयोगे गुणविधौ निमित्तत्वासंभवेन तद्विशिष्टप्रयोगान्तरविधिसंभवेऽपि प्रकृते आहवनीयादिसापेक्षक्रतुविध्याक्षेपलभ्याधाने ब्राह्मणादीनां प्राप्तानां निमित्तत्वसंभवेनाधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिर्युज्यते। नन्वाधानस्यान्यतोऽप्राप्तत्वात्कथं तस्मिन्ब्राह्मणादिश्रवणस्य निमित्तार्थत्वम्; न च क्रतुविधितस्तदाक्षेपः संभवति, आधानविधावाहवनीयादिशब्दश्रवणाभावेन तस्य क्रतुविध्यपेक्षिताहवनीयादिसाधकत्वे प्रमाणाभावादिति चेन्न। 'नक्तं गार्हपत्यमादधाति' 'अर्धोदिते सूर्य आहवनीयमादधाति' इत्यादिवाक्येष्वाधानस्याहवनीयादेश्च

1. सम्राजाखण्डदेशविशेषस्य—घ, ङ. 2. कर्मान्तरतया—क, ख, ग, घ, ङ.

साध्यसाधनभावावगमात्। यद्यपि तानि वाक्यानि गुणविधायकान्येव नं त्वाधानविधायकानि तथापि 'गार्हपत्यम्' इत्यादिद्वितीयया साध्यत्वानुवादिन्या आधानस्य तत्साधनत्वावगमसंभवः। यद्वा 'य एवं विद्वानग्निमाधत्ते' इति सामान्यतः सर्ववर्णानामाधानविधायकमिति प्राप्ताधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिः। इति प्राप्ते, सिद्धान्तयति—

आधानेऽसर्वशेषत्वात् ॥ ४ ॥

आधाने विषये वसन्तादिवाक्यं ब्राह्मणादिवसन्तादिविशिष्टाधानप्रापकम्, न तु प्राप्ताधाने निमित्तसंयोगेन कालविशेषबोधकम्। कुतः। असर्वशेषत्वात् आधानस्य सर्वक्रत्वर्थतया विधेरश्रवणात्॥ आधानविधिसद्भावे हि 'आदधीत' इत्यात्मनेपदबलादाधानसाध्याग्नीनां कर्तृगामित्वप्रतीत्या स्वीयाधानसाध्यत्वं लभ्यते। आक्षेपपक्षे तु 'कृत्तिकास्वग्निमादधीत' 'वसन्ते ब्राह्मणोऽग्निमादधीत' इत्यादिगुणवाक्येष्वात्मनेपदस्यानुवादत्वेनाविवक्षिततया क्रतुविधिभिराधानमात्राक्षेपेऽपि तस्य स्वकर्तव्यत्वे प्रमाणाभावात्परानुष्ठिताधाननिष्पन्नाग्नीनां क्रयादिना संपादनं स्यादिति कथं नियमेन क्रतुविधिभिराधानस्य प्राप्तिः। एवं चाधानस्य तदुद्देशेन नैमित्तिकगुणस्य च विधौ वाक्यभेदप्रसङ्गाद्ब्राह्मणादिवसन्तादिविशिष्टाधानविधिः। तथा च वसन्तादियुक्तप्रत्यक्षविधौ जाग्रति 'य एवं विद्वानग्निमाधत्ते' इत्यस्य वर्तमानापदेशस्य विधित्वकल्पनक्लेशोऽपि नानुभवितव्यो भवति। न चैवमपि वसन्तादिवाक्येष्वाहवनीयादिशब्दाभावादाधानोत्पन्नाग्नीनां कथं क्रत्वर्थता स्यादिति वाच्यम्। वसन्तादिवाक्येष्वाहवनीयादिग्रहणाभावेऽपि 'नक्तं गार्हपत्यम्' इत्यादिगुणवाक्येषु गार्हपत्यादीनां द्वितीयया आधानसाध्यत्वानुवादबलेन वसन्तादिवाक्येऽग्निशब्दस्य गार्हपत्यादिपरत्वे पर्यवसानस्योक्तत्वादित्यन्यत्र विस्तरः। प्रयोजनं पूर्वपक्षे ब्राह्मणादिश्रवणस्य निमित्तार्थत्वाच्छूद्रस्याप्याधानम्; सिद्धान्ते तु ब्राह्मणादिवाक्यानामेव विधायकत्वाच्छूद्रस्य पृथगाधानविध्यभावान्नाधानमिति। न च ब्राह्मणादिश्रवणस्य निमित्तार्थत्वेऽपि शूद्रस्योपनयनाभावेन विद्याभावादेव नाधानमिति वाच्यम्। समानजातीयत्वेन 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्यानामपि पूर्वपक्षे निमित्तार्थत्वेन शूद्रस्याप्युपनयनसत्त्वेन विद्यासत्त्वादिति दिक्। याज्ञिकास्तु ब्राह्मणादिश्रवणं निमित्तार्थमेवेति मन्यन्ते। युक्तं चैतत्। तथाहि—तैत्तिरीयके 'अग्नय आधातव्याः' इत्यस्याधानविधिः। तथा वाजसनेयकेऽपि संभरणकाण्डे द्वितीयाध्याये 'भ्रान्ति ह वा एतद्यज्ञम्' इति द्वितीयब्राह्मणे 'ते ह देवा अग्न्याधेयं ददृशुः' इत्युपक्रम्य 'अग्नीनादधीत' इत्याधानविधिः श्रूयते। षष्ठस्य तृतीये 'पुनराधेयमोदनवत्' 'द्रव्योत्पत्तेर्वोभयोः स्यात्' इत्यत्र भाष्यवार्तिकतन्त्ररत्नेषु च वक्ष्यते। ततश्चाधानस्य प्राप्तत्वान्न वसन्तादिवाक्येषु तस्य विधानं संभवति। अतो ब्राह्मणादिश्रवणमन्यतः प्राप्ते आधाने निमित्तसंयोगार्थमित्येव युक्तम्। किंच क्रतुविधीनां क्रयसंपादितान्यदीयाहवनीयादिभिरपि शान्ताकाङ्क्षत्वात्तैराधानस्य नाक्षेपसंभव इत्यप्ययुक्तम्,

'यदि वान्यस्याग्निषु यजेत यदि वान्योऽस्याग्निषु यजेत अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इति प्रायश्चित्तविधानादेवान्यदीयाग्नीनामप्राप्तेः अग्नित्यागे प्रायश्चित्तविधानाच्च। 'अहं त्वदस्मि मदसि त्वमेतत्, ममासि योनिस्तव योनिरस्मि, ममैव सन्वह हव्यान्यग्ने' इत्याधानोत्पन्नाग्न्युपस्थानमन्त्रवर्णेन 'अन्तर्वत्नीजन्यं जातवेदसम्, अध्वराणां जनयथः पुरोगाम्, आरोहतं दशतं शकरीर्मम, ऋतेनाग्न आयुषा वर्चसा सह, ज्योग्जीवन्त उत्तरामुत्तरां समाम्, दर्शमहं पूर्णमासं यज्ञं यथा यजै' इत्यरण्यादानमन्त्रवर्णेन चात्मीयाग्नीनामेव ऋत्वर्थतावगमाच्च। किंच यद्यस्मिन्नेवाधिकरणेऽन्यदीयाग्नीनां क्रतुषु व्युदासः क्रियेत, तर्हि षष्ठस्य षष्ठे 'विहारस्य प्रभुत्वादनग्नीनामपि स्यात्' इत्यधिकरणस्यानुन्मेषः स्यात्। तत्र हि सत्रेष्वनाहिताग्नीनामप्यन्यदीयाग्निभिरधिकारं पूर्वपक्षयित्वा स्वीयाधाननिष्पन्नाग्निसाध्यत्वात्कर्मणामन्यदीयाग्निभिस्तस्य नाधिकार इति सिद्धान्तयिष्यते। [1]अस्मिन्नधिकरणेऽन्यदीयाग्नीनां क्रतुषु व्युदासे निश्चिते सति तादृशपूर्वपक्षो न कथंचिदुन्मेषमर्हति। तस्मादत्र ब्राह्मणादिग्रहणं निमित्तार्थमित्येव युक्तम्। पूर्वपक्षसिद्धान्तावपि विपर्ययेण प्रवर्तनीयौ। प्राप्त आधाने वसन्तादिवाक्यानि गुणविधायकान्येव, 'अग्नीनादधीत' इत्यविशेषेण विहितस्य तस्य सर्ववर्णसाधारणत्वादिति सूत्रयोजनापि सूपपादा। न चैवं शूद्रस्याप्याधानं शङ्क्यम्; 'अध्वराणां जनयथः पुरोगाम्' 'दर्शमहं पूर्णमासं यज्ञं यथा यजै' इत्यादिमन्त्रवर्णत आधानस्य यज्ञार्थत्वावगमात्, 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति तस्य यज्ञनिषेधात्, शूद्रस्याध्ययनविध्यभावात्, 'न स्त्रीशूद्रौ वेदमधीयाताम्' इति तस्य विद्याप्रतिषेधाच्चेति षष्ठेऽपशूद्राधिकरणे स्पष्टं भविष्यतीत्यास्तां तावत्। वृत्तमधिकरणम्॥

दर्शपूर्णमासौ प्रकृत्यामनन्ति 'दाक्षायणयज्ञेन सुवर्गकामो यजेत' 'साकंप्रस्थायीयेन यजेत पशुकामः' 'संक्रमयज्ञेन प्रजाकामः' इति। तत्र कर्मान्तरविधिर्गुणविधिर्वेति संशये पूर्वपक्षयति—

अयनेषु चोदनान्तरं संज्ञोपबन्धात्॥ ५॥

अयनेष्विति दाक्षायणशब्दैकदेशग्रहणम्। छत्रिन्यायेन साकंप्रस्थायीयाद्युपलक्षणमिति बहुवचनोपपत्तिः। दाक्षायणयज्ञादिवाक्येषु चोदनान्तरम्। चोद्यते विधीयत इति कर्मणि ल्युट्।

४. दाक्षायणादीनां वसन्तादिवाक्येष्वाधानमिवात्र कर्मान्तरं विधेयमिति यावत्। कुतः। संज्ञोगुणताधिकरणम्। पबन्धात् संज्ञान्तरोपबन्धबलात्। एकस्य चानेकसंज्ञानर्थक्येन प्रकृतकर्मणि संज्ञान्तरसमावेशासंभवात् 'अथैष ज्योतिः' इत्यादाविव कर्मान्तरविधानमेव युक्तम्।

1. तस्मिन्नधिकरणे—ख, ग.

अभ्यासादपि कर्मभेद इत्याह—

अगुणा च कर्मचोदना ॥ ६ ॥

'दाक्षायणयज्ञेन यजेत' इत्यादिचोदना अगुणा गुणोपबन्धरहिता, दाक्षायणादिशब्दस्य कस्मिंश्चिद्गुणेऽप्रसिद्धत्वात् । अतः 'दध्नेन्द्रियकामस्य—' इत्यत्रेव फलाय गुणविधानासंभवात्कर्मचोदनैषा पुनर्विधानम् । ततश्चाभ्यासात्कर्मभेद इत्युक्तं भवति ॥

ननु प्रकृतकर्मणि फलविधानमेवास्त्वित्यत आह—

समाप्तं च फले वाक्यम् ॥ ७ ॥

दाक्षायणादिवाक्यं स्वर्गादिफले समाप्तम । न हि कर्मोद्देशेन व्रीह्यादिवत्फलस्य विधानं संभवति । तस्मिन्नुत्पादनीये उपायोपदेश एव पर्यवसन्नं भवति, तस्यानुपादेयत्वात् । ततश्च भावार्थाधिकरणे धात्वर्थस्यैव फलकरणताया निश्चितत्वाद्गुणस्य तत्र विधातुमशक्यत्वात्परिशेषादवश्यं कर्म विधातव्यमिति सिद्धः कर्मभेदः ॥ इति प्राप्ते, सिद्धान्तयति—

विकारो वा प्रकरणात् ॥ ८ ॥

वाशब्द एवार्थे । दर्शपूर्णमासकर्मणि विकारः अवस्थाविशेषः अत्र फलाय विधीयते, न तु कर्मान्तरम् । दर्शपूर्णमासयोरवस्थारूपाद्विकारात्फलं न कर्मान्तरादित्युक्तं भवति । कुतः । प्रकरणात् कर्मान्तरत्वे प्रकरणविच्छेदप्रसङ्गात् ॥ अयमाशयः । लोकतः प्रसिद्ध्यभावेऽपि 'द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत' इति वाक्यात् 'सह कुम्भीभिरभिक्रामं जुहोति' इति वाक्याच्च पौर्णमास्यमावास्यावृत्तिलक्षणः कुम्भीभिः सहप्रस्थानलक्षणश्च गुणः प्रसिद्धः । ततश्च दक्षस्योत्साहिनो यजमानस्येमे दाक्षा ये ऋत्विजः तेषामयनमावृत्तिः, तत्कर्तृकद्विःप्रयोग इति यावत् । अभेदविवक्षया च यज्ञसामानाधिकरण्यम् ; साकंप्रस्थायः सहप्रस्थानम् , तत्संबन्धी साकंप्रस्थायीय इति चावयवव्युत्पत्त्या वाक्यान्तरप्रसिद्धावृत्तिसहप्रस्थानलक्षणगुणविशिष्टवचनदाक्षायणयज्ञादिशब्देन 'लोहितौष्णीषा ऋत्विजः—' इत्यत्रेवोपसर्जनगुणस्य विधानं नानुपपन्नम् । एवं च 'दध्नेन्द्रियकामस्य—' इत्यत्रैवात्र फलाय गुणविधिरेव, न तूद्भिदादिवत्कर्मान्तरम् ।

दाक्षायणयज्ञविषये इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ९ ॥

'त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत यदि दाक्षायणयज्ञी स्यात् पञ्चदश वा वर्षाणि यजेत तर्ह्येवं संपद्यते' इति त्रिंशतं वर्षाणि दर्शपूर्णमासयाजिनो यावती दर्शपूर्णमासप्रयोगसंख्या तावत्संख्याकदर्शपूर्णमासप्रयोगसंपत्तिं पञ्चदशवार्षिकदाक्षायणयज्ञिनो दर्शयति। तदेतत्कर्मान्तरत्वे विरुध्यते। न हि दाक्षायणयज्ञस्य कर्मान्तरत्वे तदीयपञ्चदशवर्षसंपन्नसंख्यया त्रिंशद्वर्षलब्धसंख्याकदर्शपूर्णमासप्रयोगसंपत्तिवर्णनमुपपद्यते। अतोऽपि न कर्मान्तरम् ॥

यदुक्तं संज्ञाभेदात्कर्मभेद इति तत्राह—

गुणात्संज्ञोपबन्धः ॥ १० ॥

दर्शपूर्णमासयोरुत्पन्नयोरावृत्त्यादिगुणनिबन्धना संज्ञेयम्। उत्पत्तिशिष्टैव च संज्ञा कर्मभेदिका, प्रकृतकर्मण्यसंभवन्ती च। न चेयमुत्पत्तिशिष्टा नापि प्रकृतकर्मण्यसंभवन्ती, 'अथैष ज्योतिः' इत्यादिवत्प्रकरणविच्छेदेन प्रक्रमस्याभावात् स्वाश्रितगुणवाचित्वेन प्रकृतकर्मणि संभवाच्च ॥

यदुक्तं फलाय कर्मविधान एव फलविधेः पर्यवसानात्तत्र[1] कर्मण एव भावार्थाधिकरणन्यायेन फलाय विध्यवश्यंभावाद्गुणस्याविधेयत्वात्कर्मभेद इति, तत्राह—

समाप्तिरविशिष्टा ॥ ११ ॥

यथा कर्मणः फलमिति भावार्थाधिकरणे साधितं तथैव 'फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात्' 'अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत' इतीन्द्रियकामाधिकरणे गुणादपि फलस्य साधितत्वेन फलाय गुणविधानेऽपि फलविधेः पर्यवसानस्याविशिष्टत्वान्न कर्मणः पुनर्विधानमत्रेति भावः। अतो गुणविधिः ॥ अत्र 'अयनेषु' इति बहुवचनोपपत्तये संक्रमवाक्यमप्युदाहृतं भाष्ये। तथत्रकचिच्छाखायामन्वेषणीयम्। तत्रैव च संक्रमशब्दस्य गुणविशेषपरत्वे वाक्यशेषश्चान्वेषणीयः। प्रयोजनं पूर्वपक्षे दाक्षायणयज्ञं कुर्वाणेन दर्शपूर्णमासावपि कर्तव्यौ, सिद्धान्ते तु न कर्तव्याविति। तदेतदपरे न क्षमन्ते। न हि दर्शपूर्णमासयोः संनिधौ दाक्षायणयज्ञादिविधिः, येन तत्र गुणविधानं स्यात्। कौषीतकब्राह्मणे हि तृतीयेऽध्याये दर्शपूर्णमासावनुक्रम्य चतुर्थेऽध्याये 'अनुनिर्वाप्यया वै देवाः' इत्यादिना पूर्णमासे दर्शे च संस्थिते वैमृधमादित्यं च यागं विधाय 'अथातोऽभ्युदितायाः' इत्यादिनाभ्युदितेष्टिं विधाय 'अथातोऽभ्युदृष्टायाः' इत्यादिनाभ्युदृष्टेष्टिं च विधाय 'अथातो दाक्षायणयज्ञस्य दाक्षायणयज्ञेनैष्यन्फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्ते' इत्यादिना दाक्षायणयज्ञमनुक्रम्य

1. पर्यवसानादत्र—क, घ, ङ.

'अथातः साकंप्रस्थायीयस्य' 'अथातो मन्थधनस्य' 'अथातस्तुरायणस्य' 'अथात आग्रयणस्य' 'अथातश्चातुर्मास्यानाम्' इत्यादिना बहूनि कर्माण्यनुक्रान्तानि। तत्राथशब्देन प्रकरणविच्छेदात् 'अथैष ज्योतिः' इत्यादिवदुत्पत्तिशिष्टसंज्ञान्तरकत्वात्प्रकृतकर्मणि संज्ञान्तरस्य समावेशासंभवाच्च कर्मान्तरत्वमेव युक्तम्। नापि द्राक्षायणशब्दो दर्शपूर्णमासयोरावृत्तिगुणयोगाद्वर्तितुमर्हति। न हि दक्षस्येमे दाक्षा ऋत्विजः, तत्कर्तृकमयनमावृत्तिरित्यवयवव्युत्पादनमुचितं येन वाक्यान्तरप्रसिद्धगुणपरत्वं स्यात्। 'दक्षो ह वै पार्वतिरेतेन यज्ञेनेष्ट्वा सर्वान्कामानवाप' 'स वै दक्षो नाम तदयदनेन सोऽयजत तस्माद्दाक्षायणयज्ञ' इत्याख्या' इति कौषीतकवाजसनेयकयोरन्यथैव निर्वचनावगतेः। किंच दाक्षायणशब्दस्यावृत्तिगुणपरत्वे तन्मात्रस्य फलाय विधानापत्तौ 'पौर्णमास्यामैन्द्रं सांनाय्यम्' 'मैत्रावरुण्यामिक्षयामावास्यायां यजेत' इत्यादिगुणानां फलार्थत्वानुपपत्तिः। अतो दाक्षायणशब्दस्य गुणविधिपरत्वासंभवात्कर्मान्तरत्वमेव युक्तम्। एवं शतपथब्राह्मणेऽपि हव्यवाहकाण्डे दर्शपूर्णमासावनुक्रम्य संभरणकाण्डे आधानं पुनराधानमग्निहोत्रं चानुक्रम्य दाक्षायणयज्ञोऽनुक्रान्तः। तथा च प्रकरणविच्छेदात्कर्मान्तरत्वमेव युक्तम्। यद्यपि तैत्तिरीयादिशाखायां दर्शपूर्णमासप्रकरणे दाक्षायणादिवाक्यं श्रुतम्, तथापि दाक्षायणादिशब्दस्य गुणपरत्वमुक्तरीत्यानुपपन्नमिति कर्मान्तरत्वमेव युक्तम्। अधिकरणं तु गवामयनप्रकरणस्थोत्सर्गिणामयनादिविषयं योज्यमित्यास्तां तावत्। इति दाक्षायणयज्ञाधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते 'ईषामालभते' 'चतुरो मुष्टीन्निर्वपति' इति। ईषा शकटावयवदारुविशेषः। आलम्भनं स्पर्शनम्। निर्वपणं पृथक्करणम्। मुष्टीन् मुष्टिपरिमितान्व्रीहीन्। तथा

५. द्रव्यदेवतायुक्तानां यागान्तरताधिकरणम्।

कस्यचिदपि प्रकरणमनारभ्य श्रूयते 'वायव्यं श्वेतमालभेत भूतिकामः' 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति। किमत्र वायव्यवाक्ये सौर्यवाक्ये च दार्शपूर्णमासिकालम्भनिर्वापानुवादेन श्वेतत्वं चरुश्च गुणो विधीयते, उत कर्मान्तरभूतौ भूतिब्रह्मवर्चसफलौ वायुसूर्यदेवत्यश्वेतत्वचरुगुणकावालम्भनिर्वापौ यावदुक्तौ विधीयेते, किं वा उक्तगुणफलविशिष्टौ यागौ विधीयेते इति संशये पूर्वपक्षयति—

संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात्॥ १२॥

चशब्दो वैषम्ये। दर्शपूर्णमासप्रकरणपठितेषु दाक्षायणादिवाक्येषु कर्मणः संनिहितत्वात्तदाश्रित्य फलाय गुणविधिरिति युक्तम्। इह तु अप्रकरणे कस्यचिदपि प्रकरणमनारभ्य श्रुते वायव्यादिवाक्ये प्रकरणादाश्रयालाभे सति फलाय गुणविध्यसंभवादीषासंस्कार आलम्भो व्रीहियवसंस्कारो निर्वापश्च श्वेतत्वचरुलक्षणगुणविधानायानूद्येते, न तु गुणफलविशिष्टमपूर्वमालम्भनं निर्वपणं च विधीयते। कुतः। अकर्मशब्दत्वात् वायव्यादिवाक्ये आलभातिनिर्वपत्योरपूर्वालम्भनिर्वाप-

कर्मशब्दत्वाभावात् । विशिष्टविधानापेक्षया गुणविधानायानुवादत्वस्यैव युक्तत्वादिति भावः । अ॰ कर्मशब्दत्वादित्यस्य वायव्यादिवाक्ये आलभतिनिर्वपत्योर्यागवाचकत्वाभावादित्यप्यर्थः । ततश्च यागविधिरत्यन्ताप्रसक्त इति भावः ॥ न च प्राप्तालम्भनिर्वापानुवादेन वायुसूर्यदेवतयोः श्वेतत्वचरुगुणयोश्च विधाने वाक्यभेद इति वाच्यम् । न हि 'वायव्यम्' 'सौर्यम्' इति च देवताविधिः; किंतु 'सर्वे ओषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादाः' इति श्रुतौ प्राणभृतां वनस्पतिभोक्तृत्वावगमात्तेन संबन्धेन वनस्पतिसंबन्धिनि प्राणे वायौ देवतात्वोपचारेण ईषायामेव वायव्यशब्दोऽनुवादः । 'सौर्यम्' इति च आग्नेयपुरोडाशीयव्रीहियवद्रव्यस्य तेजोदेवत्यत्वसामान्यादनुवाद इति न वाक्यभेदः । अतो दार्शपूर्णमासिकालम्भनिर्वापावनूद्य गुणविधिः । न च दर्शपूर्णमासकर्मणः पुरोडाशाज्यदधिपयोद्रव्यावरुद्धत्वात्तत्र चरुविधानमनुपपन्नमिति वाच्यम् । अत एवानुपपत्त्या चरुशब्दो लक्षणया स्थालीवचनम्, सप्तम्यर्थे च द्वितीया । स्थाल्यां निर्वपेदित्यर्थः । न च 'शूर्पे निर्वपति' इति विरोधः, शूर्पे स्थाल्यामित्यविरोधात् । न च केवलगुणविधौ फलपदानन्वयः, गुणसंबन्धस्य फलसंबन्धस्य च विधौ वाक्यभेदात् अनारभ्याधीतत्वेन प्रकरणादाश्रयलाभाभावेन फलाय गुणविध्यनुपपत्तेश्चेति वाच्यम् । भूतिब्रह्मवर्चसपदयोः 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति सर्वकामार्थदर्शपूर्णमासफलैकदेशानुवादत्वात् । तस्माद्दार्शपूर्णमासिकालम्भनिर्वापानुवादेन श्वेतत्वचरुगुणविधिः ।

तमिमं पूर्वपक्षं निराकुर्वन्पूर्वपक्षान्तरमुद्भावयति—

यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥

वाशब्दः पूर्वपक्षव्यावृत्तौ । दार्शपूर्णमासिकालम्भनिर्वापानुवादेन केवलगुणविधिरित्ययुक्तम् । किंत्वालम्भान्तरं निर्वपणान्तरं च गुणफलविशिष्टं विधीयते । फलपदयोर्नित्यवच्छ्रुतयोर्देवतापदयोश्च संभवत्प्रयोजनकयोः पाक्षिकानर्थकानुवादत्वस्यान्याय्यत्वात् । किंच लोकेऽप्यालम्भनिर्वापयोः सत्त्वाद्दार्शपूर्णमासिकयोरेव तयोः कथं प्रतीतिः । न चानारभ्याधीतत्वेन प्रकृतिगामित्वात्प्रतीतिरिति वाच्यम् । अव्यभिचरितक्रतुसंबन्धिष्वेवानारभ्याधीतानां प्रकृतिगामित्वाभ्युपगमात्; अन्यथा 'तस्मात्सुवर्णं हिरण्यं भार्यम्' इत्यादिविधेरपि प्रकृतिगामित्वापातात् । एतेन वैदिककर्मत्वसामान्याद्वैदिककर्मसंबन्ध्यालंभाद्यनुवादेन गुणविधिरित्यपि निरस्तम्, हिरण्यभरणादिष्वतिप्रसङ्गात् । ननु गुणफलविशिष्टालम्भनं निर्वपणं च कर्मान्तरं चेत्किंप्रकृतिकं तदित्यत आह— यावदुक्तमिति । दर्विहोमादिवदपूर्वमिदम् । ततश्च यत्किंचिच्छ्रुतद्रव्यं वायवे संकल्प्य भूतिकामेन स्प्रष्टव्यम्, चरुश्च सूर्याय संकल्प्य ब्रह्मवर्चसकामेन निर्वप्तव्य इति लभ्यते । ननु द्रव्यदेवतासंबन्धाद्यागः कुतोऽत्र न कल्प्यत इत्यत आह— कर्मणः श्रुतिमूलत्वादिति । कर्मणो यागस्य शब्दैकगम्यत्वाद्द्रव्यदेवतासंबन्धमात्रेण

कल्पयितुमशक्यत्वादित्यर्थः। न चैवम् 'आग्नेयोऽष्टाकपालो भवति' इत्यत्र कथं यागकल्पनमिति वाच्यम्। वैषम्यात्। आग्नेयादिवाक्ये हि पुरुषव्यापारं विना विध्यनुपपत्तेः पुरुषव्यापारापेक्षायां पदान्तरार्थद्रव्यदेवतासंबन्धोपस्थितयागरूप एव कल्पयितुं न्याय्य इत्यश्रुतस्यापि यागस्य विधिर्युज्यते। इह त्वालम्भनिर्वापयोः पुरुषव्यापारयोः श्रुतत्वात्तत एव विध्युपपत्तेरश्रुतयागविधिर्नाभ्युपेयः। तस्माद्यावदुक्तावालम्भनिर्वापौ गुणफलविशिष्टौ वायव्यसौर्यवाक्ययोर्विधीयेते इति पूर्वः पक्षः॥

सिद्धान्तयति—

यजिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसंबन्धात्॥ १४॥

तुशब्दोऽवधारणे। द्रव्यग्रहणं देवताया अप्युपलक्षणम्। वायव्यादिवाक्ये यजिरेव विधीयते, नालम्भनादि। कुतः। द्रव्यफलभोक्तृसंयोगात्। 'वायव्यम्' इत्यादितद्धितान्तशब्देन द्रव्यदेवतासंबन्धस्य 'भूतिकामः' इत्यादिपदेन फलसंबन्धस्य तत्कामभोक्तृसंबन्धस्य च अवगमादित्यर्थः। ननु द्रव्यदेवतादिसंबन्धानां कथं यागकल्पकत्वमित्यत आह— एतेषामिति। द्रव्यदेवताफलभोक्तृणां कर्मणा यागेन अविनाभावात्॥ 'वायव्यम्' इति देवतातद्धितेन हि देवतात्वेन वायुसंबन्धो द्रव्यस्य प्रतीतः। त्यज्यमानहविरुद्देश्यत्वं च देवतात्वम्। तच्च सूर्यादुद्देशेन द्रव्यत्यागादेव भवति, नान्यथा। एवं च वायव्यादिवाक्येषु श्रुतप्राय एव याग इति भवति तद्विधिः। तत्र द्रव्यदेवतासंयोग एव यागस्याक्षेपकः। फलसंयोगो भोक्तृसंयोगश्च फलस्य तत्कामनायाश्चाभावे स्वकीयद्रव्यं यजमानः किमिति त्यजेदिति यागस्य निर्वाहकतयोपात्त इति न तत्राभिनिवेष्टव्यम्। अत्र 'आलभेत' 'निर्वपेत्' इति धात्वर्थो न विवक्षितः। 'श्वेतद्रव्यकवायुदेवताकयागेन भूतिं कुर्यात्' 'चरुद्रव्यकसूर्यदेवताकयागेन ब्रह्मवर्चसं कुर्यात्' इत्यर्थः। धातुभ्यां तु चोदकादर्थाद्वा प्राप्तं स्पर्शनं पृथक्करणं चानूद्यते। न चास्मिन्पक्ष आलभतेर्निर्वपतेश्चानर्थक्यम्, पूर्वपक्षे तु देवतापदस्येति को विशेष इति वाच्यम। विधिप्रत्ययप्रयोगार्थं धातूपादानस्यावश्यंभावेन सार्थक्यात।

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च॥ १५॥

'सोमारौद्रं चरुं निर्वपेत्' इति प्रकृत्य 'परिश्रिते याजयेत्' इति परिश्रयणविधिपरे वाक्ये यागानुवाददर्शनादपि लिङ्गाद्द्रव्यदेवतासंबन्धस्य यागाक्षेपकत्वमनुमिमीमहे इति। वृत्तमिदमधिकरणम्॥

'पयसाग्निहोत्रं जुहोति' इति विहितस्य पयसो दोहनविषये 'वत्समालभेत' 'वत्समुपसृजति' 'प्राचीमावृत्य गां दोग्धि' 'दुह्यमानां गामनुमन्त्रयते' इत्यादि श्रुतम्। उपसृजति

1. यजतिस्तु.

मातृसमीपं प्रापयति। तत्र 'वत्समालभेत' इति किं यागविधिः उत संस्पर्शनमात्रविधिरिति संशयः। तत्र 'वायव्यं श्वेतमालभेत' इत्यत्रेव यागविधिरिति ब्रूमः। न च देवतासंयोगाभावात्कथमिह यागविधिरिति वाच्यम्। वत्सालम्भोऽयं यजिमत्कर्म भवितुमर्हति, प्राणिद्रव्यकालम्भत्वात्, वायव्यवाक्यावगतालम्भवदित्यनुमानेन यागविधित्वाध्यवसाये सति प्राणिद्रव्यकत्वसामान्येनाग्नीषोमीयविध्यन्तप्राप्त्या देवतालाभस्योपपादयितुं शक्यत्वादिति प्राप्ते, सिद्धान्तयति—

६. वत्सालम्भादीनां संस्कारताधिकरणम्।

विशये प्रायदर्शनात् ॥ १६ ॥

यागविधिर्वा स्पर्शनमात्रविधिर्वेति संशये स्पर्शनमात्रविधिरित्येव युक्तम्। कुतः। प्रायदर्शनात् प्रायेषु बहुषु उपसर्जनावर्तनानुमन्त्रणादियावदुक्तकर्मस्वालम्भनस्य पाठात्, सामान्यतोदृष्टानुमानस्य च वैदिकार्थागोचरत्वात्, 'अध्वर्युमालभेत' इत्यादौ प्राणिद्रव्यकर्मत्वेऽपि स्पर्शनमात्राभिधानेन व्यभिचाराच्चात्रालभतेः स्पर्शनमात्रार्थकत्वम्। न चैवं सति 'वत्समुपसृजति' इत्युपसर्जनविधानादेवार्थसिद्धत्वादालम्भनविधिर्व्यर्थ इति वाच्यम्। न ह्यत्र स्पर्शनमात्रं विधीयते येन तद्वैयर्थ्यं स्यात्; किंतु चाटूकरणात्मकस्पर्शनविशेषलक्षणसंस्कारः। स च नावश्यं प्राप्तः। गोप्रस्रवनातिशये चोपयुज्यत इति न वैयर्थ्यम्॥

इतोऽप्येवमित्याह—

अर्थवादोपपत्तेश्च ॥ १७ ॥

'वत्सनिकान्ता हि पशवः' इति धेनुप्रस्रवनार्थवत्सोपचारात्मकालम्भविधेरर्थवादः। वत्सा नितरां कान्ताः प्रिया येषामिति विग्रहः। स चायमर्थवादो वत्सस्पर्शनमात्रविधावेवोपपद्यते न तु यागविधौ, यागे सति तस्य संज्ञपनप्रसङ्गात्। तथा च यस्मादसौ मातुः प्रियो वत्सस्तस्मात्संज्ञपनार्थमालभ्य इत्यसंगतं स्यात्; मारणे अप्रीतिप्रसङ्गात्। चाटूकरणात्मकस्पर्शनविधौ तु वत्सप्रिया माता चाटूकृतेन वत्सेन संयुज्यमाना स्नेहात्प्रस्नविष्यतीत्युपपद्यते। तस्मादत्र स्पर्शनमात्रविधिः, न यागविधिः। प्रयोजनं पूर्वपक्षे अग्निहोत्राङ्गतयाग्नीषोमदेवताकवत्सद्रव्यकयागोऽनुष्ठेयः, सिद्धान्ते तु वत्सचाटूकरणमात्रमिति। वृत्तमधिकरणम्॥

अग्नौ श्रूयते 'चरुमुपदधाति' 'बृहस्पतेर्वा एतदन्नं यन्नीवाराः' इति। तत्र किं चरोरुपधानमात्रं यावदुक्तं विधीयते, उतोपधानयुक्तो यागो विधीयत इति संशयः। तत्र 'वत्समालभेत' इत्यत्र देवतासंयोगाभावेन यागविध्यसंभवेऽपि प्रकृते वाक्यशेषतो देवतालाभाद्यागविधिरस्तु। यद्यपि वाक्यशेषे देवतात्वेन बृहस्पतेश्चरुसंबन्धो न

७. नैवारचरोराधानार्थताधिकरणम्।

श्रुतः, तथापि 'बृहस्पतेरन्नम्' इति संबन्धश्रवणाद्देवतात्वं कल्प्यते । यदि हि नैवारचरौ बृहस्पतिर्देवता न भवेत्तदा कथं बृहस्पतेर्नीवारा अन्नं भवेयुः । तैत्तिरीयके 'बार्हस्पत्यो भवति' इति तद्धितेनापि स्पष्टमेव चरोर्देवतासंबन्धः श्रुतः । किंच उपधानमात्रविधौ चरोरुपधानसंस्कृतस्य भूतभाव्युपयोगाभावेन संस्कार्यत्वरूपकर्मत्वासंभवाद्द्वितीयाश्रुतिरनुपपन्ना स्यात् । यागविधिपक्षे तु तस्य यागस्यैकदेवताकत्वौषधद्रव्यकत्वादिसामान्येनाग्नेयविध्यन्तप्राप्तौ चोदकप्राप्तस्विष्टकृदादिप्रतिपत्तिबाधेनोपधानं चरोः प्रतिपत्तित्वेन विधीयत इति न द्वितीयानुपपत्तिः । तस्मादुपधानप्रतिपत्तिकर्मयुक्तो बृहस्पतिदेवत्यचरुद्रव्यकयागो विधीयते इति प्राप्ते, सिद्धान्तयति—

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

अर्थः कार्यमुपधानम् । तद्वाचकशब्देन उपदधातिना चरुः [1]संयुक्तः । अतः सः तदर्थः उपधानरूपकार्यार्थ एव भवति । उपधानसंस्कार्यस्यापि चरोरुपधानार्थत्वमार्थिकसाधनत्वाभिप्रायम्[2], चरोरुपधानमात्रस्यैव श्रवणात् ॥ तन्मात्रं यावदुक्तं विधीयते, न तु याग इत्युक्तं भवति । ननु वाक्यशेषतो देवतावगमे सति यागः कुतो न कल्प्यत इत्यत आह—श्रुतिसंयोगादिति । वाक्यशेषे तावन्नीवारेष्वेव बृहस्पतिः श्रुतः, न चरौ । स च स्वरूपेणैव, न तु देवतात्वेन । तत्र यदि विध्युद्देशस्य देवताकाङ्क्षा स्यात्तदा तद्गुलान्नीवारशब्दस्य तद्विकारलक्षणामाश्रित्याश्रुतश्चरुसंबन्धो देवतात्वं च बृहस्पतेः कल्प्यते । इह च विध्युद्देशस्योपधानमात्रविधायकत्वेनोपपन्नतया न देवतापेक्षास्ति, चरोरुपधानस्य च देवताविरहात् । अतः कथं वाक्यशेषाच्चरोर्देवतासंबन्धलाभः । चरूपधानं तु प्रकरणादग्न्यङ्गम् । तदङ्गत्वं चाहवनीयाधारस्थण्डिलनिष्पत्त्यर्थतया वाच्यम् । उपधानस्य स्थण्डिलनिष्पत्त्यर्थत्वमुपधेयचरुद्वारैव, न साक्षात् । ततश्चोपधानलक्षणसंस्कारविधिबलादेवोपधेयस्य चरोरप्युपधानसाध्यस्थण्डिलनिष्पत्तौ विनियोगकल्पनादुपधानविधेरयमर्थः संपद्यते 'उपधानसंस्कृतेन चरुणा स्थण्डिलं निष्पादयेत्' इति । एवं च अनेनैव वचनेन चरोरपि विनियोगात्संस्कार्यत्वं संभवतीति द्वितीयाप्युपपद्यते । 'बार्हस्पत्यो भवति' इति वाक्यमपि प्राग्दीव्यतीयेष्वर्थेष्वपत्यादिषु विहितण्यप्रत्ययान्तत्वेन विशिष्य देवतार्थत्वे विध्युद्देशाकाङ्क्षालक्षणप्रमाणाभावाद्यथाकथंचिन्नीयमानमपि न दुष्यति । तस्मादुपधानमात्रविधिरिति । वृत्तमिदमधिकरणम् ॥

'त्वाष्ट्रं पाल्लीवतमालभेत' इति प्रकृत्यामनन्ति 'पर्यग्निकृतं पाल्लीवतमुत्सृजति' इति । तत्र संशयः किमिह यागान्तरविधिः, उत त्वाष्ट्रवाक्यविहिते कर्मणि पर्यग्निकरणान्ताङ्गकलापविधि-

1. संयुक्तः तदर्थः अतः—क. 2. अभिप्रायगर्भम्—ख

रिति। तत्र 'चरुमुपदधाति' इत्यत्र 'बृहस्पतेर्वा एतदन्नम्' इति वाक्यशेषस्य देवतासमर्पकत्वाभावेन

८. पात्नीवतस्य पर्यग्नि-करणगुणकत्वाधिकरणम्।

यागान्तरविध्यसंभवेऽपि प्रकृते विधावेव 'पात्नीवतम्' इति तद्धितान्तेन देवता-संबन्धावगमाद्यागान्तरविधिः संभवति। 'उत्सृजति' इति प्रत्ययप्रतिपाद्य-विधेर्हि 'पात्नीवतम्' इत्यत्रैव संनिधानादन्वयः, न तु 'पर्यग्निकृतम्' इत्यत्र। ततश्च वायव्यवाक्यवद्द्रव्यदेवतासंबन्धाक्षिप्तयागविधिः। प्रकृत्यंश उत्पूर्वकसृजिधातुर्यागविधिबलादुत्सर्गस्य प्राप्तेः प्रत्ययानुग्रहमात्रार्थः। पर्यग्निकृतशब्दश्च चोदकप्राप्तपर्यग्निकरणानुवादः। एवं च 'पात्नीवतयागेन कुर्यात्' इत्येव वाक्यार्थ इति न वाक्यभेदः। न च त्वाष्ट्रवाक्ये पात्नीवतशब्दादुपस्थितस्यैव यागस्य पर्यग्निकृतवाक्ये पात्नीवतशब्देन प्रत्यभिज्ञानात्कथं यागान्तरविधिरिति वाच्यम्। त्वाष्ट्रवाक्ये हि पत्नीवांस्त्वष्टा देवतात्वेन निर्दिश्यते, अन्यथा त्वष्टृपदवैयर्थ्यात्। पर्यग्निकृतवाक्ये तु पत्नीवानेव निर्दिश्यत इति कथं तेन त्वाष्ट्रवाक्यविहितयागप्रत्यभिज्ञासंभवः। किंच, त्वाष्ट्रवाक्यविहिते कर्मणि पर्यग्निकृतवाक्येन किं विधीयते; किं पर्यग्निकरणम्, उतोत्सर्गः, अथवा पर्यग्निकृत्वोत्सृजतीति क्रमः, किं वा पर्यग्निकरणान्ताङ्गकलापः। नाद्यः, चोदकत एव पर्यग्निकरणस्य प्राप्तत्वात्। न द्वितीयः, देवतोद्देश्यकद्रव्यत्यागात्मकयागविधायकत्वाष्ट्रवाक्यादेव यागरूपस्योत्सर्गस्य सिद्धत्वात्पर्यग्निकृतशब्दवैयर्थ्याच्च पर्यग्निकरणविशिष्टपात्नीवतोद्देशेनोत्सर्गविधौ च विशिष्टस्यैवोद्देश्यत्वापत्त्या वाक्यभेदात्। न तृतीयः, पर्यग्निकृत्वोत्सृजतीति क्रमस्यापि चोदकत एव प्राप्तेः। न चतुर्थः, पर्यग्निकरणान्ताङ्गकलापस्यापि चोदकत एव प्राप्तेः। उत्तराङ्गपरिसंख्याने च त्रैदोष्यापत्तेः। एवं च पूर्वकर्मणि विधेयालाभादपि 'गुणश्चापूर्वसंयोगे' इति गुणाधिकरणन्यायेन यागान्तरविधिपरमेव पर्यग्निकृतवाक्यमिति प्राप्ते, सिद्धान्तयति—

पात्नीवते तु पूर्ववत्त्वादपच्छेदः॥ १९॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। पात्नीवते 'पर्यग्निकृतं पात्नीवतम्' इति वाक्ये कर्मान्तरविधिर्न भवति, किंतु पूर्ववत्त्वात् प्रत्यभिज्ञायमानपूर्वकर्मवत्त्वात्। पूर्वकर्मण्येव पर्यग्निकरणान्ताङ्गकलापविधानेनोत्तराङ्गानामपच्छेदः[1] निवृत्तिर्भवति॥ अयमाशयः। त्वाष्ट्रवाक्ये तावत् 'त्वाष्ट्रम्' 'पात्नीवतम्' इति च तद्धितान्तपदं प्रत्येकमेव देवतात्वं गमयति, न त्वत्राग्नीषोमीयादिवत्समासोत्पन्नेनैकेन तद्धितेन त्वष्टुः पत्नीवतश्च देवतात्वावगमः, येन व्यासक्तं देवतात्वं स्यात्। न च प्रत्येकं देवतात्वे विकल्पः स्यादिति वाच्यम्। एकेनैव वाक्येन युगपदुभयोर्विहितत्वेन एकक्रियावशीकृततया अन्योन्यनियमलाभात्। न हि व्रीहियवादिविधाविवात्र वाक्यभेदोऽस्ति। ततश्च यथा देवदत्तयज्ञ-

1. पूर्वत्वादवच्छेदः।

'दत्तयोर्माता देवदत्तमातेति यज्ञदत्तमातेति च पृथग्व्यपदिश्यते एवं त्वष्टृपत्नीवतोर्याग: 'पात्नीवत:' इत्यपि पृथग्व्यपदेशमर्हतीति पर्यग्निकृतवाक्ये पात्नीवतशब्देन त्वाष्ट्रवाक्यविहितयागप्रत्यभिज्ञानसंभवान्न कर्मान्तरविधानं युक्तमाश्रयितुम। ततश्च 'पात्नीवतम' इत्यस्यानुवादत्वात् 'उत्सृजति' इति विधिप्रत्ययस्य 'पर्यग्निकृतम्' इत्यत्रैवान्वयः। तथा च 'पात्नीवतम' इत्यनेन उत्सृजिना च प्रकृत्यंशेन पात्नीवतयागमनूद्य प्रत्ययांशेन पर्यग्निकरणान्ताङ्गकलापश्चोदकप्राप्तोऽप्युत्तराङ्गपरिसंख्यानाय विधीयते। अप्राप्तपरिसंख्यात्वाच्च न वैदोष्यम्। चोदकप्रवृत्तेः प्रागेव हि पर्यग्निकरणान्ताङ्गकलापविधिः प्रवर्तते। ततश्च तेनैव पर्यग्निकरणान्ताङ्गकलापेन शान्ताकाङ्क्षत्वात्पात्नीवतयागोऽयं नातिदेशमपेक्षते। यथा गृह्यमेधीययागः 'आज्यभागौ यजति' इति चोदकात्प्रागेव प्रवृत्तविधिना कल्प्याज्यभागाभ्यां निराकाङ्क्षो नातिदेशमपेक्षते तद्वत्। एवं चोत्तराङ्गकलापस्यार्थादेवाप्राप्तेस्तन्निवृत्तौ विधेर्व्यापाराभावान्न वैदोष्यम्। न चैवमपि पर्यग्निकरणमात्रविधिरेव स्यान्न तु तदन्ताङ्गकलापविधिः 'शंयवन्ता प्रायणीया संतिष्ठते' इत्यादिवदन्तशब्दाभावादिति वाच्यम्। अन्तशब्दाभावेऽपि पर्यग्निकृतशब्दबलादेव तदन्ताङ्गानां प्रतीतेः। पर्यग्निकृतशब्दो हि भूतकालार्थकक्तप्रत्ययान्तः कर्मसाधनः प्राकृतपर्यग्निकरणावस्थापन्नतावचनः। न हि पूर्वाङ्गेष्वकृतेष्वियमवस्था संपद्यत इति तदन्ततालाभः। न च पात्नीवतविशिष्टोत्सर्गानुवादेन तदन्ताङ्गकलापविधौ विशिष्टोद्देशाद्वाक्यभेदः, उत्सर्गमात्रानुवादेन तद्विधावतिप्रसङ्ग इति वाच्यम। उत्सृजतिमात्रस्यैवोद्देश्यसमर्पकत्वे विशिष्टोद्देशदोषानवकाशात्, संनिधानाच्च प्रकृतस्यैवोद्देश इति नातिप्रसङ्गः। यद्यपि नवमोपान्त्याधिकरणे 'पर्यग्निकृतानारण्यानुत्सृजति' इत्यत्र प्रज्ञाते[1] प्रकृतकर्मणि पर्यग्निकरणान्ताङ्गकलापविधिः सिद्धान्तयिष्यते, तथापि प्रत्यभिज्ञास्मि नास्तीत्यधिकाविचारार्थमिदमधिकरणमित्यपौनरुक्त्यमिति। वृत्तमधिकरणम॥

'योऽदाभ्यं गृहीत्वा सोमाय यजते' इति 'योंशुं गृह्णाति' इति चानारभ्य श्रुतम। तत्र संशयः किं ज्योतिष्टोमे ग्रहणविधिर्यागान्तरविधिर्वेति। तत्र 'पर्यग्निकृतं पात्नीवतम—' इति वाक्ये पात्नीवतशब्देन पूर्वकर्मणः प्रत्यभिज्ञानात्तत्र गुणविधावप्यनारभ्याधीतत्वेनात्र प्रत्यभिज्ञाविरहाद्यागान्तरविधिरेव स्यात्। किंच संकल्पाद्युपयोगाभावेनांश्वदाभ्यशब्दयोर्ग्रहणसंस्कारनामधेयत्वानर्हतया ग्रहणव्यतिरिक्तमेवंसंज्ञकं यागान्तरमेव वाक्यद्वयेऽपि विधेयम। यद्यप्यदाभ्यवाक्ये 'यजते' इत्येव श्रुतं न तु रूपम् अंशुवाक्ये तु 'गृह्णाति' इत्येव श्रुतं न तु यजिरपि, तथापि ज्योतिष्टोमे 'ऐन्द्रवायवं गृह्णाति' इत्यादाविव गृह्णातिशब्ददर्शनादंशुवाक्येऽपि विधेयं कर्म ज्योतिष्टोमप्रकृतिकमिति निश्चिते सति

९. अदाभ्यादीनां ग्रहनामताधिकरणम्।

[1] प्रतिज्ञाते — ग.

तदीयद्रव्यदेवतालाभाद्यागत्वाध्यवसायः। यथा आघारवाक्ये आघारसंज्ञककर्ममात्रे विहिते 'इत इन्द्र ऊर्ध्वो अध्वरः' इति मन्त्रवर्णात् 'चतुर्गृहीतं वा एतत्' इति वाक्यशेषाच्च द्रव्यदेवतालाभाद्यागत्वाध्यवसायः, तद्वदेव अदाभ्यवाक्येऽपि 'यजते' इति सामान्यरूपेण देवतावगमेऽपि इन्द्रवायुत्वादिविशेषाध्यवसायः। गृह्णातिस्तु चोदकप्राप्तानुवादः। तस्मादंश्वदाभ्यसंज्ञकयागान्तरयोर्विधिरिति प्राप्ते, सिद्धान्तयति—

अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ २० ॥

द्रव्यशब्देन द्रव्यदेवतासंबन्धो लक्ष्यते। केवले अरूपे गृह्णातौ श्रूयमाणे कर्मणः ज्योतिष्टोमस्य अङ्गभूतं ग्रहणं विधेयं स्यात्। अदाभ्यनामकोंशुनामकश्च ग्रहणसंस्कार एवात्र विधीयते, न तु यागान्तरविधानमित्युक्तं भवति। कुतः कैवल्यम्। अद्रव्यत्वात् द्रव्यदेवताराहित्यात्॥ अयमाशयः। संस्कारकर्मणो नामानर्हत्वे ह्युभयत्रापि यागविधिर्भवेत्। न तु तदस्ति, सामानाधिकरण्यतः प्रतीयमानस्य ग्रहणसंस्कारनामधेयत्वस्य दृष्टप्रयोजनाभावमात्रेण परित्यक्तुमनुचितत्वात् तन्नामकतया ज्ञानमभ्युदयकारीति कल्पयितुं शक्यत्वात् अंशुवाक्ये यजेरश्रुतत्वेन अदाभ्यवाक्ये यजेर्व्यवहितत्वेन तन्नामधेयत्वासंभवाच्च। तस्मादंश्वदाभ्यनामकग्रहणसंस्कारावेवात्र विधीयेते, न तु यागान्तरं। एवं चांशुवाक्ये प्रथमं तत्संज्ञककर्ममात्रविधौ तस्य च ज्योतिष्टोमविकृतित्वकल्पनया ततो रूपलाभे सति पश्चाद्यागत्वाध्यवसायः, अदाभ्यवाक्येऽपि प्रथमं सामान्येन देवतात्वावगमे पश्चात्तद्विशेषाध्यवसाय इति क्लेशोऽपि नानुभवितव्यो भवति। आघारवाक्ये तु मन्त्रवर्णाद्वाक्यशेषाच्च द्रव्यदेवतालाभाद्युक्तं यागरूपत्वम्। न च ग्राह्यविशेषापरिज्ञानात्प्रयोजनाभावाच्च ग्रहणविधिरप्यनुपपन्न इति वाच्यम। ज्योतिष्टोमाभ्यभिचरितगृह्णातिशब्दोपस्थितज्योतिष्टोमाङ्गत्वे सति तत्रापि संनिपातित्वे सत्यारादुपकारकत्वस्यान्याय्यतया संनिपातित्वस्य च सोमसंस्कारद्वारैव वक्तव्यत्वेन संस्कार्यसोमाख्यग्राह्यद्रव्यलाभात्कतूपकारलक्षणप्रयोजनलाभाच्च। ननु 'आज्यं गृह्णाति' 'चतुर्जुह्वां गृह्णाति' इति दर्शपूर्णमासयोरपि गृह्णातेर्दर्शनान्न ततो ज्योतिष्टोमाङ्गतालाभ इति वाच्यम। तैत्तिरीयके षष्ठकाण्डे षष्ठप्रपाठके 'देवा वै यद्यज्ञेऽकुर्वत' 'देवा वै प्रबाहुग्रहानगृह्णत' इत्यनुवाकयोः ज्योतिष्टोमप्रकरणगतयोः पुनराम्नातत्वेन ज्योतिष्टोमाङ्गतासंभवाददाभ्यवाक्ये 'यजते' इति यजिः प्रकरणप्राप्तज्योतिष्टोमस्यानुवादः। एवं च यजिना प्रकृतयागमनूद्य तदुत्तरप्रत्ययेन रेवतीवारवन्तीयपूर्वपक्षन्यायेन गृहीत्वाशब्दार्थसंक्रान्तविधिशक्तिना ग्रहणसंस्कारविधिरिति स्थितम्। अत्रेदं वक्तव्यम्। तैत्तिरीयक अदाभ्यमधिकृत्य 'उपनद्धस्य गृह्णाति' 'अनभिषुतस्य गृह्णाति' इति द्रव्यं श्रुतम्। 'योऽदाभ्यं गृहीत्वा सोमाय यजते' इत्यत्र सोमस्य देवतात्वं चतुर्थ्यावगतमिति द्रव्यदेवतासंबन्धाक्षिप्तयागविधिः संभवति। तथांशुविधिमधिकृत्य तैत्तिरीयके 'सकृदभिषुतस्य गृह्णाति' इति

द्रव्यं श्रुतम्। तथा वामदेव्यमिति साम। 'तद्वा अस्यायतनं मनसा गायमानो गृह्णाति' इति विहितवामदेव्यसामाधारभूतया 'कया नश्चित्रः' इत्यृचा प्राजापत्यया 'उपयाम गृहीतोऽसि प्रजापतये त्वेति गृह्णाति' 'प्रजापतये त्वा स्वाहेति जुहोति' इत्यादिबोधायनादिपठितमन्त्रवर्णेन च देवता लभ्यत इति तत्रापि यागविधिरेव युक्तः। तथा च प्रस्तरप्रहरणवत्स्विष्टकृद्वदाधारवच्चांश्वदाभ्ययोरपि ग्रहणसंस्काररूपत्वं यागरूपत्वं च युक्तम्। अधिकरणस्य तु 'यत्पृश्नयो गृह्यन्ते' इत्यनारभ्य श्रुतं तैत्तिरीयकवाक्यं विषयः। तत्रापि 'प्रातःसवनिकाभिषवाय होतृचमसीयाभिरद्भिः उपसिक्तं संतृप्तं राजानं दशया व्यूह्याभिमृशति वायुरसि प्राणो नामेति दशभिः' इति द्रव्यदेवतासंबन्धलाभो न शङ्क्यः। न ह्यत्र देवता चोद्यते, तद्धितचतुर्थ्योरभावात्। मन्त्रवर्णस्तु न स्वतो देवतां विधातुं क्षमः; किंतु यत्र यजतिजुहोत्यादिशब्दतो देवतोद्देश्यकद्रव्यत्यागात्मकयागावगमस्तत्रैव देवताविशेषकल्पनाय प्रभवति। तत्र हि सामान्यरूपेणावगतायाऽपि देवताया विशिष्यावगम आकाङ्क्ष्यते। तत्र तद्धितचतुर्थ्योः सत्त्वे तत एवावगमः। तदुभयाभावे तु मन्त्रवर्णात्तदवगमः। न ह्यत्र यजतिः श्रूयते, जुहोतिर्वा अन्यो वा यागवचनः कश्चिच्छब्दः। तस्मान्नात्र मन्त्रवर्णतो देवतालाभः। तदेतत् 'पुरोडाशकपालेन तुषानपास्यति' इति कात्यायनसूत्रव्याख्यावसरे कर्कभाष्ये व्यक्तमुपपादितम्। आधारशब्दस्तु क्षारणशिरस्कयागात्मकहोमे वर्तत इति तत्प्रख्याधिकरणेऽवोचाम। अतस्तत्र मान्त्रवर्णिकदेवतालाभ इति युक्तम्। अत एव शतपथब्राह्मणे 'तं वा एतमग्निमैन्धिषत, तस्मिन्नेते प्रथमे आहुती जुहोति' इत्युपक्रम्य 'स्रुवेण तमाघारयति' 'स्रुचा तमाघारयति' इत्यादि श्रुतम्। अत एव च पूर्वाधारे स्वाहाकारनिषेधोऽपि तत्र श्रूयमाणोऽर्थवान्भवति, क्षारणमात्रविधौ देवतोद्देश्यकद्रव्यत्यागात्मकयागाभावेन स्वाहाकारस्याप्राप्त्या तत्प्रतिषेधानर्थक्यात् 'स्वाहा देवहविर्दाने' इति कोशानुसारेण स्वाहाशब्दस्य यागविषयकत्वावगमात्। आघारं प्रकृत्य 'इत इन्द्र इति जुहोति' इत्येव कात्यायनः। न चैवं सत्याघारशब्देन प्रथममाघारसंज्ञककर्ममात्रेऽवगते वाक्यशेषमन्त्रवर्णाभ्यां देवतावगतौ सत्यां पश्चात्तस्य यागत्वाध्यवसाय इति कथं वार्तिकोद्घोषः, होमत्वेनैव तस्य प्रथममवगमादिति वाच्यम्। आघारपदेन कश्चिद्धोमविशेष इत्येतावन्मात्रावगमे सति [1]तस्य विशेषस्य चतुर्गृहीताज्यैकदेशत्वेनेन्द्रत्वेन च द्रव्यदेवताज्ञानाभावे पर्यवसानाभावाद्वाक्यशेषमन्त्रवर्णाभ्यां तथा पर्यवसानमित्यभिप्रायकत्वात्। यथा चैतत्तथा आघाराग्निहोत्राधिकरणे निरूपितमस्माभिः। तस्मात् 'यत्पृश्नयो गृह्यन्ते' इति वाक्यमिहोदाहरणम्। 'संतृप्तं राजानम' इत्यव्यभिचरित-[2]ज्यौतिष्टौमिकाङ्गसंवलनाज्ज्योतिष्टोमाङ्गता पृश्निग्रहाणाम्। एवम् 'प्राणग्रहान्गृह्णाति' इत्यप्युदाहरणम्। तत्र हि 'संतृप्तस्य राज्ञो नवनवांशूनयंपुरोभुव इति प्राणभृन्मन्त्रैः प्रतिदिशं व्यूह्य प्राचीदिशामित्यपानभृन्मन्त्रैः प्रत्यूहति' इति प्रयोगः। तत्र 'प्रायणीये चोदनीये च गृह्यन्ते' 'दशमेऽहन्गृह्यन्ते'

1. तस्य चतुर्गृहीत...—क. 2. ज्योतिष्टोम—क, ग, ङ.

इति च वचनात्प्राणग्रहाणां द्वादशाहिकप्रायणीयादिसुत्याविशेषार्थता। 'ज्योतिष्टोमे वा गृह्णीयाद्-गदो हैव भवति' इति शाखान्तरम्। बोधायनादिसूत्रेऽप्येवमित्यास्तां तावत्। इत्यंश्वदाभ्याधिकरणम्॥

'य एवं विद्वानग्निं चिनुते' इत्यत्र किं यावदुक्तमग्निसंस्कारात्मकं चयनं विधीयते, उताग्निसंज्ञकयागान्तरं विधीयते, किं वा ज्योतिष्टोमादौ गुणविधिरिति संशये, पूर्वपक्षयति—

अग्निस्तु लिङ्गदर्शनात्क्रतुशब्दः प्रतीयेत॥ २१॥

तुशब्दः अंश्वदाभ्ययोर्वैषम्यं द्योतयन्प्रथमतृतीयौ पक्षौ निराचष्टे। अंश्वदाभ्ययोरनारभ्यपठितयोरपि प्रकरणे पुनःपाठाज्ज्योतिष्टोमाङ्गता। न चेदं वाक्यं ज्योतिष्टोमप्रकरणे पठ्यते।

१०. अग्निचयनस्य संस्कारताधिकरणम्।

अतो न तत्र गुणविधिः। वैयर्थ्याच्च न स्वतन्त्रसंस्कारविधिः। न च 'ऋद्ध्नोत्येव' इत्यार्थवादिकफलश्रवणात्स्वातन्त्र्यं शङ्क्यम्, फलवत्त्वे संस्कारकर्मत्वस्यैवानुपपत्तेः। तदेवं तुशब्देन प्रथमतृतीयपक्षौ निराकृत्य द्वितीयपक्षमवलम्बते—अग्निः क्रतुशब्द इति। अग्निः अग्निशब्दः क्रतुशब्दः यागवाचकः प्रतीयेत, 'अग्निं चिनुते' इत्यस्य हि अग्निसंज्ञकयागं कुर्यादित्यर्थः। एवं च 'अग्निं चिनुते' इत्यस्य चयनविधायकत्वाभावात् 'इष्टकाभिरग्निं चिनोति' इति वाक्यमिष्टकाविशिष्टचयनविधायकं संपद्यते। तच्च प्रकरणात् 'अग्निं चिनुते' इति वाक्यविहितयागाङ्गमिति तद्वाक्यप्राप्तचयनस्य चिञ्धातुरनुवादः। ननु यजिरत्र न श्रूयते। तथा च यजिसामानाधिकरण्याभावादग्निशब्दस्य कथं यागनामत्वमित्यत आह—लिङ्गदर्शनादिति। 'अग्नेः स्तोत्रम् अग्नेः शस्त्रं, षडुपसदोऽग्नेः' इति ज्योतिष्टोमयागाङ्गस्तोत्रशस्त्रादिदर्शनादग्नेर्यागात्मकत्वमध्यवसीयते। किंच 'अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तं षोडशिना तमतिरात्रेण तं द्विरात्रेण' इत्यादीनि 'तमेकादशरात्रेण' इत्यन्तानि चतुर्दश वाक्यानि श्रुतानि। 'तमुक्थ्येन' इत्यादिषु 'अनुयजन्ति' इत्यनुषज्यते। तत्राद्यानि चत्वारि वाक्यान्यग्निनामकस्य यागस्य संस्थाविधिपराणि। 'अग्निं यजन्तीति यत्तदग्निष्टोमसंस्थेन' इत्यादिवचनव्यक्तिः। 'तं द्विरात्रेण' इत्यादीनि तु तस्यैव यागस्य कालविधिपराणि। 'अग्निं यजन्तीति यत्तद्विरात्रेण द्वाभ्यां रात्रिभ्याम्' इत्यादिवचनव्यक्तिः। एतेषु सर्वेषु वाक्येषु 'अग्निं यजन्ति' इत्यनुवादेऽग्निशब्दस्य सामानाधिकरण्यादुत्पत्तावग्निशब्दस्य यागनामत्वाध्यवसायः। 'अग्निम्' इति द्वितीया तु 'अग्निहोत्रम्' इत्यादिवदुपपाद्या। आहवनीयाद्यग्निसाध्यत्वादग्निशब्दश्च तत्प्रख्यन्यायेन नामधेयत्वम्। अनुशब्दश्च 'एष वा व प्रथमो यज्ञो यज्ञानां य एतेनानिष्ट्वाथान्येन यजेत' इत्यादिवाक्यावगताग्निष्टोमानन्तर्यस्यानुवादकः। तस्मादग्न्याख्ययागविधिः॥

इति प्राप्ते, सिद्धान्तयति—

द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥

वाशब्द एवार्थे। 'अग्निं चिनुते' इत्यत्र अग्निशब्दस्य द्रव्यं ज्वलनात्मकमेवाभिधेयं स्यान्न तु यागः, अग्निशब्दस्य ज्वलनेऽत्यन्तरूढस्य यागवचनतायां अयुक्तत्वात्। अत उद्भिदादिवद्यौगिकत्वाभावाच्चित्राग्निहोत्रश्येनादिवद्वाक्यभेदतत्प्रख्यतद्वयपदेशत्वाभावाच्च न यागनामधेयत्वमग्निशब्दस्य युक्तमाश्रयितुम्। नन्वाहवनीयादिप्राप्त्या तत्प्रख्यन्यायेनाग्निशब्दस्य यागनामत्वमुक्तमिति तत्राह— चोदनायास्तदर्थत्वादिति। 'अग्निं चिनुते' इत्यादिवाक्यस्य ज्वलनरूपद्रव्यार्थत्वात्॥ न हि 'अग्निं चिनुते' इति वाक्ये अग्निर्विधिरिष्यते, येनाहवनीयादिप्रापकशास्त्रादेव विधित्सितगुणप्राप्त्या नामत्वं स्यात्। किंतु प्रसिद्धाग्निशब्दवाच्यज्वलनानुवादेन तस्य चयनसंस्कारो विधीयते। 'चयनेन स्थण्डिलं निष्पाद्य तत्राग्निस्थापनमुखेन क्रतुमुपकुर्यात्' इति। अतो नात्र तत्प्रख्यन्यायावतारः। तथा च यागविधेरभावात् 'अग्निष्टोमेनानुयजन्ति' इत्यादिवाक्यानि न संस्थादिविधिपराणि, किंतु तस्यैव चयनसंस्कारस्य तथाविधक्रतुसंबन्धविधिपराणि। न च तेषु वाक्येषु केवलाग्निशब्दश्रवणात्कथं ततः संस्कारस्य क्रतुसंबन्धविधिरिति वाच्यम्। एषु हि वाक्येष्वग्निशब्दः प्रकरणाच्चयनसंस्कृते ज्वलने वर्तते। 'अनुर्लक्षणे' इत्यनोः कर्मप्रवचनीयत्वाद्द्वितीया। लक्षणत्वं च तत्र हेतुत्वम्। 'परापि. हेतौतृतीया बाध्यते' इति वैयाकरणाः। तथा च 'स्थण्डिलनिष्पत्तिप्रणाडिकया चयनसंस्कृतेनाग्निनाग्निष्टोमादीन्कुर्यात्' इति फलितमिति चयनसंस्कारस्य क्रतुसंबन्धलाभः। एवं चाग्निष्टोमादिवाक्येष्वग्निशब्दस्य यजिसामानाधिकरण्यमप्युक्तं निरस्तम्, अग्निशब्दस्य वैयधिकरण्येनैवान्वयस्योपपादितत्वात्। तस्माज्ज्योतिष्टोमादिषु गुणविधिः॥

लिङ्गदर्शनं विघटयति—

[1]तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि ॥ २३ ॥

'अग्नेः स्तोत्रम्' इत्यादिवाक्येषु क्रतुः यागः तदाख्यः अग्निशब्दप्रतिपाद्यः स्यात्। कुतः। तत्संयोगात् तेन मुख्यविधया अग्निशब्दार्थेन ज्वलनेन चयनसंस्कृतेन संयोगात्। प्रणाडिकया तत्राग्निशब्दः क्रतुलक्षक इति यावत्। तेन कारणेन तस्य अग्निसंयुक्तक्रतोरेव तानि वाक्यानि षष्ठ्युपसत्कत्वादिधर्मविधायकानि संपद्यन्ते, तत्रागत्या अग्निशब्दः क्रतुलक्षकः। इह तूक्तरीत्या सत्यां गतौ ज्वलनवचनत्वमेव युक्तम्। 'अग्निं प्रोक्षति' 'अग्निमधिरोहति' इत्यादौ त्वग्निशब्दो ज्वलनाधारे लाक्षणिकः। 'ब्रह्मवादिनो वदन्ति, यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति, यच्छन्दोभिश्चिनोति, अग्नयो वै छन्दांसि, तस्मादग्निरुच्यते' इत्यादिवाक्यशेषास्तु तत्र तात्पर्यग्राहका इत्यन्यदेतत् इति। वृत्तमधिकरणम्॥

1. क्रतुसंयोगात्.

वृत्तो गुणविचारः। इदानीं प्रकरणान्तरं प्रस्तूयते। कुण्डपायिनामयनं प्रकृत्य ताण्डकब्राह्मणे श्रूयते 'ते मासं दीक्षिता भवन्ति, ते मासि सोमं क्रीणन्ति, तेषां द्वादशोपसदः, उपस-

११. मासाग्निहोत्रादीनां कर्मान्तरताधिकरणम्। द्विश्चरित्वा सोममुपनह्य मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजन्ते, मासं वैश्वदेवेन, मासं वरुणप्रघासैः, मासं साकमेधैः, मासं शुनासीरीयेण' इत्यादि। तत्र 'मासमग्निहोत्रं जुह्वति' इत्यादिषु वाक्येषु संशयः किं नित्याग्निहोत्रादिषु मासगुणविधिः, उत कर्मान्तरविधिरिति। तत्राग्निहोत्रादिकर्मणः 'अग्निहोत्रं जुहोति' इत्यादिवाक्यप्राप्तत्वेनाविधेयत्वात्तदनुवादेन मासविधिः। न च नैयमिकाग्निहोत्रादिकर्मणोऽसंनिहितत्वेनानुपस्थितत्वात्कथं तत्र मासगुणविधिरिति वाच्यम्। असंनिहितस्यापि नाम्नोपस्थितिसंभवात्। न च मासस्य पुरुषकृत्या संपादयितुमशक्यत्वेनानुपादेयस्य कथं विधिरिति वाच्यम। न ह्यत्र कर्मोद्देशेन मासो विधीयते, किंतु 'यो मासस्तत्राग्निहोत्रादि कुर्यात्' इत्येव मासोद्देशेन कर्मविधिः। तस्य च विधेरप्राप्तपक्षपातितया कर्मोद्देशेन मासविधौ पर्यवसानम्। एवं च मासस्यैव विधेयत्वात्कर्मणो विधानाभावान्न कर्मभेदः। विहितस्य विधानमेव हि कर्मभेदप्रयोजकमित्युक्तं शब्दान्तराधिकरणे; न तु यथाकथंचित्पुनरुपादानमात्रम। तस्मान्नित्याग्निहोत्राद्यनुवादेन मासगुणविधिरिति प्राप्ते, सिद्धान्तयति—

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २४ ॥

नित्यस्याग्निहोत्रादिकर्मणः प्रकरणादन्यत्कुण्डपायिनामयनस्य प्रकरणं प्रकरणान्तरम। तत्र पठ्यमाने मासाग्निहोत्रादिवाक्ये प्रयोजनान्यत्वम। प्रयुज्यते अनुष्ठीयत इति प्रयोजनं कर्म। तस्य अन्यत्वम, अप्रकृताभिधानात्कर्मान्तरत्वमित्यर्थः। असंनिहितत्वादग्निहोत्रादिशब्दैर्नैयमिकाग्निहोत्रादिकर्मण उपस्थित्यभावेन तदनुवादेन मासगुणविध्यसंभवात मासविशिष्टमग्निहोत्रादिसंज्ञकं कर्मान्तरमेव मासाग्निहोत्रादिवाक्येषु विधेयमित्युक्तं भवति। न चासंनिहितस्याप्यग्निहोत्रादिकर्मणो नाम्नोपस्थितिसंभवात्तदनुवादेन मासगुणविधिसंभव इति वाच्यम। एवं सति प्राप्तकर्मण्यनेकगुणविधौ वाक्यभेदप्रसङ्गात। यदि हि केवलो मासगुणः श्रूयेत तदा भवेत्तस्य विधिः। 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति' इत्यादि श्रूयते। न चाग्निहोत्रादिकर्मण्युपसदः संभवन्ति। अत उपसदस्तदानन्तर्यं मासश्रुति त्रयं विधेयमिति भवेद्वाक्यभेदः। तथा च नाम्नोपस्थितमपि नित्याग्निहोत्रादिकर्म परित्यज्य कर्मान्तरमेवैषु वाक्येषु विधेयम्। न च 'उपसद्भिश्चरित्वा—' इत्यस्य [1]'तेषां द्वादशोपसदः, सोममुपनह्य मासमग्निहोत्रं जुह्वति' इति पाठप्राप्तोपसदानन्तर्यानुवादकतयोपपत्तेर्वाक्यभेदाप्रसङ्गादस्तु प्रसिद्धाग्निहोत्रकर्मणि गुणविधिरिति वाच्यम्। पाठो ह्याकाङ्क्षितमेव क्रमं प्रापयितुमीष्टे न

1. तेषां द्वादशोपसदः समुपनह्य सोमं मासमग्निहोत्रं जुह्वति— क, ख, ग, घ, ङ.

'त्वनाकाङ्क्षितमपि। एकप्रयोगवचनपरिगृहीताङ्गानामेव हि क्रमाकाङ्क्षा भवति, तेषामित्थंभावाकाङ्क्षया युगपदुपनिपातात्। न च प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनस्य चाङ्गाङ्गिभावोऽस्ति, येन तेषाम् 'कुण्डपायिनामयनमुपयन्ति' इत्येकप्रयोगवचनपरिगृहीतत्वात्क्रम आकाङ्क्ष्येत। 'दीक्षितो न ददाति न जुहोति न पचति' इति सोमक्रतुमध्ये पुरुषार्थहोमप्रतिषेधेन प्रसिद्धाग्निहोत्रादिकर्मणस्तत्रैवोपनिपाताभावाच्च। एवं च काम्येष्टीनामिवात्र पाठस्य क्रमप्रापकत्वासंभवेन 'उपसद्भिश्चरित्वा—' इत्यस्य पाठप्राप्तक्रमानुवादकत्वानुपपत्त्योपसदस्तदानन्तर्यं मासश्रेति त्रयमपि विधेयमिति स्वीकार्यमिति भवेदेव वाक्यभेदः। एतेन 'दीक्षितो न जुहोति' इति प्रतिषिद्धस्य प्रसिद्धाग्निहोत्रादिकर्मणः प्रतिप्रसवरूपेण वा सत्रैकदेशत्वेन वा विधिरिति प्रत्युक्तम्, उक्तरीत्या प्राप्तकर्मण्यनेकगुणविधानासंभवेन प्रतिप्रसवायोगात् सत्रसंबन्धस्योपसदादीनां च प्रसिद्धकर्मणि विधौ वाक्यभेदापत्त्या सत्रैकदेशत्वेन विध्यनुपपत्तेश्च। तस्मादत्र कर्मान्तरविधानमिति भाष्यानुसारी पन्थाः। तमिमं प्रकारं भङ्क्त्वा प्रकारान्तरमुत्प्रेक्षितं वार्तिके। तद्यथा—अप्रकृताभिधानात्मकं प्रकरणान्तरं न पृथक्शब्दान्तरादिवत्कर्मभेदकोपाधिः, प्रसिद्धाग्निहोत्रादिकर्मण्यसंभवत उपसदादिगुणादेव कर्मभेदसिद्धेः। ननु, अत्राप्रकृताभिधानापरपर्यायात्प्रकरणान्तरादेव कर्मभेदो न तु गुणात्; अप्रकृताभिधानं हि प्रागनवगताग्निहोत्रादिकर्माभिधानम्; तच्च प्रसिद्धाग्निहोत्रादिकर्मण्यसंभवत उपसदादिगुणादध्यवसीयते; तथा च कर्मभेदावगमकप्रकरणान्तरस्यात्मलाभे उपक्षीणत्वाद्गुणस्य नात्र कर्मभेदकत्वम् इति चेन्न। एवं सति 'वाजिभ्यो वाजिनम्' इत्यत्राप्यप्रकृताभिधानादेव कर्मभेदापत्तौ गुणस्य कर्मभेदकत्वानुपपत्तिप्रसङ्गात्, पूर्वकर्मासंयोगिनो वाजिनगुणस्याप्रकृताभिधानस्वरूपलाभ एवोपक्षीणत्वात्। किं बहुना, शब्दान्तराभ्यासंज्ञानामपि विधेरप्रकृतविषयत्वबोधन एवोपयोगः। अप्रकृताभिधानाच्च कर्मभेद इति वक्तुं शक्यतया सर्वत्र प्रकरणान्तरमेव भेदकं स्यात्। शब्दान्तरादीनां शेषाणां प्रकरणान्तरेण शेषिणा अविनाभावात्। न हि शब्दान्तरादीनां परस्परपरिहारेणेव प्रकरणान्तरपरिहारेण क्वचिद्वर्तनं संभवति। तथा च तैः सह प्रकरणान्तरस्य कथं पृथक्परिगणनं स्यात्। न हि प्रधानस्योपसर्जनभूतैः सह परिगणनमुचितम्। किंच 'उपसद्भिश्चरित्वा—' इत्यस्य संनिहिताग्निहोत्रवाक्यान्वयेन शान्ताकाङ्क्षत्वात् निराकाङ्क्षत्वाच्च दर्शपूर्णमासादिवाक्यानां न तेषु तस्यान्वयः। एवं च दर्शपूर्णमासादिवाक्येषूपसदां तदानन्तर्यस्य चाविधानान्मासमात्रस्यैव गुणस्य विधानाद्वाक्यभेदाभावेन नाम्नोपस्थितस्य प्रसिद्धदर्शपूर्णमासादिकर्मणः परित्यागाभिधानं प्रकरणान्तरं तत्र नास्तीति कर्मभेदो न स्यात्। तस्मादत्र वाक्यभेदप्रयुक्तमप्रकृताभिधानं न कर्मभेदप्रयोजकम्। किंतु शब्दान्तरादिवदप्रकृताभिधानापादकं किंचिन्निरूपणीयम्। तत्तु प्रकरणविच्छेदापरपर्यायं पूर्वकर्मासंनिधानमेव। तथाहि। विच्छिन्नप्रकरणं कर्म द्वेधा उपादेययुक्तमनुपादेययुक्तं च। तत्र 'यदाहवनीये जुहोति' इत्यादावुपादेयस्थले आहवनीयादिगुणस्य होमे प्रसक्ते संपादयितुं शक्यत्वेनोपादेयतया

होमोद्देशेन विधानसंभवेन विशिष्टविधिगौरवभीत्या कर्मण उद्देश्यत्वावश्यंभावे दूरस्थस्यापि होमस्य सिद्धवन्निर्देशबलेनाभिध्यानादिना कथंचिद्बुद्धौ विपरिवृत्तिं संपाद्य 'यो होमः स आहवनीये' इत्येवं गुणविधिसंभवः। अनुपादेयगुणस्तु पञ्चधा 'देशः कालो निमित्तं च फलं संस्कार्यमेव च। इति मीमांसकाः प्राहुरनुपादेयपञ्चकम्' इति। तदिह मासस्याग्निहोत्रादिकर्मणि प्रसक्ते संपादयितुमशक्यतया दध्यादिवदानयनादिक्रियाविशिष्टत्वेनाननुष्ठेयतया चानुपादेयस्याग्निहोत्रादिकर्मोद्देशेन पर्यवसानगत्यापि विधानासंभवेन 'यो मासस्तत्राग्निहोत्रादि कुर्यात्' इत्येवं मासानुवादेनाग्निहोत्रादिकर्मण एव भावार्थाधिकरणन्यायेन विधेयतया विहितस्य विधानान्यथानुपपत्तेः प्राप्तवन्निर्देशाभावेन परप्रकरणपाठेन च पूर्वकर्मप्रत्यभिज्ञाविरहाच्च सिध्यति कर्मभेदः। 'पौर्णमास्यां यजेत' 'सायं जुहोति' 'प्रातर्जुहोति' इत्यादौ कालोद्देशेन कर्मविधावपि न कर्मान्तरत्वमिति 'संनिधौ त्वविभागात्' इत्यधिकरणेऽनुपदमेव वक्ष्यामः। तत्र, मासस्यानुपादेयत्वेऽपि तत्र कर्मणोऽनुष्ठेयतामात्रेण कथंचिद्विधिसंस्पर्शात् परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणपारार्थ्यात्मकशेषत्वरूपमङ्गत्वमुपपाद्यम्। ननु, मासाग्निहोत्रादिवाक्येषु प्रसिद्धाग्निहोत्रादिकर्मणः संनिधिकृतप्रत्यभिज्ञाविरहेऽपि नामधेयकृता तत्प्रत्यभिज्ञास्ति; न च नाम्ना तद्विपरिवृत्तावपि तत्रानुपादेयस्य सिद्ध्यसंभवाद्विपरिवृत्तिरप्रयोजिकेति वाच्यम्; प्रसिद्धाग्निहोत्रादिकर्मणि मासविध्यसंभवेऽपि तस्यैव कर्मणो नाम्ना विपरिवर्तमानस्य कुण्डपायिनामयनैकदेशत्वेन विधिसंभवादिति चेन्न। प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनैकदेशत्वेन विधानेऽप्यग्निहोत्रादिशब्दस्य धात्वर्थमात्रनामधेयतया तेन भावनाया उपस्थित्यभावेन तद्भेदस्यापरिहार्यत्वात्। किंच 'मासं जुह्वति' इत्याख्यातवर्तिना धातुना स्वरसतो लिङ्गसंख्यान्वयानर्हसाध्यत्वरूपेण कर्मान्तरमभिधीयत इत्यग्निहोत्रादिनाम्नापि साध्यरूपेणैव तदभिधेयम्, नाम्न आख्यातपरतन्त्रत्वात्। अतः कथं मासाग्निहोत्रादिवाक्ये अग्निहोत्रादिनाम्ना प्रसिद्धस्य कर्मण उपस्थितिः। अस्तु वात्र नाम्ना सिद्धरूपेणोपस्थितिः; तथाप्याख्यातेन साध्यत्वेन प्रतीतस्य प्रसिद्धहोमस्य कथं तेनोपस्थितिः। न च नाम्ना तद्रूपोपस्थित्यभावेऽपि नैयमिकाग्निहोत्रादिशब्दो यद्रूपवाचकस्तद्रूपविपरिवृत्तिरस्त्विति वाच्यम्। विध्यर्थं हि प्रसिद्धाग्निहोत्रादिकर्मणो विपरिवृत्तिरिहोच्यते। विधिश्च सिद्धरूपस्य नाम्नोपस्थाप्यस्य न संभवति, भावार्थाधिकरणे धात्वर्थविधिविषयाकारसमर्पणं धातुनैव न तु नाम्नेति प्रतिपादनात्। ततश्च सिद्धरूपस्य नाम्ना विपरिवृत्तिरिहानुपयुक्तैवेति न प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनैकदेशत्वेन विधिसंभवः। एवं च विध्यनर्हानुपादेयगुणश्रवणेन कर्मणो विधेयतया सिद्धवन्निर्देशाभावेन तद्विपरिवृत्त्यभावात्मके पूर्वकर्मासंनिधानापरपर्याये प्रकरणान्तरे सति मासाग्निहोत्रादिविधेरप्रकृतविषयतया प्रयोजनान्यत्वं कर्मभेदः सिध्यतीति सूत्रयोजना। न चैवमप्यनुपादेयगुणानिबन्धनत्वात्कर्मभेदस्य गुणात्कर्मभेद एव पर्यवस्यतीति वाच्यम्। विधीयमानो हि गुणः पूर्वकर्मण्यसंभवन्कर्म भिनत्ति। न चात्र मासगुणो विधानमर्हति, अनुपादेयत्वात्। एवम् 'सरस्वत्या दक्षिणे तीरे आग्नेयोऽष्टाकपा-

'लः पुरोडाशः' इत्यादिदेशसंयुक्ते 'सत्रायागूर्य विश्वजिता यजेत' इत्यादिनिमित्तसंयुक्ते च वाक्ये द्रष्टव्यम्। प्रयोजनं—पूर्वपक्षे प्रसिद्धाग्निहोत्रादिषु यावज्जीवादिकालैर्मासस्य विकल्पः, कुण्डपायिनामयनेऽग्निहोत्राद्यननुष्ठानं च; सिद्धान्ते तु तदुभयाभाव इत्यादृश्यम्। विस्तरस्तूच्चावचो वार्तिकादावनुसंधेयः इति। प्रकरणान्तराधिकरणम्॥

तदेवं देशकालनिमित्तफलसंस्कार्येष्वनुपादेयेषु देशकालनिमित्तानां कर्मभेदकत्वं प्रतिपादितम्। इदानीं फलसंस्कार्ययोः कर्मभेदकत्वं प्रतिपादयितुमिदमारभ्यते। अनारभ्य किंचिच्छ्रूयते

१२. आग्नेयादिकाम्ये- 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः' 'अग्नीषोमीयमेकादशकपालं निर्वपेद्रुष्टर्थाधिकरणम्। ह्यवर्चसकामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' इति। रुक् तेजः। तत्कामो रुक्कामः। तथा अश्वमेधे श्रूयते 'त्रैधातवीया दीक्षणीया' इति। दीक्षणीयाकार्ययजमानसंस्कारकारिणीत्यर्थः। तत्र संशयः, किं प्रकृतेष्वाग्नेयादिषु रुगादिफलं कामयितव्यमिति विधीयते काम्यत्रैधातवीयया संस्कार्योऽश्वमेधयजमान इति च, उत फले संस्कार्ये च कर्मान्तरविधिरिति। तत्र कालदेशनिमित्तानां सिद्धानामेव ग्रहणादनुपादेयत्वं युक्तम्; फलसंस्कार्ययोस्तु पुरुषप्रयत्नसंपाद्यतयोपादेयत्वमेव, कामनामुखेन फलस्यापि पुरुषप्रवृत्तिविषयत्वसंभवात्। शक्यते च दर्शपूर्णमासस्थेनापि रुगादिफलं कामयितुम्, काम्यत्रैधातवीयाप्रयोगेणाप्यश्वमेधयजमानः संस्कर्तुम्। अतः फलसंस्कार्ययोरुपादेयत्वादिह न कर्मान्तरत्वमिति प्राप्ते, सिद्धान्तयति—

फलं [2]चाकर्मसंनिधौ॥ २५॥

चशब्दः संस्कार्यं समुच्चिनोति। प्रकृताग्नेयादिकर्मणः काम्यत्रैधातवीयाकर्मणश्च प्रकरणादन्यत्र श्रूयमाणं फलं संस्कार्यं चानुपादेयत्वात्कर्मभेदकमेव॥ अयमाशयः। कामनामुखेन फलस्य प्रवृत्तिविषयत्वस्वीकारे विधिबलात्कामना संपाद्या स्यात्। न च विधितः कामना संपाद्यते, किंतु [1]स्वरसासिद्धैव सा। ततश्च स्वारसिककामनामुखेन फलस्य विध्यधीनप्रवृत्तिविषयत्वासंभवेनोपादेयत्वासंभवादुद्देश्यत्वमेवेति तदुद्देशेन कर्मैव विधेयम्। न चोद्देश्यत्वेऽपि फलस्य कालदेशयोरिवाग्निमाधिकरणे वक्ष्यमाणरीत्या विधेयत्वं किं न स्यादिति वाच्यम्। देशकालयोः सिद्धवत्काररूपोद्देश्यत्ववतोः कर्मणोऽनुष्ठेयतया तयोरपि तद्विशिष्टवेषेण विध्यधीनप्रवृत्तिविषयतया विधेयत्वोपपत्तावपि फलस्य स्वारसिकप्रवृत्तिविषयत्वलक्षणप्रयोजनत्वरूपेणोद्देश्यस्य विधेयत्वे विधीयमानप्रवृत्तिविषयत्वापत्त्या स्वारसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वव्याघातात्। एवं संस्कार्यस्यापि विध्यन्तरसिद्धस्य फलवदुद्देश्यतया तद्वदेव प्रधानत्वात्तद्व्याघातप्रसङ्गान्न विधेयत्वम्। एतेन निमित्तस्यापि विधेयत्वं

1. स्वतः सिद्धैव सा—कः स्वरसतः सिद्धैव सा—ङ. 2. च. कर्मसंनिधौ.

व्याख्यातम्, तस्य विधेयत्वेऽङ्गत्वापत्त्या निमित्तत्वव्याघातात्। यत्स्वयमनङ्गभूतमेव कर्मप्रवृत्तिं लक्षयति तदेव हि कर्मणो निमित्तमित्युच्यते। तस्मादत्रापि कर्मभेद इत्यास्तां तावत्। प्रयोजनं—पूर्वपक्षे रुगादिफलार्थं न पृथक्प्रयोगः, किंतु गुणफलवद्दर्शपूर्णमासप्रयोगेणैव तत्सिद्धिः; सिद्धान्ते तु कर्मान्तरत्वात्पृथक्प्रयोगः इति। वृत्तमधिकरणम्॥

अथ देशकालनिमित्तफलसंस्कार्याणां संनिधौ प्रत्युदाहरणानि प्रदर्शयितुमारभ्यते। दर्शपूर्णमासयोर्देशकालनिमित्तफलपराणि श्रूयन्ते 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति, तथा 'स्विष्टकृतं यजति' इति विहितस्विष्टकृद्यागस्य संस्कार्यपरम् 'शेषात्स्विष्टकृते समवद्यति' इति। तत्र संशयः किं देशाद्यनुपादेयसंबन्धात्कर्मभेदः, उत प्रकृतमेव कर्म देशादिषु विधीयत इति। अनुपादेयसंबन्धवशात्पूर्ववत्कर्मान्तरत्वं देशादेरुद्देश्यत्वेन कर्मणो विधेयत्वावश्यंभावात्। न हि कर्मणो देशादेश्चेत्युभयोरप्युद्देश्यत्वसंभवः। अतः कर्मणोऽवश्यं विधेयत्वाद्विहितस्य च विधानायोगाद्भवति कर्मभेदः। एवं च कर्मभेदेऽनुपादेयसंबन्ध एव प्रयोजको न त्वसंनिधानमपीति प्राप्ते, सिद्धान्तयति—

१३. अवेष्टेरन्नाद्यफलकत्वाधिकरणम्।

संनिधौ त्वविभागात्फलार्थे न पुनःश्रुतिः॥ २६॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। संनिधौ दर्शपूर्णमासादिकर्मसंनिधौ पठ्यमानेषु समादिवाक्येषु न कर्मान्यत्वम्। कुतः। अविभागात् प्रकृतकर्मात्मकतया प्रत्यभिज्ञानात्। कर्मसंनिधौ सति तस्मिन्नेव कर्मणि बुद्धौ विपरिवर्तमाने धातोरसंनिधिस्थल इव स्वरसतः कर्मान्तरप्रतिपादकत्वाभावे सति, प्रकृतकर्मात्मकतयैव प्रत्यभिज्ञाबलान्न कर्मभेद इत्युक्तं भवति। न चानुपादेयस्य देशकालादेर्विध्यनर्हत्वे कर्मण एव विधानावश्यंभावेन विहितस्य विधानानुपपत्त्या विधिसमभिव्याहारेण धातोः कर्मान्तरपरत्वमेव स्वरसतो वाच्यमिति कथं प्रकृतकर्मणः प्रत्यभिज्ञानमिति वाच्यम्। समादिवाक्येषु हि देशादेरनुपादेयस्य विध्यनर्हतयोद्देश्यत्वात्कर्मण उपादेयत्वमेव लभ्यते एकस्योद्देश्यत्वेऽन्यस्योपादेयत्वनियमात्, न तु विधेयत्वमपि। न चोपादेयस्य विधेयत्वनियमोऽस्ति। प्राधान्येन निर्देश्यत्वं ह्युद्देश्यत्वम्, पारतन्त्र्येण निर्देश्यत्वं चोपादेयत्वम्। अप्राप्तबोधनं विधिः, प्राप्तबोधनमनुवादः। एवं चोपादेयमपि देशादौ कर्म प्राप्तमेव संनिधिवशात्तादृप्येण प्रत्यभिज्ञायत इत्यनुवाद्यम्। अतः कर्मणः पुनर्विधानाभावान्न कर्मभेदः। न च कर्मणोऽनुवाद्यत्वाद्देशादीनां चोद्देश्यत्वात्कस्यापि विधियोग्यत्वाभावात्समादिवाक्यमनर्थकमेव स्यादिति वाच्यम्। देशादेः कर्मसंबन्धविधानार्थत्वात्। देशादेर्हि न फलवत्त्वारम्भिकप्रवृत्तिविषयत्वलक्षणप्रयोजनत्वरूपेण प्राधान्येनोद्देश्यत्वम्, किंतु निर्देशगतस्वांतन्त्र्य-

मात्रेण। ततश्च दध्यादेरानयनादिक्रियाविशिष्टतया[1] यथानुष्ठेयत्वं तथा देशादेर्नानुष्ठेयत्वमिति तावन्मात्रेण तस्य [2]स्वतन्त्रनिर्देशे सत्यपि फलवत्स्वारसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वात्मकोद्देश्यत्वस्य विधेयत्वविरोधिनोऽभावेन संबन्धमुखेन विधिसंभवान्न समादिवाक्यवैयर्थ्यम्। नन्वेवमपि देशकालयोरेव विधेयत्वं लभ्यते, निमित्तफलसंस्कार्याणां तु निमित्तत्वादिव्याघातप्रसङ्गेन विधेयत्वाभावस्य पूर्वस्मिन्नधिकरणे प्रतिपादिततया निमित्तादिवाक्येषु कर्मण एव विधानस्य वाच्यतया कर्मभेदः स्यादित्यत आह— फलार्थे न पुनःश्रुतिरिति। फलग्रहणमुपलक्षणम्। फलनिमित्तसंस्कार्यवाक्येषु यदाग्नेयादिवाक्योत्पन्नानां कर्मणाम् 'स्विष्टकृतं यजति' इत्युत्पन्नस्य च फलादिसंबन्धप्रतिपादनार्थं पुनःश्रवणं तन्न कर्मभेदं प्रयोजयितुं क्षमते, उत्पत्तिविधिभेदस्यैव कर्मभेदप्रयोजकत्वात्। अप्रवृत्तकर्मस्वरूपप्रवर्तनं ह्युत्पत्तिः। न चैकस्य कर्मणोऽनेकवाक्यतोऽप्रवृत्तप्रवर्तनं संभवतीत्युत्पत्तिविधिभेदः शक्नोति कर्म भेत्तुम्। निमित्तादिवाक्यं तु उत्पत्तिवाक्यतः कर्तव्यत्वमात्रेणावगतानां कस्मिन्निमित्ते [3]कस्मिन्फले किं संस्कार्यमिति विधिविशेषापेक्षाणां कर्मणां निमित्तसंयोगादिप्रतिपादनाय पुनर्विधानपरत्वादुत्पन्नविधिरिति न कर्मभेदः। एतेन देशकालवाक्ययोः कर्मविधिस्वीकारेऽप्युत्पन्नकर्मणः प्रयोगविधानार्थत्वान्नात्रापि कर्मभेदप्रसक्तिरित्यप्युक्तं भवति। यथा चैतत्तथैकादशस्य द्वितीयाद्ये स्फुटीभविष्यति। इयांस्तु विशेषः— निमित्तादिवाक्येषु कर्मणो विधेयत्वमेव; देशकालवाक्ययोस्तु कर्मस्वरूपोत्पत्तिविषयेऽनुवाद्यत्वम्, प्रयोगविषये विधेयत्वम्; विषयभेदाच्च न तयोर्विरोध इति। [4]न चैवं सति मासाग्निहोत्रादिवाक्यमपि प्रयोगविधिः न तु उत्पत्तिविधिरिति तत्रापि कर्मभेदो न स्यादिति वाच्यम्। तस्य प्रयोगविधित्वेऽप्युत्पत्तिविधित्वस्यापि सत्त्वात् प्रयोगस्योत्पत्त्यपेक्षत्वेन संनिहितोत्पत्त्यभावे प्रयोगविधेरेव उत्पत्तावपि व्यापारात्; यथा आग्नेयादिवाक्यं द्रव्यदेवतासंबन्धं तदपेक्षितं यागं च विधत्ते तद्वत्। समादिवाक्यं तु प्रयोगविधिसंनिहितानेयादिवाक्यैरुत्पत्तेर्लाभान्न तत्र व्याप्रियते; यथा ऐन्द्रवायवादिवाक्यानि 'सोमेन यजेत' इति संनिहितयागलाभान्न यागविधावपि व्याप्रियन्ते तद्वत्। प्रयोजनं पूर्वपक्षे समादिवाक्येषु कर्मान्तरविधौ प्रतिवाक्यमेकं कर्म, सिद्धान्ते तु सर्वत्रैकमेवेति स्पष्टमेवेति। वृत्तमधिकरणम्॥

तैत्तिरीयके द्वितीयकाण्डे दर्शपूर्णमासब्राह्मणे षष्ठप्रपाठके 'प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्' इत्यनुवाके 'अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन' इत्युपक्रम्य 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति कालद्वयसंयुक्तमेकं वाक्यं श्रुतम्। मानाभ्यं पौर्णमास्यां नास्ति। अग्नीषोमीयपुरोडाशोऽमावास्यायां नास्ति। आग्नेयः पुरोडाश उभयस्मादपि

1. क्रियाविषयतया —ख. 2. स्वातन्त्र्यनिर्देशे—ख, ग. 3. कस्मै फलाय—क, ग.
4. न चैवमपि—ख.

कालान्न व्यवत इत्यच्युतः। तथा तत्रैव ब्राह्मणे पञ्चमप्रपाठके 'इन्द्रं वृत्रं जघ्निवांसम्' इत्यनुवाके

१४. आग्नेयद्विरुक्तेः स्तुत्यर्थता-धिकरणम्।

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इत्येककालसंयुक्तं वाक्यान्तरं श्रुतम्। तत्र संशयः, किं कालद्वययुक्तविहिताग्नेययागाद्यागान्तरं विधीयते, उत स एव यागोऽनूद्यत इति। तत्र पूर्वपक्षयति—

आग्नेयस्तूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

तुशब्दः पूर्वाधिकरणसिद्धान्तोपमर्देन प्रवृत्तिं सूचयति। अनन्यार्था पुनःश्रुतिः कर्मभेदिका, निमित्तादिवाक्येषु च पुनःश्रुतिर्निमित्तसंयोगादिप्रापणार्थेति न कर्मभेदिकेति युक्तम्। इह तु पुनःश्रुतिरनन्यार्था। ततश्च 'एकस्यैव पुनःश्रुतिरविशेषादनर्थकं हि स्यात्' इत्यभ्यासाधिकरणन्यायेन कर्मभेदः सिध्यति। न चैककालयुक्तवाक्यमनुवादः, विनिगमनाविरहात्। ननु, कालद्वययुक्तवाक्यस्य नानुवादकत्वमवकल्पते; एककालसंयुक्तवाक्यविहिताग्नेययागानुवादकत्वं हि तस्य वक्तव्यम्; तच्च न भवति, उत्पत्तिशिष्टामावास्यायुक्तकर्मणः कालद्वयसंयुक्ततयानुवादानुपपत्तेः; न च तस्य पौर्णमासीकालविषये विधित्वमिति वक्तुं शक्यम्, उत्पत्तिशिष्टामावास्याविरोधात्; अत एककालयुक्तवाक्यमेवानुवादः, कालद्वययुक्तवाक्यं तु विधिरित्यस्ति विनिगमकमिति चेत्। कालद्वययुक्तवाक्ये हि नैक एवाग्नेययागः येन एककालयुक्तवाक्योत्पन्नाग्नेययागस्य कालद्वययुक्तवाक्यमनुवादकं न भवेत्। यागद्वयं हि तत्र कालभेदात्प्रतीयते। तत्र चैककालवाक्योत्पन्नामावास्याकालयुक्त आग्नेययागोऽनूद्यते; पौर्णमासीकालयुक्ताग्नेययागान्तरं च विधीयत इति विशेषाभावेनान्यतरवाक्यस्यानुवादत्वनिर्धारणाभावादुभयोरपि विधायकत्वे [1]पुनर्विधानात्कर्मभेदः। ततश्चाग्नेययागस्यामावास्यायाम् अभ्यासः आवृत्तिः प्रतीयेत। अमावास्यायां द्विराग्नेयः प्रयुज्यत इति यावत्।

तमिमं पूर्वपक्षं प्रौढिवादेन निराकरोति—

अविभागात्तु [2]कर्मणो द्विरुक्तो न विधीयेत ॥ २८ ॥

तुशब्द उक्तनिरासे। समिदादिवाक्येषु प्रत्यक्षयाजिपुनःश्रवणात् भेदकत्वम्। इह तु द्रव्यदेवतासंबन्धाद्यागोऽनुमातव्यः। प्रत्यक्षश्रुतं च द्रव्यदेवतं वाक्यद्वयेऽपि न भिद्यते। कुतः। अविभागात् एकत्वेन प्रत्यभिज्ञानात्। अतो द्विःपठितेन वाक्येनान्यतरेणाग्नेयो यागो विधीयेत। उभयोर्वाक्ययोरमावास्याकालयुक्तकर्मविधायकत्वे विकल्पः। एकं वाक्यमेकं पुरुषं प्रत्यमावास्यायुक्तकर्मणो विधायकम्, अन्यच्चान्यं प्रति तस्यैव विधायकमिति यावत्। अथवा विनिगमनाविरहा-

1. सति पुनः—क. 2. कर्मणा द्विरुक्तेर्न विधीयते.

'द्वाक्यद्वयेनाप्येकमेव कर्म युगपद्विधीयत इति व्याख्येयम् । न चान्यतरवाक्यस्यानर्थक्यं शङ्कयम्, कर्मभेदाश्रयणापेक्षया आनर्थक्याश्रयणस्याभ्यर्हितत्वात् । यद्यपि वेदे [1]मात्रामात्रस्याप्यानर्थक्याभ्युपगमो न युक्तः, तथापि प्रौढिवादोऽयम् ।

परमार्थतः सिद्धान्तमाह—

अन्यार्था वा पुनःश्रुतिः ॥ २९ ॥

वाशब्दोऽर्धाङ्गीकारे । 'अविभागात्कर्मणः' इति कर्मैकत्वमुक्तमङ्गीकुर्मः, 'द्विरुक्तेन तु विधीयेत' इत्यानर्थक्यमुक्तं नाङ्गीकुर्मः । ननु पुनःश्रवणस्य का गतिरित्यत आह— अन्यार्थेति । अमावास्यायां केवलाग्निदेवत्योऽष्टाकपालः प्रशस्तः किमुतेन्द्रसहिताग्निदेवत्य एकादशकपाल इत्यैन्द्राग्नप्रशंसापरमेककालसंयुक्तवाक्ये आग्नेययागस्य पुनःश्रवणम्, 'स एतमैन्द्राग्नमेकादशकपालममावास्यायामपश्यत्' इत्युपक्रमात् । एवं चैन्द्राग्नविध्येकवाक्यतया तत्प्रशंसार्थं केवलामावास्यावाक्यमेवानुवाद इति विशेषग्रहणाद्विधिपुनःश्रवणाभावाच्च नाभ्यासन्यायावतारः । तस्मादमावास्यायामपि सकृदेवाग्नेययागस्य प्रयोग इति सिद्धम् ॥

इति द्वितीयाध्याये तृतीयः पादः ॥



1. मात्राभ्यासस्यापि—ख.

चतुर्थः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

तदेवं कर्मभेदे विचारिते तत्प्रसङ्गात्प्रयोगभेदोऽस्मिन्पादे प्राधान्येनाभिधीयते ।

'यावज्जीवमग्निहोत्रं जुहोति' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यत्र किम् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति विहितकाम्यप्रयोगस्यैकस्य यावज्जीवकालमभ्यासो विधीयते, उत जीवने निमित्ते अग्निहोत्रस्य दर्शपूर्णमासयोश्च बहूनां प्रयोगाणां स्वर्गकामवाक्यविहितादन्येषां विधिरिति संशये, पूर्वपक्षयति—

१. यावज्जीविकाग्निहोत्रा धिकरणम् ।

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

कर्मशब्दः प्रयोगवाची । स्वर्गकामवाक्यविहितोऽयं काम्यः प्रयोगः । तस्य धर्मः शेषभूतः कालः, यावज्जीविकः यावज्जीववाक्यगम्यो भवति । काम्यप्रयोगाङ्गतया यावज्जीवकालो विधीयते, न तु जीवने निमित्ते प्रयोगान्तरविधिरिति यावत् । कुतः । प्रकरणात् । एवं हि प्रकरणमनुगृहीतं भवति । यद्यपि प्रकृतकर्मण एव जीवने निमित्ते विधानात्पक्षान्तरेऽपि न प्रकरणबाधः, तथापि प्रकरणमत्र नाधिकाररूपं विवक्षितम्, किंत्वित्थंभावाकाङ्क्षालक्षणं विवक्षितम् । तच्च कर्म धर्ममपेक्षमाणं जीवने निमित्ते पुरुषार्थतया प्रयोगान्तरविधौ बाधितं स्यात् । ननु काम्यप्रयोगस्यैकस्य यावज्जीवकाले कर्तुमशक्यत्वात्प्रयोगबहुत्वमापतितमित्यत आह— अभ्यास इति । यावज्जीवकालविधौ हि तत्सामर्थ्यादेकस्यैव काम्यप्रयोगस्याभ्यासः पर्यवस्यति, यथा 'सोमेन यजेत' इत्युत्पन्नस्यैव यागस्य ऐन्द्रवायवादिवाक्येषु ग्रहणसंस्कारविधिपरेषु द्रव्यदेवतासंबन्धभेदादभ्यासस्तद्वत् तस्माद्यावज्जीवकालकोऽभ्यस्तरूप एक एव काम्यप्रयोग इति फलतीति पूर्वः पक्षः ॥

सिद्धान्तयति—

कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥

वाशब्द एवार्थे। 'धर्मः' इत्यनुवर्तते। एकस्यैव काम्यप्रयोगस्य यावज्जीवकालमभ्यासो नात्र विधीयते; किंतु जीवने निमित्ते नियमेन भिन्नः प्रयोगः पुरुषधर्मतया विधीयते। कुतः। श्रुतिसंयोगात् एवं सत्येव यावज्जीवपदस्य यजेश्च मुख्यवृत्तिकत्वसंभवात्॥ कर्मधर्मत्वे हि 'यावति विन्दजीवोः' इति सूत्रविहितणमुल्प्रत्ययान्तस्य 'अव्ययकृतो भावे भवन्ति' इति जीवनक्रियावाचिनः काले लक्षणा स्यात्; एकस्या यागक्रियाया यावज्जीवकालसंबन्धानुपपत्त्या यजिनाप्यभ्यासो लक्षणीयः स्यात्। न च यथा 'पौर्णमास्यां पौर्णमास्या यजेत' इति विहितकालैकदेशे सकृदनुष्ठानेनापि शास्त्रार्थसिद्धिः, तथा यावज्जीवकालैकदेशे सकृदनुष्ठानेनापि शास्त्रार्थसिद्धिसंभवान्नाभ्यासलक्षणेति वाच्यम। अपौर्णमासीव्यावृत्त्यर्था चोदनेति युक्ता तत्र सकृदनुष्ठानेन शास्त्रार्थसिद्धिः। इह तु चोदना अजीवनकालव्यावृत्त्यर्था न भवति, तदा कर्मणोऽनुष्ठानस्याप्रसक्तेः। किंतु समस्तजीवनकालग्रहणार्थैव चोदनेत्यभ्यासलक्षणा दुर्वारा। तत्र 'यावति विन्दजीवोः' इति णमुल्विधायकं सूत्रम्। तत्र 'समानकर्तृकयोः पूर्वकाले' इत्यनुवर्तते 'णमुल्' इति च। यावत्युपपदे समानकर्तृकयोः क्रिययोर्मध्ये पूर्वकालिकक्रियावृत्तेर्विन्दतेर्जीवतेश्च णमुल्स्यादित्यर्थः। जीवतेश्च प्राणधारणमर्थः। प्राण उच्छ्वासः नासाबहिर्निर्गतो वायुविशेषः। तस्य धारणं नासिकया अन्तराकर्षणम्। 'अव्ययकृतो भावे—' इति वचनाण्णमुलन्तस्यापि जीवनक्रिया अर्थः। पौर्वापर्यं समानकर्तृकत्वं च द्योत्यम। यावच्छब्दो जीवनं सामस्त्येन विशिनष्टि। तच्च जीवनम् 'समानकर्तृकयोः' इति क्रियान्तरसंबन्धे विहितेन णमुल्प्रत्ययेन होमाद्यन्वयितया प्रतीयते। स च संबन्धो यदि जीवनस्य होमादिक्रियायाश्चाङ्गाङ्गिभावादिः स्यात् तर्हि सर्वेष्वपि जीवनेष्ववश्यं होतव्यमित्यर्थस्यासिद्धेर्यावच्छब्दार्थस्य प्राप्त्यभावादनुवादो नावकल्पेत। नापि विधातुं शक्यते, जीवनानामयुगपत्कालकत्वेन तत्सामस्त्यस्य कर्मणि विधानासंभवात्। ततश्च यथा भावलक्षणे विहिता सप्तमी भावं प्रति लक्षणत्वं निमित्तत्वे सति घटते नान्यथेत्यर्थान्निमित्तत्वेऽवतिष्ठते, तथा यावच्छब्दबलादेव संबन्धसामान्यवाची णमुल्प्रत्ययो निमित्तनैमित्तिकभावेऽवतिष्ठत इति जीवनस्य तावन्निमित्तत्वम्। एवं च जीवने निमित्तेऽग्निहोत्रं प्रयोक्तव्यं दर्शपूर्णमासौ प्रयोक्तव्यावित्यर्थः सिद्धः। नैमित्तिकश्चायं प्रयोगः 'धर्मेण पापमपनुदति' इति श्रुतपापक्षयार्थः। 'अकुर्वन्विहितं कर्म निन्दितं च समाचरन्। प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' 'विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति' इति स्मृतिसिद्धस्याकरणप्रयुक्तप्रत्यवायस्य परिहारस्त्वानुषङ्गिकः। नरकेषु पतत्यनेनेति पतनं पापम। ऋच्छति प्राप्नोति। अत्र विहिताकरणजन्यप्रत्यवायप्रागभावपरिपालनं नित्यकर्मणां फलमिति केचित्। तन्न। प्रत्यवायो हि न कर्ममात्रातिक्रमात्; किंतु विहितकर्मातिक्रमात्, 'अकुर्वन्विहितं कर्म—' इति वचनात्। ततश्च सिद्धे विधौ विहितकर्मातिक्रमात्प्रत्यवायावगमः, अवगतस्य प्रत्यवायस्य परिहाराय च विधिरित्यन्योन्या-

श्रयः। अतः पापक्षय एव फलम्। तच्च पापमिह जन्मनि जन्मान्तरे च संचितम्, 'पूर्वा संध्यां जपंस्तिष्ठेन्नैशमेनो व्यपोहति' 'कषाये कर्मभिः पक्वे' 'धर्मेण पापमपनुदति' इत्यादिश्रुतिस्मृतिभ्यः। न च निमित्तोद्देशेन पापक्षयरूपफलोद्देशेन च कथं कर्मविधिः, वाक्यभेदप्रसङ्गादिति वाच्यम्। न ह्येकमेव वाक्यं निमित्ते फले च कर्म विधत्ते, किंतु यावज्जीववाक्यं निमित्ते कर्म विधत्ते, अन्यच्च श्रुतार्थापत्तिकल्पितं वाक्यं फले विधत्त इत्यदोषः। न चैवमप्युद्देश्यद्वय एकस्य विधिर्विरुध्यत इति वाच्यम्। न हि द्वयोरेकरूपमुद्देश्यत्वमस्ति। निमित्तस्य हि [1]सिद्धवत्काररूपमुद्देश्यत्वम्, पापक्षयस्य तु स्वारसिकप्रवृत्तिविषयत्वात्मकप्रयोजनत्वरूपम्। न ह्येवंविधयोरुद्देश्ययोः फलनिमित्तयोरेकत्र विरोधोऽस्ति। यदि हि निमित्तमपि फलवत्कर्मजन्यं स्यात् तदा द्वयोरप्येकप्रकारसंबन्धाद्विरोधः स्यात्। प्रत्युत निमित्ते कर्म क्रियमाणं किं प्रयोजनमिति सुतरामपेक्षते, निमित्तेऽवश्यकर्तव्यताया नैष्फल्ये सत्यनुपपत्तेः। अतश्च निमित्तबलेनापेक्ष्यमाणं फलं कथं तेन विरुद्धं स्यात्। ननु, निमित्तत्वमुपलक्षणत्वं ज्ञापकत्वं व्याप्यत्वरूपम्; व्याप्तिश्च यदा यदा जीवनं तदा तदा कर्मेत्येवंरूपा, अन्यथा कर्मणि कदाचिज्जीवनसंबन्धस्यावर्जनीयत्वेन तत्प्रतिपादनानर्थक्यात्; तथा च व्याप्त्या निमित्ते कर्मण आवश्यकत्वरूपनियमोऽर्थाद्भ्रस्यते, अनावश्यकत्वे निमित्ते सत्यपि कदाचित्कर्मणोऽकरणे निमित्तत्वव्याघातात्; एवं च तच्च फलार्थत्वे फलेच्छायामसत्यामननुष्ठाने सति निमित्तत्वं व्याहन्येत, इति चेत्। न हि काम्यत्वनैमित्तिकत्वयोः स्वरूपेण विरोधोऽस्ति। फलेच्छायाः कादाचित्कत्वमेव हि तद्विरोधे बीजम्। प्रकृते च न पापक्षयस्य [2]कदाचित्कस्यचिदप्यनिच्छास्ति, दुःखाधायकपापनिवृत्तेः सर्वदाभिलषणीयत्वात्। न च येन पापं नैवाचर्यते तस्य न तदिच्छेति वक्तुं शक्यम्, इह जन्मन्यनाचरणेऽप्यनादिजन्मान्तरप्रवाहार्जितपापराशिक्षयेच्छाया अवर्जनीयत्वात्। न च ब्रह्मलोकान्तविरक्तस्य मुमुक्षोर्न तदिच्छेति वाच्यम्। मुमुक्षुणापि पापक्षयस्यावश्यमभिलषणीयत्वात्। न ह्येतज्जन्मनि जन्मान्तरेषु चार्जितेषु नरकप्रापकेषु सत्सु मोक्षः [3]संभवतीति भवति पापक्षयः [4]फलम्, [5]विरक्तस्य कर्मानधिकारात्, 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति श्रुतेः 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता' इत्यादिस्मृतेश्च। तत्र क्रिमिकीटभावाद्याधायकं पापान्तरं प्रत्यवायरूपं नित्यकर्माकरणादुत्पद्यत इति श्रुतिस्मृतिभ्यो गम्यते। तत्र ज्ञानकर्ममार्गपरिभ्रष्टानधिकृत्य 'य एतौ पन्थानौ न विदुस्ते कीटपतङ्गाः' इत्यादिः श्रुतिः 'एतयो न विजानाति मार्गाद्वितयमात्मनः। दंदशूकः पतङ्गो वा कीटो वा जायते ध्रुवम्। अकुर्वन्विहितं कर्म', इत्यादिस्मृतिश्च। तत्परिहारो नित्यकर्मणामानुषङ्गिकं फलमिति षष्ठस्य तृतीये सर्वशक्त्यधिकरणे

1. सिद्धवत्कारनिर्देशरूपम्—क, घ, ङ. 2. कादाचित्कस्य क्वचिदपि—क, ख, ग, घ. 3. संभवतीति पापक्षयः—क, घ, ङ. 4. फलविरक्तस्य—ख, ग. 5. विरक्तस्येत्यादिः स्मृतेश्चेत्यन्तो ग्रन्थः ङ पुस्तके नास्ति.

दुष्टीकावार्तिकतन्त्ररत्नयोः स्पष्टम् । एवं च जीवने निमित्ते कर्मणः पापक्षयार्थतया विधौ नियमोऽप्यर्थसिद्धः । 'कर्तृधर्मो नियमश्चोद्यते' इति भाष्यादिग्रन्थस्याप्ययमेवाशयः । जीवनं च सायंप्रातः पौर्णमास्यादिकालावच्छिन्नं निमित्तमिति षष्ठस्य द्वितीये 'तेषामौत्पत्तिकत्वात्—' इत्यधिकरणे स्पष्टीभविष्यतीत्यास्तां तावत् ।

इतोऽपि कर्तृधर्म इत्याह—

लिङ्गदर्शनाच्च कर्मधर्मे[1] हि प्रक्रमेण नियम्येत
[2]तत्रानर्थकमन्यत्स्यात् ॥ ३ ॥

'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्' इति दर्शपूर्णमासयोः स्वकालातिक्रमे प्रायश्चित्तस्य पाथिकृतेष्टेर्विधानादपि लिङ्गान्न कर्मधर्मः । यः दर्शपूर्णमासयाजी । 'करणे यजः' इति भूते णिनिः । ताभ्यामिष्टवान्सन्नमावास्यां पौर्णमासीं वा कर्म अतिपादयेत् स्वकालात्प्रच्यावयेत् सः पाथिकृतीमिष्टिं कुर्यादिति तदर्थः । कथमिदं लिङ्गदर्शनमित्यत आह—कर्मधर्मे हीति । काम्यप्रयोगस्य शेषतया यावज्जीवनकाले विधीयमाने प्रक्रमेण प्रक्रान्तेन यावज्जीवनकालेन काम्यप्रयोगो नियम्येत । 'यम उपरमे' । समाप्येत । एवं च कर्मधर्मपक्षे यावज्जीवमभ्यस्तरूपस्यैकस्य प्रयोगस्य फलार्थतया मध्ये समाप्त्यभावेन जीवनदशायां न कोऽपि दर्शपूर्णमासाभ्यामिष्टवान्भवतीति यावज्जीवनकालोत्तरमेव दर्शपूर्णमासयाजीति वक्तव्यम् । यथा ऐन्द्रवायवादियज्यभ्यासे कृत्स्ने निर्वृत्ते सति सोमयाजीति तद्वत् । तथाविधस्य च दर्शपूर्णमासयाजिनस्तत्र तस्मिञ्जीवने समाप्ते सति अन्यत् स्वकालातिक्रमप्रायश्चित्ततया पाथिकृतेष्टिविधानम् अनर्थकम् असंगतार्थकं स्यात् । यावज्जीवनकालेन समाप्तदर्शपूर्णमासकर्मणो दर्शपूर्णमासयाजिनो दर्शपूर्णमासातिपत्तिर्हि स्वकालातिक्रमात्मा न यावज्जीवनकालमध्ये वक्तुं शक्या, तदा दर्शपूर्णमासकर्मणः समाप्त्यभावात् ; नापि जीवनोत्तरकाले, तस्य स्वकालत्वाभावात् तदानीं कर्तुर्यजमानस्याभावेन प्रायश्चित्तविध्यसांगत्याच्च । कर्तृधर्मत्वे च यावज्जीवनकालो न कर्माङ्गम् । पौर्णमास्यादिकालावच्छिन्नजीवनभेदाच्च नैमित्तिकः प्रयोगो भिद्यत इति प्रतिमासं दर्शपूर्णमासप्रयोगस्य समाप्तत्वाज्जीवद्दशायामेव[3] दर्शपूर्णमासयाजीति व्यपदेशः संभवतीति तं प्रति प्रयोगस्य पौर्णमास्यादिस्वकालातिपत्तावुत्तरकाले प्रायश्चित्तविधानं समञ्जसं भवति ॥

इतोऽप्येवमित्याह—

[4]व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात् ॥ ४ ॥

1. धर्मो हि. 2. तत्रानुष्ठेयम्. 3. जीवदशायामेव— क, ख, ग, घ. 4. अपवर्गम्.

'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति सोमात्प्राग्दर्शपूर्णमासयोः समाप्तिं दर्शयति। यदि हि यावज्जीवनकालः कर्मशेषः स्यात्तर्हि दर्शपूर्णमासप्रयोगमध्य एव सोमः कर्तव्य इति प्रक्रान्तस्य दर्शपूर्णमासकर्मणः भेदः नाशः स्यात्, 'वि वा एतस्य [1]यज्ञश्छिद्यते यस्य यज्ञे प्रततेऽन्यत्तन्त्रं प्रतायतेऽन्तरन्यामिष्टिं निर्वपन्ति' इत्यादिदर्शनात्। न हि दर्शपूर्णमासप्रयोगं समाप्य सोमोऽनुष्ठातुं शक्यते, यावज्जीवनकालेनैव तस्य समाप्यत्वात्तदुत्तरं च यजमानस्याभावात्। कर्तृधर्मत्वे तु प्रतिमासं दर्शपूर्णमासप्रयोगस्य समाप्तत्वान्नायं दोषो भवति॥

इतोऽप्येवमित्याह—

अनित्यत्वात्तु नैवं स्यात्॥ ५॥

तुशब्दश्चार्थेऽन्वाचये। यदि च यावज्जीवनकालः कर्मधर्मः स्यात्तर्हि 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च जरया ह वा एष एताभ्यां निर्मुच्यते मृत्युना च' इत्येवमग्निहोत्रस्य दर्शपूर्णमासयोश्च जरामर्यत्ववचनं जरामरणमोचनार्थत्ववचनं च संगतार्थकं न स्यात्। जरया वयोहान्या मर्यं समाप्यं न तु स्वेच्छयेति जरामर्यम् अवश्यानुष्ठेयम्। 'ह' 'वै' इति निपातावधारणे। एषः अग्निहोत्रस्य दर्शपूर्णमासयोश्च कर्ता जरया मृत्युना चावश्यं मुच्यते इति तदर्थः। कर्मधर्मे हि वचनमिदं विरुध्यते। कुतः। अनित्यत्वात्। काम्यप्रयोगधर्मे हि यावज्जीवनकाले विधीयमाने नित्यप्रयोगस्यालाभात् काम्यप्रयोगस्य चानित्यत्वादवश्यानुष्ठेयत्वरूपजरामर्यत्ववचनविरोधः, काम्यप्रयोगस्यानित्यस्वर्गमात्रार्थत्वेन जरामरणनिवृत्तिफलकत्ववचनविरोधश्च। अनित्यत्वादित्यस्य नित्याभिलषणीयफलरहितत्वादित्यप्यर्थः। सिद्धान्ते तु नैमित्तिकप्रयोगस्य पापक्षयार्थत्वाच्छरीरारम्भकपापाभावाज्जरामरणनिवृत्त्यर्थत्वमुपपद्यते। न च 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यादिवाक्याज्जरामरणनिवृत्तिफलकत्वस्यापि सत्त्वेन तदनुवाद उपपद्यत इति वाच्यम्। एवं सति 'ह वै' इति निर्धारणानुपपत्तेः। 'जरामरणनिर्मोचनावधारणवचनं नियमपक्ष उपपद्यते' इति भाष्यस्याप्ययमेवाशयः॥

इतोऽप्येवमित्याह—

विरोधश्चापि पूर्ववत्॥ ६॥

यावज्जीवनकालाभ्यासे कर्मधर्मतया विधीयमाने स विकृतिष्वप्यतिदिश्येत। तथा सति वैमृधं प्रकृत्य 'यदि निर्वपेदन्वेव निर्वपेत्' इति वचनं व्यर्थं सद्विरुध्येत; 'प्रजापतिः पुरुषमसृजत'

1. यज्ञ ऋध्यते—ख, ग.

'इत्युपक्रम्य तैत्तिरीयकेऽग्निहोत्रदर्शपूर्णमासपशुबन्धादीनां केषांचिदेव नित्यतया परिगणनं च विरुध्येत। तथा च विरोधोऽयमपि पूर्ववत् जरामरणनिर्मोकवत् कर्तृधर्मो यावज्जीविकः प्रयोगनियम इत्यवगमयति। तस्य च पुरुषार्थस्य नातिदेश इति वक्ष्यतेऽष्टमस्याद्ये 'कर्मणस्त्वप्रवृत्तित्वात्फलनियम-कर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात्' इत्यत्र ॥

नन्वेवमग्निहोत्रस्य दर्शपूर्णमासयोश्च नित्यत्वसिद्धावपि ज्योतिष्टोमादिषु का गतिः, तत्र यावज्जीववाक्याभावादित्यत आह—

[1]कर्तुस्तु धर्मनियमात्कालशास्त्रं [2]निमित्तार्थं स्यात् ॥ ७ ॥

तुशब्दः शङ्कानिवृत्तौ। नेयं शङ्का। कुतः। कर्तुः धर्मनियमात् 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इति विहितकाम्यप्रयोगादन्यस्य प्रयोगस्य ज्योतिष्टोमादौ पुरुषार्थतया नियमेन विधानात्। कुतः। यतः 'वसन्ते वसन्ते ज्योतिषा यजेत' इति कालशास्त्रं वीप्सायुक्तं वसन्तस्य निमित्ततावोधनार्थं भवति। न चेदं वाक्यं काम्यप्रयोगविषयं भवितुमर्हति, 'वसन्ते ज्योतिषा यजेत' इत्येतावतैव तत्सिद्धौ वीप्सावैयर्थ्यात् यावत्कामं वसन्तस्याङ्गतायास्तावतैव सिद्धेः। अतो नैयमिकप्रयोगपरमेव वीप्सायुक्तं वसन्तवाक्यम। तस्य हि प्रयोगस्य वीप्सावशाद्यावद्वसन्तं प्रयोगः सिद्धः। वीप्सा हि व्याप्तिः। सा च 'यदा वसन्तस्तदा ज्योतिष्टोमप्रयोगः' इत्येवंरूपा वसन्तस्य निमित्तत्व एव संभवति नान्यथेति तस्य निमित्तत्वे वीप्सायुक्तवसन्तशास्त्रं पर्यवस्यति। एवं च सप्तमी निमित्तार्था 'भिन्ने जुहोति' इत्यादिवत् द्विर्वचनं तात्पर्यग्राहकमिति सिद्धो ज्योतिष्टोमस्य नैमित्तिकः प्रयोगः। एवमाप्रयणादिनित्यकर्मस्वप्यूह्यम। प्रयोजनं—पूर्वपक्षे कामनावत एवाग्निहोत्रादिकर्मणः प्रयोगः, सोऽपि यावज्जीवमभ्यस्त एव कामायावकल्पते; सिद्धान्ते तु कामनारहितस्यापि पापक्षयार्थः प्रयोगो नियतः, काम्यस्तु प्रयोगः सकृत्कृत एव फलाय कल्पत इति। वृत्तं यावज्जीवाधिकरणम ॥

तदेवमुक्तेषु षट्सु भेदकारणेषु शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरेषु कानिचिदधिकानि भेदकारणानि शाखान्तरविहितकर्मस्वाशङ्क्य निराकर्तुमिदमारभ्यते। सन्ति शाखाभेदाः

२. सर्वशाखाप्रत्ययैक- 'काठकम' 'शाकलम' 'पैप्पलादम' तैत्तिरीयम' 'काण्वम' 'माध्यं-
कर्मताधिकरणम्। दिनम' 'कालापम' इत्यादयः। तत्र किं प्रतिशाखं कर्म भिद्यते, उत एकमेवेति संशये पूर्वपक्षयति—

1. कर्तुस्तु नियमात् 2. निमित्तम.

नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचन-प्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे[1] कर्मभेदः स्यात् ॥ ८ ॥

विशेषशब्दो नामादिषु त्रिषु संबध्यते । शाखाविशेषेषु विहितस्य कर्मणो नामविशेषादिना भेदः स्यात् । तथाहि— 'काठकाग्निहोत्रम्' 'कालापाग्निहोत्रम्' इत्यादिसंज्ञाभेदादग्निहोत्रादिकर्म भिद्यते । रूपशब्देन गुण उच्यते । 'वपया प्रचर्याग्नीषोमीयमेकादशकपालम्' इत्येकस्यां शाखायाम् 'द्वादशकपालम्' इत्यन्यस्यामिति गुणभेदः । धर्मविशेषः अध्ययनधर्मभेदः । कारीरेष्टिमन्त्रब्राह्मणम् 'मारुतमसि' इत्याद्यधीयानास्तैत्तिरीयास्तावद्बोधायनसूत्रानुसारिणः 'भूमौ भोजनम्' इत्याद्याचरन्ति; बोधायनीयेभ्योऽन्ये तु स्वशाखागतमिदमेवाधीयाना न तदाचरन्ति । तमिमं धर्मविशेषमेकैव कारीरेष्टिः केषांचिदाकाङ्क्षति नेतरेषामिति न संभवति । अतः कर्मभेदः । यद्यपि गुणपर्याय एवायं धर्मविशेषः, तथापि हविर्धर्मोऽन्तरङ्गो गुणः पूर्वमुपात्तः । अयं तु इतिकर्तव्यतास्थानीयो बहिरङ्ग इत्यपौनरुक्त्यम् । पुनरुक्तिरभ्यासः । एकमेवाग्निहोत्रादिकर्म सर्वत्र शाखास्वाम्नायत इति पुनरुक्त्या कर्म भिद्यते । यदि हि सर्वशाखास्वेकं कर्म तर्ह्येकस्यां शाखायां विहितस्य शाखान्तरे पुनर्वचनमनर्थकं स्यात् । अतः कर्मभेदः । एवमुदितहोमप्रस्तावे क्वचिच्छाखायामनुदितहोमो निन्द्यते 'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् । दिवा कीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्' इति । अनुदिते सूर्ये 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा' इत्यभिधानमनृतं संपद्यत इत्यर्थः । अन्यस्यां तु शाखायामनुदितहोमप्रस्तावे उदितहोमो निन्द्यते 'यदुदिते सूर्ये प्रातर्जुहुयात्, यथातिथये प्रदुताय शून्यायावसथायाहार्यं हरन्ति, तादृगेव तत्' इति । अस्यार्थः— 'अग्निं वा वादित्यः सायं प्रविशति' 'उद्यन्तं वा वादित्यमग्निरनुसमारोहति' इति पूर्वमुक्तम् । अतो यजमानस्य गृहे सूर्योऽग्निं प्रविष्टो रात्रौ वसति । उदयानन्तरमग्निं विहाय गच्छति । ततश्च यथा अतिथये प्रद्रुताय वैमुख्येन गृहात्प्रस्थिताय आहार्यम् उपहर्तव्यमन्नम् । 'शून्याय' 'आवसथाय' इति चतुर्थ्यौ सप्तम्यर्थे । अतिथिवर्जिते शून्ये गृहे हरन्ति, तादृगेव तद्भवति, यदुदिते हूयत इति । सेयमुदितानुदितहोमनिन्दा कर्मभेद एवोपपद्यते, न तु तदेकत्वे । तस्मात्कर्मभेदः । तथा अनन्तासु शाखास्वनन्तानामङ्गानामुपदिष्टानामेकस्मिन्कर्मण्युपसंहारस्यानुष्ठानस्य चाशक्यत्वात् अशक्यार्थोपदेशकतया अप्रामाण्यापातादपि कर्मभेदः । तथा मैत्रायणीयशाखायामग्निचयनमन्त्रसमाम्नाये अन्वारोहा नाम स्थण्डिलारोहणमन्त्रविशेषा अन्ते पठ्यन्ते । क्वचिच्छाखायां न ते मन्त्राः सन्ति । तत्राध्येतारो याज्ञिकाश्चेत्थं

1. शाखान्तरेषु. ‘

व्यपदिशन्ति— अन्वारोहेषु मैत्रायणीयानामग्निः समाप्यते, इतरेषां त्वन्यत्र समाप्यते नान्वारोहेष्विति। तदेतत्कर्मभेद एवोपपद्यते। न ह्येकस्यैवाग्निकर्मण उभयत्र समाप्तिवचनमुपपद्यते। तस्मादपि कर्मभेदः। तथा 'यस्याग्निहोत्रमहुतं सूर्योऽभ्युदियात्' इत्यादिनोदितहोमे प्रायश्चित्तं विहितम्, तथा अनुदितहोमेऽपि। तदिदं प्रायश्चित्तविधानं कर्मैकत्वे सति नोपपद्यत इति कर्मभेदः। एतेन पूर्वोदाहृतनिन्दावाक्ययोर्विकल्पपरत्वमपि प्रत्युक्तं भवति। विकल्पे सति ह्युभयथाप्यवैगुण्यात्प्रायश्चित्तद्वयविधानमप्यनर्थकं स्यात्। दृश्यते चोभयथा प्रायश्चित्तविधानाद्वैगुण्यम्। न चैतत्कर्मैकत्व उपपद्यत इति कर्मभेदः। एवं च निन्दयाप्यपौनरुक्त्यं वेदितव्यम्, वैकल्पिकत्वशङ्कानिराकरणार्थत्वात्। तथा अन्यार्थदर्शनादपि भवति कर्मभेदः। अन्यद्विधातुं प्रवृत्तेषु वाक्येषु अन्यस्मिन्नर्थे लिङ्गदर्शनमन्यार्थदर्शनम्। तच्चात्र पञ्चविधं परिहारसूत्रवशादुदाह्रियते। क्वचिच्छाखायां द्वादशाहसत्रे श्रूयते 'यदि पुरा दिदीक्षाणा एतमेव बृहत्सामानमुपेयुरुपेतं ह्येषां रथंतरम् अथ यद्यदिदीक्षाणा रथंतरसामानमुपेयुः' इति। यदि पुरा पूर्वं दिदीक्षाणा दीक्षितवन्तः कृतप्रथमसोमाः स्युः तदा एतमेवातिरात्रं बृहत्सामानमुपेयुः। हि यस्मात्कारणात् प्रथमसोमे रथंतरमेभिः प्रयुक्तम्। यदि तु अदिदीक्षाणाः अकृतप्रथमसोमास्तदा रथंतरसामानमुपेयुः, 'न रथंतरसामानमकृत्वा बृहत्सामानमाहरेत्' इति नियमादित्यर्थः। तदिदमनिष्टप्रथमसोमानामपि द्वादशाहसत्रवचनं प्रतिशाखं कर्मभेदमवगमयति। न हि कर्मैकत्वे सत्येतदुपपद्यते, ताण्डकशाखायाम् 'एष वा व प्रथमो यज्ञो यज्ञानाम्' इति ज्योतिष्टोमस्य सर्वयज्ञेभ्यः प्राथम्यविधानात् कर्मैकत्वे सर्वशाखासु ज्योतिष्टोमप्राथम्यनियमात्। प्रतिशाखं कर्मभेदे तु ताण्डकवचनेन तच्छाखास्थज्योतिष्टोमस्य प्राथम्यनियमे सत्यपि एतच्छाखास्थज्योतिष्टोमस्य तदनियमान्न विरोध इति कर्मभेदः। तथा तैत्तिरीयके यूपैकादशिनीविषये श्रूयते 'यत्पक्षसंमितां मिनुयात्कनीयाꣳसं यज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनः प्रजा स्यात्, वेदिसंमितां मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्यात्मनः पापीयसी प्रजा भवति' इति। अस्यार्थः— प्रकृतिभूतोऽग्निस्तावत्पक्ष्याकृतिकः, 'वयसां वा एष प्रतिमया चीयते' 'व्याममात्रौ पक्षौ च पुच्छं च भवति' 'अरत्निना पक्षौ द्राघीयाꣳसौ भवतः' इत्यादिश्रवणात्। व्याममात्रौ पुरुषमात्रौ, 'पञ्चारत्निः पुरुषो व्यामश्च' इति बोधायनादयः। यदि पक्षसंमितां[1] पक्षायामप्रमाणां यूपैकादशिनीं मिनुयादवटेषु निखन्यात्। पक्षायामप्रमाणं समशो दशधा विभज्य मध्ये अग्निष्ठयूपं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं मिनुयादिति यावत्। यद्वा पक्षाभ्यां यावन्तं प्रदेशमग्निर्व्याप्नोति तावत्प्रमाणां मिनुयात्। अग्नेस्तिर्यक्प्रमाणं शतधा विभज्य मध्ये एकं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं मिनुयात्। तदा कनीयांसं स्वल्पतरं यज्ञक्रतुं प्राप्नुयात्। किंच अस्य पक्षसंमितां यूपैकादशिनीं कुर्वाणस्य यजमानस्य प्रजा पुत्रपौत्रादिः पापीयसी दरिद्रतमा स्यात्। अतो वेदि-

1. पक्षसंमिताया वेदिसंमितायाश्च—घ, ङ.

संमितां मिनोति । आग्निकवेदिपूर्वार्धतिर्यक्प्रमाणं समशो दशधा विभज्य मध्ये एकं यूपं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं निखनति । एवं सति 'ज्यायांसमेव' इत्यादि स्पष्टम् । तदियं पक्षसंमितां यूपैकादशिनीं कदाचित्प्राप्तां निन्दित्वा वेदिसंमितायाः स्तुतिः प्रतिशाखं कर्मभेदमवगमयति । कर्मैकत्वे ह्येतदनुपपन्नं स्यात् । शाखान्तरे हि यूपैकादशिनीमधिकृत्य श्रूयते 'रथाक्षान्तराला यूपावटा भवन्ति' इति । 'अक्षश्चतुःशतम्' इति श्रुतिः । चतुरधिकं शतमङ्गुलय इत्यर्थः । [1]पक्षसंमितायां वेदिसंमितायां च यूपावटान्तरालप्रमाणं त्वल्पतरम् । एवं च शाखान्तरे यूपैकादशिन्यां रथाक्षान्तरालवचने जाग्रति वेदिसंमिताया अप्राप्तत्वात्स्तुतिः कथमुपपद्येत । न चौदुम्बराधिकरणन्यायेन स्तुत्या तद्विधानमनुमीयत इति वाच्यम् । विरोधिनि रथाक्षान्तरालवचने प्रत्यक्षे जाग्रति तदनुमानानुन्मेषात् । सत्यपि तदुन्मेषे पक्षसंमितानिन्दाया अनुपपत्तेः । निन्दया हि न पक्षसंमितविधिः प्रकल्पयितुं शक्यते नापि तन्निषेधः, रथाक्षान्तरालवचने सति तत्र पक्षसंमितायाः अप्रसक्तेः । प्रतिशाखं कर्मभेदे तु रथाक्षान्तरालवचनं तच्छाखास्थयूपैकादशिनीविषयत्वाच्छाखान्तरे स्तुत्या वेदिसंमितविधिकल्पनं न विरुणद्धि । नापि कदाचित्प्राप्तायाः पक्षसंमितायाः अप्रसक्तिमासञ्जयति यतस्तन्निन्दा नोपपद्येत । तस्मादपि कर्मभेदः । तथा क्वचिच्छाखायां ज्योतिष्टोमातिरात्रे श्रूयते 'द्वे संस्तुतानां[1] विराजोऽतिरिच्येते' इति, शाखान्तरे 'तिस्रः संस्तुतानां विराजोऽतिरिच्यन्ते' इति । सम्यक् स्तुतं स्तुतिः यासु ताः [2]संस्तुताः स्तोत्रीया ऋचः । विराडिति एकमनेकं वा दशकं दशविंशतित्रिंशदादिरूपमुच्यते, 'दशाक्षरा विराट्' इति दर्शनात् । तदिदं प्रतिशाखं कर्मभेद एवोपपद्यते । न ह्येकस्मिन्कर्मणि द्वयोस्तिसृणां चातिरेकः संभवति । तस्मात्कर्मभेदः । तथा सारस्वते सत्रे श्रूयते 'ये पुरोडाशिनस्त उपवसन्ति' 'ये सांनाय्यिनस्ते वत्सान्धारयन्ति' इति । ये यजमानाः पुरोडाशिनः अनिष्टप्रथमसोमतया ऐन्द्राग्नपुरोडाशकदर्शेष्टिमन्तः, 'नासोमयाजी संनयेत्' 'ऐन्द्राग्न एकादशकपालोऽमावास्यायामसंनयतः' इति तेषां तद्विधानात्, ते पुरोडाशिन उपवसन्ति । असंनयत उपवसथदिने वत्सापाकरणादि यत्कर्तव्यम् 'ग्राम्येभ्य उपवसति' इत्यन्तं तन्न कुर्वन्ति । ये तु यजमाना इष्टप्रथमसोमाः सांनाय्यिनः, 'सोमयाजी संनयेत्' इति तेषां तद्विधानात्; ते वत्सान्धारयन्ति अपाकुर्वन्ति मातृसकाशं न गमयन्ति दोहाय । तदेवमनिष्टप्रथमसोमानामपि सारस्वतसत्रदर्शनं प्रतिशाखं कर्मभेदमवगमयति । कर्मैकत्वे हि ताण्डके ज्योतिष्टोमप्राथम्यवचनेन इष्टप्रथमसोमानामेव सारस्वतसत्राधिकारे सति सर्वेषां सांनाय्यित्वात् 'ये पुरोडाशिनः' इति नावकल्पेत । यद्यपि 'ये पुरा दिदीक्षाणाः' इत्यन्यार्थदर्शनेन गतार्थमिदम्, तथापि प्रकरणान्तरेण परिहारस्य वक्ष्यमाणत्वात्पृथगुपादानम् । तथा उपहव्ये 'अग्निष्टोमो रथंतर-

1. संस्कृतानां—क. 2. संस्कृताः—क.

सामा, अश्वः श्यावो दक्षिणा' इत्येकस्यां शाखायाम्, 'उपहव्य उक्थ्यो बृहत्सामा, अश्वः श्वेतो दक्षिणा' इत्यन्यस्याम्। उपहव्यो नाम सोमयागविशेषः। अत्र शाखाद्वयविहितस्योपहव्यस्यैकत्वे बृहद्रथंतरपृष्ठयोर्विकल्पः स्यात्। तस्य च प्रकृतित एव प्राप्तत्वात्पुनर्विधानमनर्थकम्। कर्मभेदे तु प्रकृतिप्राप्तविकल्पस्य तत्तच्छाखास्थोपहव्ये व्यवस्थासिद्ध्यर्थं पुनर्वचनमिति प्रतिशाखं कर्मभेद एव युक्तः॥

सिद्धान्तयति—

एकं वा संयोगरूपचोदनाख्याविशेषात्॥ ९॥

वाशब्द एवार्थे। सर्वास्वपि शाखास्वेकमेव कर्म प्रत्येतव्यम्. न तु कर्मभेदः। कुतः। संयोगरूपचोदनाख्याविशेषात्। 'स्वर्गकामो ज्योतिष्टोमेन' इति फलसंयोगस्य सोमरसेन्द्रवाय्वादिद्रव्यदेवतास्वरूपस्य 'यजेत' इति धात्वर्थानुरक्तभावनात्मिकायाश्चोदनाया ज्योतिष्टोमादिसमाख्यायाश्च सर्वत्राविशेषात्॥ तदेभिः कारणैः प्रत्यभिज्ञानात्सर्वासु शाखास्वेकमेव कर्म, यथा ताण्डके पञ्चविंशब्राह्मणे षड्विंशब्राह्मणे च ज्योतिष्टोमद्वादशाहौ पुनराम्नातौ न भिद्येते यथा वा तैत्तिरीयके प्रथमक्राण्डेऽष्टमप्रश्ने प्रथमाष्टके च षष्ठसप्तमाष्टमप्रश्नेषु 'अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति' इत्यादिना आनुमतादिकर्माणि राजसूयिकान्यनुक्रान्तानि न भिद्यन्ते तद्वत्। न च प्रकरणान्तरवच्छाखान्तरेषु परस्परासंनिधानं भेदहेतुरिति वाच्यम्। असंनिधानं हि तदानीं बुद्धावपरिवर्तनम्। तच्च प्रतियोग्यनुयोगिनोर्ज्ञातयोरेव भेदबुद्धिं जनयितुमीष्टे। येन हि प्रदेशान्तरे किंचित्कर्म गृहीतं भवति स एव तत्सदृशमन्यत्रोपलभमानस्ततोऽन्यदिति शक्नोत्यध्यवसातुम्। शाखान्तरे पुनरन्यशाखागतज्योतिष्टोमाद्यनवबोधादपूर्ववदुच्यमानेषु न भेदबुद्धिर्जायते। न च योऽनेकशाखाध्यायी तस्य प्रतिशाखं कर्मभेदबुद्धिः स्यादिति वाच्यम्। एकस्यानेकशाखाध्ययनाभावात्। स्वाध्यायत्वं हि प्रतिव्यक्ति गोत्वादिवत्प्रतिशाखं समवैति। ततश्च 'अधीतेन स्वाध्यायेनेष्टं भावयेत्' इत्यर्थपर्यवसन्नस्वाध्यायविधौ स्वाध्यायस्योपादेयतया तद्गतैकत्वस्य पश्वेकत्ववत् पित्रादिपरंपरागतत्वरूपस्वत्वस्य समासान्तर्गतस्याश्वाभिधान्यामश्ववच्च विवक्षितत्वादेकशाखाध्यायिना शाखान्तराध्ययनं नावश्यमनुसर्तव्यम्। न चैवं वेदान्तरस्याप्यध्ययनं न प्रसज्यत इति वाच्यम्। 'वेदानधीत्य वेदौ वा' इत्यादिवचनान्तरेण तदुपपत्तेः। किंच यजुर्वेदे समाम्नातद्रव्यदेवतारूपयुक्तज्योतिष्टोमादिकर्मण[1] ऋग्वेदे याज्यानुवाक्यादिगुणमात्रं सामवेदे च स्तोत्रादिगुणमात्रं विधीयते। अतः साकाङ्क्षत्वाद्वेदान्तराणामतुल्यकार्यत्वात्समुच्चयो युज्यते। शाखान्तरेषु तु नैवं संभवति। सर्वासु ह्यध्वर्युशाखासु दर्शपूर्णमासज्योतिष्टोमादीनि द्रव्य-

1. ज्योतिष्टोमादिकर्मणि—क.

देवतारूपवन्ति तान्येवान्योन्यनिरपेक्षाणि विधीयन्त इति शाखान्तराणां तुल्यकार्यत्वाद्विकल्पः। अतो नैकस्यानेकशाखाध्ययनसंभवः। उक्तं च वार्तिके 'स्वाध्यायग्रहणेनैका शाखा हि परिगृह्यते। एकार्थानां विकल्पश्च कर्मैकत्वे भविष्यति' इति। तदिदं सूत्रकार एवानुपदं वक्ष्यति। तदेवं भेदकारणाभावादभेदप्रत्यभिज्ञानाच्च सर्वशाखास्वेकं कर्मेति सिद्धम्।

अथ पूर्वपक्षोक्तहेतून्प्रतिक्षिपन्नाम्ना कर्मभेदं तावन्निराचष्टे—

न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥

न नाम्ना कर्मभेदः स्यात्। कुतः। अचोदनाभिधानत्वात्, चोदना कर्मोत्पत्तिवाक्यम्, तद्गतमभिधानं नामधेयं चोदनाभिधानम्, अतद्रूपत्वात्काठकादिनाम्न इत्यर्थः। 'संज्ञा चोत्पत्तिसंयोगात्' इत्यधिकरणे उत्पत्तिवाक्यगता संज्ञा कर्म भिनत्तीत्युक्तम्। काठकादिसंज्ञाश्च नोत्पत्तिगता इति न ततः कर्मभेदः प्रसज्यते। यद्वा, चोद्यत इति चोदना कर्म, तदभिधानत्वाभावात्काठकादिशब्दस्येत्यर्थः। ग्रन्थनाम्न एव सतोऽस्य लक्षणया कर्मणि प्रयोगः। न च वैपरीत्यं शङ्क्यम्, काठकादिशब्दस्याग्निहोत्र इव दर्शपूर्णमासादिकर्मस्वपि प्रयोगदर्शनेनानेकार्थशक्त्यापातात् अग्निहोत्रमात्रवाचकत्वे कर्मान्तरेषु लक्षितलक्षणापाताच्च ॥

इतोऽपि काठकादिसंज्ञाया न कर्मभेदकत्वमित्याह—

सर्वेषां चैककर्म्यं[1] स्यात् ॥ ११ ॥

चशब्दोऽन्वाचये। सर्वेषामप्यग्निहोत्रदर्शपूर्णमासादिकर्मणां काठकादिसंज्ञाया अविशिष्टत्वेन भेदहेतोः संज्ञाभेदस्याभावेन भेदो न स्यात् ॥

इतोऽप्येवमित्याह—

कृतकं चाभिधानम् ॥ १२ ॥

चशब्द उक्तसमुच्चये। 'तेन प्रोक्तम्' इति तद्धितप्रत्ययान्तकाठकादिनामधेयं प्रवचननिमित्तत्वात् कृतकम् इदानींतनम्। कर्माणि त्वनादिवेदसिद्धत्वादनादीनि। न हि तानीदानींतनसंज्ञावशाद्भेदमर्हन्ति। न हि प्रवचनात् प्राक्तन भेदः पश्चाद्भेद इति युज्यते। तस्मादपि न काठकादिनाम्ना कर्मभेदः ॥

रूपभेदं प्रत्याह—

1. सर्वेषां चैककर्म्यात्.

एकत्वेऽपि परम् ॥ १३ ॥

परं नामानन्तरोक्तं कपालसंख्यात्मकरूपान्यत्वं कर्मण एकत्वेऽपि वचनाद्व्रीहियवादिवद्विकल्पनोपपद्यते । न चोत्पत्तिशिष्टत्वात्कथं विकल्प इति वाच्यम । उभयोरपि संख्ययोरुत्पत्तिशिष्टत्वाविशेषात् ॥

धर्मविशेषं प्रत्याह—

विद्यायां धर्मशास्त्रम् ॥ १४ ॥

भूमिभोजनादिव्रतादेशकं धर्मशास्त्रं विद्यायां कारीरीष्टिमन्त्रब्राह्मणाध्ययनविषये प्रवृत्तम् । अतोऽध्ययनाङ्गमेव तत् न तु कर्मधर्मः, श्रुत्यादिषट्प्रमाणागोचरत्वात् । अतो न ततः कर्मभेदः ॥

पुनरुक्तिं प्रत्याह—

आग्नेयवत्पुनर्वचनम् ॥ १५ ॥

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति' [1]इति पुनर्वचनमैन्द्राग्नस्तुत्यर्थत्वेनानन्यगतिकत्वाभावान्न कर्मभेदकमित्युक्तं पूर्वपादान्ते । एवं शाखान्तरे विहितस्य सेतिकर्तव्यताकस्य ज्योतिष्टोमादिकर्मणः शाखान्तरे पुनर्वचनं न कर्म भिनत्तीत्यर्थः ॥

नन्वत्र विधेयान्तराभावान्नार्थवादत्वमिति पुनर्वचनं कर्म भिन्द्यादित्यस्वरसादुक्तं परिहारमुपेक्ष्य पुनर्वचनमेवात्र नेत्याह—

[2]अद्विर्वचनं वा [3]श्रुतिसंयोगाविशेषात् ॥ १६ ॥

वाशब्द एवार्थे । पुनर्वचनं तावत्पुनःश्रवणसंयुक्तमेव कर्मभेदमवगमयति, न स्वरूपसत् । शाखान्तरेषु च पुनर्वचनं नैव तथाविधं भवितुमर्हति, एकस्य पुरुषस्यानेकशाखाश्रवणाभावात् । ननु मेधाविनस्तत्संभव इत्यत आह—श्रुतिसंयोगाविशेषादिति । शाखान्तरश्रवणसंयोगस्यैकशाखाश्रवणसंयोगाद्विशेषाभावादित्यर्थः । कठो हि काठकमग्निहोत्रं श्रुत्वा तैत्तिरीयकमग्निहोत्रं शृण्वन्नपि स्वशाखयैव प्रतिपन्नत्वात्तैत्तिरीयान्प्रत्येव बोधकमिदं तैत्तिरीयशाखागतमग्निहोत्रवाक्यमिति कल्पयन्न पुनःश्रुतिं मन्यते । एवं तैत्तिरीयादिरपि काठकादिवचनं न पुनःश्रुतिं मन्यते इति सर्वोऽपि जनः शाखान्तरं शृण्वन्नप्यश्रुतमेव मन्यते इत्यपौनरुक्त्यम् ॥

नन्वेकस्यानेकशाखाश्रवणाभावः कुत इत्यत आह—

1. इति पूर्ववचनम्—क, ख, ग, घ, ङ, च. 2. द्विर्वचनं—क, ख, ग, घ, ङ, च. 3. अश्रुति...

वाक्यासमवायात् ॥ १७ ॥

स्वाध्यायविधेरुक्तरीत्या एकशाखाध्ययनविधिपरत्वादेकस्यानेकशाखाध्ययनाभावादेकस्मिन्पुरुषे शाखान्तरवाक्यस्यासमवायान्न तच्छ्रवणसंभव इत्यपुनर्वचनमित्यर्थः । इदं तु सूत्रं भाष्ये परिभ्रष्टमिति वार्तिककृतः ॥

नन्वेकस्या एव शाखाया अध्ययनविधौ शाखान्तरानर्थक्यमिति तदध्ययनमपि प्राप्तमिति पौनरुक्त्यं दुर्वारमित्यत आह—

अर्थासंनिधेश्च ॥ १८ ॥

चशब्द उक्तसमुच्चये । एकमेव पुरुषं प्रत्यनेकशाखागतस्यार्थस्यासंनिधेः पुरुषविशेषान्प्रत्येव संनिधेर्न शाखान्तराणामानर्थक्यमित्यर्थः । यथा एकशाखागतं कर्म पुरुषान्तरेषु पुनःश्रूयमाणमपि प्रतिपत्तृभेदान्न पुनरुक्तम्, एवं शाखान्तरेष्वपीति भावः ॥

इतोऽपि न पौनरुक्त्यमित्याह—

न चैकं प्रति शिष्यते ॥ १९ ॥

चशब्द उक्तसमुच्चये । अग्निहोत्रादिकर्म प्रतिशाखं नैकमेव पुरुषं प्रति शिष्यते, 'शासु अनुशिष्टौ', विधीयते; 'किंत्वर्थिमात्रं[1] प्रति सर्वशाखासु विधीयमानमेकमेकं पुरुषमुपतिष्ठते । तत्र एकस्यानेकशाखाश्रवणात्पुनर्वचनतः प्रतिशाखं कर्मभेदे एकार्थत्वात्समुच्चयानुपपत्तौ विकल्प आश्रयितव्यः स्यात् । तद्वरं प्रत्यभिज्ञानतः कर्मैक्ये सति शाखानामेव पुरुषव्यवस्थया तदाश्रयणमित्येकस्यानेकशाखाध्ययनाभावादपुनरुक्तता ॥

इतोऽपि न पुनरुक्तिरित्याह—

समाप्तिवच्च संप्रेक्षा ॥ २० ॥

चशब्द उक्तसमुच्चये । स्वार्थिको वतिः 'नित्यवदाम्नातम्' इत्यादिवत् । मैत्रायणीयास्तावदन्वारोहमन्त्रान्तेऽग्नेः समाप्तिं व्यपदिशन्ति 'अत्रास्माकमग्निः समाप्यते' इति । एकस्यानेकशाखाश्रवणतः प्रतिशाखं कर्मभेदे सति यावदेव येषां समाम्नातं तावदेव तेषां समाप्यत इत्यत्र

1. किंत्वर्थमात्र—क, ख, ग, घ, ङ.

'अस्माकम्' इति न ब्रूयुः। तथा चैकस्यैवाग्नेरत्रास्माकं समाम्निरन्येषामन्यत्रेत्युक्तिसामर्थ्यात् एकस्यानेकशाखाश्रवणतः पुनरुक्तौ च तदनुपपत्तेः पुरुषव्यवस्थयैव तदाश्रयणं युक्तमिति न पुनरुक्तिः॥

तदेवं षड्भिः सूत्रैः पुनरुक्तिं परिहृत्य निन्दादित्रयं प्रत्याह—

एकत्वेऽपि पराणि[1] ॥ २१ ॥

पुनरुक्त्यनन्तरमनुक्रान्तानि निन्दाशक्तिसमाम्निवचनानि कर्मैकत्वेऽप्युपपद्यन्ते। तथाहि—'उदिते जुहोति' 'अनुदिते जुहोति' इत्यग्निहोत्रकालौ विधीयेते। तत्रैकनिन्दा अन्यं स्तोतुं प्रवृत्तेत्यविरोधः। न च विकल्पाश्रयणप्रसङ्गात्कर्मभेदाश्रयणमेव युक्तमिति वाच्यम्। प्रतिशाखं भिन्नयोरपि कर्मणोः फलं प्रति विकल्पाश्रयणस्यार्थाविशिष्टत्वात्। अशक्तिस्तु एकशाखागतानेकब्राह्मणविहिताङ्गकलापोपसंहारेऽप्यविशिष्टा। यो ह्येकशाखागताङ्गकलापविधीनुपसंहर्तुं शक्नुयाच्छक्नोत्यसौ सर्वास्वपि शाखास्वङ्गविधीनुपसंहर्तुम्। न हि सर्वासु शाखासु सर्वेऽङ्गविधय उपसंहर्तव्या येनाशक्यता स्यात्, स्वाध्यायाध्ययनतः सर्वास्वपीतरशाखास्वधिकविधीनामेवोपसंहार्यत्वात्। अधिकविधयश्चैकशाखातोऽपि हीनपरिमाणा एव भवन्तीति नाशक्यता। सत्यामपि शक्तौ शाखान्तरगताधिकविधीनामुपसंहार ऐच्छिक एव न त्वावश्यकः, शाखान्तराध्ययनानित्यत्वस्य प्रतिपादितत्वात्, क्वचिच्छाखासु तेषामनाम्नानबलाच्च; अन्यथा अङ्गान्तरविधीनामिवाधिकविधीनामपि सर्वशाखास्वाम्नानापत्तेः। मैत्रायणीयानामन्वारोहेषु समाम्निवचनं च तच्छाखाविहिताङ्गकलापसमाम्न्यभिप्रायेणेति सूत्रकार एव स्पष्टमुपपादयिष्यति॥

अथ यदुक्तमुदितहोमेऽनुदितहोमे च प्रायश्चित्तविधानमुभयथाप्यवैगुण्यादनर्थकमिति तत्परिहर्तुमनुभाषते—

प्रायश्चित्तं निमित्तेन ॥ २२ ॥

अनुदितकालमतिक्रम्योदितहोमे उदितकालमप्राप्यानुदितहोमे च प्रायश्चित्तविधानं कर्मभेदमवगमयतीति यदुक्तं तत्परिहर्तव्यमित्यर्थः॥

परिहरति—

प्रक्रमाद्वा नियोगेन ॥ २३ ॥

वाशब्द एवार्थे। नियोगेन वैकल्पिकानां पदार्थानां प्रयोगादावेकतरनिर्धारणेनैव प्रयोगस्य

1. निन्दाशक्तिसमाम्निवचनानि इत्यधिकमन्यत्र दृश्यते. 2. एकशाखागतानेकविधिविहित—क, घ, ङ.

प्रक्रमादुदिते होष्यामीति निर्धार्य प्रक्रान्तेऽग्निहोत्रप्रयोगे उदयात्प्रागेवानुष्ठिते सति दोषः। एव-मनुदिते होष्यामीति प्रक्रम्योदितहोमप्रयोगेऽपि। अत उभयथापि प्रायश्चित्तविधानं कर्मैकत्वेऽप्युपपद्यते। अत्रोदितानुदितकालयोरन्यतरकालं प्रति प्रयोगमादौ निर्धार्य प्रयोगप्रक्रमः न तु सर्वप्रयोगादावेव सकृत्तन्निर्धारणम्, 'यदि वैमृधं निर्वपेदन्वेव निर्वपेत्' इतिवदत्र वचनाभावात्। प्रत्युत वाजसनेयके चातुर्मास्येषु साकमेधपर्वणि 'आनीकवते क्रैडिने च साकं सूर्येणोद्यता निर्वपति' इति सूर्योदयकालिके कर्मणि प्रातरग्निहोत्रपूर्वोत्तरकालिकत्वयोरैच्छिकविकल्पानुवादो दृश्यते 'अथ प्रातरहुते हुते वाग्निहोत्रे इतरथा कामयेत' इति। कल्पकाराणामप्ययमेवार्थोऽनुमतः। आपस्तम्बसत्याषाढकात्यायनादौ हि दाक्षायणयज्ञस्य दर्शपूर्णमासाभ्यामादिविकल्प उक्तः 'सोऽयं दर्शपूर्णमासयोः प्रक्रमे विकल्पोऽनेन दर्शपूर्णमासाभ्यां वा यजेत' इत्यादिना। तथा वैमृधविषयेऽपि 'तस्य यथाकामी प्रक्रमे प्रक्रमात्तु नियम्यते' इत्यादिना आदिविकल्प उक्तः। धूर्तस्वामिभाष्ये च 'पुनः पुनः प्रक्रमनियमवचनाद्यत्र प्रक्रमनियमवचनं तत्रैव प्रक्रमनियमो नान्यत्र; तेनाग्निहोत्रादौ द्रव्यकालादीनां न प्रक्रमनियमः' इत्युक्तम् 'होमकालः संकल्पयितव्यः कर्मादौ' इति च। तस्मादुदितानुदितकालयोर्न प्रक्रमनियमः। यत्तु 'यत्र शास्त्रगतिर्भिन्ना सर्वकर्मसु भारत। उदितेऽनुदिते चैव होमभेदो यथा भवेत्। तस्मिन्कुलक्रमायातमाचारं त्वाचरेद्बुधः। स गरीयान्महाबाहो सर्वशास्त्रोदितादपि' इति सुमन्तुवचनं दाक्षिणात्यस्मृतिनिबन्धन उदाहृतं तत्प्राचीननिबन्धनेषु क्वाप्यदर्शनादुपेक्ष्यम्; स्वकुलाचारप्राशस्त्यपरं वा, 'स गरीयान्' इति लिङ्गादित्यन्यदेतत्॥

'एकत्वेऽपि पराणि' इति सूत्रे 'पराणि' इति बहुवचनेन सामान्यतः परिहार्यत्वेनोपक्षिप्तं, सिंहावलोकनन्यायेन तदुपपादयति—

समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत॥ २४॥

मैत्रायणीयानामन्वारोहेष्वग्निसमाप्तिवचनं यथाज्ञाते यावत्पदार्थजातं तच्छाखायामाम्नातं तद्विषयतया प्रतीयेत। कुतः। पूर्ववत्त्वात् शब्दप्रयोगस्य तात्पर्यपूर्वकत्वात्। तात्पर्यं चात्र समाप्तिवचनस्याग्नावसमाप्ते प्रयुज्यमानस्य तच्छाखाविहितपदार्थजातसमाप्तिपरत्वमिति[1] निश्चिनुम इति कर्मैकत्वेऽपि न विरोधः, आध्वर्यवे प्रयोगे समाप्ते 'ज्योतिष्टोमः समाप्तः' इति यथा। 'समाप्तिवच्च संप्रेक्षा' इत्यत्र कर्मैकत्वे लिङ्गमुपपादितम्, इह तु कर्मैकत्वे विरोधः परिहृत इत्यपौनरुक्त्यम्॥

यदुक्तम् 'यद्यदिदीक्षाणाः—' इत्यनिष्टप्रथमसोमानां द्वादशाहे दर्शनं प्रतिशाखं ज्योतिष्टोमभेदमवगमयति, कर्मैकत्वे ताण्डकावगतज्योतिष्टोमप्राथम्यविरोधात्; कर्मभेदे तु ताण्डकावगत-

1. परत्वं— क, घ, ङ.

'ज्योतिष्टोमप्राथम्यवचनम्यैतच्छाखाम्थज्योतिष्टोमविषयत्वाभावान्न विरोध इति तत्राह—

लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद्द्वादशाहस्याहारव्यपदेशः स्यात् ॥ २५ ॥

यदेतत्कर्मभेदे लिङ्गत्वेनोपन्यस्तं द्वादशाहेऽनिष्टप्रथमसोमदर्शनं तत्कर्मैकत्वेऽप्यविशिष्टम्। कुतः। सर्वशेषत्वात् ताण्डकगतज्योतिष्टोमप्राथम्यवचनस्य सर्वशाखास्थज्योतिष्टोमविषयत्वात्। हि यस्मात्कारणात् तत्र ताण्डके ज्योतिष्टोमकर्मणः न चोदना उत्पत्तिर्नास्ति, येन 'तत्रत्यज्योतिष्टोममात्रविषयं प्राथम्यवचनं स्यात्। तस्मात् कर्मभेदपक्षेऽप्यनिष्टप्रथमसोमानां द्वादशाहे दर्शनस्य विरोधात् 'यद्यदिदीक्षाणाः—' इति वाक्ये अदिदीक्षाणशब्दे द्वादशाहस्य आहारव्यपदेशः अनुष्ठानस्य व्यपदेशः स्यात्। 'द्वादशाहेनादिदीक्षाणाः' इति व्याख्येयमिति यावत्। तथा च नैतत्कर्मभेदे लिङ्गमिति भावः॥

एवं प्रथममन्यार्थदर्शनं परिहृत्य द्वितीयं निराचष्टे—

द्रव्ये [2]वा अचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद्व्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २६ ॥

वाशब्दः संभावनायाम्। कर्मैकत्वे सति द्रव्ये अग्नौ वेदिसंमिताया अचोदितत्वात्पक्षसंमितावेदिसंमितारथाक्षान्तरालविधीनां क्रमेणार्थिकस्तुतिकल्प्यश्रौतानां तत्तच्छाखिनः प्रति अव्यवस्था व्यवस्थाया अभावः स्यात् संभाव्येत। ततश्च रथाक्षान्तरालवाक्येन [3]पक्षसंमितावेदिसंमितयोर्बाधे सति पक्षसंमिता कथं निन्द्येत; कथं वा स्तुत्या वेदिसंमिताविधिरुन्नीयेत। नैवमस्ति, वेदिसंमिताया अग्नौ श्रुतत्वेन तस्या रथाक्षान्तरालवाक्येनानारभ्याधीतेन सामान्यविषयेण बाधायोगात्। ननु रथाक्षान्तरालवाक्यस्य कावकाश इत्यत आह—निर्देशादिति। अनग्निचित्ये सर्वस्तोमादिकतौ यूपैकादशिनीनिर्देशाद्रथाक्षान्तरालवाक्यं तत्र व्यवतिष्ठेत। ततश्च साग्निचित्यानग्निचित्यक्रतुभेदेन यूपैकादशिन्यामेकस्यामेव वेदिसंमितात्वस्य रथाक्षान्तरालत्वस्य चोपपत्तेर्न विरोधः। नन्वेवमपि पक्षसंमितानिन्दायाः का गतिरित्यत आह—तस्मादिति। वेदिसंमितारथाक्षान्तरालयोर्विहितत्वात्पक्षसंमिताया नित्यानुवादः 'नान्तरिक्षे न दिव्यग्निश्चेतव्यः' इतिवत्। [4]कात्यायनस्त्वाह 'यूपैकादशिनी चेद्रथाक्षान्तराला

1. तत्र ज्योति... —क, ख, ग, घ, ङ, च. 2. च. 3. पक्षसंमितावेदिसंमिता च बाधिता सती कथं निन्द्येत— ख, ग. पक्षसंमिता वेदिसंमिता सति कथं निन्द्येत— क, घ, ङ, च. [उभावपीमौ 'पाठावस्वरसाविति पाठान्तरं प्रकल्प्य योजितम्]

यूपावटाः स्युः, वेदिपूर्वार्धे समं विभज्य पक्षसंमितां वाग्नौ' इति । पक्षसंमितविधिः शाखान्तरे दृष्ट इति तदभिप्रायः ॥

तृतीयमन्यार्थदर्शनं प्रत्याह—

विहितप्रतिषेधात्पक्षेऽतिरेकः स्यात् ॥ २७ ॥

'अतिरात्रे षोडशिनं गृह्णाति' इति विहितं षोडशिग्रहणम् 'नातिरात्रे षोडशिनं गृह्णाति' इति प्रतिषिध्यते । तत्र ग्रहणपक्षे चत्वारि शतानि त्रिषष्टिश्च स्तोत्रीया इति तिसृणां दशकादतिरेकः, अग्रहणपक्षे चत्वारि शतानि द्विचत्वारिंशच्च स्तोत्रीया इति द्वयोरतिरेक इति न विरोधः ॥

चतुर्थं प्रत्याह—

सारस्वते विप्रतिषेधाद्यदेति स्यात् ॥ २८ ॥

सारस्वतसत्रस्य ज्योतिष्टोमपूर्वकत्वात्कृतसोमस्य च दर्शे सांनाय्यविधानात्तत्र 'ये पुरोडाशिनः' इत्यैन्द्राग्नपुरोडाशकदर्शेष्टिमतां दर्शनं विरुद्धमिति यच्छब्दो यदेति व्याख्येयं स्यात् । एवं च यदा पौर्णमास्यां पुरोडाशिनस्तदोपवसन्ति यदामावास्यायां सांनाय्यिनस्तदा वत्सानपाकुर्वन्तीत्यर्थलाभान्न कर्मैक्येऽपि विरोधः ॥

पञ्चमं निराकर्तुमनुवदति—

[1]हव्येऽप्रतिप्रसवः ॥ २९ ॥

अनर्थकः प्रतिप्रसवः अप्रतिप्रसवः हव्ये उपहव्ये रथंतरबृहत्सान्नोः शाखाद्वयविहितयोः प्रकृतितः प्राप्तत्वात्पुनर्विधानमनर्थकम् । कर्मभेदे तु तत्तच्छाखाम्थोपहव्ये व्यवस्थया तत्तात्सस्यार्थं पुनर्वचनमिति यदुक्तं तत्परिहर्तव्यमित्यर्थः ॥

परिहरति—

गुणार्था वा पुनःश्रुतिः ॥ ३० ॥

वाशब्दः शङ्कानिवृत्तौ । नात्र शाखाद्वये रथंतरबृहत्सामनी विधीयेते, येन कर्मैकत्वे पुनर्विधानमनर्थकं स्यात् । किंतु प्रकृतितो विकल्पेन प्राप्तयोस्तयोः पुनःश्रुतिः गुणार्थां संस्थादक्षिणागुण-

1. उपहव्येप्रतिप्रसवः.

विधानार्था। यदि रथंतरसामा तदा अग्निष्टोमसंस्थः, तत्राश्वः श्यावश्च दक्षिणा; यदि बृहत्सामा तद्वोक्थ्यसंस्थः, तत्राश्वः श्वेतश्च दक्षिणेति न विरोधः॥

तदेवं कर्मभेदसाधकानि लिङ्गानि निरस्य कर्मैक्यसाधकं लिङ्गं दर्शयति—

प्रत्ययं चापि दर्शयति॥ ३१॥

चापीति निपातसमुदाय उक्तसमुच्चये। सर्वास्वपि शाखास्वेकस्यैव प्रत्ययं विधानं दर्शयति वेदः। मैत्रायणीयशाखायां प्रयाजा नोत्पन्नाः। तत्र शाखान्तरोत्पन्नान्प्रयाजानधिकृत्य धर्मो विधीयते 'ऋतवो वै प्रयाजाः समानत्र तिष्ठता होतव्याः' इति। समानत्र एकत्र। तथा कचिच्छाखायाम् 'कुटरुरसि' इत्यश्मादानमन्त्रो नाम्नातः। तत्र 'कुक्कुटोऽसीत्यश्मानमादत्ते कुटरुरसीति वा' इति मन्त्रोऽश्मादाने विनियुज्यते। तदेतत्सर्वशाखास्वेकं कर्मेति दर्शयति। तस्मात्सर्वशाखाप्रत्ययमेकं कर्म॥

अत्र शङ्कते—

अपि वा श्रुतिसंयोगाद्विधिपृथक्त्वमेकैकस्यां[1] शाखायां व्यवतिष्ठेत॥ ३२॥

अपि वेति निपातसमुदायो नेत्यर्थे। न कर्मैक्यम्। किं तर्हि। एकैकस्यां शाखायां प्रतिशाखं विधीयमानानां कर्मणां पृथक्त्वं भिन्नत्वं व्यवतिष्ठेत निश्चितं भवेत्। कुतः। श्रुतिसंयोगात् क्रमकालपरिमाणानां प्रतिशाखं श्रुतिबोधितत्वात्। कर्मैक्ये च शाखान्तरविध्युपसंहारे सति तेषां बाधः स्यात्। 'क्रमसंयोगात्' इति पाठान्तरम्। तत्र क्रमग्रहणं कालपरिमाणयोरप्युपलक्षणम्॥

परिहरति—

विरोधिना त्वसंयोगादैककर्म्यं तत्संयोगाद्विधीनां सर्वप्रत्ययः[2]॥ ३३॥

तुर्नेत्यर्थे विधीनामित्यत्रान्वेति। सर्वशाखास्वैककर्म्ये सत्यप्येकशाखागतानां विधीनां विधीयमानपदार्थानां क्रमकालपरिमाणं न शाखान्तरगतेन पदार्थजातेन बाध्यते। कुतः। विरो-

1. ...एकस्यां. 2. विरोधिनां तु...सर्वकर्मप्रत्ययः स्यात्.

धिना असंयोगात्। न हि क्रमकालपरिमाणं शाखान्तरीयपदार्थैर्विरुध्यते, क्रमकालपरिमाणस्य पदार्थान्प्रति गुणत्वात्। प्रत्युत तदेव तैः प्राधान्याद्बाध्येत। तथा च तत्संयोगात् शाखान्तरीयपदार्थानां समावेशसंभवात् सर्वप्रत्ययः सर्वासु शाखासु कर्मैकत्वप्रत्ययः प्रामाणिकः, न तु कर्मभेदः। ननु शिष्टाकोपाधिकरणे आचमनादयः स्मार्तपदार्थाः श्रौतक्रमकालपरिमाणैर्न बाध्यन्त इति व्यवस्थापितम्; तत्र स्मार्ता अपि चेन्न बाधिताः किमिति श्रौतास्तैर्बाधिष्यन्त इति तेनैव गतार्थमिति चेत्सत्यम्। अत्रैव स विचारः सूत्रकृता कण्ठरवेण कृत इति शिष्टाकोपाधिकरणं विषयान्तर एव योजितं वार्तिके। तदेवं सर्वशाखासु तदेवेदमिति प्रत्यभिज्ञानाद्भेदकस्य शब्दान्तरादीनामन्यतमस्याभावात्सर्वशाखाप्रत्ययमेकं कर्म। तदुक्तम् 'तस्मात्तदेवेति मतेर्न कर्म भिन्नं कथंचित्प्रतिशाखमिष्टम्। न कारणं सप्रममस्ति चान्यदेवं यथोक्तेव तु भेदसिद्धिः॥' इति॥

इति श्रीमत्संततसंतन्यमानश्येनकूर्मषोडशाररथचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजितुक्कोजिभोसलचोलमहीमहेन्द्रामात्यधुरंधरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण तदध्वर्युणा बाल्य एव तद्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामादिवरिष्ठसोममन्यसंतर्पितशतमन्यप्रमुखबर्हिर्मुखेन श्रीमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन **वासुदेवदीक्षितविदुषा** विरचितायां जैमिनिसूत्रव्याख्यायाम्

अध्वरमीमांसाकुतूहलवृत्तौ

द्वितीयोऽध्यायः

